THE

BRAHMASÛTRA S'ANKARA BHÂSHYA

CHATUSSUTRÎ PORTION

with the Commentaries

BHÂMATI, KALPATARU AND PARIMALA

EDITED WITH NOTES Etc.,

BY

PANDIT VEDÂNTA VIS'ARADA

NURANI ANANTHA KRISHNA S'ASTRI

PROFESSOR OF MIMAMSA, AT TIRUPATI SANSKRIT COLLEGE

AND

VÂSUDEVA LAXMANA SHASTRI PANSIKAR

PUBLISHED

BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF THE "NIR.

ब्रह्मसूत्रशाङ्करभाष्यम् ।

श्रीमदप्पय्यदीक्षितविरचितपरिमलोपबृंहितश्रीमदमलानन्दसरस्वतीप्रणीत-
कल्पतरुव्याख्यायुतश्रीमद्वाचस्पतिमिश्रकृतभामतीविलसितम् ।

(चतुःसूत्रीभागः ।)

तिरुपतिश्रीवेङ्कटेश्वरसंस्कृतकलाशालापूर्वमीमांसाध्यापकेन-मद्रपुरसंस्कृतकलाशालातोऽधिगत-
वेदान्तविशारदबिरुदेन नूरणिग्रामाभिजन-विद्वद्वरसुब्रह्मण्यात्मजेन
अनन्तकृष्णशास्त्रिणा

टिप्पणादिभिरुपस्कृतम् ।

पणशीकरोपाह्वविद्वद्वरलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणाच
संस्कृतम् ।

मुम्बय्याम्

तुकाराम जावजीश्रेष्ठिभिः

स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये स्वायसाक्षरै-
रङ्कयित्वा प्राकाश्यं नीतम् ।

शाकः १८३७, सन् १९१५.

मूल्यं १॥ सार्धो रूप्यकः

॥ श्रीः ॥

भूमिका–

इह खलु नित्यशुद्धबुद्धमुक्तस्वभावाद्वितीयनिरतिशयपरमात्मभावापत्तिलक्षणं निःश्रेयसमेव निखिलपुरुषार्थमूर्धन्यमामनन्त्यद्वैतवेदान्तिनः। तच्च श्रवणमननिदिध्यासनपरिपाकाधीनात्मतत्त्वसाक्षात्कारायत्तं न कर्मोपासनादिसाध्यम्। कर्मोपासनादि तु "कर्मणा चित्तशुद्धिः स्यात्" "वशीकृते मनस्येषां सगुणब्रह्मशीलनादि"ति वचनानुसारेण चित्तवशीकरणादावुपयुज्यते। तदत्र वशीकृतनिजस्वान्तानां शान्तानां निर्धूतसकलाऽसंभावना-विपरीतभावनादिप्रतिबन्धकजातानां मात्रयापि कर्तृत्वमात्मनोऽनभिनिविशमानानां आत्मतत्त्व एव परिनिष्णातानां पुरुषधौरेयाणामेवोक्तविधं निःश्रेयसमात्यन्तिकं नान्येषाम् अनात्मधर्माणामात्मनि आत्मधर्माणामनात्मनि चाध्यसनेन नैसर्गिके सुखदुःखप्रवाहबहुले बहले संसारसागरे निमज्जतां लोकायतिकमतावलम्बेन देहएवात्मतत्त्वमिति, सौगतमतावलम्बेन शून्यमेवात्मेति, वैशेषिकमतावलम्बेन कर्तृत्वभोक्तृत्वादिविशिष्टमेवात्मतत्त्वमिति, सांख्यमतावलम्बेनाकर्तृभोक्तृनिर्लेपमेवात्मतत्त्वमिति, वा मन्वानानामितिपारमार्थिकं श्रुत्येकसमधिगम्यं निष्कृष्टमात्मतत्त्वमुपदिदिक्षुरुद्दिधीर्षुश्च चराचरलक्षणं जीवराशिमसुसूत्रत् **भगवान् बादरायणश्चतुरध्यायीरूपमुत्तरमीमांसाशास्त्रम्**। यथाच बादरायणसूत्राण्यद्वैत एव स्वरसानि न द्वैते नवा विशिष्टाद्वैते, तथा अनुपदमेव प्रकाशयिष्यमाणायां **विट्ठलेश्युपबृंहितगौडब्रह्मानन्दीयुताद्वैतसिद्धिभूमिकायां प्रकाशयिष्याम** इति नेह वितन्यते। यथावा न पूर्वोत्तरमीमांसे नाभिन्ने तदपि निर्णयसागराधिपतिभिरेवानुपदमेव प्रकाशयिष्यमाणायां **शास्त्रदीपिकाभूमिकायां** सुविशदं भविष्यति। तानि चेमानि ब्रह्मस्वरूपमात्रप्रकाशनार्थं प्रवृत्तत्वाद्धर्मे प्रत्यशेषत्वाच्च ब्रह्मसूत्रनाम्ना व्यपदिश्यन्ते। एतेषां हि सूत्राणां वेदान्ततात्पर्यनिर्णयार्थं सूत्रितानामद्वैत एव परमतात्पर्यं नान्यत्रेत्यत्र व्यासतात्पर्यनिर्णयं न्यायरक्षामणिं च प्रमाणयामः।

एतानि च सूत्राणि तैस्तैराचार्यैर्यथास्वाभिमतमन्यथान्यथा व्याख्यातानि न बादरायणाशयं श्रुतितात्पर्यं वा स्पृशन्तीति परमकारुणिको **भगवान् परमेश्वरः "चतुर्भिः सह शिष्यैस्तु शंकरोऽवतरिष्यती"**ति वचनानुसारेणावातारीच्छङ्करभगवत्पादरूपेण **केरले कालटिक्षेत्रे शिवगुरोरार्याम्बायामिति** सुविशदमेवेदमाबालगोपालम्। इमे हि **शङ्करभगवत्पादा** गृहीत्वा पञ्चमे वयस्येव मातुरनुज्ञया तुरीयमाश्रममधीत्य च सर्वशास्त्राणि गोविन्दभगवत्पादेभ्यः न केवलमचखण्डन्दुर्मतजल्पितान्यपि त्वतिछिपन्निष्कलङ्कमद्वैतमबीभणंश्च यथाबादरायणाशयं यथाश्रुतिच ब्रह्मसूत्राणीति करतलामलकितमेव नः समेषाम्। तदिदं **ब्रह्मसूत्रभाष्यं शंकरभगवत्पादकृतं** न केवलं शब्दगाम्भीर्येणापि स्वर्थगाम्भीर्येणाप्यतिशेत एव सर्वाणि भाष्याणि द्वैतविशिष्टाद्वैतपराणि। इदमुदाहरणमेव **"भाष्यं प्रसन्नगम्भीर"**मिति वचनमिति मन्यामहे।

अत्रहि भाष्ये भगवत्पादाः चतुःसूत्र्या ब्रह्मविचारप्रतिज्ञया ब्रह्मलक्षणप्रमाणनिरूपणेन सिद्धस्यापि ब्रह्मणः शास्त्रैकसमधिगम्यत्ववर्णनेन च समजीगमन्सर्वाण्यपि वाक्यानि ब्रह्मणि संग्रहेण। तं चेमं समन्वयं ईक्षत्यधिकरणेन ब्रह्मलक्षणस्य प्रधानसाधारण्यनिरासेनानन्दमयाधिकरणमारभ्य सविशेषनिर्विशेषेषु वाक्येषु अध्यायशेषेण समर्थयामासुः। तत्रच प्रथमे पादे स्पष्टब्रह्मलिङ्गानि, द्वितीयतृतीययोश्चास्पष्टलिङ्गानि, चतुर्थे च प्रधानाशाब्दत्वपराणि व्यचीचरन्वाक्यानीति मर्यादा। तत्र स्पष्टब्रह्मलिङ्गकत्वं नाम विषयवाक्ये ब्रह्मधर्मतया निर्णीतब्रह्मलिङ्गकत्वम्। यथा अन्तरधिकरणविषयवाक्ये ब्रह्मधर्मतया निर्णीतं सर्वदुरितोदितत्वं फलवचनोपोद्बलनेन जीवादावसंभवेन ब्रह्मण्येव संगमनीयं ब्रह्मधर्मतया निर्णीतं विद्यते इति तत्स्पष्टब्रह्मलिङ्गम्। तच्चेदं सर्वत्र प्रसिद्धाधिकरणविषयवाक्ये नास्त्येव। नहि तत्र सत्यकामत्वसत्यसंकल्पत्वादिकं वाक्यान्तरे श्रुतब्रह्मसमन्वयतः पूर्वं ब्रह्मधर्मतया निर्णीयते, मनोमयत्वादिजीवधर्मानुसारेण जीवविषयतयापि योजनसंभवादिति न तत्रास्पष्टब्रह्मलिङ्गेऽतिव्याप्तिः। **एतेन**—'अस्य लोकस्य का गतिरिति आकाश इतिहोवाचे'ति वाक्यमपि—**व्याख्यातम्**; तत्रापि हि सर्वभूतकारणत्वत्रिविधपरिच्छेदराहित्यरूपानन्तत्वलिङ्गं ब्रह्मधर्मतया निर्णीतं स्ववाक्य एव विद्यते। नहि भूताकाशे सर्वभूतकारणत्वं संभवदुक्तिकमिति। "ज्योतिश्चरणाभिधाना"दिति सूत्रविषयेऽपि यच्छब्दसामानाधिकरण्यं "दिवोज्योतिर्दीप्यते"इत्यादीनां ब्रह्मधर्मतया निश्चायकं विद्यत इति नानुपपत्तिः। इन्द्रप्रतर्दनाधिकरणमपि तदीयविषयवाक्य एव हिततमत्वादीनामपि श्रवणात्प्रथमपादे संगतमिति न दोषः। "यस्य ब्रह्म च क्षत्रं चे"त्यत्र, "गुहां प्रविष्टा"वित्यत्र,

"अथ य एषोऽक्षिणी"त्यत्र, "अथ परा यये"त्यत्र, "यः पृथिव्यां तिष्ठन्नि"त्यत्रान्यत्र च द्वितीयतृतीयपादविषयवाक्येषु तु नैवं स्ववाक्ये एव ब्रह्मधर्मतया निर्णीतं किंचिदुपलभ्यते । "अन्यत्र धर्मा"दिति सर्वपापराहित्यादिश्रवणं हि वाक्यान्तर एवोपलभ्यते इति तेषु स्पष्टब्रह्मलिङ्गकत्वातिरिक्तत्वरूपास्पष्टब्रह्मलिङ्गकत्वसमन्वयः। यदि तु संभाव्यमानस्वारस्यजीवलिङ्गाभिभूतब्रह्मलिङ्गकत्वं अस्पष्टब्रह्मलिङ्गकत्वं । यथा सर्वत्र प्रसिद्धाधिकरणे जीवे विषये स्वरसानि मनोमयत्वादीनि सत्यकामत्वादिब्रह्मलिङ्गान्यभिभवन्ति, यथावा "यस्य ब्रह्मचे"तिवाक्ये भोग्यत्वलिङ्गं संहार्यत्वलिङ्गं अभिभवदत्तुः संहर्तृत्वविवक्षां वारयति, यथा "गुहां प्रविष्टा"वित्यत्र गुहाप्रवेशलिङ्गं बुद्धिजीवयोर्योग्यं परमात्मलिङ्गान्यभिभवति, एव"मथ य एष" इत्यादिवाक्येष्वपि प्रतिबिम्बादियोग्यं प्रत्यक्षदर्शनं ब्रह्मलिङ्गममृतत्वाभयत्वादिकमभिभवतीत्यस्पष्टब्रह्मलिङ्गकानि सर्वाण्यपि द्वितीयतृतीयपादगतानि वाक्यानि । प्रथमपादविषयवाक्येषु तु "अथ य एषोऽन्तरादित्य" इत्यत्र हिरण्मयश्मश्रुत्वं न जीवासाधारणं लिङ्गमिति न तस्य जीवविषयकत्वे स्वारस्यम् । तेन यद्यपि ब्रह्मलिङ्गाभिभवेनैव पूर्वपक्षः, तथापि संभाव्यमानस्वारस्यजीवलिङ्गाभिभूतब्रह्मलिङ्गकत्वाभावात् स्पष्टब्रह्मलिङ्गकत्वसमन्वयः । आकाशाधिकरणविषये तु श्रुत्यैवाकाशविषयिण्या लिङ्गमभिभूयते न लिङ्गेनेति विशिष्टलक्षणं निरपोहं समन्वेति । ज्योतिरधिकरणं तु यद्यपि दिवि दिव इति विभक्तिभेदेन प्रत्यभिज्ञाविच्छेदसंदेहादस्पष्टगायत्रीब्रह्मानुवृत्तिकं ज्योतिर्वाक्यमधिकृत्य प्रवृत्तं द्वितीयपाद एव संगतम्; तथापि स्पष्टब्रह्मलिङ्गकस्य गायत्रीवाक्यस्यापि तत्र विचार्यत्वात्प्रथमपाद एव तदधिकरणप्रवृत्तिः । प्रतर्दनाधिकरणे तु लिङ्गत्रितयेनोपासनत्रितयपूर्वपक्षेऽपि इतरलिङ्गेन ब्रह्मलिङ्गाभिभवाभावात्तद्विषयवाक्यमपि स्पष्टलिङ्गकमेवेति सर्वमनवद्यम् ।

तदत्र स्पष्टलिङ्गानामस्पष्टलिङ्गानामन्येषां च ब्रह्मणि समन्वयकरणात्समन्वयाध्याय इतीममध्यायं व्यपदिशन्ति । यथा द्वितीयमध्यायं प्रथमे पादे स्मृतियुक्तिविरोधपरिहारेण, द्वितीये सांख्याद्यागमानां भ्रान्तिमूलत्वव्यवस्थापनेन, तृतीये प्रतिवेदान्तं सृष्ट्यादिश्रुत्यविरोधोपपादनेन, चतुर्थे लिङ्गशरीरश्रुत्यविरोधसमर्थनेन चाविरोधाध्याय इति । यथावा तृतीयाध्याये प्रथमे पादे वैराग्यनिरूपणेन द्वितीये त्वंपदार्थविवेचनेन तृतीये वाक्यार्थतदर्थोपासनप्रतिपादनेन तुरीये सम्यग्दर्शननिरूपणेनच साधनाध्याय इति । **एतेन**—तुरीयाध्यायस्य फलाध्यायत्वेन व्यपदेशेऽपि तदीये प्रथमे पादे फलार्थापत्तिगम्यावृत्त्यादिनिरूपणं द्वितीये उत्क्रान्तिप्रतिपादनं तृतीयेऽर्चिरादिमार्गस्य गन्तव्यस्य च निर्णयः तुरीये ज्ञानोपासनयोः फलनिर्णयश्च निमित्तमिति—**व्याख्यातम्** । तदिदं भाष्यं इतरव्याख्याशतकेनालंकृतमपि भामतींविना न प्रकाशकं संवृत्तमिति **भामतीनाम्नीं** कांचन व्याख्यामचीकरन्**सर्वतन्त्रस्वतन्त्रा वाचस्पतिमिश्राः** । येहि ग्रन्थकरणशैल्यैकजातीयया भाष्यकारानपि कुत्रकुत्रचिदतिशेरते ।

अथ कुतो वा भामतीनाम्नास्य ग्रन्थस्य व्यवहारः । अत्र केचिद्वर्णयन्ति—सुरेश्वराचार्यावतारा वाचस्पतिमिश्राः, तत्पत्नी चापरावतीर्णा सरस्वती तन्नाम्नैव केनचन सन्तोषस्थानेनास्य ग्रन्थस्य व्यवहारश्चेति । **युक्तं चैतत्**—यथा मण्डनमिश्रपत्नी शारदैव पारयति शंकरभगवत्पादमतं यथावदनुवदितुं नान्येति मण्डनमिश्रभगवत्पादयोर्विवादसमये माध्यस्थ्यपदेऽभिषिक्ता, तदनुवादपूर्वकविवादेन चाद्वैत एव विजयकोष्ठा; एवमत्रापि तदवतारभूतया वाचस्पतिमिश्रपत्न्यैव भामतीनाम्न्यातिगम्भीरं भाष्यमनुवदितुं प्रभूयते, नान्येनेति दुर्मतकुजलपदूरीकरणे इयमेकैव प्रभवतीति च युक्तस्तन्नाम्ना व्यपदेश—**इति । परेतु मन्यन्ते**—कान्तिमती द्यौरेव भामतीपदाभिधेया, तत्साधर्म्याद्भामतीनाम्नाऽस्य ग्रन्थस्य व्यवहारः । यथाहि अलौकिका उल्लेखा स्वर्गलोकप्राप्त्या सुलभाः, यथा वाऽव्याकृताकाशाच्छब्दरूपाद्याकृताकाशोऽभिव्यज्यते; तथास्मिन् शङ्करभगवत्पादकृते भाष्ये विद्यमाना अलौकिका उल्लेखा भामतीप्राप्त्यैव सुलभाः नान्यथा, तथाऽस्पष्टात्प्रसन्नगम्भीराद्भाष्यादेव व्याकृतरूपाया भामत्याश्चाभिव्यक्तिरितिच । **युक्तं चैतत्**—अतएव भाष्यभामत्योः समाना रीतिः, समानं गाम्भीर्यं कारणांशस्य कार्ये इव भाष्यवाक्यस्यैव तत्रतत्रानुवृत्तिश्चेति सर्वं सुविशदं विदुषाम् । भामतीगाम्भीर्यादिवर्णने न कोऽपि पारयति । तदत्र स्मृतिपथागतं, "**नहीक्षुक्षीरगुडादीनां रसः सरस्वत्याप्याख्यातुमल**"मिति भामतीवाक्यमेव निदर्शयामः । तत्रतत्र "**वेत्ति वाचस्पतिः स्वयमि**"ति वदन्तोऽमलानन्दसरस्वत्योऽप्यत्र हस्तावलम्बयन्ति । अस्यां हि भामत्यामपरिशीलितजैमिनीयनयानां अनधीतव्याकरणानामनाघ्रातवैशेषिकतन्त्राणां वा न सर्वथाऽधिकार इति, को विप्रतिपद्येत तन्निर्मातृणां वाचस्पतिमिश्राणां सर्वतन्त्रस्वतन्त्रत्वे ।

तदिदं "यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात्संभवति स ततोऽधिकतरविज्ञान इति प्रसिद्धं लोक" इति भाष्यमत्रोदाहरामः । भामत्याशयं चातिगम्भीरं नान्तराकल्पतरुमन्यः पारयति निर्देष्टुमिदंतयेति भामतीस्थसर्वार्थप्रदानान्निमित्तात्कल्पतरुरिति नामापि यथार्थमेवेति मन्यामहे । **अथवा**—यथा दिवैव कल्पतरुः शोभते न भूम्या पातालेन वा, यथा कल्पतरुणैव द्यौश्चकास्ति नान्येन वृक्षेणैवं कल्पतरुणैव भामत्याः भामत्यैव च कल्पतरोः शोभेति परस्परशोभाधानाद्युक्तोऽनयोः संबन्ध इति जानीमः । तदत्र यथा कल्पतरोः **परिमल एव सारः** तेनैव

कल्पतरोर्दिवश्वोत्कर्षः तथा कल्पतरुव्याख्यानं परिमलः कल्पतरोः सारांशत्वेनैव च भामत्या अपि विशेषावगम इति त्रयाणां परस्परापेक्षत्वं विशदम् । तदेवं विशकलितं प्रकाशितैरपि भाष्यभामतीकल्पतरुपरिमलैरन्तरेणैकत्रसमवधानं संजातं प्रेक्षकाणां बहुविधमसौकर्यं समीक्ष्य प्रतिपाल्य च महतां पण्डितवर्याणां साहाय्यं **निर्णयसागराधिपतयः तुकाराम-श्रेष्ठिनः** प्रारभन्त पञ्चग्रन्थीरूपेणैतेषां प्रकाशनम् । तदत्र भागशः प्रकाशनमपेक्षमाणानां बहूनां पण्डितानामाशय-मनुसृत्य प्राथमिकीं चतुःसूत्रीं प्रकाशयितुं प्रवर्तामहे । सेयं पञ्चग्रन्थी श्रीरङ्गवाणीविलासाधिपतिभिः प्रकाश्यमानापि अत्र विवरणभामतीप्रस्थानयोर्विवेकादिनिरूपणपरया तत्रतत्र योजितया टिप्पण्यापि प्रकाशिता महत उपकाराय ग्राहकाणां कल्पितेति विश्वसिमः । पञ्चग्रन्थ्याश्चास्याः परिष्करणे टिप्पण्यादियोजने वाऽसमर्थानामपरिनिष्ठितानां चास्माकमप्ययमायासो भाष्यभामतीकल्पतरुपरिमलसंबन्धेन —

आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम् ।
रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति ॥

इत्युक्तरीत्या विद्वदामोदावह एव भवेदिति विश्वसिमः । तदत्र पुरुषसुलभैः प्रमादादिभिः संभावितानां दोषाणां मर्षणीया-वयमिति अन्ततो निर्णीतस्य शुद्धाशुद्धसंकलनस्य कृते ज्ञापनीयाश्च वयं तेषामिति चासकृन्नतितिपुरःसरं प्रार्थयामः । निवेद-यन्तश्च वयं निर्णयसागरप्रधानपण्डितानामेतद्ग्रन्थपरिष्करणादिविषये बहूपकृतवतां वासुदेवशास्त्रिणां कृते सततमेव कृतज्ञतां प्रार्थयामः **श्रीगैर्वाणविद्याप्रकाशनकृतदीक्षाणां निर्णयसागराधिपतीनां निर्णयसागरस्य** चोत्तरोत्तरामभि-वृद्धिं वितरतात् सर्वेश्वरः श्रीवेङ्कटेश इति शिवम् ॥

इति सुधीजनविधेयः-

वेदान्तविशारदः सु- अनन्तकृष्णशास्त्री,

पूर्वमीमांसाध्यापकः वेङ्कटेश्वरसंस्कृतकलाशाला. तिरुपति.

ब्रह्मसूत्रशाङ्करभाष्यम्।

भामती–वेदान्तकल्पतरु–कल्पतरुपरिमलोपबृंहितम्।

ॐ तत्सद्ब्रह्मणे नमः।

भामती।

अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो विवर्ता यस्यैते वियदनिलतेजोऽबवनयः।
यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम्॥ १॥

वेदान्तकल्पतरुः।

यदज्ञातं जीवैर्बहुविधजगद्विभ्रमधरं वियद्वद्बालैस्तलमलिनतायोगि कलितम्।
तदुन्मुद्रज्ञानप्रततसुखसद्ब्रह्म परमं नमस्यामः प्रत्यक्श्रुतिशतशिरोभिः प्रकटितम्॥ १॥

कल्पतरुपरिमलः।

गुरुभिरुपदिष्टमर्थं विस्मृतमपि तत्र बोधितं प्राज्ञैः। अवलम्ब्य शिवमधीयन्यथामति व्याकरोमि कल्पतरुम्॥ १॥
कल्पकतरुमुपकुर्यां कमधिकमाकाङ्क्षितार्थमुपहृत्य। तद्दत्तैरेवार्थैर्मम मतिमीहे परिष्कर्तुम्॥ २॥
यावन्तो निविशन्ते विदुषां व्याख्यानचातुरीभेदाः। सर्वेषामपि तेषामयमवकाशं ददाति पुष्पकवत्॥ ३॥
इत्थमिहातिगभीरे कियदाशयवर्णनं मया क्रियते। तुष्यन्ति ततोऽपि बुधाः कतिपयरत्नग्रहादिवाम्बुनिधेः॥ ४॥

यदिति। अत्र प्रत्यगिति ब्रह्मविशेषणेन शास्त्रस्य विषयं प्रदर्श्य तत्र **सर्वेषां वेदान्तानां समन्वयः प्रथमाध्यायार्थः** श्रुतिशतेत्यादिविशेषणेन दर्शितः। शतशब्द आनन्त्यपरः; 'विश्वं शतं सहस्रं च सर्वमक्षयवाचक'मिति महाभारतवचनात्। ब्राह्मणशतं भोज्यतामित्यत्र भोजनस्येव शिरसां संख्योपसर्जनसंख्येयेनान्वयः। सकलप्रपञ्चाश्रयस्य ब्रह्मणः परिमितकर्तृत्वाद्याश्रयस्य जीवस्य चाभेदमविरोधेनोपपादयितुमुभयत्र विरुद्धधर्माणां मिथ्यात्वं **यदज्ञातमित्यादि**विशेषणेन दर्शितम्। जीवैर्यदविज्ञातं **सद्बहुविधस्य** प्रतिजीवं व्यवस्थितकर्तृत्वादिरूपस्य साधारणस्य घटपटादिरूपस्य च प्रपञ्चविलासस्य **धरं** धारकम्। **कलितम्** अहं कर्ताहं भोक्ता सन् घटः सन् पट इत्यादिरूपेणावगतम्। यथा वियत् बालैरविज्ञाततत्त्वं सत् तलमलिनतायोगि कलितमित्यर्थः। एवमव्याख्यायामुपमानोपमेये वैरूप्येण निर्दिष्टे स्यातां, नेयार्थत्वदोषश्च प्रसज्यते। स्फुटं हि वैरूप्यं यद्ब्रह्म जीवैरज्ञातं सद्बहुविधानां जगद्विषयविभ्रमाणां धारकं, यथा वियद्बालैः तलमलिनतायोगित्वेन कलितं भ्रान्त्यानुभूतमिति। यथाश्रुतयोजनायामत्र जीवास्तावदुपमेयब्रह्मविपयाज्ञानाश्रयत्वेन निर्दिष्टाः, बालास्तूपमानवियदध्यस्ततलमलिनताविषयविभ्रमाश्रयत्वेने**त्येकं वैरूप्यम्**; ब्रह्म प्रपञ्चविषयविभ्रमधरत्वेन निर्दिष्टं, वियत्तु तलमलिनतायोगित्वेन तद्विषयविभ्रमस्तु कलितमिति पश्चात्तदन्वयी निर्दिष्ट **इत्यन्यद्वैरूप्यम्**; ब्रह्म विभ्रमधरमिति क्रियायां कर्तृत्वेन निर्दिष्टं, वियत्तु कलितमिति तस्यां कर्मत्वेने**त्यपरं वैरूप्यम्**। विभ्रमधरशब्दश्च विभ्रमविषये न शक्तः, अप्रसिद्धौ तादृशलक्षणा च नेयार्था। एवंविधमुपमानोपमेययोर्निर्देशवैरूप्यं नेयार्थलक्षणां च काव्यसरणिविदो नानुमन्यन्ते इत्येवमाशङ्कास्पदं दोषचतुष्टयमप्यज्ञातमित्यस्य वियत्यप्यन्वयेन कलितमित्यस्य ब्रह्मण्यप्यन्वयेन जगद्विभ्रमशब्दस्य जगद्रूपकार्यपरत्वेन च परिहृतं भवति। वियदुदाहरणेन विरुद्धधर्माणामध्यस्तत्वविभावनमनैन्द्रियके कथमपरोक्षाध्यास इति शङ्कानिराकरणं च कृतम्। यद्यप्यज्ञानमित्यस्य

वेदान्तकल्पतरुः ।

बोधाभीषुशतैरबोधतिमिरं हृद्व्योमगं दारयन्प्रज्ञावारिधिमुन्नतिं च गमयन्सोमः सदोदेति यः ।
तं संसारसहस्ररश्मिजनितक्लेशापहं दक्षिणामूर्तिं निर्मलयोगिचिन्त्यचरणाम्भोजं भजे शंकरम् ॥ २ ॥
माद्यन्मोहमहेभकुम्भदलनप्रोद्भूतसन्मौक्तिकद्योतालंकृतसत्सुखाद्वयवपुः श्रीमान्नृकण्ठीरवः ।
प्रह्लादोक्तगिरः प्रमाणनविधौ दिव्याकृतिः स्तम्भतो निर्यातः प्रकटीभवेत्स हृदयाम्भोजे ममाखण्डितम् ॥ ३ ॥
ललितैः पदविन्यासैर्या नृत्यति विबुधवदनरङ्गेषु । सच्छास्त्रवेदवाद्यैः सरस्वतीं तां नमस्यामः ॥ ४ ॥

कल्पतरुपरिमलः ।

'मतिबुद्धिपूजार्थेभ्यश्चे'ति वर्तमानार्थविहितक्तप्रत्ययान्तत्वे 'क्तस्य च वर्तमाने' (पा. २।३।६७) इति षष्ठ्या भाव्यं; तथापि भूतार्थक्तप्रत्ययान्तत्वमिह ग्राह्यम् । नच—क्तस्य मत्याद्यर्थेभ्यो विशिष्य वर्तमानार्थे विधानात् तक्रकौण्डिन्यन्यायेन भूतार्थत्वबाधः स्यादिति–वाच्यम्; **तेनेत्य**धिकारे (पा. २।२।४७) 'दृष्टं साम' ('उपज्ञाते' इति) सौत्रनिर्देशेन भाष्यादिषु 'कलिना दृष्टं साम कालेयं' (पा. ४।३।११५) 'पाणिनिना उपज्ञातं पाणिनीय'मिति तदुदाहरणदर्शनेन च बुद्ध्यर्थेभ्यो भूतार्थेऽपि क्तप्रत्ययानुमत्यवगमात् । केनचिद्रूपेणावगते रूपान्तरेणानवगते शुक्त्यादावध्यासो दृष्टः, अतो निर्विशेषे स न संभवतीत्याशङ्कानिरासायोन्मुद्रेत्यादिविशेषणम् । न केवलं सदेव ब्रह्म किंतु चिदानन्दरूपमपि । यद्यपि तत्र चिदानन्दरूपत्वमपि बाह्याध्यात्मिकसकलविषयसाक्षित्वात् परमप्रेमास्पदत्वाच्च कर्तृत्वाद्यध्यासकालेऽपि भासत एव; तथापि ज्ञानं विषयविशेषानवच्छिन्नं सुखमपरिच्छिन्नं च सत् तदा न भासत इति दर्शयितु**मुन्मुद्रत्वप्रततत्व**विशेषणे ॥ १ ॥ यद्यपि सकलप्रपञ्चकारणं मायाशबलं सविशेषमीश्वररूपं ब्रह्म नमस्कार्यं, नतु निर्विशेषं निरस्तकर्तृकर्मभावं; तथापि तत्र तत्त्वदृष्ट्या प्रत्यगभेदानुसंधानं युज्यते । अतएवाहंग्रहोपासनासु सर्वास्वभेदानुसंधानमिष्यते । चिदानन्दघनस्य ब्रह्मणः प्राप्तौ साधनं 'फलमत उपपत्तेः' (ब्र. अ. ३ पा. २ सू. ३४) इति न्यायेनोपासनाप्रसादितं ब्रह्मैवेति दर्शयति—**बोधेति । अत्र शङ्करमित्यनेन** मुक्तिसुखप्रदत्वं, **संसारेत्यादिविशेषणेन** मुक्तिसुखाभिव्यक्त्युपपादकं तदावरकानर्थनिवृत्तिहेतुत्वं, **निर्मलेत्यादिवि**शेषणेनोक्तफलार्थं संसारोद्विग्नैर्भजनीयत्वं, **दक्षिणामूर्तिमित्य**नेनोक्तार्थस्य 'अजात इत्येवं कश्चिद्भीरुः प्रपद्यते' 'रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्य'मिति श्वेताश्वतरोपनिषन्मन्त्रप्रमाणकत्वं च दर्शितम् । उक्तफलं न श्रवणादिकं विनेति तत्संपादकत्वं पूर्वार्धेन दर्शितम् । यथा खल्वमृतांशुस्तत्तद्गगनप्रदेशावच्छिन्नस्वांशरूपैरंशुभिर्गगनगतं तिमिरमपनयन् वारिधिं चोद्वेलयन् प्रतिदिनमुदेति, एवं बहुशोऽनेकवेदान्तवाक्यश्रवणजन्यान्तःकरणवृत्त्यवच्छेदककृतभेदस्वांशरूपचित्प्रतिबिम्बैरन्तःकरणगततत्तद्वाक्यार्थाज्ञानमपनयन् ऊहापोहकौशलसाध्यमननचित्तैकाग्र्यसाध्यनिदिध्यासनरूपां प्रज्ञां चाभिवर्धयन्नुमया 'तत्राकाशे स्त्रियमाजगाम उमां हैमवतीं बहु शोभमाना'मिति तलवकारिणामुपनिषदि ब्रह्मविद्याप्रदत्वेन प्रसिद्धया सहितः सन् यः सदोदेति नित्यमेव स्फुरतीति तदर्थः । **अत्र** सोम इति श्लेषोत्थापितो बोधाभीष्वित्यादिषु रूपकालंकारः ॥ २ ॥ अथ कृतश्रवणमनननिदिध्यासनस्य साक्षात्कारोदयेन प्राप्यं फलमपि ब्रह्मैवेति दर्शयति—**माद्यदिति ।** माद्यन् प्रपञ्चरूपेणोज्जृम्भमाणो मोह एव महेभः तस्य कुम्भ इव कुम्भाः मूलाविद्याभागाः; वक्ष्यमाणमौक्तिकद्योतालंकार्यकर्तृकदलनविषयत्वसाम्यात् । अतएव महेभत्वरूपणस्य मोहवत्कुम्भत्वरूपणस्याधिष्ठानरूपः कश्चित्तदंशो नोक्त इति न्यूनता न शङ्कनीया; 'मयूखनखरत्रुटत्तिमिरकुम्भिकुम्भस्थलोच्चलत्तरलतारकाकपटकीर्णमुक्तागण' इत्यत्र प्रत्यग्रोदितचन्द्रमयूखसंसृष्टतिमिरपुरोभागस्येवात्र ब्रह्मसाक्षात्कारदलनीयमूलाविद्याभागस्यातिशयोक्त्या कुम्भत्वेनाध्यवसानात् । तस्य **दलनं** निवर्तकम् प्रोद्भूतं जननं यस्य तथाभूतः सन्नुत्तमो, **मौक्तिको** मुक्तिप्रयोजनः, **द्योतः** प्रकाशो वृत्तिसाक्षात्कारः, **तेनालंकृतम**भिव्यक्तं सत्, सुखात्मकं वपुः स्वरूपमस्येति तथोक्तः । मुक्तिः प्रयोजनमस्येत्यर्थे 'प्रयोजनम्' (पा. ५।१।१०९) इति सूत्रेण ठक्प्रत्ययान्तो मौक्तिकशब्दः । **यद्वा** माद्यन्मोहमहेभकुम्भस्य **दलनेन** निवर्तनेन, **प्रोद्भूतः** अभिव्यक्तः, **सन्मौक्तिकसदृशः** घर्षणनिर्मलीभूतमुक्ताफलसदृशः, **द्योतः** स्वरूपसाक्षात्कारः, **तेनालंकृतं** प्रकाशमानं, सत् सुखाद्वयं वपुरस्येति तथोक्तः । **सन्मौक्तिकद्योतेत्यत्र** शाकपार्थिवादिवन्मध्यमपदलोपिसमासः । द्योतस्य सुखाभेदेऽपि राहोः शिर इतिवद्भेदव्यपदेशः । **माद्यन्म**दशाली, मोहयति मदगन्धमात्रेण प्रतिगजादीनिति **मोहः** । मोहयतेः पचाद्यच् । 'णेरनिटि' (पा. ६।४।५१) इति णिलोपः । तथाभूतस्य महेभस्य कुम्भदलनेन प्रोद्भूतानां निर्गतानां शुद्धमौक्तिकानां नखाग्रलग्नानां प्रकाशेनालंकृतं सत् सुखं रिपुसंहरणेन जायमानानन्दम् अद्वयं शौर्ये द्वितीयरहितं वपुरस्येति तथोक्तः । पूर्ववदलंकारः । एवमेभिस्त्रिभिर्नमस्कारश्लोकैः सामान्यतः शास्त्रस्य विषयोऽध्यायानां चार्थः सूचितः ॥ ३ ॥ **ललितैरिति । अत्र** वदनरङ्गादिरूपणस्य शाब्दतया विशिष्य वाच्यत्वेन वर्तमानत्वात् सरस्वत्यां नर्तकीरूपणस्य तद्गम्यत्वाच्चैकदेशविवर्तिरूपकालंकारः ॥ ४ ॥

वेदान्तकल्पतरुः ।

भजमानविघ्नभित्तिप्रभित्तिकुद्दालमिव करेण रदम् । दधतं महागणेशं प्रणौमि सकलेष्टसंपदं ददतम् ॥ ५ ॥
यन्न्यायसूत्रग्रथितात्मबोधसौरभ्यगर्भश्रुतिपद्ममाला । प्रसाधयत्यद्वयमात्मतत्त्वं तं व्यासमाद्यं गुरुमानतोस्मि ॥ ६ ॥
वेदान्तार्थतदाभासक्षीरनीरविवेकिनम् । नमामि भगवत्पादं परहंसधुरन्धरम् ॥ ७ ॥
स्वयंप्रभसुखं ब्रह्म दयारचितविग्रहम् । यथार्थानुभवानन्दपदगीतं गुरुं स्तुमः ॥ ८ ॥
विद्याप्रश्रयसंयमाः शुभफला यत्संनिधिस्थानतः पुंसां हस्तगता भवन्ति सहसा कारुण्यवीक्षावशात् ।
आनन्दात्मयतीश्वरं तमनिशं वन्दे गुरूणां गुरुं लब्धं यत्पदपद्मयुग्ममनघं पुण्यैरनन्तैर्मया ॥ ९ ॥
ग्रन्थग्रन्थ्यभिधाः स्फुटन्ति मुकुला यस्योदये कौमुदा व्याकुर्वत्यपि यत्र मोहतिमिरं लोकस्य संशाम्यति ।
प्रोद्यत्तारकदिव्यदीप्ति परमं व्योमापि नीराज्यते गोभिर्यस्य सुखप्रकाशशशिनं तं नौमि विद्यागुरुम् ॥ १० ॥
वैदिकमार्गवाचस्पतिरपि सम्यक्सुरक्षितं चक्रे । नयविजितवादिदैत्यः स जयति विबुधेश्वराचार्यः ॥ ११ ॥
रूढोऽयं वेदकाण्डान्नयमयविटपो भूरिशाखाविचारः सद्वर्णानन्तपर्णः समुदितपरमब्रह्मबोधप्रसूनः ।
साक्षाद्धस्तावचेयं ददद‌मृतफलं जीवविश्वेशवीन्द्रः संसारार्कोत्थतापप्रमथननिपुणस्तन्यते कल्पवृक्षः ॥ १२ ॥
कीर्त्या यादववंशमुन्नमयति श्रीजैत्रदेवात्मजे कृष्णे क्ष्माभृति भूतलं सह महादेवेन संबिभ्रति ।
भोगीन्द्रे परिमुञ्चति क्षितिभरप्रोद्भूतदीर्घश्रमं वेदान्तोपवनस्य मण्डनकरं प्रस्तौमि कल्पद्रुमम् ॥ १३ ॥

श्रीमच्छारीरकव्याख्यायाः प्रारिप्सिताया अविघ्नसमाप्त्यादिसिद्धये शास्त्रप्रतिपाद्यां परां देवतां प्रणमन् शास्त्रीयविषयादि दर्शयति—**अनिर्वाच्येति** । एका ह्यविद्या अनादिर्भावरूपा देवताधिकरणे (ब्र. अ. १ पा. ३ सू. २६–३३) वक्ष्यते, अन्या पूर्वपूर्वविभ्रमसंस्कारः, तदविद्याद्वितयं, सत्त्वासत्त्वाभ्यामनिर्वाच्यं, सचिवं सहकारि यस्य तत्तथा । तत्सचिवता ब्रह्मणस्तद्विषयता, तदाश्रयास्तु जीवा एवेति वक्ष्यते । नचाविद्यासाचिव्ये ब्रह्मणोऽनीश्वरत्वमुपकर-

कल्पतरुपरिमलः ।

भजमानेति । भजमानानां विघ्न एव भित्तिः तस्याः प्रभित्तिः नाशकरणं कुद्दालमिवेति स्वरूपोत्प्रेक्षा । दशभुजस्य महागणपतेर्वामाधःकरेण स्वविषाणधारणं शुण्डाग्रधृतकलशस्थितरत्नवर्षेण भक्तेभ्यः सकलसंपत्प्रदानं च मन्त्रशास्त्रप्रसिद्धम् । प्रभिद्यते नाश्यतेऽनेनेति प्रभित्तिशब्दोऽत्र नाशकरणवाची, नतु विदारणक्रियावाची । अतो विदारणे भिदान्यत्र भित्तिरिति शाब्दिकमर्यादाया न विरोधः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ **ग्रन्थेति** । ग्रन्थग्रन्थय इत्यभिधानमात्रेण भेदः । मुकुला एवैते इत्यनभिव्यक्तत्वसाम्यान्मुकुलत्वाध्यवसानरूपातिशयोक्तिः । यस्योदये स्फुटन्तीत्यनेनास्योदयात्पूर्वं शास्त्रेषु केचन कठिनप्रदेशाः, केनापि नोद्धाटिताः; मुद्रिता एव स्थिता इति प्रतीतेरस्मान्येभ्यो व्याख्यातृभ्य उत्कर्षरूपो व्यतिरेकालंकारो व्यज्यते । **व्याकुर्वत्यपीति** । अनेनास्य शब्दश्रवणतोऽपि तिमिरं शाम्यति, नतु प्रादुर्भावमवेक्षते इति प्रसिद्धचन्द्रादुत्कर्षरूपो व्यतिरेकालंकारो व्यज्यते । **प्रोद्यदिति** । प्रोद्यन्ती प्रसर्पन्ती तारकेषु प्रणवेषु **दिव्यस्य** द्युसंबन्धिनः, 'यः पुनरेतं त्रिमात्रेणे'तिश्रुतौ ब्रह्मलोकाख्योक्तद्युलोकप्राप्तिफलकत्वेन श्रुतस्य त्रिमात्रप्रणवस्य, **दीप्तिः** प्रकाशनशक्तिर्यस्मिंस्तत्तथोक्तम् । **यद्वा** प्रोद्यन्ती तारकशब्दोपलक्षितानां 'न तत्र सूर्यो भाती'त्यादिश्रुत्युक्तानां सूर्यचन्द्रविद्युन्नक्षत्राणां दिव्या दिवि भवा गगने प्रसृता दीप्तिर्येन तत्तथोक्तम् । **यद्वा** प्रोद्यन्त्य उन्नमन्त्यस्तारका जनानामक्षिकनीनिका यया सा तथोक्ता तथाभूता दिव्या दिवि प्रसृता दीप्तिर्यस्य तत्तथोक्तम् । 'अथ यदतः परो दिवो ज्योतिर्दीप्यते' इति श्रुतौ हि ब्रह्मणो दिवि प्रसृता दीप्तिरुक्ता, तद्विशिष्टब्रह्मोपासनस्य फलं श्रुतं 'चक्षुष्यः श्रुतो भवती'ति । अत इयं दीप्तिरुपासकस्य चक्षुष्यत्वफलप्रदानद्वारा तमवलोकयतां सुन्दरवस्तुदर्शनकौतुकेन चक्षुर्विस्फारणहेतुर्भवतीत्ययमर्थः प्रोद्यत्तारकेति दीप्तिविशेषणेनोक्तः । **परमं व्योम** 'सैषा भार्गवी वारुणी विद्या परमे व्योमन्प्रतिष्ठिते'ति श्रुतिप्रसिद्धं परं ब्रह्म । चन्द्रपक्षे प्रोद्यन्त्या नक्षत्राणां दिव्यया स्वर्लोकभवया दीप्त्या परा प्रकृष्टा मा शोभा यस्य तथाभूतं व्योमेति योज्यम् । नीराज्यते प्रकाश्यते ॥ १० ॥ **रूढ इति** । वेदस्यैकदेशः काण्डं ब्रह्मकाण्ड एव काण्डः समुद्रसलिलं तस्मात्प्रादुर्भूतः । 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु' इति निघण्टुः । वृक्षपक्षे भूरिः शाखासु वीनां पक्षिणां चारोऽस्येत्यर्थः । **वीन्द्र इति** । जीवेश्वरयोः प्रधानपक्षित्वोक्त्या वृक्षपक्षे तेन विशेषणेनापौनरुक्त्यम् । कल्पवृक्षः सर्वेषां विबुधानामिवायं ग्रन्थः सर्वेषां वेदान्तानां तात्पर्यविषयस्यार्थस्य प्रतिपादने

---

१ 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं' इति श्रुत्या 'आश्रयित्वविषयत्वभागिनी निर्विभागचितिरेव केवला । पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः' इति संक्षेपशारीरकवचनेन उपपत्त्या च स्वरूपचैतन्यमेवाज्ञानाश्रयः, न जीवः; तस्याज्ञानाश्रयत्वे प्रमाणाभावात् । यथाहि अहंकारादिकं जडत्वान्नाज्ञानाश्रयं, एवं जीवस्यापि विशिष्टस्य जडत्वान्नाज्ञानाश्रयत्वम् । जीवत्वस्य अज्ञानाश्रयतावच्छेदकत्वेऽन्योन्याश्रयाच्च । वृत्त्यवच्छिन्नचैतन्याश्रिताज्ञानं—

भामती ।

निःश्वसितमस्य वेदा वीक्षितमेतस्य पञ्च भूतानि । स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलयः ॥ २ ॥
षड्भिरङ्गैरुपेताय विविधैरव्ययैरपि । शाश्वताय नमस्कुर्मो वेदाय च भवाय च ॥ ३ ॥
मार्तण्डतिलकस्वामिमहागणपतीन्वयम् । विश्ववन्द्यान्नमस्यामः सर्वसिद्धिविधायिनः ॥ ४ ॥
ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे । ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥ ५ ॥
नत्वा विशुद्धविज्ञानं शंकरं करुणाकरम् । भाष्यं प्रसन्नगम्भीरं तत्प्रणीतं विभज्यते ॥ ६ ॥
आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम् । रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति ॥ ७ ॥

वेदान्तकल्पतरुः ।

णस्य स्वातन्त्र्याविघातकत्वादित्याह—**प्रभवत इति** । अतत्त्वतोऽन्यथाभावो विवर्तः । न केवलं भूतानां ब्रह्मविवर्तत्वं, अपितु जीवानामपि चराचरशरीरोपाधिकानां तत्प्रतिबिम्बत्वेन तद्विवर्ततेत्याह—**यतश्चेति** । **अथवा** भूतसृष्टिवद्भौतिकसृष्टेरपि हिरण्यगर्भद्वारा ब्रह्मैव कर्तृ इत्यनेनोक्तम् । एवमज्ञानविपर्ययस्तत्त्वाभ्यां विषयत्वमुक्त्वा प्रयोजनतामाह—**अपरिमितेति** ॥ १ ॥ जगद्विवर्ताधिष्ठानत्वेन ब्रह्मणः सर्वकर्तृत्वमुक्त्वा सर्वज्ञत्वं ज्ञानपदसूचितं वेदकर्तृत्वादिना साधयति—**निःश्वसितमिति** । वीक्षणमात्रेण सृष्टत्वाद्भूतानि वीक्षितम् । हिरण्यगर्भद्वारा साध्यं चराचरं वीक्षणाधिकप्रयत्नसाध्यस्मितसाम्यात्स्मितम् । सर्वज्ञत्वसिद्ध्यर्थं चेतनधर्मसुप्तिमत्त्वेन चेतनतां संभावयति—**अस्य चेति** । **यद्वा** विनायासेन नामरूपसृष्टिप्रलयकर्तृत्वाद्ब्रह्मानेन स्तुतम् ॥ २ ॥ **षड्भिरिति** । **ईश्वरस्य षडङ्गानि पुराणोक्तानि**— 'सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः । अचिन्त्यशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥' इति । **अव्ययानि वायुपुराणे पठ्यन्ते**—'ज्ञानं विरागतैश्वर्यं तपः सत्यं क्षमा धृतिः । स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च । अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे ॥' इति । वेदस्य षडङ्गानि निरुक्तादीनि । अव्ययानि च चादयः ॥ ३ ॥ तिलकप्रियः स्वामी **तिलकस्वामी** । सर्वसिद्धिविधायित्वं स्मृतिसिद्धम् । 'आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा । महागणपतेश्चैव कुर्वन्सिद्धिमवाप्नुयात् ॥' (याज्ञ० अ. १ श्लो. २९४) इति ॥ ४ ॥ **वेधसे** विधात्रे ईश्वराय । हरेः ज्ञानशक्तेरवतारः प्राप्तिर्यस्मिन्स तथा । तथाचाह श्रीपराशरः—'द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने । वेदमेकं सुबहुधा कुरुते जगतो हितम् ॥' इति ॥ ५ ॥ इह भगवता सूत्रकारेण साधनचतुष्टयसंपत्त्यनन्तरं ब्रह्मजिज्ञासामुपदिशता जिज्ञास्यस्य ब्रह्मणः संदिग्धत्वसप्रयोजनत्वे समसूचिषातां तदाक्षेपसमाधानपरताम् 'आह कोऽय'

कल्पतरुपरिमलः ।

समर्थं इति कल्पवृक्षत्वाध्यवसानम् ॥ १२ ॥ **ईश्वरायेति** । सर्वज्ञायेत्यपि शक्यं व्याख्यातुम् । 'मेधावी तु विधाता स्याद्वेधाः सर्वज्ञ उच्यते' इति, 'वेधास्त्रिषु स्यात्सर्वज्ञे नरि विष्णुविरिञ्चयो'रिति च नैघण्टुकाः । **अवतारः प्राप्तिर्यस्मिन्निति । ननु** ज्ञानशक्त्यवतारायेत्यत्र अवतारशब्दस्य प्राप्त्यर्थत्वमाश्रित्य बहुव्रीहिसमासप्रदर्शनमयुक्तं; 'समानाधिकरणानां बहुव्रीहि'रिति वार्तिककारेण नियमितत्वात्, 'न धातुलोप आर्धधातुके' (पा. १।१।४) इति पाणिनिसूत्रे धातुलोपशब्दे षष्ठीगर्भव्यधिकरणबहुव्रीह्याश्रयणात् तद्वदिह तदुपपादनेऽपि 'ऋदोरप्' (पा. ३।३।५७) इत्यबन्तस्यावतरशब्दस्येव घञन्तस्यावतारशब्दस्य

—तु भ्रमतन्निवर्तकज्ञानसामानाधिकरण्योपपत्त्यर्थं विशिष्टमेवाश्रयतीत्युपपन्नम् । न चैवं; स्वरूपचैतन्यस्यैव ज्ञातृत्वात् । अहमज्ञ इत्यादिकं तु अहंकारादीनामविद्याधीनतया तदनाश्रयत्वेन पारिशेष्यात्स्वरूपचैतन्याश्रयत्व एव पर्यवसानादविद्यान्तःकरणयोः सामानाधिकरण्यमादायोपपद्यते । अतएव सुप्तोत्थितोक्तप्रतीत्युपपत्तिः । स्वप्रकाशचैतन्यरूपत्वेऽपि यथा न स्वरूपतो ज्ञानविरोधित्वं, किंतु वृत्त्यवच्छिन्नत्वेनेव तथान्यत्र विस्तरः । ज्ञाज्ञाविति श्रौतव्यपदेशोऽप्येतेन व्याख्यातः; अज्ञानकार्यसंबन्धमादायोपपत्तेः । यथाचाज्ञानाश्रयस्यापीश्वरस्य न तत्कार्यसंबन्धः; उपाधेः प्रतिबिम्बपक्षपातित्वनियमात्, तथान्यत्र विस्तरः । एवंच जीवो नाज्ञानाश्रयः किंतु स्वरूपचैतन्यमेव । अतएव तस्य सर्वज्ञत्वव्यवहारोऽप्युपपद्यते । 'स्वरूपतः प्रमाणैर्वा सर्वज्ञत्वं द्विधा भवेत् । तच्चोभयं विनाऽविद्यासंबन्धं नोपपद्यते' इति निरूपयन्ति । विवरणप्रस्थानम् ।

तत्र जीवत्वस्य अज्ञानाश्रयतावच्छेदकत्वेऽपि जीवाविद्ययोरनादित्वेन अज्ञानस्य चिद्भास्यत्वेऽपि चितोऽज्ञानाभास्यत्वेन अज्ञानस्य चिदाश्रयत्वचिदधीनस्थितिकत्वयोरपि चितोऽज्ञानाश्रयत्वाज्ञानाश्रयत्वस्थितिकत्वयोरभावेनान्योन्याश्रयाप्रसङ्गेन, अहमज्ञ इत्यादिप्रतीतेः ज्ञाज्ञावित्यादिश्रुतेश्च जीवस्याज्ञानाश्रयत्वपक्ष एवोपपत्त्या च जीव एवाज्ञानाश्रयः, न त्वीश्वरः; तस्याज्ञानाश्रयत्वे अज्ञत्वप्रसङ्गात् । उपाधेः प्रतिबिम्बपक्षपातित्वेन तु समाधानं न युक्तं, नीरूपस्य चैतन्यस्य प्रतिबिम्बायोगेन बिम्बप्रतिबिम्बभावस्यैवायुक्तत्वात् । उपपादयिष्यते चैवेदं परिमले समन्वयसूत्रे ।

भामती ।

अथ—यदसंदिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरः; यथा समनस्केन्द्रियसंनिकृष्टः स्फीतालोकमध्यवर्ती घटः, करटदन्ता वा, तथाचेदं ब्रह्मेति व्यापकविरुद्धोपलब्धिः । **तथाहि**—'बृहत्त्वाद्बृंहणत्वाद्वात्मैव ब्रह्मेति गीयते', स चायमाकीटपतङ्गेभ्य आ च देवर्षिभ्यः प्राणभृन्मात्रस्येदंकारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यो विवेकेन 'अहं' इत्यसंदिग्धाविपर्यस्तापरोक्षानुभवसिद्ध इति न जिज्ञासास्पदम् । नहि जातु कश्चिदत्र संदिग्धेऽहं वा नाहं वेति । नच विपर्यस्यति नाहमेवेति । नच—अहं कृशः स्थूलो गच्छामीत्यादिदेहधर्मसामानाधिकरण्यदर्शनाद्देहाल-

वेदान्तकल्पतरुः ।

मित्यतः प्राक्तनस्य भाष्यस्य दर्शयति—**अथेत्यादिपरिहरतीत्यन्तेन** । अथशब्दः प्रतिग्रन्थं व्याख्यानप्रारम्भार्थः । **इहाहं** प्रत्ययगम्यमात्मानमुपनिषत्प्रतिपाद्यमापाद्य जिज्ञास्यत्वाक्षेपः, **तत्पुनर्ब्रह्मेत्यादौ तु** तदतिरिक्तं ब्रह्मोररीकृत्य तस्य वेदान्तेभ्य एव सिद्धेर्विचारविषयत्वाक्षेप इति भेदः । जिज्ञास्यत्वव्यापके संदिग्धत्वसप्रयोजनत्वे तद्विरुद्धे चासंदिग्धत्वनिष्प्रयोजनत्वे तयोरुपलब्धिस्ततश्च व्यापकाभावे व्याप्यजिज्ञास्यत्वाभाव इत्यर्थः । **अत्र** प्रयोगौ–मुमुक्षुणा ब्रह्म न विचार्यं तं प्रत्यसंदिग्धत्वात्, तथाविधकुम्भवत्, तथा अप्रयोजनत्वात्, काकदन्तवदिति । **आद्यं हेतुं विवृणोति—तथाहि** इत्यादिना । **बृंहणत्वात्** देहादीनां परिणमयितृत्वात् । **नन्वहं**प्रत्ययस्य देहादिमिश्रविषयत्वात्कथं विविक्तविषयत्वमत आह—**नचाहमिति । देहालम्बन इति** । आत्मैक्याध्यस्तदेहालम्बन इत्यर्थः । देहादात्मनोऽहंप्रत्ययगम्यस्य भेद-

कल्पतरुपरिमलः ।

भावार्थत्वाभावात्, 'अवे तॄस्त्रोर्घञि'ति सूत्रेणावपूर्वात्तरतेः करणाधिकरणयोरेव घञ्विधानात् । अतोऽवतारशब्दस्याधिकरणार्थत्वमाश्रित्य ज्ञानशक्तेरवतारायेति षष्ठीतत्पुरुषः प्रदर्शयितुं युक्त—**इति चेद्**, यद्येवं स एवात्राचार्यैः प्रदर्शित इति ब्रूमः । प्राप्तिर्यस्मिन्नित्युभयमप्यवतारपदव्याख्यानार्थं, नतु प्राप्तिपदमात्रं, प्राप्तिर्यस्मिन्सोऽवतार इत्यर्थः । **अथशब्द इति** । मङ्गलश्लोके शास्त्रीयविषयप्रयोजनप्रदर्शनेन तथाभूते ब्रह्मणि भाष्यस्य तात्पर्यमिति कृत्स्नं भाष्यं सामान्यतो व्याख्यातम् । इदानीं प्रतिग्रन्थं व्याख्यानं प्रारभ्यते इत्येतदर्थोऽथशब्द इत्यर्थः । यद्यपि प्रारभ्यत इत्यनुक्तेऽपि प्रारम्भादेवेदं प्रारभ्यत इत्यवगन्तुं शक्यं; तथापि श्रोतॄणां श्रद्धेयत्वप्रतिपत्त्यर्थं तदुक्तिः । दृश्यते हि तदर्थमेव लोकेऽप्याप्ताः किंचिदहं वक्ष्यामीत्युक्त्वा हितमुपदिशन्तीति । **मुमुक्षुणेति । ननु**—हेतुसाध्ययोर्मुमुक्षुविशेषणं किमर्थम् । नच–अमुमुक्षोः सर्वप्रपञ्चविषयो येनकेनचित्प्रकारेण संदेहस्तन्निवर्तनार्थं विचारश्च संभवतीति कुम्भाहमर्थयोरपि तद्विषयत्वावश्यंभावाद्दृष्टान्ते हेतुसाध्यवैकल्यं, पक्षे हेत्वसिद्धिबाधौ च स्यातामिति तद्वारणार्थं मुमुक्षुविशेषणमिति–वाच्यम्; मुमुक्षोरपि तथाविधसंदेहविचारयोः संभवेन तत उक्तदोषानिवारणात्, नच–यस्य मुमुक्षोस्तौ न स्तः सोऽत्र विशेषणमिति–वाच्यम्; ब्रह्मविचारार्थमिदं शास्त्रमारम्भणीयमिति वदतः सिद्धान्तिनो मते, प्रपञ्चः सत्यो मिथ्या वा, सन् असन्वा, जीवः स्वाभाविकचैतन्य आगन्तुकचैतन्यो वेत्यादिसंदेहस्य तत्तदधिकरणनिरूपितन्यायानुसंधाननिवर्तनीयस्यावश्यंभावेन प्रतिवादिनं प्रति पक्षदृष्टान्तयोर्हेत्वसिद्धेरनिवारणात्, **मुमुक्षु**ज्ञातव्येन रूपेणासंदिग्धत्वं हेतुर्विवक्षित इति चेत्, न; स्वाभाविकचैतन्यत्वादेरपि मुमुक्षुज्ञातव्यतायाः सिद्धान्तिना वाच्यत्वात्, अन्यथा तेन मोक्षार्थमारभ्यमाणेऽस्मिञ्शास्त्रे तद्विचारानुपपत्तेः–**इति चेत्, उच्यते**; मोक्षजनकत्वाभिमतज्ञानविषयेण रूपेणासंदिग्धत्वं हेतुः । नचाहंत्वादन्यन्मोक्षजनकत्वाभिमतज्ञानविषय इति सिद्धान्तिना वक्तुं शक्यम्; ब्रह्मज्ञानं मोक्षहेतुरिति वदतः सिद्धान्तिनो मते अहमिति ज्ञानमेव मुक्तिहेतुः स्यादित्यापाद्य पूर्वपक्षप्रवृत्तेः । पक्षदृष्टान्तयोर्बाधसाध्यवैकल्यपरिहारार्थं साध्येऽपि मुमुक्षुविशेषणम्; अन्यथा सर्वप्रपञ्चविषयसत्यत्वमिथ्यात्वारम्भपरिणामादिविचारं मुमुक्ष्वमुमुक्षुकृतं प्रतिपक्षदृष्टान्तीकृताहमर्थकुम्भव्यक्त्योरपि विषयत्वावश्यंभावाद्बाधसाध्यवैकल्ये स्याताम् । नच—मुमुक्षुविशेषणलभ्ये मोक्षजनकत्वाभिमतज्ञानविषयेण रूपेण विचार्यत्वाभावे विवक्षितेऽपि साध्ये दोषतादवस्थ्यम्, पक्षे अहंत्वस्य दृष्टान्ते तद्व्यतिरेकस्य च लोकसिद्धत्वेऽप्यनुमित्सया विचारसंभवादिति–वाच्यम्; मोक्षजनकज्ञानप्रकारप्रकारकसंदेहनिवृत्त्यर्थविचारविषयत्वाभावस्य साध्यार्थस्य विवक्षितत्वात् । एवंचाहमिति सदावभासमानं ब्रह्म नाहंत्वप्रकारकसंदेहनिवर्तकविचारविषयः; अहंत्वेन निश्चीयमानत्वाद्, यो यदा येन प्रकारेण निश्चीयते, स तदा न तत्प्रकारकसंदेहनिवर्तकविचारविषयः; यथा समनस्केन्द्रियसंनिकर्षे स्फीतालोकमध्यवर्तितादशायां घट इत्यनुमाननिष्कर्षः । नच प्रतियोग्यप्रसिद्ध्या साध्याप्रसिद्धिर्दोषः; साध्यविशेषप्रसिद्धिं विनापि घटे सामान्यव्याप्तिग्रहोपपत्तेः । विशिष्टवैशिष्ट्यज्ञानरूपायाः प्रतियोगिविशिष्टाभावरूपसाध्यविशिष्टानुमितेः अहंत्वप्रकारकत्वसंदेहनिवर्तकविचारविषयत्वयोर्विशकलितप्रसिद्ध्या विशेष्ये विशेषणं तत्र च विशेषणान्तरमित्युक्तरूपविशिष्टवैशिष्ट्यज्ञानसामग्र्योपपत्तेः[1] । नच प्रतियोग्यप्रसिद्धिरपि; देहेन्द्रियेषु तत्प्रसिद्धेः सुलभत्वात् । **देहादात्मन**

१ साम्यत्वोपपत्तेरिति पाठः.

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ

भामती ।

स्वनोऽयमहंकार इति—सांप्रतम्; तदालम्बनत्वे हि योऽहं बाल्ये पितरावन्वभवं स एव स्थाविरे प्रणप्तृननुभवामीति प्रतिसंधानं न भवेत्। नहि बालस्थविरयोः शरीरयोरस्ति मनागपि प्रत्यभिज्ञानगन्धो येनैकत्वमध्यवसीयेत। तस्माद्येषु व्यावर्तमानेषु यदनुवर्तते तत्तेभ्यो भिन्नं यथा कुसुमेभ्यः सूत्रम्। तथाच बालादिशरीरेषु व्यावर्तमानेष्वपि परस्परमहंकारास्पदमनुवर्तमानं तेभ्यो भिद्यते। अपिच स्वप्नान्ते दिव्यं शरीरभेदमास्थाय तदुचितान्भोगान्भुञ्जान एव प्रतिबुद्धो मनुष्यशरीरमात्मानं पश्यन् नाहं देवो मनुष्य एवेति देवशरीरे बाध्यमानेऽप्यहमास्पदमबाध्यमानं शरीराद्भिन्नं प्रतिपद्यते। अपिच योगव्याघ्रः शरीरभेदेऽप्यात्मानमभिन्नमनुभवतीति नाहंकारालम्बनं देहः । अतएव नेन्द्रियाण्यप्यस्यालम्बनम्; इन्द्रियभेदेऽपि योऽहमद्राक्षं स एवैतर्हि स्पृशामीत्यहमालम्बनस्य प्रत्यभिज्ञानात्। विषयेभ्यस्त्वस्य विवेकः स्थवीयानेव। बुद्धिमनसोश्च करणयोरहमिति कर्तृप्रतिभासप्रख्यानालम्बनत्वायोगः; कृशोऽहमन्धोऽहमित्यादयश्च प्रयोगा असत्यप्यारोपे कथंचिन्मञ्चाः क्रोशन्तीत्यादिवदौपचारिका इति युक्तमुत्पश्यामः। तस्मादिदंकारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यो व्यावृत्तः, स्फुटतराहमनुभवगम्य आत्मा संशयाभावादजिज्ञास्य इति सिद्धम्। अप्रयोजनत्वाच्च। तथाहि—संसारनिवृत्तिरपवर्ग इह प्रयोजनं विवक्षितम्। संसारश्चात्मयाथात्म्याननुभवनिमित्त आत्मयाथात्म्यज्ञानेन निवर्तनीयः । स चेदयमनादिरनादिनात्मयाथात्म्यज्ञानेन सहानुवर्तते कुतोऽस्य निवृत्तिः; अविरोधात्। कुतश्चात्मयाथात्म्याननुभवः; नह्यहमित्यनुभवादन्यदात्मयाथात्म्यज्ञानमस्ति । नचाहमिति सर्वजनीनस्फुटतरानुभवसमर्थित आत्मा देहेन्द्रियादिव्यतिरिक्तः शक्य उपनिषदां सहस्रैरप्यन्यथयितुम्; अनुभवविरोधात्। नह्यागमाः सहस्रमपि घटं पटयितुमीशते। तस्मादनुभवविरोधादुपचरितार्था एवोपनिषद इति युक्तमुत्पश्याम इत्याशयवानाशङ्क्य परिहरति—युष्मदस्मत्प्रत्ययगोचरयोरिति । अत्रच युष्मदस्मदित्यादिर्मिथ्याभवितुं युक्तमित्यन्तः शङ्काग्रन्थः । तथापीत्यादिपरिहारग्रन्थः । तथापीत्यभिसंबन्धाच्छङ्कायां यद्यपीति पठितव्यम्। इदमस्मत्प्रत्ययगोचरयोरिति वक्तव्ये युष्मद्ग्रहणमत्यन्तभेदोपलक्षणार्थम् । यथा ह्यहंकारप्रतियोगी त्वंकारो नैवमिदंकारः; एते वयमिमे वयमास्महे इति बहुलं प्रयोगदर्शनादिति । चित्स्वभाव आत्मा विषयी, जडस्व-

वेदान्तकल्पतरुः ।

प्रहाणाध्यास इत्याह—तदालम्बनत्वे हीति। बालस्थविरदेहयोः परिमाणभेदान्न प्रत्यभिज्ञेत्युक्तम्, परिमाणभेदेऽपि देहैक्यं मन्वानं प्रत्याह—स्वप्नान्त इति। जाग्रत्यप्याह—योगेति । मनुष्यः सन् कृत्रिमं व्याघ्रशरीरमभिमन्यमानो योगव्याघ्रः। नाहंकारालम्बनं देह इति। अत्रापि देहशब्द आत्मैक्याध्यस्तदेहपरः, अन्यथा हि जिज्ञास्यत्ववादिनापि तन्मात्रालम्बनत्वानङ्गीकारादनुक्तोपालम्भः स्यादिति। अथवा लोकायतमतं प्रसङ्गादाशङ्क्य निरस्यते। प्रख्यानं शब्दः। असत्यप्यारोपिते अभेदे इत्यर्थः, वास्तवाभेदस्याध्यासवादिनोऽप्यनिष्टेः। लोकायतनिरासे तु यथाश्रुतोऽर्थः। द्वितीयं हेतुं विभजते—अप्रयोजनत्वाच्चेत्यादिना। ननु किमिति नास्त्यन्यदात्मयाथात्म्यज्ञानं ब्रह्मात्मभावस्योपनिषद्भिरवबोधनादत आह—नचाहमितीति। युक्तमिति निर्देशात्पूर्वस्यैव सिद्धान्तत्वं व्यावर्तयति—अत्र चेति। ननु पुरुषान्तरवचनो युष्मच्छब्दः कथमचेतने देहादौ प्रयुक्तोऽत आह—इदमस्मदिति। नन्विदंकारप्रयोगेऽपि प्रत्यक्पराग्भावेन भवति भेदप्रतीतिः; एते वयमिति तु सामानाधिकरण्यं गौणं, तथा त्वंकारप्रयोगेऽपीति न विशेषः कश्चित्, अत आह—इति बहुलं प्रयोगदर्शनादिति। यद्यप्युभयत्र गौणत्वमविशिष्टं; तथापि विरलप्रयोगत्वात्स्फुटं त्वमहमिति

कल्पतरुपरिमलः ।

इति। मम देह इत्यभिज्ञारूपोऽपि भेदग्रहो विवक्षितः। परिमाणभेदेऽपीति। काष्ठपाषाणादिषु तक्षणादिना शरीरेषु कालभेदेन च परिमाणभेदेऽप्यभेदप्रत्यभिज्ञोदयस्तथाभिमानबीजम् । कृत्रिमेति । योगमहिम्ना 'ह्रस्वता स्थूलता बाल्यं वार्धकं यौवनं तथा। नानाजातिस्वरूपं च तथा सुरभिगन्धता ॥ पार्थिवांशं विना भूतैश्चतुर्भिर्देहधारणम्।

---

१ **विवरणप्रस्थाने**—अनर्थनिवृत्तिफलकब्रह्मजिज्ञासासूत्रेण सूत्रितनिखिलप्रपञ्चाध्यासमूलाहंकाराध्यासनिरूपणार्थं 'युष्मदस'दित्यादिभाष्यस्य प्रवृत्तिः। तत्र **'युष्मदस'**दित्यादिसामान्यतोऽध्यासनिरूपणपरम्। **'आहकोय'**मित्यादिविशेषतस्तल्लक्षणस्वरूपसंभावनास्वरूपनिर्णयादिपरम्। शास्त्रारम्भसमर्थनं तु वर्णकान्तरेणेति विवेकः ॥ **भामतीप्रस्थाने तु—युष्मदस्मदित्याद्यारभ्यन्ते** इत्यन्तमेवाध्याससमर्थनद्वारा शास्त्रारम्भसमर्थनपूरम्, नतु तदर्थं वर्णकविशेषादरणम्। तत्रापि **युष्मदस्मदित्यादि** अध्यासनिमित्तसमर्थनेन, **आह कोय**मित्यादिआरोप्यस्वरूपसमर्थनेन, **कथं पुनः प्रत्यगात्मनी**त्यादि आत्माधिष्ठानत्वसमर्थनेन, **कथं पुनरविद्यावद्विषयाणी**त्यादिप्रमाणानामविद्यावद्विषयत्वसमर्थनेन, **सर्वे वेदान्ता आरभ्यन्त** इत्यनेन समर्थितशास्त्रारम्भमुपकुर्वन्तीति विवेकः।

सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः, इत्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदा-

भामती ।

भावा बुद्धीन्द्रियदेहविषया **विषयाः** । एते हि चिदात्मानं विसिन्वन्ति अवबध्नन्ति, स्वेन रूपेण निरूपणीयं कुर्वन्तीति यावत् । परस्परानध्यासहेतावत्यन्तवैलक्षण्ये दृष्टान्तः **'तमःप्रकाशव'दिति** । नहि जातु कश्चित्समुदाचरद्वृत्तिनी प्रकाशतमसी परस्परात्मतया प्रतिपत्तुमर्हति, तदिदमुक्तम्—**इतरेतरभावानुपपत्ताविति** । **इतरेतरभाव** इतरेतरत्वम्, तादात्म्यमिति यावत्, **तस्यानुपपत्ताविति** । **स्यादेतत्**—माभूद्धर्मिणोः परस्परभावः; तद्धर्माणां तु जाड्यचैतन्यनित्यत्वानित्यत्वादीनामितरेतराध्यासो भविष्यति, दृश्यते हि धर्मिणोर्विवेकग्रहणेऽपि तद्धर्माणामध्यासः, यथा कुसुमाद्भेदेन गृह्यमाणेऽपि स्फटिकमणावतिस्वच्छतया जपाकुसुमप्रतिबिम्बोद्ग्राहिण्यरुणः स्फटिक इत्यारुण्यविभ्रम, इत्यत उक्तम्—**तद्धर्माणामपीति** । **इतरेतरत्र धर्मिणि धर्माणां भावो** विनिमयस्तस्यानुपपत्तिः । **अयमभिसंधिः**—रूपवद्धि द्रव्यमतिस्वच्छतया रूपवतो द्रव्यान्तरस्य तद्विवेकेन गृह्यमाणस्यापि छायां

वेदान्तकल्पतरुः ।

सामानाधिकरण्ये गौणत्वं, ततस्तन्न भेदं तिरोदधीतेत्यत्यन्तभेदसिद्धिः । इमे वयमिति तु बहुलप्रयोगत्वेन निरूढमिति तिरोदधीत भेदं, अतो नात्यन्तभेदसिद्धिः । दृश्यते च लाक्षणिकत्वाविशेषेऽपि प्रयोगबाहुल्याबाहुल्याभ्यां निरूढसांप्रतिकत्वे—यथा पटः शुक्लो रथाङ्गनामा चक्रवाक इति । प्रयुञ्जते बहुलं वेदाश्च कवयश्च, 'अयमहमस्मीति' 'एते वयमिमे दाराः कन्येयं कुलजीवित'मित्यादि । न सहानवस्थानं दृष्टान्ते विवक्षितं दार्ष्टान्तिके तदभावात्, किंत्वन्योन्यात्मनाऽस्फुरणमित्यभिप्रेत्याह—**परस्परेति** । **ननू**लूकादेः प्रकाशेऽप्यस्ति तमस्त्वारोपस्तत्राह—**नहीति** । समुदाचरन्त्यौ भेदेन भासमाने वृत्ती वर्तने ययोस्ते तथा उलूकादेरविवेकादारोप इत्यर्थः । इतरेतरभावानुपपत्तिर्नामेतरेतरभावप्रतीत्यनुपपत्तिर्विवक्षिता; तन्मात्रानुपपत्तिसाधनेऽध्यासवादिनं प्रति सिद्धसाधनत्वात्, इत्यभिप्रेत्य दृष्टान्ते स्थित्वा वक्ति—**परस्परात्मतया प्रतिपत्तुमिति** । इतरस्येतरत्र भ.व इति योजने धर्मिणोरपि संसर्गाध्यासनिषेधः स्यात्, तथाच सिद्धसाधनं; तादात्म्याध्यासाभ्युपगमात्, तन्निवृत्त्यर्थमाह—**इतरेतरत्वमिति** । विनिमयो व्यत्यासः । **रूपवत इति** । गगनस्य तु स्वगतसवितृकरादिप्रतिबिम्बनद्वारा सलिले प्रतिबिम्बितत्वविभ्रमः; ततश्च रूपवत एव प्रतिबिम्बभाव इति व्याप्तेर्न

कल्पतरुपरिमलः ।

गन्धतन्मात्रतत्त्वोत्थमेतदष्टगुणं महत् ॥' इत्युक्तरूपपार्थिवैश्वर्याष्टकलाभाल्लीलार्थं व्याघ्रशरीरं कृत्वा तदभिमन्यमान इत्यर्थः । तद्व्याघ्रशरीरं योगिसंकल्पकरणेन कृत्रिमम् । **पटः शुक्ल इति** । गुणशब्दः तद्वति निरूढलक्षणया प्रयुज्यते । रथाङ्गशब्दश्चक्रवाकशब्दैकदेशपर्यायस्तद्वाच्ये सांप्रतिकलक्षणया प्रयुज्यते । एवंचाहमेव त्वमित्यत्रेव भाष्यकारीयेऽपि युष्मत्प्रयोगे सांप्रतिकी गौणी वृत्तिः । सा चात्यन्तभेदावभासद्योतनार्था । इदंकारस्याहंकाराविरोधशङ्कया स्फुटभेदानवभासादिति भावः । 'अयमहमस्मी'ति छन्दोगतैत्तिरीयाणां श्रुतिः । **अविवेकादिति** । येषां तु तमःप्रकाशयोर्विवेको भेदग्रहोऽस्ति तेषां तयोरन्योन्यात्मत्वेनास्फुरणं नियतमेवेति भावः । **नन्वि**तरेतरभावानुपपत्तिस्तत्प्रतीत्यनुपपत्तिरिति किमर्थमिदं क्लिष्टव्याख्यानम्, अधिष्ठानसामान्यांशाध्यस्यमानविशेषांशयोः क्वचिद्वास्तवतादात्म्ये सत्येव तत्प्रमितिजन्यसंस्कारापेक्ष इदं रजतमित्याद्यध्यासो दृष्टः, तदसंभव इहाध्यासासंभवहेतुत्वेनोच्यत इत्यस्त्वित्याशङ्क्याह—**तन्मात्रानुपपत्तिसाधने इति** । आत्मानात्मनोर्वास्तवतादात्म्यासंभवस्य सिद्धान्तिनाप्यङ्गीकृतत्वाद्विरोधहेतुना तत्साधनं सिद्धसाधनदूषितमित्यर्थः । **ननु** बुद्धिपूर्विकायां गृहक्षेत्रादिपरिवर्तनायां प्रसिद्धस्य विनिमयशब्दस्य कथमत्र प्रयोग इत्याशङ्क्य व्यत्यासमात्रे लक्षणयेत्याह—**विनिमय इति** । **ननु** रूपवत एव प्रतिबिम्ब इति नास्ति नियमः, जानुदघ्ने कूपजले दूरविशालतलमलिनतादियुक्तगगनप्रतिबिम्बदर्शनादित्याशङ्क्याह—**गगनस्येति** । **ननु**—रूपवत एव प्रतिबिम्ब इति नियममादृत्यालोकप्रतिबिम्बे गगनप्रतिबिम्बत्वविभ्रममात्रं, नतु गगनस्य प्रतिबिम्बोऽस्तीति कल्पने, रूपवत एव चाक्षुषत्वमिति नियममनुरुध्य गगनप्रसृतालोके एव तलमलिनताध्यासः, गगने तलमलिनताध्यास इति विभ्रममात्रमित्यपि कल्प्येत; तथा**चाप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्तीति** भाष्यविरोधः । यदि रूपवदेव चाक्षुषमिति न नियमः, किंतु रूपवदरूपं वा रूपोपधानेन चाक्षुषमिति नियमः, अतो नीरूपस्यापि गगनस्याध्यस्यमानतलमलिनताद्युपधानेन चाक्षुषत्वमुपपद्यत इत्युच्येत, तर्हीहापि रूपवतः प्रतिबिम्ब इति न नियमः, किंतु रूपोपधानेन प्रतिबिम्बविभ्रम इति; अतोऽध्यस्यमानतलमलिनताद्युपधानेन गगनप्रतिबिम्बविभ्रम उपपादयितुं शक्यः; तथैव देहे चेतनप्रतिबिम्बविभ्रमोऽप्युपपादयितुं शक्यः; चेतनेऽपि देहगतरूपेणैव रूपोपधानसंभवान्मलिनदर्पणादिषूपाधिगतश्यामिकोपधानेनापि प्रतिबिम्बविभ्रमदर्शनात्, **इति चेत्, उच्यते**; जले गगनप्रतिबिम्बमभ्युपगच्छताप्यालोकप्रतिबिम्बोऽवश्यमभ्युपगन्तव्यः; अन्यथा कूपाधिकपरि-

भामती ।

गृह्णीयात्; चिदात्मा त्वरूपो विषयी न विषयच्छायामुद्ग्राहयितुमर्हति, **यथाहुः**—'शब्दगन्धरसानां च कीदृशी प्रतिबिम्बता' इति । तदिह पारिशेष्याद्विषयविषयिणोरन्योन्यात्मसंभेदेनैव तद्धर्माणामपि परस्परसंभेदेन विनिमयात्मना भवितव्यम्, तौ चेद्धर्मिणावत्यन्तविवेकेन गृह्यमाणावसंभिन्नौ, असंभिन्नाः सुतरां तयोर्धर्माः; स्वाश्रयाभ्यां व्यवधानेन दूरापेतत्वात्, तदिदमुक्तं—**सुतरामिति** । **तद्विपर्ययेणेति** । विषयविपर्ययेणेत्यर्थः । **मिथ्याशब्दो**ऽपह्नववचनः । **एतदुक्तं भवति**—अध्यासो भेदाग्रहेण व्याप्तः, तद्विरुद्धश्चेहास्ति भेदग्रहः, स भेदाग्रहं निवर्तयंस्तद्व्याप्तमध्यासमपि निवर्तयतीति ॥ मिथ्येति भवितुं युक्तं यद्यपि, तथापीति योजना ॥ **इदमत्राकूतम्**—भवेदेतदेवं यद्यहमित्यनुभवे आत्मतत्त्वं प्रकाशेत, नत्वेतदस्ति । **तथाहि**—समस्तोपाध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसमुदासीनमेकमद्वितीयमात्मतत्त्वं श्रुतिस्मृतीतिहासपुराणेषु गीयते । नचैतान्युपक्रमपरामर्शोपसंहारैः क्रियासमभिहारेणेदृगात्मतत्त्वमभिदधति तत्पराणि सन्ति शक्यानि शक्रेणाप्युपचरितार्थानि कर्तुम्; अभ्यासे हि भूयस्त्वमर्थस्य भवति; यथाहो दर्शनीयाहो दर्शनीयेति, न न्यूनत्वं, प्रागेवोपचरितत्वमिति । अहमनुभवस्तु प्रादेशिकमनेकविधशोकदुःखादिप्रपञ्चोपप्लुतमात्मान-

वेदान्तकल्पतरुः ।

व्यभिचारः, आत्मनस्तु नास्ति प्रतिबिम्बितत्वभ्रमकरं किंचिदित्यर्थः । धर्माध्यासो हि धार्मिणोरैक्यारोपेण प्रतिबिम्बभावेन वा दृष्टः, इह प्रतिबिम्बभावे निरस्ते आरोपः शिष्यत इत्याह—**पारिशेष्यादिति** । अध्यासानुपपत्तिमुक्त्वा तदभावोपसंहारार्थमतोऽस्मत्प्रत्ययेत्यादिभाष्यम् । **अथवा**ऽहं मनुष्य इत्यादिप्रतीतावतस्मिंस्तत्प्रतीतित्वस्याध्यासलक्षणस्याभावे उक्ते लक्ष्याध्यासरूपत्वस्याभावप्रदर्शनार्थं **विषयविपर्ययेणेति** । विषयोऽचेतनः तस्य विपर्ययश्चैतन्यम् । इत्थंभावे तृतीया; चिदात्मन ऐक्यारोपे हि विषयस्य चेतनत्वमिव भवतीति । तथापीति भाष्यसूचितामध्यासाभावहेतोर्विवेकग्रहस्यासिद्धिमाह—**इदमत्राकूतमित्यादिना** । यथा श्रुत्यादिष्वात्मतत्त्वं गीयते तथाहमित्यनुभवे यदि प्रकाशेत, नत्वेतदस्तीति योजना । **परामर्शो** मध्ये निर्देशः । **क्रियासमभिहारः** पौनःपुन्यम् । **दर्शनीया** सुन्दरी । **नत्वेतदस्तीति यदुक्तं** तत्प्रपञ्चयति—**अहमनुभवस्त्विति** । **उपप्लवो** विपर्यासोऽस्य नास्तीत्यनुपप्लवो**ऽहमनुभवः** कथं विपर्यासशून्य इत्यर्थः ।

कल्पतरुपरिमलः ।

माणरूपस्य प्रतिबिम्बगतविशालत्वस्याचाक्षुषत्वप्रसङ्गात्, यत्र रूपं भासते तत्रैव परिमाणस्य चाक्षुषत्वात् । एवंच गगनालोकयोरुभयोरपि प्रतिबिम्बावङ्गीकृत्यालोकप्रतिबिम्बे भासमानस्य विशालत्वस्य गगनप्रतिबिम्बगतत्वेन विभ्रम इति कल्पनाद्वरमालोकप्रतिबिम्बएवाधःप्रदेशे तलमलिनताद्यध्यासः । अन्यत्र तदीयरूपविशालताभ्यां सह स्फुरणं तत्रैव गगनप्रतिबिम्बत्वविभ्रम इति कल्पनम्, बहिस्तु नीलं नभः विशालं नभ इत्यादिप्रत्ययस्यालोकविषयत्वं न कल्पनीयम्; जलमध्ये नभःप्रतिबिम्बस्येव बहिर्नभसोऽसंप्रतिपत्त्यभावेन यथाव्यवहारं नभसि नीलिमाध्यासस्य तस्मिन्नेव तत्प्रसृतालोकगतरूपाध्यासेन तदीयविशालतानुभवस्य चाङ्गीकारे बाधकाभावात् । अतो रूपवत एव प्रतिबिम्ब इति नियमे व्यभिचाराभावान्नात्मनः प्रतिबिम्बो घटत इति भावः । गगनप्रतिबिम्बत्वविभ्रमविषयालोकप्रतिबिम्बवदात्मप्रतिबिम्बत्वभ्रमविषये देहादौ रूपवतः कस्यचित्प्रतिबिम्बोऽस्ति चेत्, तस्माच्च प्रतिबिम्बोपाधेर्देहस्य जपाकुसुमप्रतिबिम्बात्स्फटिकस्येव विवेकाग्रहोऽप्यस्ति चेत्, अध्यस्तगगनधर्मस्य नीलिम्नो जलमध्ये भासमानस्यालोकप्रतिबिम्बधर्मत्वेनेवाध्यस्तात्मधर्मस्य चैतन्यादेर्देहमध्ये भासमानस्यात्मप्रतिबिम्बत्वभ्रमविषयान्यप्रतिबिम्बधर्मत्वेन प्रतिभासः संभवेत् । एवंप्रतिभासतस्तद्धर्मस्य चैतन्यादेः प्रतिबिम्बग्राहिणि देहादावध्यासश्चोपपद्यते; जपाकुसुमप्रतिबिम्बारुणिम्न इव स्फटिके न तवात्मप्रतिबिम्बत्वभ्रमविषयः कस्यचित्प्रतिबिम्बोऽस्ति देहादावित्याह—**आत्मनस्त्विति** । **नन्वितरेतरभावानुपपत्तिः**, इतरेतरभावाप्रतीत्यनुपपत्तिरिति व्याख्यातम्; अतः सैवाध्यासाभाव इति, तेनैव तत्साधने साध्यावैशिष्ट्यमित्याशङ्क्य हेतुसाध्ययोर्भेदं दर्शयति—**अध्यासानुपपत्तिमुक्त्वेति** । **अनुपपत्तिः** अन्योन्यानात्मतास्फुरणेन प्रतिबन्धादुत्पत्त्यनर्हत्वं स हेतुः अध्यासाभावस्ततो भिन्नः साध्य इति भावः । **अथवा** अहं मनुष्य इत्यादिप्रतीतावतस्मिंस्तत्प्रतीतित्वस्याध्यासलक्षणस्याभावे उक्ते लक्ष्याध्यासरूपत्वस्याभावप्रदर्शनार्थमतोऽस्मत्प्रत्ययेत्यादिभाष्यमिति व्याख्यान्तरं केषु-

---

१ उपक्रमः प्रारम्भः, परामर्शो मध्ये निर्देश उपसंहारश्च सामान्येन कथितस्य विशेषनियमनम् । **अत्रायमभिप्रायः**—'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' इत्युपक्रम्य, अन्तरा च 'तेजसा शुङ्गेन सन्मूलमन्विच्छ अन्नेन शुङ्गेन सन्मूलमन्विच्छे'त्यादिनिर्दिश्य 'स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इत्युपसंहृतं वाक्यं, अखण्डसत्तात्पर्यकं, तदुपक्रमोपसंहारलिङ्गात्, अवान्तरपठितम् 'असद्वा इदमग्र आसीत्' इत्यादिकमेतदनुसंधानेन नेयम् । **ननु** तेजोवादिसृष्टिक्रममपि व्याचष्टे । **न;** एकमद्वितीयं ब्रह्मैवेह प्रतिपिपादयिषितम्, यत्परः शब्दः स एव तदर्थः, अन्यथातिप्रसङ्गात् । तस्मात् ब्रह्मणोऽवताराय यत्किंचिद्वाहर्तव्यमिति तद्व्याहृतमिति सुवचमतो निष्प्रपञ्चात्मतत्त्वप्रतिपादकान्येवैतानीति दिक् ।

भामती।

मादर्शयन्कथमात्मतत्त्वगोचरः कथं वानुपप्लवः । नच—ज्येष्ठप्रमाणप्रत्यक्षविरोधादाम्नायस्यैव तदपेक्षस्याप्रामाण्यमुपचरितार्थत्वं चेति–युक्तम्; तस्यापौरुषेयतया निरस्तसमस्तदोषाशङ्कस्य, बोधकतया स्वतःसिद्धप्रमाणभावस्य, स्वकार्ये प्रमितावनपेक्षत्वात् । प्रमितावनपेक्षत्वेऽप्युत्पत्तौ प्रत्यक्षापेक्षत्वात्तद्विरोधादनुत्पत्तिलक्षणमप्रामाण्यमिति चेत्, न; उत्पादकाप्रतिद्वन्द्वित्वात् । नह्यागमज्ञानं सांव्यवहारिकं प्रत्यक्षस्य प्रामाण्यमुपहन्ति; येन कारणाभावान्न भवेत्, अपितु तात्त्विकम्; नच तत्तस्योत्पादकम्; अतात्त्विकप्रमाणभावेभ्योऽपि सांव्यवहारिकप्रमाणेभ्यस्तत्त्वज्ञानोत्प-

वेदान्तकल्पतरुः।

कथमात्मतत्त्वगोचर इत्यज्ञानं सूचितम्। प्रक्रमादिना तात्पर्यसिद्धावप्युपजीव्यविरोधादप्रामाण्यमाशङ्क्याह—**नचेत्यादिना**। ज्येष्ठस्यापि पौर्वापर्यन्यायेन (जै० अ. ६ पा. ५ सू. ५४) बाधमाशङ्क्याह—**तदपेक्षस्येति**। आगमस्य किं स्वजन्यज्ञानगतप्रमितित्वे प्रत्यक्षापेक्षा, उत तदुत्पत्तौ। **आद्ये** किं विपर्याससशङ्कानिरासाय, संवादाय वा । **एतद्वयं** निरस्य, **द्वितीयं** शङ्कते—**प्रमितावितिः**। आगमस्य किं प्रत्यक्षगतव्यावहारिकप्रामाण्येन विरोधः, उत तत्त्वावेदकत्वेन। **नाद्य** इत्याह—**नहीति**। **द्वितीयं** प्रत्याह—**नच तदिति** । एवमप्रामाण्यं निराकृत्योपचरितार्थत्वं निरस्यति—

कल्पतरुपरिमलः।

चित्कोशेषु दृष्टम्। अस्यां व्याख्यायामतोऽस्मत्प्रत्ययेत्यतः प्राचीनग्रन्थोऽहं मनुष्य इत्यादिप्रतीतावध्यासलक्षणाभावसमर्थने फलतः पर्यवसन्नो द्रष्टव्यः। **ज्येष्ठस्यापीति** । अपच्छेदन्यायेन (जै० अ. ६ पा. ५ सू. ५४) पूर्वस्य परेण बाधमाशङ्क्य **तदपेक्षस्येति** विशेषितं । तेनोत्तरस्य पूर्वापेक्षायामुपक्रमाधिकरणन्याय एव प्रवर्तत इति सूचितमित्यर्थः। **आद्यद्वयं निरस्येति**। अपौरुषेयतयेत्यादिषष्ठ्यन्तविशेषणद्वयेनेति शेषः। **एवमप्रामाण्यं निराकृत्येति** । **ननू**त्पादकाप्रतिद्वन्द्वित्वादित्यप्रामाण्यनिराकरणहेतुनैवोपचरितार्थत्वमपि निराकृतं, किमर्थं पुनस्तन्निराकरणाय प्रागुपपादितमनन्यपरत्वं स्मार्यते, इत्याशङ्क्याह—**पूर्वमिति** । **ननु**—इह का पुनरप्युपजीव्यविरोधशङ्का, यन्निरासायानन्यपरत्वहेत्वन्वेषणम्; उत्पादकाप्रतिद्वन्द्विहेतुविवरणग्रन्थ एव हि यदुपजीव्यं न तेन विरोधः, येन विरोधः न तदुपजीव्यमित्युपजीव्यविरोधशङ्का निरस्ता—**उच्यते**; उपजीव्योपजीवकविरोधोऽत्र द्वेधा समाधातुं शक्यते; उपजीव्यं प्रत्यक्षमौत्सर्गिकात् तत्त्वावेदकप्रमाणभावात् प्रच्याव्य तस्य सांव्यवहारिकविषयसमर्पणेन वा, उपजीवकं वाक्यजातमौत्सर्गिकान्मुख्यार्थात्प्रच्याव्य तस्यौपचारिकविषयसमर्पणेन वा । **तत्रोपजीव्योपमर्दादुपजीवकोपमर्दो वरमिति न्याय**मवलम्ब्य शङ्कायां तत्समाधानार्थमनन्यपरत्वस्य पुनरनुकीर्तनम्। इत्थं च तत्समाधानप्रकारो विवक्षितः; अस्त्युपजीव्यस्यापि बलवता उपजीवकेनोपमर्दः पूर्वतन्त्रे निर्णीतः । यथा–'**विप्रतिषेधे करणसमवायविशेषादितरमन्यस्तेषां यतो विशेषः स्यात्**' (जै० अ. ३ पा. ८ सू. २१) **इत्यधिकरणे चिन्तितम्**—कुण्डपायिनामयने श्रूयते 'यो होता सोऽध्वर्यु'रिति; तत्र होत्रध्वर्युशब्दयोर्भिन्नपुरुषवाचिनोर्मुख्यसामानाधिकरण्यायोगादन्यतरस्य लक्षकत्वे कल्पनीये प्रथमश्रुतस्य होतृशब्दस्य मुख्यवृत्त्या चरमश्रुतस्याध्वर्युशब्दस्याध्वर्युकर्मलक्षकत्वमिति तल्लक्षितेऽध्वर्युकर्मणि कर्तृत्वेन होतुर्विधिः । तेन प्रकृतितः प्राप्तयोरध्वर्युहोत्रोरध्वर्य्वोर्निवृत्तिः, होत्रैवाध्वर्यवमपि कर्तव्यमिति व्यवस्था। **तत्र** यूपपरिव्याणकाले 'परिवीरसि' 'युवा सुवासा' इत्यनयोः परिव्याणे क्रियमाणानुवादिकरणमन्त्रयोरध्वर्युणा होत्रा च प्रयोज्ययोः परिव्याणासंकल्पप्रभृति तत्समाप्तिपर्यन्तमनुवर्तमानः क्रियमाणानुवादी तन्मध्यपाती परिव्याणारम्भसंनिपाती करणमन्त्र इति कालैक्यमापन्नयोस्तथैव कुण्डपायिनामयनेऽपि प्राप्तावेकेन होत्रा युगपदुभयोः प्रयोक्तुमशक्यतयावश्यमन्यतरबाधे वक्तव्ये, प्रत्यक्षश्रुतिविधीयमानाध्वर्युकर्मबाधायोगादानुमानिकप्रकृतिवच्छब्दप्राप्तहोतृकर्मबाध इति । **तत्र** होतुः प्रकृतिवच्छब्देन प्राप्तिः प्रत्यक्षवचनस्योपजीव्या; विकृतौ पदार्थप्राप्तिरुपकारमुखेनेति होतृकर्मप्राप्तिरपि होतृप्राप्त्यर्थत्वेनोपजीव्या; सा चोपजीव्यहोतृकर्मप्राप्तिरविशेषप्रवृत्ता 'युवा सुवासा' इति मन्त्रप्रयोगमपि स्पृशति । अध्वर्युशब्दश्चाध्वर्युकर्मणि लक्षयन् 'परिवीरसी'ति मन्त्रप्रयोगमपि स्पृशति; उभयोरप्युदाहृतमन्त्रद्वयप्रयोगातिरिक्तविषयत्वेन सावकाशताप्यस्ति; एवं सत्यप्युपजीवकस्य प्रत्यक्षवचनत्वेन प्राबल्यादुपजीव्यस्यैवोपमर्दः संश्रितः । **तथा–'हिरण्यगर्भे पूर्वस्य मन्त्रलिङ्गात्'** (जै. अ. १० पा. ३ सू. १३) **इत्यधिकरणे चिन्तितम्**—वायव्यपशौ श्रूयते, 'हिरण्यगर्भः समवर्तताग्रइत्याघारमाघारयती'ति तत्र किममन्त्रके प्रजापतिदेवताके प्रथमाघारे मन्त्रो विधीयते, उत मन्त्रवतीन्द्रदैवत्यद्वितीयाघारे प्राकृतमन्त्रापवादकं मन्त्रान्तरं विधीयत इति संशये, हिरण्यगर्भशब्दस्य प्रजापतिनामत्वप्रसिद्धेः 'प्रजापतिर्वै हिरण्यगर्भ' इति वाक्यशेषाच्च

१ अत्र तदपेक्षत्वं प्रत्यक्षप्रमाणसिद्धार्थानुवादकतया स्वप्रामाण्यसिद्धौ तत्प्रामाण्यमुखनिरीक्षकत्वरूपं बोध्यम्। २ पूर्वानुपूर्व्यनपेक्षपुंविशेषबुद्ध्यधीनानुपूर्वीमत्त्वं पौरुषेयत्वं, तद्रहिततयेत्यर्थः । ३ अनधिगताबाधितार्थबोधकत्वमेव हि प्रामाण्यं तच्चान्तराध्यक्षं सिद्धमित्यर्थः ।

त्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः, तद्विपर्ययेण विषयिणस्तद्धर्माणां च

भामती ।

त्तिदर्शनात् । तथाच वर्णे ह्रस्वदीर्घत्वादयोऽन्यधर्मा अपि समारोपितास्तत्त्वप्रतिपत्तिहेतवः; **नहि लौकिका नाग इति वा नग इति वा पदात्कुञ्जरं वा तरुं वा प्रतिपाद्यमाना भवन्ति भ्रान्ताः** । नचानन्यपरं वाक्यं स्वार्थे उपचरितार्थं युक्तम्; **उक्तंहि**—'न विधौ परः शब्दार्थः' इति । ज्येष्ठत्वं चानपेक्षितस्य बाध्यत्वे हेतुः, न बाधकत्वे; रजतज्ञानस्य ज्यायसः शुक्तिज्ञानेन कनीयसा बाधदर्शनात्, तदनपबाधने तदपबाधात्मनस्तस्योत्पत्तेरनुत्पत्तेः । दर्शितं च तात्त्विकप्रमाणभावस्यानपेक्षितत्वम् । **तथाच पारमर्षं सूत्रं—'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्'** (जै० अ० ६ पा० ५ सू०

वेदान्तकल्पतरुः ।

नचानन्यपरमिति । पूर्वं भेदाग्रहसिद्ध्यर्थमिदमुक्तम्; इदानीमुपजीव्यविरोधाभावाय । विधायके शब्दे परो लक्ष्यः शब्दार्थो न भवतीति शबरस्वामिनोक्तं, तत्तुल्यं वेदान्तेष्वपि; अनधिगतार्थबोधित्वेन तत्परत्वसाम्यादिति । एवं तावदुपजीव्यत्वं प्रत्यक्षस्य निराकृत्य मुख्यत्वमात्रस्य प्राबल्यहेतुतां निराकरोति—**ज्येष्ठत्वं चेति** । **पौर्वापर्य इति** । षष्ठे स्थितम् (जै. अ. ६ पा. ५ सू. ५४) । ज्योतिष्टोमेऽन्योन्यं संबध्य यज्ञशालातो निर्गच्छतामृत्विजां विच्छेदनिमित्तं प्रायश्चित्तं श्रूयते—**'यद्युद्गाता विच्छिन्द्याददक्षिणेन यजेत, यदि प्रतिहर्ता सर्वस्वदक्षिणेने'ति** । तत्रोद्गातृप्रतिहर्त्रोः क्रमेण विच्छेदे विरुद्धप्रायश्चित्तयोः समुच्चयासंभवात्, किं पूर्वं कार्यमुत परमिति विशयेऽनुपजातविरोधित्वात्पूर्व-

कल्पतरुपरिमलः ।

विनियोज्यमन्त्रस्वारस्यानुरोधेन प्रथमाधार इति पूर्वः पक्षः; द्वितीयाधारे मन्त्रकार्यनियमादृष्टस्य क्लृप्तत्वादक्लृप्तत्वाच्च प्रथमाधारे तदकल्पना लाघवानुसारेण द्वितीयाधारे मन्त्रविधिरिति सिद्धान्त इति ॥ **अत्रा**धारमन्त्रविधौ मन्त्र उपजीव्यः; प्रसिद्धं मन्त्रमादाय तद्विनियोगस्य कार्यत्वात्, आधारे तद्विधिरुपजीवकः । **तत्र** मन्त्रः कथंचिदिन्द्रे योगकल्पनया सावकाशः, तदुपजीवकविधिगताधारशब्दस्तु द्वितीयाधार इव प्रथमाधारेऽपि प्रसिद्धवृत्त्यैव सावकाशः; एवं सत्यपि लाघवानुगृहीतस्योपजीवकस्य प्राबल्येनोपजीव्यस्य क्लिष्टवृत्तिराश्रिता, एवमिहाप्यद्वैतवाक्यजातस्योपक्रमादितात्पर्यलिङ्गयुक्तत्वेन प्राबल्यात्तदुपजीव्यस्य प्रत्यक्षस्यैव व्यावहारिकविषयसमर्पणेनोपमर्दः कल्पयितुं युक्त इति । **एतेन**—उपजीव्यविरोधे तात्पर्यवत्त्वमेव न सिध्यतीत्यपि शङ्का—**निरस्ता**; तदुपजीव्यविरोधेऽपि तात्पर्यवता वाक्येनोपजीव्योपमर्दस्य दर्शितत्वात् । **विधायके इति** । **ननु**—एतदयुक्तम्; सोमेन यजेतेति विधिवाक्ये सोमवता यागेनेति मत्वर्थलक्षणाङ्गीकारात्, **तत्तुल्यमित्येद**प्ययुक्तम्; तत्त्वमसिवाक्ये भागत्यागलक्षणाङ्गीकारादिति-**चेत्, उच्यते**; विधिवाक्यं तत्तुल्यं वा तात्पर्यवद्वाक्यं यत्किंचिदनुग्रहार्थम् अन्यमर्थं नेतुमयुक्तमिति तदभिप्रायः । एवंच विशिष्टविधिपरे सोमवाक्ये सोमद्रव्यतादात्म्यविशिष्टयागविध्यभ्युपगमे तस्य विशिष्टस्य विधेयस्य दध्यादिवल्लोकसिद्धत्वाभावेन विधिवाक्यादेव देवताधिकरणे (ब्र. अ. १ पा. ३ सू. ३३) उदाहरिष्यमाणरेवत्याधारवारवन्तीयविशेषणस्येव विना तात्पर्यं सिद्धिरेष्टव्या । नच तात्पर्यरहितादागमाद्यागसोमलताभेदग्राहिप्रत्यक्षविरुद्धार्थः सिध्यतीति; तत्र तदविरोधाय मत्वर्थलक्षणाश्रयणम्; अद्वैतश्रुतेस्तु तात्पर्यविषयादन्यत्र नयनमेव नास्तीति न कश्चिद्दोषः । **ननु** प्रत्यक्षज्ञानप्रामाण्यं ज्ञानसमानवित्तिवेद्यतया ज्ञाने प्रकाशमाने विशिष्य नियमेन प्रतीतं नाद्वैतश्रुत्या बाधनमर्हतीत्याशङ्क्य विशिष्य नियमेन प्रतीतस्यापि पूर्वस्य परेण बाधे टीकायामपच्छेदन्यायो (जै. अ. ६ पा. ५ सू. ५४) दाहारणं कृतम्; **तत्र** पूर्वस्य परोपजीव्यत्वं नास्तीति वैषम्याशङ्कानिराकरणपूर्वकं तदवतारयति—**एवं तावदिति** । किमद्वैतश्रुतेः प्रत्यक्षं प्रमाणं सदुपजीव्यमिति प्रामाण्यस्य प्राबल्यमुच्यते, उतानुपजीव्यत्वेऽपि प्रथमप्रतीतत्वमात्रेण । **आद्यपक्षो** न शङ्कार्ह इत्याह—**उपजीव्यत्वमिति । प्रत्यक्षस्य** प्रमाणस्य सत इति शेषः । **द्वितीयपक्ष**निराकरणार्थमुत्तरग्रन्थ इत्याह—**मुख्यत्वमात्रस्येति** । ज्योतिष्टोमे बहिष्पवमानार्थं हविर्धानान्निर्गच्छतां ऋत्विग्यजमानानामन्वारम्भणं, विहितम् । 'अध्वर्युं प्रस्तोतान्वारभते प्रस्तोतारमुद्गातोद्गातारं प्रतिहर्ते'त्यादिना । तद्विच्छेदे प्रायश्चित्तमाम्नायते 'यद्युद्गाताऽपच्छिद्येतादक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत, तत्र तद्दद्यात्पूर्वस्मिन्दास्यन्स्यात्, यदि प्रतिहर्तापच्छिद्येत सर्ववेदसं दद्या'दिति । तत्र पूर्वनिमित्तकर्तव्यताबुद्धिः परनिमित्तकर्तव्यताबुद्ध्या यथा बाध्यते, तथा श्रुतिजन्याद्वैतबुद्ध्या परया पूर्वप्रत्यक्षजन्या कर्तृत्वादिबुद्धिर्बाध्यते । बाधितापि सा तदुचितविषयसमर्पणेन शुक्तिरूप्यादिबुद्धिवदनुग्राह्येति यावद्ब्रह्मज्ञानाऽबाध्यव्यावहारिकविषयाङ्गीकारात् तद्विषयं प्रत्यक्षादि व्यावहारिकप्रमाणमिति व्यपदिश्यते; व्यावहारिकमेव प्रत्यक्षादिसिद्धं तत्तत्कारणस्वरूपं प्रमित्युत्पत्तावपेक्षितमिति तदबाधात् । तद्गततात्त्विकांशबाधेऽपि शरशास्त्रस्य वेद्यास्तरणप्रप्त्यर्थं प्रकृतिवच्छब्दापेक्षस्य तत्प्राप्तकुशांशबाध इव अपरामृष्टप्रकृतिवच्छब्दजन्यबुद्धौ कुशांशप्रामाण्यबाधइव च नोपजीव्यविरोध इत्याशयः । **यत्तु**—एकस्मिन्नपि प्रयोगे क्रमिकाभ्यां निमित्ताभ्यां तत्तन्नैमित्तिककर्तव्यतयोर्बदरफले श्यामरक्तरूपयोरिव क्रमेणोत्पादाद्रूपज्ञानद्वयवत् कर्तव्यताज्ञानद्वयमपि प्रमाणमेवेति न

भामती।

५४) इति। तथा '**पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्** ॥' इति। **अपिच** येऽप्यहंकारास्पदमात्मानमास्थिषत तैरप्यस्य न तात्त्विकत्वमभ्युपेतव्यम्; 'अहमिहैवास्मि सदने जानानः' इति सर्वव्यापिनः प्रादेशिकत्वेन ग्रहात्, उच्चतरगिरिशिखरवर्तिषु महातरुषु भूमिष्ठस्य दूर्वाप्रवालनिर्भासप्रत्ययवत्। नच–इदं देहस्य प्रादेशिकत्वमनुभूयते नत्वात्मन इति सांप्रतम्; नहि तदैवं भवति—'अहम्' इति; गौणत्वे वा न 'जानानः' इति। **अपिच** परशब्दः परत्र लक्ष्यमाणगुणयोगेन वर्तत इति यत्र प्रयोक्तृप्रतिपत्त्रोः संप्रतिपत्तिः, स गौणः; स च भेदप्रत्ययपुरःसरः, तद्यथा नैयमिकाग्निहोत्रवचनोऽग्निहोत्रशब्दः (जै० अ० १ पा० ४ सू० ४)

वेदान्तकल्पतरुः।

मिति पूर्वपक्षे, राद्धान्तः—**पौर्वापर्ये सति** निमित्तयोः, **पूर्वस्य** नैमित्तिकस्य, दौर्बल्यं; उत्तरस्य निरपेक्षस्य तद्बाधकतयोदितत्वात्, पूर्वोदयकाले उत्तरस्याप्राप्तत्वेन पूर्वेण बाध्यत्वायोगात्। **उक्तंहि**—'पूर्वं परमजातत्वादबाधित्वैव जायते। परस्यानन्यथोत्पादान्नत्वबाधेन संभवः ॥'—इति। **प्रकृतिवत्** यथाहि प्रकृतौ क्लृप्तोपकाराः कुशाः प्रथममतिदेशेन विकृतावुपकाराकाङ्क्षिण्यां प्राप्ताः, कल्प्योपकारतया चरमभाविभिरपि शरैर्निरपेक्षैर्बाध्यन्ते, तद्वदिदमिति। एवं तावच्छ्रुत्यादिगम्यात्मतत्त्वस्याहंप्रत्ययेऽनवभासादविविक्तविषयत्वमुक्तं। **संप्रति** वादिनिरूपितस्यात्मनोऽनवभासादपि तदाह—**अपिचेति**। सर्वगतात्मवादिनं प्रत्याह—**अहमिहेति। नहि तदैवमिति**। तव मतेऽहंप्रत्ययस्य विविक्तात्मविषयत्वादित्यर्थः। **ननु** तत्रात्मवचनोऽहंशब्दो देहे उपचर्यते, अत आह—**गौणत्वे वेति**। भवतीत्यनुषङ्गः। उपचरितात्मभावस्य देहस्य ज्ञातृत्वानुपपत्तेः जानान इति प्रतीतिर्नहि भवतीत्यर्थः। नच–ज्ञातृत्वमपि देहे उपचर्यत इति–वाच्यम्; वक्तुः स्वज्ञानप्रकाशनपरे वाक्ये तद्विरोधात्। अथाहमालम्बने आत्मनि देहगतप्रादेशिकत्वमेवोपचर्यते, तर्हि देहात्मनोर्भेदो ग्रहीतव्यो; नच गृह्यते इत्याह—**अपिचेत्यादिना**। अत्र गौणवादी प्रष्टव्यः, किं सिंहशब्दस्येव माणवके सांप्रतिकं देहादावहंशब्दस्य गौणत्वम्, उत सार्षपरसादौ तैलशब्दस्येव निरूढम्। **नाद्य** इत्याह—**परेति। प्रमाणलक्षणे स्थितम्—'तत्प्रख्यं चान्यशास्त्रम्'** (जै. अ. १ पा. ४ सू. ४)। अग्निहोत्रं जुहोतीति श्रूयते तत्र संशयः, किमग्निहोत्रशब्दोऽग्निदेवतागुणविधिः, उत कर्मनामेति। तत्राग्नये होत्रं हविरस्मिन्निति समासान्तर्वर्तिन्या चतुर्थ्याऽग्नेर्होमदेवतात्वप्रतीतेर्गुणविधिरिति प्राप्ते, राद्धान्तः—'यदग्नये च प्रजापतये च सायं जुहोती'त्यग्नेर्होमे देवतात्वप्रख्यापनात्प्राप्ते च विधिवैयर्थ्या-

कल्पतरुपरिमलः।

परेण पूर्वज्ञानबाधेऽपच्छेदन्याय उदाहरणं–**इति। तन्न;** अङ्गस्य सतः कर्तव्यत्वं, नच पश्चादुद्गातृप्रतिहर्त्रपच्छेदवति पूर्ववृत्तोद्गात्रपच्छेदप्रायश्चित्तस्याङ्गत्वमस्ति; आहवनीयशास्त्रस्य पदहोमातिरिक्तहोमविषयत्ववत् तदङ्गत्वबोधकशास्त्रस्य पश्चादुद्गातृप्रतिहर्त्रपच्छेदरहितक्रतुविषयतायाः सिद्धान्तितत्वात्। **उक्तंहि न्यायरत्नमालायाम्**—तत्रैवं सति शास्त्रार्थो भवति, पश्चादुद्गात्युद्गात्रपच्छेदविधुरप्रतिहर्त्रपच्छेदवतः क्रतोः सर्ववेदसदानमङ्गमेवमुद्गात्रपच्छेदेऽपि द्रष्टव्यमिति। नच मीमांसकमर्यादामतिक्रम्य परकर्तव्यतानिवर्त्यं पूर्वकर्तव्यत्वं निर्वक्तुमपि शक्यम्; नहि कृतिसाध्यत्वयोग्यत्वं तत्; तस्य पश्चादपि सत्त्वात्। नापि फलमुखकृतिसाध्यत्वम्; तस्य पूर्वमप्यजननात्। नाप्यङ्गत्वम्; तस्य संनिपत्योपकारकत्वफलोपकारकत्वान्यतररूपकारणताविशेषत्वेन तत्र योग्यत्वफलमुखत्वविकल्पे पूर्वोक्तदोषानतिवृत्तेः। नच कर्तव्यत्वं नाम धर्मान्तरमागमापायि कल्पनीयं; मानाभावात्। सत्यपि प्रत्यक्षे संनिहिते शराम्नाने कल्प्यातिदेशवाक्यप्रापणीयानां दूरस्थितानां कुशानां ततः प्रागेव ग्रहणे हेतुगर्भं विशेषणम्—**उपकाराकाङ्क्षिण्यामिति। अस्यार्थः**—फलजनकत्वेन कर्माणि बोधयतां प्रधानविधीनां कथमनेन फलं जननीयमित्यनिर्ज्ञातप्रकारतया प्रधानगतफलजननसामर्थ्योद्बोधकाङ्गजन्यदृष्टादृष्टकार्यसमुदायरूपे उपकारे एव प्रथममाकाङ्क्षा भवति, तन्मुखेनोपकारजनकपदार्थरूपेष्वङ्गेष्वाकाङ्क्षा। एवंच प्राकृतप्रधानविधिः प्रथमाकाङ्क्षितमप्युपकारं क्वचिदपि क्लृप्तमपश्यन्नगत्या प्रकरणाम्नातान्पदार्थान्गृहीत्वा तत्पदार्थशक्त्यनुसारेण दृष्टादृष्टकार्यविशेषकल्पनया तत्समुदायरूपमुपकारं लब्ध्वा निवृत्तो भवति। वैकृतविधयस्तु स्वसंनिधौ क्लृप्तमुपकारमपश्यन्तोऽपि प्रकृतौ क्लृप्तं तं पश्यन्तः स्वाकाङ्क्षया दूरस्थितमपि तमेव गृह्णन्तः तन्मुखेन तज्जननशक्तत्वेनावधृतं प्राकृतपदार्थजातमेव प्रथमं गृह्णन्ति। **यदाहुः**—'क्लृप्तोपकारसाकाङ्क्षाः प्रथमं प्राकृतैः सह। संबध्यन्ते समीपस्थं विकाराः प्रोज्झ्य चोदितम् ॥' इति। ततश्च वैकृतविधिसंनिध्याम्नातस्य शरादेर्वैशेषिकाङ्गजातस्य पश्चादन्वय इति। **निरपेक्षैरिति**। प्रत्यक्षश्रुतत्वेन पुरुषबुद्धिमूलप्रापकप्रमाणकल्पनाऽनपेक्षैरित्यर्थः। **यद्वा** शरप्राप्तिनिरपेक्षैरित्यर्थः। **ननु** पूर्वनिमित्तवति प्रयोगे तन्निमित्तककर्तव्यताबुद्धेः परनैमित्तिककर्तव्यताबुद्ध्या भ्रमत्वापादनेऽपि पूर्वनैमित्तिकशास्त्रस्य नात्यन्तबाधः; पूर्वनि-

१ बधिरादिषु श्रोत्रधर्माध्यासादर्शनात्पृथक्धर्मग्रहणमिति पञ्चपादिका। लोहित्यस्य स्फटिके इव धर्ममात्रप्रतिबिम्बनिराकरणार्थं धर्मपदमिति तु भामती।

भामती।

प्रकरणान्तरावधृतभेदे कौण्डपायिनामयनगते कर्मणि 'मासमग्निहोत्रं जुहोति' (जै० अ० ७ पा० ३ सू० १) इत्यत्र

वेदान्तकल्पतरुः।

नामधेयम्। नचात्र चतुर्थीसमाससंभवः; तादर्थ्यप्रकृतिविकारयोरभावात्-इति। एवं नित्याग्निहोत्रवाचिनोऽग्निहोत्रशब्दस्य गुणादन्यत्र वृत्तिं वक्तुं मुख्यार्थाद्गृहीतभेदं कर्मोदाहरति—**प्रकरणान्तरेति। भेदलक्षणे स्थितम्**-'**प्रकरणान्तरे प्रयोजनान्यत्वम्**' (जै. अ. २ पा. ३ सू. २४)। कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीति श्रूयते। **अत्र** किं नित्याग्निहोत्रे मासगुणो विधीयते, उत कर्मान्तरमिति। **तत्र** सत्यपि प्रदेशभेदे नाम्ना नित्याग्निहोत्रस्य बुद्धौ संनिधापनात्तत्समभिव्याहृतस्य जुहोतीत्याख्यातस्य तत्संनिधापितार्थपरत्वान्नित्याग्निहोत्रानुवादेन मासो विधीयते इति प्राप्ते, राद्धान्तः-**न तावदत्रा**ख्यातेन होमानुवादेन मासः शक्यो विधातुं; कालस्य पुरुषानिष्पाद्यत्वेनानुपादेयत्वात्। **नापि** मासोद्देशेन नित्याग्निहोत्रविधिः; तस्यासंनिधेः। नच नाम तत्संनिधापयति; अन्यत्र जुहोतीत्याख्यातेन पूर्वापरीभूततयोक्तस्य **सिद्धार्थबोधिना नाम्नानु**पस्थापनात्।

कल्पतरुपरिमलः।

मित्तमात्रवति प्रयोगान्तरे चारितार्थ्यात्, अहंप्रत्ययस्य कर्तृत्वभोक्तृत्वादिविषयस्यात्मन्यद्वैतवाक्यजातेन बाधे तु तन्मूलस्य प्रमाणस्य न क्वचिदपि चारितार्थ्यम्। नच-व्यावहारिकविषयालम्बनतया तत्रैव चारितार्थ्यं स्यादिति-वाच्यम्; व्यावहारिकविषयस्य शुक्तिरूप्यादिवत्कदाचिद्बाध्यत्वाभ्युपगमाद्बाध्यविषये च व्यावहारिकं प्रामाण्यमिति व्यवहारस्याद्वैतपरिभाषामात्रसिद्धत्वादित्याशङ्क्य निर्दोषत्वेन क्लृप्तशास्त्रस्यैव विषयान्तरप्रदर्शनेन चारितार्थ्यमुपपादनीयं, नतु दोषमूलस्याहंप्रत्ययस्य तस्य पश्चाद्भाव्युद्वात्रपच्छेदवत्प्रयोगविषयतदपरामर्शदोषमूलसर्वस्वदानकर्तव्यताबुद्ध्यादिवद्भ्रान्तित्वोपपत्तेरिति विवेचनाय तस्य दोषमूलत्वं दर्शयितुं प्रवृत्तमुत्तरग्रन्थमवतारयति—**एवं तावदिति। तादर्थ्यप्रकृतिविकारयोरिति।** तादर्थ्यप्रकृतिविकारभावयोरित्यर्थः। पूर्वमीमांसकमते हविषो देवतार्थत्वं हविर्देवतयोर्हिरण्यकुण्डलवत् प्रकृतिविकारभावश्चेत्युभयमपि नास्ति। **सिद्धान्ते** हविषो देवताभोज्यस्य तादर्थ्यसद्भावेऽपि हविर्देवतयोः प्रकृतिविकारभावो नास्तीत्यर्थः। **ननु**-अत्र पूर्वपक्षिणा अग्नये होत्रमस्मिन्निति बहुव्रीहिसमासः शङ्कितः, नतु बहुव्रीहौ तादर्थ्यप्रकृतिविकारापेक्षास्ति; तत्पुरुषाधिकारे एव 'चतुर्थी तदर्थार्थे'त्यादिसूत्रेण तदर्थसमासस्य विहितत्वात्, तस्यैव च तदर्थसमासस्य तस्मिन्सूत्रे बलिरक्षितग्रहणेन ज्ञापकेन प्रकृतेस्तादर्थ्यस्य स्फुटत्वेन वार्तिककृद्वचनेन च प्रकृतिविकृतिविषयत्वनियमसिद्धेः, **समानाधिकरणानां बहुव्रीहिरिति** शाब्दिकनियमादलाक्षणिकश्चतुर्थीगर्भव्यधिकरणबहुव्रीहिरिति **चेत्**, तर्हि स एव शङ्कितसमासासंभवे हेतुर्वक्तव्यो न तादर्थ्यप्रकृतिविकारभावाभावे—**इति चेत्, सत्यम्**; यदि पूर्वपक्षी चतुर्थीगर्भव्यधिकरणबहुव्रीहिमलाक्षणिकं मन्यमानः सन् प्रत्ययस्य भावार्थतामवलम्ब्याग्नये होत्रं हवनमिति चतुर्थीतत्पुरुषमाश्रयेत, तदा तदसंभवे हेतुराचार्यैरुपन्यस्त इति न विरोधः। **ननु**—सिद्धान्ते प्राप्तदेवतासंबन्धप्रवृत्तिनिमित्तकं यौगिकमग्निहोत्रनामेष्यते, बहुव्रीहिसमासश्च प्रदर्श्यते, स कथमुपपद्यत—**इति चेत्, उच्यते**; नात्यन्तं व्यधिकरणबहुव्रीहेरसंभवः; 'सप्तमीविशेषणे बहुव्रीहा'विति सप्तमीग्रहणेन ज्ञापकेन कण्ठेकाल इत्यादौ तस्याभ्युपगमात्, तदेव व्याप्तिन्यायेन विभक्त्यन्तरगर्भव्यधिकरणबहुव्रीहेरपि ज्ञापकमाश्रित्य वामनेनावृत्त्या 'बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद'इति 'सच्छास्त्रजन्मा हि विवेकलाभ' इत्यादिप्रामाणिकप्रयोगदृष्टस्य पञ्चम्यादिगर्भव्यधिकरणबहुव्रीहेः साधुत्वप्रतिपादनाच्च, किंत्वेवं ज्ञापकसिद्धो व्यधिकरणबहुव्रीहिः प्रामाणिकप्रयोगदर्शने सति समर्थनीयो न सर्वत्र; अन्यथा 'शेषो बहुव्रीहि'रिति सूत्रे शेषग्रहेणेनाहत्य वार्तिकवचनेन च सिद्धस्य समानाधिकरणानां बहुव्रीहिरित्यौत्सर्गिकनियमस्य निर्हेतुकभङ्गापत्तेः। ततश्च सिद्धान्ते यदग्नये चेत्यादिवाक्यान्तरप्राप्ताग्निदेवतासंबन्धानुवादकं यौगिकमग्निहोत्रनामेति प्रतीतेः तदुपपादनार्थः प्रमाणमूलो युज्यते व्यधिकरणबहुव्रीहिः। गुणविधिरिति पूर्वपक्षे तु यदग्नये चेत्यादिशास्त्रमग्निप्रजापतिरूपानेकगुणविशिष्टहोमान्तरविधायकम्, अग्निर्ज्योतिरिति मन्त्रस्तस्यैव होमान्तरस्याङ्गमिति तयोर्विषयान्तरप्रदर्शनेन विधित्सितगुणप्रापकत्वाभावस्य रामर्थनीयत्वादग्निदेवताया अप्राप्तेरकस्मादभ्युपगम्यमानो व्यधिकरणबहुव्रीहिर्न प्रमाणमूल इति स न युज्यते। तत्प्रख्यसूत्रे (जै. अ. १ पा. ४ सू. ४) यस्मिन्गुणोपदेश (जै. अ. १ पा. ४ सू. ३) इति पूर्वसूत्राद्यस्मिन्नित्यस्यापि वा, नामधेय (जै. अ. १ पा. ४ सू. २) मिति तत्पूर्वसूत्रान्नामधेयमित्यस्य चानुषङ्गः; तथाच तस्य विधित्सितगुणस्य प्रख्यं प्रख्यापकमन्यत् शास्त्रं यस्मिंस्तदग्निहोत्रादिकं नामधेयमित्यर्थः। **कुण्डेति।** कुण्डपायिनामयनाख्ये सत्रे श्रुतं 'यन्मासमग्निहोत्रं जुहोती'ति वाक्यं तत्रेत्यर्थः। अस्मिन्वाक्ये श्रुतगुणस्य विधेयत्वसंभवे विशिष्टविधिगौरवपरिहारार्थं विधिशक्तेर्गुणसंक्रान्त्या धात्वर्थाविधानात्तद्विधानापेक्षः कर्मभेदो न सिद्ध्येदतो धात्वर्थविधानसिद्ध्यर्थं मासगुणस्य विध्यनर्हत्वमाह—**न तावदिति। ननु** कालस्याविधेयत्वेऽपि विहितमेव नित्याग्निहोत्रं कालसंबन्धसिद्ध्यर्थं तदुद्देशेन पुनर्विधीयतां, सायं प्रातश्च जुहोतीति वाक्य इवेत्याशङ्क्य तद्वैषम्यमाह—**नापीति। सिद्धार्थबोधिना नाम्नेति।** 'यदा त्वाद्यपरिसन्दात्प्रभृत्या फललाभतः। क्रिया पूर्वापरीभूता

भामती।

साध्यसादृश्येन गौणः, माणवके चानुभवसिद्धभेदे सिंहात्सिंहशब्दः, नत्वहंकारस्य मुख्योऽर्थो निर्लुठितगर्भतया देहादिभ्यो भिन्नोऽनुभूयते, येन परशब्दः शरीरादौ गौणो भवेत्। नच—अत्यन्तनिरूढतया गौणेऽपि न गौणत्वाभिमानः सार्षपादिषु तैलशब्दवदिति—वेदितव्यम्; तत्रापि स्नेहात्तिलभवाद्भेदे सिद्ध एव सार्षपादीनां तैलशब्दवाच्यत्वाभिमानो नत्वर्थयोस्तैलसार्षपयोरभेदाध्यवसायः। तत्सिद्धं गौणत्वमुभयदर्शिनो गौणमुख्यविवेकविज्ञानेन व्याप्तं; तदिह व्यापकं विवेकज्ञानं निवर्तमानं गौणतामपि निवर्तयतीति। नच—बालस्थविरशरीरभेदेऽपि सोऽहमित्येक-

वेदान्तकल्पतरुः।

तस्मात्प्रयोजनान्यत्वं विधेय**भावनान्यत्वमिति**। **नन्व**ग्निहोत्रशब्दस्य कौण्डपायिने कर्मणि प्रयोगे किं प्रयोजनम्, न तावन्नित्याग्निहोत्रेण सह क्रियात्वादिसादृश्यबोधः; तस्य वैयर्थ्यादत आह—**साध्येति**। **सप्तमे स्थितम्—'उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात्'** (जै. अ. ७ पा. ३ सू. १)। मासमग्निहोत्रमित्यत्रान्या चिन्ता, किमग्निहोत्रशब्दो नित्याग्निहोत्रधर्मानिहातिदिशेन्न वेति। तत्र यद्ययं गौणः स्यात्तदाग्निहोत्रवज्जुहोतीत्यतिदिशेत्तद्धर्मान्, न त्वयं गौणः; जुहोतिसामानाधिकरण्यस्यात्रापि तुल्यत्वेन नामधेयत्वादग्निदेवताविधानार्थत्वाद्वा, अतो नातिदिशेदिति प्राप्ते, सिद्धान्तः—न तावदत्राग्निदेवता विधातुं शक्या; चतुर्थीसमासासंभवस्योक्तत्वात्। तत्र सिद्धे कर्मभेदेऽनेकार्थस्यान्याय्यत्वादेकत्राग्निहोत्रशब्दो मुख्योऽपरत्र गौणः; नित्याग्निहोत्रे च नामप्रवृत्तिनिमित्तस्याग्निदेवतासंबन्धस्य भावात्तत्रैव मुख्यता, अतः परशब्दः परत्र सादृश्यमुपादाय प्रवर्तते; तच्च सादृश्यं कर्तव्यार्थबोधकाख्यातसमभिव्याहृतनाम्नाग्निहोत्रवज्जुहोतीति साध्यत्वेन विधेयमिति तत्सिद्ध्यर्थं नित्यधर्मानतिदिशेदिति। अतश्च नित्याग्निहोत्रधर्माणां द्रव्यदेवतादीनामतिदेशो गौणप्रयोगफलमित्यर्थः। **क्रियाया** नित्याग्निहोत्रस्य, **अभिधानं** नामधेयमग्निहोत्र**पदमुक्तं** तत्प्रख्याधिकरणे (जै. अ. १ पा. ४ सू. ४) **तस्यान्यत्र श्रवणे, विधिप्रदेशः,** विधेयधर्मातिदेशः **स्यादिति** सूत्रार्थः। लोकसिद्धसादृश्यां गौणीं वृत्तिमाह—**माणवके इति**। प्रकृते भेदग्रहाभावमाह—**नत्विति**। निष्कृष्य लुठितः प्रतिभासितो गर्भोऽसाधारणाकारो यस्य स तथा, तत्तया नानुभूयते, अनुभवे वा वादिविवादो न स्यादित्यर्थः। एवं सांप्रतिकीं गौणतां निरस्य निरूढां निराचष्टे—**न चात्यन्तेति**। निरूढत्वं नाम प्रयोगप्राचुर्यान्मुख्यवद्भानम्। निरूढेऽपि गौणप्रयोगे नार्थयोस्तादात्म्यं प्रतीयते, प्रतीयते तु प्रकृते इति वैषम्यमित्यर्थः। **तत्** तस्माद्गौणत्वव्यापकं विवेकज्ञानमिह व्यावर्तमानं गौणतामपि व्यावर्तयतीत्येतत्सिद्धमित्यन्वयः। अभिज्ञारूपाहंप्रत्ययाद्विवेकासिद्धावपि प्रत्यभिज्ञारूपात्तत्सिद्धिमाशङ्क्याह—**नच बालस्थविरेति**। आत्मैक्यं

कल्पतरुपरिमलः।

लक्ष्यते वर्तते तदा ॥' इत्युक्तरीत्या पूर्वापरीभूतेन क्रियारूपेण स्वार्थं धातुरुपस्थापयति, न तेन रूपेण नाम तदर्थमुपस्थापयितुं शक्नोतीति न नाम्ना धात्वर्थप्रत्यभिज्ञा संभवतीत्यर्थः। **उक्तंच वार्तिके**—'यादृशी भावनाख्याते धात्वर्थश्चापि यादृशः। नासौ तेनैव रूपेण कथ्यतेऽन्यैः पदैः क्वचित् ॥' इति। **भावनान्यत्वमिति**। नित्याग्निहोत्रस्य मासाग्निहोत्रस्य च जुहोतिधात्वर्थस्य भेदो भेदलक्षणद्वितीयाध्यायार्थभावनाभेदोपपादकतया प्रसाधित इति तत्प्रयोजनभूतो भावनाभेदः प्रयोजनान्यत्वमिति सौत्रपदेन विवक्षित इत्यभिप्रेत्यैवं व्याख्यातम्। **यद्वा** नाम्ना यथाकथंचिन्नित्याग्निहोत्रप्रत्यभिज्ञया धात्वर्थाभेदोपपादनेऽप्यग्निहोत्रहोमस्य नित्यत्वेन प्राधान्ये कुण्डपायिनामयनाङ्गत्वे च भाव्यभेदेन भावनाप्रत्यभिज्ञापकाभावेन च भावनान्यत्वमनिवार्यमित्यभिप्रेत्यैवं व्याख्यातम्। **उक्तंच शास्त्रदीपिकायाम्—'ननु** नामधेयेन भवति पूर्वकर्मोपस्थापनम्, भवतु धात्वर्थस्य, भावना तु तेनानुपस्थानाद्भिद्यतएव। धात्वर्थोऽपि यादृशो धातुनाऽऽख्यातवर्तिना पूर्वापरीभूतो विधेरुपनीयते, न तादृशो नाम्नोपस्थाप्यत इति तस्यापि युक्तो भेदः। तदभेदेऽपि भावना तावद्भिन्नेति सिद्ध'मिति। धात्वर्थस्य नाम्ना प्रत्यभिज्ञानमाचार्यैरपि वेधाद्यधिकरणे (ब्र. अ. ३ पा. ३ सू. २५) स्वीकृत्य व्यवहृतम्। तत्रैव तदुपपादनं करिष्यामः। **तत्र सिद्धे कर्मभेदे इति**। यदि प्रकरणभेदेन भावनामात्रभेदः, तदा साप्तमिकाधिकरणे (जै. अ. ७ पा. ३ सू. १) अग्निहोत्रशब्दस्य मासाग्निहोत्रे गौणत्वाभिधानमेव गौणमित्येतदपि वेधाद्यधिकरण एवोपपादयिष्यामः। **अभिज्ञारूपेति**। मम देह इति देहत्वाकारेण विवेकग्रहः परिच्छिन्नत्वाकारेण देहभेदाध्यासेन विरोधी, चैत्रमैत्रयोः संनिहितयोरयमस्माद्भिन्न इति स्वरूपेण भेदग्रहे इव मैत्रचैत्रत्वाकारेण तदभेदाध्यासे। **अर्थः** विषयः। **भिन्नाभ्यामिति**। बालस्थविरशरीरयोः परस्परभिन्नत्वं ताभ्याम् एकस्यात्मनो भेदश्चेत्युभयमप्यनुमानादित्यर्थः। परिमाणभेदे तस्यावयवापचयोपचयसाध्यत्वादवयवापचये समवायिकारणनाशात्पूर्वावयविनाशतः स्थितावयवैः सूक्ष्मावयव्यन्तरोत्पत्तिरवयवोपचये पश्चादापततामवयवानां पूर्वसिद्धेऽवयविनि कारणत्वायोगतः पूर्वसिद्धावयविसहितैरवयवान्तरैर्महावयव्यन्तरोत्पत्तिश्चावश्यंभाविनीति बालस्थविरशरीरयोर्भिन्नत्वं तावदानुमानिकं न प्रत्यक्षम्, प्रत्यक्षेण तु योऽयं मम देहो बाल्ये तथा पुष्ट आसीत् स एवेदानीं वार्धके कृश इत्यभेद एव तयोः प्रतीयते। ततश्च बाल्यस्थाविरदशयोर्भिन्नाभ्यां

भामती।

स्यात्मनः प्रतिसंधानाद्देहादिभ्यो भेदेनास्त्यात्मानुभव इति–वाच्यम्; परीक्षकाणां खल्वियं कथा, न लौकिकानाम्, परीक्षका अपि हि व्यवहारसमये न लोकसामान्यमतिवर्तन्ते; वक्ष्यत्यनन्तरमेव हि भगवान्भाष्यकारः—'पश्वादिभिश्चाविशेषात्' इति। बाह्या अप्याहुः—शास्त्रचिन्तकाः खल्वेवं विवेचयन्ति, न प्रतिपत्तारः' इति। तत्पारिशेष्याच्चिदात्मगोचरमहंकारमहमिहास्मि सदन इति प्रयुञ्जानो लौकिकः शरीराद्यभेदग्रहादात्मनः प्रादेशिकत्वमभिमन्यते, नभस इव घटमणिकमल्लिकाद्युपाध्यवच्छेदादिति युक्तमुत्पश्यामः। नच–अहंकारप्रामाण्याय देहादिवदात्मापि प्रादेशिक इति–युक्तम्; तदा खल्वयमणुपरिमाणो वा स्याद्देहपरिमाणो वा। अणुपरिमाणत्वे स्थूलोऽहं दीर्घ इति च न स्यात्। देहपरिमाणत्वे तु सावयवतया देहवदनित्यत्वप्रसङ्गः। किंचास्मिन्पक्षेऽवयवसमुदायो वा चेतयेत्, प्रत्येकं वावयवाः। प्रत्येकं चेतनत्वपक्षे बहूनां चेतनानां स्वतन्त्राणामेकवाक्यताभावादपर्यायं विरुद्धदिक्क्रियतया शरीरमुन्मथ्येत, अक्रियं वा प्रसज्येत। समुदायस्य तु चैतन्ययोगे वृक्ण एकस्मिन्नवयवे चिदात्मनोऽप्यवयवो वृक्ण इति न चेतयेत्। नच बहूनामवयवानामविनाभावनियमो दृष्टः; य एवावयवो विशीर्णस्तदा तदभावे न चेतयेत्।

वेदान्तकल्पतरुः।

प्रत्यभिज्ञार्थः। भिन्नाभ्यामेकस्य भेदस्त्वनुमानात्तच्च शास्त्रादृते न ज्ञेयमित्यर्थः। तर्हि परीक्षकाणां देहादावहंशब्दो गौणः, नेत्याह —परीक्षका अपीति। अपरोक्षभ्रमो न यौक्तिकबाधादुच्छिद्यत इत्यर्थः। देहपरिमाणात्मपक्षे किमारब्ध आत्मा, उतावयवसमुदायः। नाद्य इत्याह—अनित्यत्वेति। द्वितीये आत्मावयवानां चैतन्यं, समुदायस्य वा। नाद्य इत्याह—प्रत्येकमिति। द्वितीयेऽपि समुदायापत्तिः, शरीरोपाधिकी वा, स्वत एव वा, काकतालीया वा। आद्यं निरस्य द्वितीयं निरस्यति—नच बाहूनामिति। न तृतीय इत्याह—य एवेति। यादृच्छिकसंश्लेष इव यादृच्छिकविश्लेषोऽपि

कल्पतरुपरिमलः।

देहाभ्यां दशाद्वयाभिन्न आत्मा भिन्न इति विरुद्धधर्मलिङ्गकमेदज्ञानमप्यानुमानिकमिति भावः। ननु—देहयोः परस्परभेदस्यानुमानिकत्वेऽपि ताभ्यामात्मनो भेदकस्यैक्यस्य प्रत्यक्षत्वादात्मनि देहमेदः प्रत्यक्ष एव स्याद्; भेदकसाक्षात्कारस्य भेदसाक्षात्कारनियतत्वात्, अतो न तत्र परीक्षकक्लृप्त्यानुमानापेक्षेति—चेद्, मैवम्; तथापि प्रथमानुमानापेक्षत्वेन परीक्षकक्लृप्तत्वानपायात्। वस्तुतस्तत्र प्रत्यभिज्ञामात्रेण निर्विचिकित्समैक्यं न सिध्यतीति न भेदकसाक्षात्कारशङ्कापीत्याह—तच्च शास्त्रादृते इति। तत्प्रत्यभिज्ञाविषयभूतमप्यात्मैक्यं शास्त्रं विना न सिध्यति; परिमाणभेदेन देहभेदे सत्यपि तदभेदप्रत्यभिज्ञादर्शनेन योऽहं बाल्ये पुष्टः पितरावन्वभूवं स एव स्थाविरे कृशः प्रणप्तॄननुभवामीति परिमाणभेदभिन्नधर्मिगततयैव पितृप्रणप्त्रनुभवविषयाभेदप्रत्यभिज्ञादर्शनेन च तथाभूतप्रत्यभिज्ञामात्रादैक्यासिद्धेरिति भावः। ननु—तथापि योऽहं स्वप्ने व्याघ्रदेहः स एवेदानीं मनुष्यदेह इति प्रत्यभिज्ञया स्फुटतरभेदाभ्यां देहाभ्यां तदुभयानुवृत्तस्यात्मनो भेदः प्रत्यक्ष एव स्यात्, तत्र निर्विचिकित्सभेदकसाक्षात्कारसत्त्वादिति—चेद्, न; भेदकसाक्षात्कारस्य भेदसाक्षात्कारनियतत्वाभावात्। अपीतत्वव्याप्यशङ्खत्वदर्शनेऽपि तत्साक्षात्कारानुदयात्, स्वप्नदृष्टेषु लौकिकानां मिथ्यात्वसंप्रतिपत्त्या योऽयं स्थाणुः पुमानेष इतिवत्तत्र बाधायां सामानाधिकरण्यं न लभेद इति भेदकसाक्षात्कारासिद्धेश्च। काकतालीयेति। यद्यपि 'समासाच्च तद्विषया'दिति सूत्रेणेवार्थविषयात्समासादिवार्थेन छप्रत्ययेन निष्पादितः काकतालीयशब्द उपमाद्वयगर्भः; तथाच काकतालयोरिव यादृच्छिको दस्युदेवदत्तयोः समागम इत्येका समासार्थोपमा, तदानीमेव पतता तालेन काकस्येव दस्युना देवदत्तस्य वधः कृत इत्यन्या तद्धितार्थोपमा चेति, यत्रोपमाद्वयं तत्रैवास्य शब्दस्य संपूर्णार्थता; तथापि यादृच्छिकसमागममात्रेऽप्यस्य प्रचुरः प्रयोगो दृश्यत इत्ययमपि प्रयोगो यादृच्छिकसमागममात्रविषयः। ननु—'कृशोऽहमन्धोऽह'मित्यादीनामध्यासत्वोक्तिर्न युक्ता; परस्परभिन्नत्वेन निश्चितानां देहेन्द्रियाणां रज्जुरजतादीनां शुक्तिशकले इवैकस्मिन्नात्मन्यध्यासासंभवात्, अतस्तेषां गौणत्वमेव युक्तमित्याशङ्कां निवर्तयति—विवेकासिद्धाविति। गौणत्वे हि न देवदत्तः सिंह इतिवत्, कदाचिदपि नाहं कृशो नाहमन्ध इत्यादिरूपेण विवेको लौकिकसाधारणो दृश्येत, अतोऽध्यास इत्येवाभ्युपेयम्। भेदकसाक्षात्कारेऽपि दोषबलादभेदाध्यासः पीतशङ्खादिस्थले संप्रतिपन्नः। किंच येन रूपेण देहत्वचक्षुष्ट्वादिना देहेन्द्रियभेदनिश्चयः, तेन रूपेणात्मनि तदुभयाध्यासासंभवेऽपि कृशत्वान्धत्वादिरूपान्तरेण तदुभयाभेदाध्यासे न काचिदनुपपत्तिः। नहि कृशादन्धोऽन्य इत्यादिरूपोऽस्ति भेदप्रत्ययः; दृश्यते च देवदत्तसमीपगतयोरधीयानानधीयानयोः पुरुषत्वसामान्येन गृह्यमाणयोश्चैत्रमैत्रयोः परस्परभेदग्रहे ताभ्यां देवदत्ते दृश्यमानेन रूपेण भेदग्रहे च सत्यप्यधीयानोऽयं मैत्रस्तिष्ठतीत्यधीयानत्वमैत्रत्वाकारद्वयेन देवदत्ते तदुभयाध्यासः। ननु—तथाप्यन्धो बधिरः काणो मूक इत्यादीनामात्मनि तत्तदिन्द्रियाध्यासरूपत्वं न सिध्यति; अर्शआदिगणसंगृहीताद्विकलाङ्गवाचिनोऽन्धादिशब्दात् 'अर्शआदिभ्योऽजि'ति सूत्रेण मत्वर्थीयस्याचः प्रत्ययस्य विधानादहंशब्दसमानाधिकरणान्धादिव्यवहारस्य मत्वर्थीयप्रत्ययान्तान्धादिपदयुक्तत्वेन विकलचक्षुरादिविशिष्टपर-

विषयेऽध्यासो मिथ्येति भवितुं युक्तम्; तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्ये-

भामती।

विज्ञानालम्बनत्वेप्यहंप्रत्ययस्य भ्रान्तत्वं तदवस्थमेव; तस्य स्थिरवस्तुनिर्भासत्वादस्थिरत्वाच्च विज्ञानानाम्। **एतेन**—स्थूलोऽहमन्धोऽहं गच्छामीत्यादयोऽप्यध्यासतया **व्याख्याताः**। तदेवमुक्तक्रमेणाहंप्रत्यये पूतिकूष्माण्डीकृते भगवती श्रुतिरप्रत्यूहं कर्तृत्वभोक्तृत्वसुखदुःखशोकाद्यात्मत्वमहमनुभवप्रसञ्जितमात्मनो निषेद्धुमर्हतीति॥ तदेवं सर्व-प्रवादिश्रुतिस्मृतीतिहासपुराणप्रथितमिथ्याभावस्याहंप्रत्ययस्य **स्वरूपनिमित्तफलैरुपव्याख्यानम्—अन्योन्यस्मि-न्नित्यादि। अत्र चान्योन्यस्मिन्धर्मिण्यात्मशरीरादौ अन्योन्यात्मकताम्** अध्यस्याहमिदं शरीरादिति। **इदमिति च** वस्तुतः, न प्रतीतितः। **लोकव्यवहारो** लोकानां व्यवहारः, स चायमहमितिव्यपदेशः। इतिश-ब्दसूचितश्च शरीराद्यनुकूलं प्रतिकूलं च प्रमेयजातं प्रमाणेन प्रमाय तदुपादानपरिवर्जनादिः। **'अन्योन्यधर्मांश्चा-ध्यस्य'** अन्योन्यस्मिन्धर्मिणि देहादिधर्माञ्जन्ममरणजराव्याध्याध्यादीनात्मनि धर्मिणि अध्यस्तदेहादिभावे समारोप्य, तथा चैतन्यादीनात्मधर्मान्देहादावध्यस्तात्मभावे समारोप्य, **ममेदं** जरामरणपुत्रपशुस्वाम्यादीति **व्यवहारो** व्यप-

वेदान्तकल्पतरुः।

स्यादिति स्वस्थानामेवाकस्मादचैतन्यापत्तिरित्यर्थः। **यत्**—गौणवादिना विवेकग्रहमुपपाद्य कृशोऽहमित्यादिप्रत्ययानां गौण-त्वमुक्तं, तदविवेकसिद्धौ निरस्तमित्याह—**एतेनेति**। अहंप्रत्ययस्याविविक्तविषयत्वे शास्त्रीयविषयसिद्धिमभिधाय प्रयो-जनसिद्धिमप्याह—**तदेवमुक्तेति। पूति** दुर्गन्धि कूष्माण्डफलमिव कृतस्तथोक्तः। तात्पर्यमुपवर्ण्य भाष्यं योजयति—**तदेवं सर्वप्रवादीत्यादिना। स्वरूपं** अन्योन्यात्मकतान्योन्यधर्माध्यासौ। **निमित्तं** इतरेतराविवेकः। **फलं** व्यव-हारः। अहमिदं शरीरमिति प्रतीत्यभावाद्भाष्यायोगमाशङ्क्याह—**वस्तुत इति**। अहमिति प्रतीतेऽपि वास्तवमना-त्मत्वमस्तीति इदंशब्दप्रयोग इत्यर्थः। धर्म्यध्यासाभावादुक्तं धर्माध्यासाभावं परिहरति—**अध्यस्तदेहादिभावे इति**। धर्मिणोस्तादात्म्याध्यासकार्यमहमिदमिति व्यवहारं प्रदर्श्य धर्माध्यासकार्यं प्रदर्शयति—**ममेदमिति। नन्वध्यस्य**

कल्पतरुपरिमलः।

रत्वोपपत्तेः, कृशोऽहमित्यादीनामप्यर्शआदेराकृतिगणत्वेन मत्वर्थीयप्रत्ययान्ततया कृशादिरूपदेहवैशिष्ट्यविषयत्वोपपत्तेर्ना-ध्यासरूपत्वं कल्पनीयमिति शङ्कानिवर्तनार्थं टीकायामुपन्यस्तं **गच्छामीत्येवमादिकमुदाहरणान्तरं** कृशोऽहमित्या-**दीना**मित्यादिशब्देन संगृहीतम्। गच्छामि कृश्यामीत्याद्याख्यातप्रयोगे गन्तृकृशादिरूपदेहाभेद एवार्थो वाच्यः; तथा कुणिरहमित्यादिव्यवहारे विकलेन्द्रियाभेद एवार्थो वाच्यः; तादृक्षु प्रयोगेषु मत्वर्थीयप्रत्ययाभावात्, तत्सामान्यादन्धोऽहमि-त्यादिप्रयोगाणामप्यध्यासमूलत्वमेव युक्तमित्यर्थः। अर्शआद्यजिविधानं 'चित' इत्यन्तोदात्तस्वरार्थं, नत्वात्मनि प्रयोगनिर्वा-

---

१ **विवरणप्रस्थानम्—**अध्यासव्यापकतादात्म्यविवेकाग्रहसादृश्यादिविरहप्रतिपादनार्थं युक्तमित्यन्तस्य ग्रन्थस्य प्रवृत्तिः। तत्र तादात्म्यस्यैक्यरूपत्वे तदयोग्यत्वप्रतिपादनार्थं **युष्मदस्मदोरिति,** रूपान्तरत्वे तदयोग्यत्वप्रतिपादनार्थं **विषयविषयिणोरिति।** शुक्ते-रिव ब्रह्मणोंशाभावेनांशविशेषमादाय तादात्म्योपपादनासंभवात्। **विरुद्धस्वभावयोरिति** तु दृष्टान्तमात्रान्वयि। **एतेनेत**रे-तरभावानुपपत्तिरिति **व्याख्याता।** इदमस्मदित्येव प्रयोक्तव्ये **युष्म**त्प्रयोगः, धर्मिपदे प्रयोक्तव्ये **विषयिपद**प्रयोगश्च विवेकाग्रह सादृश्याभावं च व्यञ्जयतः—इति॥ **भामतीप्रस्थानं तु—**इतरेतरभावानुपपत्तिपदेनेतरेतरतादात्म्यायोग्यत्वविवक्षणं न युक्तमिति तादा-त्म्यप्रतीत्यनुपपत्तिपरत्वस्यैवाङ्गीकरणीयतया तत्र **युष्मदस्मदित्यादि**नोक्तायोग्यत्वादिविवक्षणे प्रयोजनाभावात् **विरुद्धस्वभावयो-**रित्यस्य दृष्टान्तमात्रान्वयित्वस्यायुक्तत्वाच्च **युष्मदस्मदित्य**नेन विवेकग्रहः, सोपाधिकाध्यासे तस्याप्रतिबन्धकत्वेनोक्ताध्यासनिषेधोप-योगि निरंशत्वं **विषयविषयिणो**रित्यनेन, **विरुद्धस्वभावयो**रित्यनेन सादृश्याभावश्च संगृह्यन्त इति विवेकः—इति॥

२ **विवरणमतेऽयमाशयः—'अहमिदं ममेदमिति** नैसर्गिको लोकव्यवहारः। सचाहमर्थ इव नापलापमर्हति। तत्र चा-ध्यासो निमित्तं। सच सत्यानृतमिथुनीकरणनिबन्धनः इति हि परम्परा। तत्र व्यवहारोऽध्यासमध्यासः सत्यानृततादात्म्यं चाक्षिप-तीति स्वरूपतो निरंशस्यापि ब्रह्मणोंशकल्पनावश्यक्येवेति नोक्तदोषप्रसङ्गः। **विषयविषयिणोरिति** पदपरित्यागेन **धर्मधर्मिणोरिति** पदनिवेशोऽपीदानीमेवानुकूलः—इति। **भामतीप्रस्थाने तु—**अध्यासरूपएवायं नैसर्गिको लोकव्यवहारः। सच मिथ्याज्ञाननिमि-त्तकः, सत्यानृतमिथुनीकरणात्मकश्च भेदग्रहश्च न कस्यापि विद्यते। नह्यात्मतत्त्वं कस्यापि विषयः। अहमनुभवस्तु कूटसाक्षितुल्यो नात्र प्रमाणतामश्नुते। **इतरेतराविवेकेनात्यन्तविविक्तयोर्धर्मधर्मिणोरिति** वाक्येन चायमर्थोऽवगम्यते। नह्यत्यन्तविवि-क्तयोर्विवेकाग्रहातिरिक्तः स्वरूपसद्विवेकः संभवदुक्तिकः। शुद्धरूपेणाविषयत्वेऽपि तत्राहंकाराध्यासस्यानभिमतत्वान्नोक्तदोषः। **अत्र च धर्मिपदं** अनुकूलमित्याशयः—इति॥

तरेतराविवेकेनात्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदं'

भामती।

देशः, इतिशब्दसूचितश्च तदनुरूपः प्रवृत्त्यादिः। अत्रचाध्यासव्यवहारक्रियाभ्यां यः कर्तोन्नीतः, स समान इति समानकर्तृकत्वेनाध्यस्य व्यवहार इत्युपपन्नम्। पूर्वकालत्वसूचितमध्यासस्य व्यवहारकारणत्वं सूचयति—**मिथ्याज्ञाननिमित्तः—व्यवहारः**। मिथ्याज्ञानमध्यासस्तन्निमित्तः। तद्भावाभावानुविधानाद्व्यवहारभावाभावयोरित्यर्थः। **तदेवमध्यासस्वरूपं फलं च व्यवहारमुक्त्वा** तस्य **निमित्तमाह—इतरेतराविवेकेन**। विवेकाग्रहेणेत्यर्थः। **अथाविवेक एव** कस्मान्न भवति; तथाच नाध्यास, इत्यत आह—**अत्यन्तविविक्तयोर्धर्मधर्मिणोः**। परमार्थतो धर्मिणोरतादात्म्यं विवेको, धर्माणां चासंकीर्णता विवेकः। **स्यादेतत्**—विविक्तयोर्वस्तुसतोर्भेदाग्रहनिबन्धनस्तादात्म्यविभ्रमो युज्यते, शुक्तेरिव रजताद्भेदाग्रहे रजततादात्म्यविभ्रमः, इहतु परमार्थसतश्चिदात्मनो न भिन्नं देहाद्यस्ति वस्तुसत्, तत्कुतश्चिदात्मनो भेदाग्रहः, कुतश्च तादात्म्यविभ्रम इत्यत आह—**सत्यानृते मिथुनीकृत्य**। विवेकाग्र-

वेदान्तकल्पतरुः।

व्यवहार इत्यनुपपन्नं; भुक्त्वा व्रजतीतिवदेकस्य क्रियाद्वये कर्तृत्वानभिधानात्, अत आह—**अत्र चेति**। व्यवहारक्रियाक्षिप्तस्य कर्तुरध्यासेऽपि कर्तृत्वात्क्त्वाप्रत्ययः स्यादित्यर्थः॥ **ननु**—उपसंहारभाष्ये नैसर्गिकोऽध्यास इत्यभिधानाद्व्यवहारोऽपि नैसर्गिकत्वविशिष्टोऽध्यास एव तत्कथं क्रियाभेदः—**उच्यते**; इह कार्यभूतव्यवहारनैसर्गिकत्वेन सामर्थ्यसिद्धाध्यासनैसर्गिकत्वोपसंहारादविरोधः॥ अध्यासाभिधानक्रिययोः पूर्वापरीभावो न युक्तः; चितो बुद्ध्यादितादात्म्यं विना क्रियान्वयायोगात्, अध्यस्यव्यवहार इत्यनेनाध्यासस्य व्यवहारहेतुतोक्तौ मिथ्याज्ञाननिमित्त इत्यनेन पौनरुक्त्यं चेति—**केचित्**। **तन्न**; पूर्वपूर्वभ्रमसंस्कृताऽविद्यया चितः संप्रतितनाध्यासक्रियाश्रयत्वात्। पुनरुक्तिं परिहरति—**पूर्वकालत्वेति**। सुप्त्वोत्तिष्ठतीतिवदहेतुत्वभ्रमं व्यावर्त्य स्फुटयतीत्यर्थः। जातिव्यक्त्योरिवार्थगतं तादात्म्यमविवेक इति भ्रमं व्यावर्तयति—**विवेकाग्रहेणेति**। **भाष्ये**—मिथुनीकरणस्य व्यवहारहेतुत्वमानन्तर्याद्भाति, नतु मिथ्याभूतप्रतियोगिसंपादनेन विवेकाग्रहहेतुतेति शङ्कां व्युदस्यन्योजयति—**सत्यानृते इति**। मिथुनीकरणाद्विवेकाग्रहस्ततोऽध्यास इत्यर्थः। **युगलीकरणं** नामा-

कल्पतरुपरिमलः।

हार्थमिति योज्यम्। दृश्यते च स्वरविशेषसिद्ध्यौपयिकतयैव तद्विधानार्थं गुणविशेषवाचिनां शुक्लादिशब्दानामप्यर्शआदिगणे संग्रहः। नहि शुक्लादिगुणवैशिष्ट्यप्रतीतिनिर्वाहार्थं तत्; गुणान्तरवाचिसाधारण्येन गुणवचनेभ्यो मतुपो लुग्विधानेनैव तन्निर्वाहात्। नच—शुक्लादिगुणशालिभिः प्रासादैर्विशिष्टे नगरे शुक्लं नगरमित्यादिप्रयोगनिर्वाहार्थं शुक्लादिशब्देभ्यो मतुब्लोपानन्तरमज्विधानमिति—वाच्यम्; संख्यासंनिवेशविशेषविशिष्टानां गृहाणामेव नगरशब्दवाच्यत्वे साक्षादेव नगरे शुक्लादिगुणवैशिष्ट्यसत्त्वेन, तथाभूतगृहाधिकरणस्थलस्य नगरत्वे तदभेदोपचारसंभवेन च तदर्थमज्विधानानपेक्षणात्। अन्यथा ह्यश्वेतन्नगरमपुष्प्यद्वनमित्याद्याख्यातप्रयोगे का गतिः। एवमहंप्रत्ययस्य केषुचिदंशेषु दृष्टविसंवादतया दृष्टकौटसाक्ष्यपुरुषवचनवदप्रामाण्यशङ्काकलुषितस्य परिमाणत्वग्रहणप्रतिबन्धक (जै. अ. ६ पा. ५ सू. ४४) दूरत्वदोषसद्भावसमुदिताऽप्रामामाण्यशङ्काकलङ्कितचन्द्रप्रादेशिकत्वज्ञानवदागमबाधनाक्षमत्वे सत्यागमेनैव तद्बाध्यते। आगमबाधितस्य च तस्य पूर्वापच्छेदशास्त्रस्येव (जै. अ. ६ पा. ५ सू. ५४) प्रामाण्यसंरक्षणाय न विपयान्तरं गवेषणीयम्; चन्द्रप्रादेशिकत्वज्ञानवद् दोषजन्यत्वेन सर्वथैवाप्रामाण्योपपत्तेरित्येतावदस्मिन्नधिकरणे शास्त्रारम्भोपयोगिविषयप्रयोजनसमर्थनार्थं सूत्रसूचितं व्युत्पाद्यम्। इत्थं तत्त्वावेदकप्रमाणभावात् प्रच्यावितस्य कर्तृत्वभोक्तृत्वादिप्रत्यक्षस्य प्रवृत्तिनिवृत्त्यादिव्यवहारोपयोगिसांव्यवहारिकं प्रामाण्यं सर्वप्रपञ्चसाधारण्येनारम्भणाधिकरणे (ब्र. अ. २ पा. १ सू. २४) व्युत्पादनीयम्; श्रोतृबुद्धिसौकर्यार्थं प्रागनूदितमित्यनुसंधेयम्। **अध्यासाभिधानक्रिययोरिति**। अध्यासक्रियैव तावन्न संभवति; दूरेऽध्यासाभिधानक्रिययोः पौर्वापर्यं; क्रियाया आश्रयाधीनात्मलाभत्वात्, शुद्धाया निर्विकारायाश्चितः क्रियाश्रयत्वायोगाद्, अध्यसनीयबुद्धितादात्म्यापन्नायाश्च चितोऽध्यासाधीनसिद्धिकत्वादिति प्रथमाशङ्कार्थः। इमां शङ्कां स्वयं परिहरति—**पूर्वपूर्वेति**। **ननु**—मिथ्याज्ञाननिमित्तविशेषणविवरणटीकया द्वितीयशङ्काया इव नैसर्गिकविशेपणविवरणटीकयाऽस्याः प्रथमशङ्कायाः परिहारो लभ्यते। यद्यपि '**अध्यासो वस्तुसतोर्भेदाग्रहाधीनः, नच देहेन्द्रियादिकं त्वया वस्तुसदिष्यत**'इत्यध्यासासंभवशङ्कायाम्, प्रातीतिकेनापि सत्त्वेनारोप्याधिष्ठानयुगलसंपादनमुपपद्यते इत्येवं **सत्यानृते मिथुनीकृत्येत्यनेन** परिहृतायां प्रातीतिकसत्त्वमप्यध्यासाधीनमिति पुनरन्योन्याश्रयशङ्का नैसर्गिकविशेपणेन परिहृतेति योजयता टीकाग्रन्थेन देहेन्द्रियबुद्ध्यादेः स्वरूपमात्रस्य पूर्वपूर्वाध्यासतः सिद्धिरुक्ता, न चितो बुद्धितादात्म्यापत्तेरपि; तथापि ततएव साप्यर्थात्सिद्ध्यति; प्रवाहानादित्वेनोच्यमानस्याध्यासस्य परत्र परतादात्म्यावभासरूपत्वादिति—चेत्,

'ममेदमिति' नैसर्गिको[1]ऽयं लोकव्यवहारः। आह—कोऽयमध्यासो नामेति। उच्यते—स्मृतिरूपः[2]

भामती ।

ह्रादध्यस्येति योजना । **सत्यं** चिदात्मा, **अनृतं** बुद्धीन्द्रियदेहादि, ते द्वे धर्मिणी **मिथुनीकृत्य** युगलीकृत्येत्यर्थः । न च संवृतिपरमार्थसतोः पारमार्थिकं मिथुनमस्तीत्यभूततद्भावार्थस्य च्वेः प्रयोगः। **एतदुक्तं भवति**—अप्रतीतस्यारोपायोगादारोप्यस्य प्रतीतिरुपयुज्यते न वस्तुसत्तेति । **स्यादेतत्**—आरोप्यस्य प्रतीतौ सत्यां पूर्वदृष्टस्य समारोपः, समारोपनिबन्धना च प्रतीतिरिति, दुर्वारं परस्पराश्रयत्वमित्यत आह—**नैसर्गिक इति** । स्वाभाविकोऽनादिरयं व्यवहारः । व्यवहारानादितया तत्कारणस्याध्यासस्यानादितोक्ता, ततश्च पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरादेरुत्तरोत्तराध्यासोपयोग इत्यनादित्वाद्वीजाङ्कुरवन्न परस्पराश्रयत्वमित्यर्थः । **स्यादेतत्**—अद्धा पूर्वप्रतीतिमात्रमुपयुज्यत आरोपे, नतु प्रतीयमानस्य परमार्थसत्ता; प्रतीतिरेव त्वत्यन्तासतो गगनकमलिनीकल्पस्य देहेन्द्रियादेर्नो-

वेदान्तकल्पतरुः ।

धिष्ठानारोप्ययोः स्वरूपेण बुद्धौ भानम् । **ननु** मिथुनं कृत्वेति किमिति नोक्तमत आह—**नच संवृतीति** । 'अभूततद्भावे कृभ्वस्तियोगे संपद्यमानकर्तरि च्विः' । यस्य यो भावी न भूतः स तद्भावं चेत्संपद्यते तस्मिन्नभूततद्भावे वर्तमानात्प्रातिपदिकात्कृभ्वस्तीनां धातूनां योगे च्विप्रत्ययो भवति । 'अस्य च्वौ' इतीकारः । ततश्च मिथुनभावोऽप्यवास्तव इत्यर्थः । समारोपप्रतीत्योरितरेतराश्रयत्वे शङ्किते व्यवहारानादित्वमसांप्रतमित्याशङ्क्याह—**व्यवहारानादितयेति । अनादितयेत्यत्रैके पर्यनुयुञ्जते**—न मिथ्याज्ञानतत्संस्कारव्यक्त्योरनादित्वम्, तज्जात्योस्तु न निमित्तनैमित्तिकभावः; नैव प्रवाहो वस्त्वस्ति—**इति । तत्र ब्रूमः**—'तदाकृत्युपरक्तानां व्यक्तीनामेकया विना । अनादिकाला वृत्तिर्या सा कार्यानादिता मता ॥' मिथ्याज्ञानत्वतत्संस्कारत्वजात्यालिङ्गितव्यक्तीनां मध्येऽन्यतमव्यक्त्या विना यदनादिकालस्याऽवर्तनमन्यतमयोगनियम इति यावत् । तासामनादित्वम् । अत्र च निमित्तनैमित्तकयोरनादित्वमुक्तम् । भ्रमोपादानं तु वक्ष्यति देवताधिकरणे (ब्रह्म. अ. १ पा. ३ सू. २४-३३) । सत्यानृते मिथुनीकृत्येत्यत्र वस्तुसत्तावर्जमारोप्यस्य प्रतीतिमात्रमुपयोगीत्युक्तम्, इदानीं प्रतीतिरेवानृतस्यायुक्तेत्याक्षेपाभिप्रायमुत्तरभाष्यस्याह—**स्यादेतदित्यादिना** । युष्मदस्मदित्यादिस्तु विवेकाग्रहादाक्षेप इति भेदः । **प्रतीतिरेव त्विति** । अपरोक्षेत्यर्थः । प्रतीतिमात्रनिषेधे त्वसत्पदस्याबोधकत्वापत्तेरनुवादायोगः स्यादिति ॥

कल्पतरुपरिमलः ।

उच्यते; नैसर्गिकत्वोक्त्या नोक्तशङ्कायाः परिहारो लभ्यते; सर्गादौ प्रथमाध्यासात् पूर्वमाध्यासिकस्य बुद्धितादात्म्यस्यासिद्धेः । नच—तदभावेऽपि पूर्वाध्याससंस्कारसत्त्वात्तदुपधानेन चितः प्रथमाध्यासक्रियाश्रयत्वं स्यादिति—वाच्यम्; प्रथमाध्यासेऽध्याससंस्कारोपधानं प्रयोजकं, द्वितीयाद्यध्यासेष्वध्यासपरिनिष्पन्नं बुद्धितादात्म्यं प्रयोजकमित्यननुगमापत्तेः, संस्कारस्य च निराश्रयस्य प्रलये स्थित्यसंभवात्, शुद्धचितस्तदाश्रयत्वायोगाद्, बुद्धीन्द्रियादीनां सर्गादावुत्पत्तिश्रवणेन प्रलयेऽध्याससन्तानविच्छेदेन च तदानीमाध्यासिकबुद्धितादात्म्यापन्नचितोऽपि तदाश्रयतया वक्तुमशक्यत्वादित्येतावत्पर्यन्तं प्रथमशङ्का धावेदित्यालोच्याचार्यैः स्वयं परिहारोऽभिहितः । **तत्रायमाशयः**—प्रलये संस्काराश्रयस्य तावन्नासंभवः, अविद्यायाः सत्त्वात्, सर्वोऽपि हि प्रपञ्चस्तदानीमविद्याचित्रभित्तौ संस्कारमात्रशेषं स्थित्वा पुनरुद्भवतीत्यङ्गीक्रियते । अतएव बीजाङ्कुरप्रवाहानादिताया अपि प्रलये तत्संस्कारसत्त्वेनैव निर्वाहः । नाप्यननुगमः; सर्वेष्वप्यध्यासेषु पूर्वपूर्वभ्रमसंस्कारसचिवाविद्योपधानमेव प्रयोजकं नतु बुद्धितादात्म्यापत्तिरपीत्यभ्युपगमे दोषाभावादिति । **प्रतीयमानतैव परमार्थसत्तेति** मन्यमानस्य शङ्कावादिनः प्रतीतिमात्रमारोपोपयोगि, न परमार्थसत्तेत्यभ्युपगमो विरुद्ध, इत्याशङ्क्य परमार्थसत्तेत्येतदन्तः सिद्धान्त्युक्तानुवादः, तत्राद्धेत्यनेन सूचितः प्रतीतिमात्रमारोपे उपयुज्यते इति युक्तं प्रतीयमानस्य सत्ता नोपयुज्यतइति तु न युक्तमित्येवंरूपोद्धाङ्गीकारः **प्रतीतिरेव त्वित्यादिना** स्फुटीकृत इति विभज्य तात्पर्यं प्रदर्शयन्नवतारयति—**सत्यानृते मिथुनीकृत्येत्यत्रेति । उक्तमिति** । तदिहाऽनूदितमिति शेषः । **विवेकाग्रहादिति।** अनृतस्य

---

१ कारणरूपेण नैसर्गिकत्वं कार्यरूपेण नैमित्तिकत्वम् । निमित्तं चाज्ञानमनुभावनार्थापत्तिश्रुतिसिद्ध इति ॥ २ निरधिष्ठानवादे उक्तलक्षणव्याप्तिपरिहारार्थं परत्रपदम् । स्मृतावतिव्याप्तिवारणार्थं स्मृतिरूपपदम् । स्पष्टप्रतिपत्त्यर्थं पूर्वदृष्टग्रहणमिति **पञ्चपादिका** । अवसन्नोऽवमतो वाभासोऽवभास इति संक्षिप्तलक्षणम् । स्मृतिरूपः परत्र पूर्वदृष्टावभास इति विस्तृतलक्षणम् । स्वाप्नादीनामपि पूर्वदर्शनसत्वान्नाव्याप्तिः । प्रत्यभिज्ञायां भ्रमत्वव्यवहारापत्तिवारणार्थं स्मृतिरूपपदम् । आरोपविषयसत्यतासूचनार्थं परत्रपदम् । पूर्वदर्शनस्यापि कारणतासूचनार्थं पूर्वदृष्टपदम् । तत्र स्मृतिरूपपदेन सर्वविधसत्ख्यातिनिराकरणं । परत्रपदेनासत्ख्यातिनिराकरणमिति तु पञ्चपादिकासिद्धान्तादविशेषः इति **भामती** । तत्र प्रत्यभिज्ञायां भ्रमत्वव्यवहारस्येष्टत्वात् अनिष्टत्वेऽपि स्वप्नभ्रमादावव्याप्त्या परत्र विशेषणत्यागस्यावश्यकत्वात् स्मृतिरूपपदेनाधिष्ठानविषमसत्ताकत्वस्यैव विवक्षणीयतया स्मृतिरूपत्वविशिष्टावभासत्वमेव लक्षणम् । अवभासपदेनात्रासत्ख्यातिनिराकरणमिति तु विशेष इति **कल्पतरुः** ।

परत्र पूर्वदृष्टावभासः । तं केचित्—अन्यत्रान्यधर्माध्यास—इति वदन्ति । केचित्तु यत्र यदध्यासस्तद्वि-

भामती ।

पपद्यते, प्रकाशमानत्वमेव हि चिदात्मनोऽपि सत्त्वं, न तु तदतिरिक्तं सत्तासामान्यसमवायः, अर्थक्रियाकारिता वा; द्वैतापत्तेः, सत्तायाश्चार्थक्रियाकारितायाश्च सत्तान्तरार्थक्रियाकारितान्तरकल्पनेऽनवस्थापातात्, प्रकाशमानतैव सत्ताभ्युपेतव्या । तथाच देहादयः, प्रकाशमानत्वान्नासन्तः, चिदात्मवत्; असत्त्वे वा न प्रकाशमानाः, तत्कथं सत्यानृतयोर्मिथुनीभावः, तदभावे वा कस्य कुतो भेदाग्रहः, तदसंभवे कुतोऽध्यास इत्याशयवान्—**आह** आक्षेप्ता—**कोऽयमध्यासो नाम ।** क इत्याक्षेपः । **समाधाता**—लोकसिद्धमध्यासलक्षणमाचक्षाण एवाक्षेपं प्रतिक्षिपति—**उच्यते—स्मृतिरूपः परत्र पूर्वदृष्टावभासः ।** अवसन्नोऽवमतो वा भासोऽवभासः । प्रत्ययान्तरबाधश्चास्यावसादोऽवमानो वा । एतावता मिथ्याज्ञानमित्युक्तं भवति । तस्येदमुपव्याख्यानम् '**पूर्वदृष्ट**—' इत्यादि । पूर्वदृष्टस्यावभासः पूर्वदृष्टावभासः । मिथ्याप्रत्ययश्चारोपविषयारोपणीयस्य मिथुनमन्तरेण न भवतीति पूर्वदृष्टग्रहणेनानृतमारोपणीयमुपस्थापयति । तस्य च दृष्टत्वमात्रमुपयुज्यते न वस्तुसत्तेति दृष्टग्रहणम् । तथापि वर्तमानं दृष्टं दर्शनं नारोपोपयोगीति **पूर्वेत्युक्तं** । तत्र पूर्वदृष्टं स्वरूपेण सदप्यारोपणीयतयानिर्वाच्यमित्यनृतम् । आरोपविषयं सत्यमाह—**परत्रेति । परत्र** शुक्तिकादौ परमार्थसति, तदनेन सत्यानृतमिथुनमुक्तम् । **स्यादेतत्**—परत्र पूर्वदृष्टावभास इत्यलक्षणम्; अतिव्यापकत्वात् । अस्ति हि स्वस्तिमत्यां गवि पूर्वदृष्टस्य गोत्वस्य परत्र कालाक्ष्यामवभासः, अस्ति च पाटलिपुत्रे पूर्वदृष्टस्य देवदत्तस्य परत्र माहिष्मत्यामवभासः समीचीनः । अवभासपदं च समीचीनेऽपि प्रत्यये प्रसिद्धम्, यथा

वेदान्तकल्पतरुः ।

ननु नात्यन्तासन् देहादिः, किंत्वनिर्वाच्यः; ततः प्रतीतिः किं न स्यात्, अत आह—**प्रकाशमानत्वमिति ।** अतिरिक्तसत्तामभ्युपगच्छन्तं प्रत्याह—**द्वैतेति ।** द्वैताभ्युपगमेऽप्याह—**सत्तायाश्चेति ।** आत्मन्यध्यासे आक्षिप्तेऽध्याससामान्यलक्षणकथा वृथेत्याशङ्क्याह—**लोकसिद्धमिति ।** पूर्वदृष्टग्रहणेनाक्षेपप्रतिक्षेपो भविष्यतीति भावः । अवभासपदस्यावयवार्थमादाय संक्षिप्तमध्यासलक्षणमाह—**अवसन्न इति ।** अवसाद उच्छेदः । अवमानो यौक्तिकतिरस्कारः । अवभासपदस्य रूढमर्थमादाय विस्तृतं लक्षणं भाष्यवाक्यार्थत्वेनाह—**तस्येति ।** परत्रेत्यादिपदैरसत्ख्यातिनिरासेन प्रपञ्चनमित्यर्थः । **स्वरूपेण सदपीति ।** अपिशब्देन स्वरूपेणासत्त्वमपि मरुमरीचिकोदकग्रन्थे वक्ष्याम इति सूचितम् । स्मृतिरूपविशेषणव्यावर्त्यमाह—**स्यादेतदित्यादिना ।** पूर्वदृष्टस्य परत्र तादात्म्यावभास इति धर्म्यध्यासमभिप्रेत्य लक्षणवाक्यार्थेऽतिव्याप्तिमाह—**स्वस्तिमत्यामिति ।** परत्र आश्रये परधर्मावभास इति धर्माध्यासं विवक्षित्वाह—**पाटलिपुत्रे इति ।** अवभासपदस्य रूढार्थग्रहणादतिव्याप्तिरुपपन्नेत्याह—**अवभासपदं चेति ।** 'सकृच्छ्रुतपदस्यार्थ-

कल्पतरुपरिमलः ।

प्रतीतिमङ्गीकृत्य भेदग्रहादध्यासाक्षेपः पूर्वं कृतः, इदानीं प्रतीतिविषयस्यानृतत्वमेव न युक्तमित्याक्षेप इति भेद इत्यर्थः । **प्रकाशमानत्वमितीति ।** प्रतीतिविषयत्वमित्यर्थः । असतः प्रतीतिविषयत्वं पूर्वपक्षी न मन्यते । **अध्याससामान्यलक्षणकथेति । ननु**—सामान्यलक्षणत्वे गोत्वादिप्रत्यभिज्ञापि द्वैतवस्त्ववभासत्वेन व्यावहारिकाध्यासरूपा तेन संग्राह्येति कथमग्रे तत्रातिव्याप्तिशङ्का । नच—सामान्यलक्षणत्वोक्तिरियं संक्षिप्तलक्षणविषया, विस्तृतलक्षणं तु प्रतिभासिकाध्यासमात्रविषयमिति तदतिव्याप्तिकथनं युज्यत इति—वाच्यम्; तस्योपव्याख्यानमिति टीकाग्रन्थेन तद्व्याख्यानेन च संक्षिप्तविस्तृतलक्षणयोरेकविषयत्वावगमात्, सन् घट इत्याद्यवभासे सत्यानृततादात्म्यावभासत्वे पर्यवसन्नस्य विस्तृतलक्षणस्य सत्त्वेनातिव्याप्त्यापत्तेश्चेति—**चेत्, सत्यम्;** स्मृतिप्रत्यभिज्ञातिव्याप्तिकथनं तयोरधिष्ठानसद्रूपब्रह्मतादात्म्यापन्नानृतवस्तुविषयतयैवाध्यासरूपत्वं, न तु समानसत्ताकजातिव्यक्तितादात्म्यविषयतयेति तेन रूपेण तयोरलक्ष्यत्वाभिप्रायम् । यदि जातिव्यक्तितादात्म्यविषयत्वांशे सत्यानृतमिथुनीकरणाभावेऽपि बाध्यत्वरूपसंक्षिप्तलक्षणानुगतिसद्भावात्, तत्र विस्तृतलक्षणेनापि भाव्यं, तदा **पूर्वदृष्टस्य परत्रावभास** इत्येतल्लक्षणं परमते गोत्वादिप्रत्यभिज्ञाया इव प्रमात्वेनाप्युपपद्यत इति तेन स्वाभिमताध्यासरूपत्वसिद्ध्यभावाभिप्रायं योज्यम् । एवमपि हि लक्षणदूषणमाकरग्रन्थेषु दृश्यते । यथा स्वश्चासौ प्रकाशश्चेति स्वप्रकाशनिर्वचनं ज्ञानस्य वेद्यत्वेऽप्युपपद्यते; स्वशब्दार्थस्य ज्ञानस्य परवेद्यत्वेऽपि प्रकाशत्वाक्षतेः । ब्रह्मभिन्नत्वं मिथ्यात्वमिति लक्षणं सत्यत्वेऽप्युपपद्यते; वियदादेः सत्यत्वपक्षेऽपि ब्रह्मभिन्नत्वाक्षतेरित्यादि । अस्मिन् दूषणेऽतिव्याप्तित्वव्यवहारश्च तत्र तत्र दृश्यते । **उच्छेदो** बाधकज्ञानोदयानन्तरं भ्रमवृत्त्यन्तरोत्पत्तिप्रतिबन्धः, स पीतशङ्खविभ्रमादिष्वव्याप्त इति तत्साधारणं पक्षान्तरमुक्तं टीकायां अवमतो वेति । तत्रावमानशब्दार्थमाह—**यौक्तिकेति । तिरस्कारः** इच्छाप्रवृत्त्यादिकार्याक्षमत्वापादनम् । **ननु** संक्षिप्तलक्षणेनैवेतरव्यावृत्तलक्ष्यव्यवहारसिद्धेः किं विस्तृतलक्षणेनेत्याशङ्क्य तत्प्रयोजनमाह—**परत्रेत्यादिपदैरिति ।** परत्रासंनिहितस्यावभास इति लक्षणवाक्यघटकपदैरित्यर्थः । **लक्षणवाक्यार्थेऽतिव्याप्तिमाहेति ।** एवं लक्षणवाक्यार्थे वर्ण्यमाने प्रत्यभिज्ञायामतिव्याप्तिमाहेत्यर्थः । **तादात्म्यावभास इति ।** धर्म्यध्यास-

भामती ।

नीलस्यावभासः पीतस्यावभास इत्यत आह—**स्मृतिरूप इति** । स्मृते रूपमिव रूपमस्येति स्मृतिरूपः । असंनिहि-

वेदान्तकल्पतरुः ।

द्वयक्लृप्तिर्न दुष्यति । संक्षिप्तविस्तृताध्यासलक्षणद्वयलाभतः ॥' एवंच मिथ्याज्ञानमध्यास इत्यवभासपदेन व्युत्पाद्य प्रत्य-भिज्ञायामतिव्याप्त्यभिधानं शोभतेतरामित्युपहासानवसरः । **ननु**—पूर्वदृष्टमारोपणीयमनृतमित्युक्तं, कथं तत्पदाङ्कितलक्ष-णस्य प्रत्यभिज्ञायामतिव्याप्तिः—**उच्यते;** स्मृतिरूपपदाभिधास्यमानाऽसंनिधानसिद्धवत्कारेण तदभिधानं, नतु पूर्वदृष्टपद-सामर्थ्येनेत्यदोषः । प्रत्यभिज्ञाया अपि संस्कारजत्वेनाव्यावृत्तिमाशङ्क्याह—**असंनिहितेति** । स्मृतिरूपपदेन चासंनिहितवि-षयत्वे विवक्षिते, तावति चोक्ते स्मृतावतिव्याप्तिस्तन्निवृत्तये परत्रेत्युक्तमित्यपि द्रष्टव्यम् । अनेनासंनिहितस्य परत्र प्रतीतिरध्यास इति लक्षणमुक्तम् । असंनिधानं चारोप्यस्याधिष्ठाने परमार्थतोऽसत्त्वं, न देशान्तरसत्त्वमिति नापराद्धान्तः । **'अथवाऽसंनि-**

कल्पतरुपरिमलः ।

लक्षणवाक्यार्थमभिप्रेत्यातिव्याप्तिमाहेति पाठो दृष्टश्चेदृजुः स पाठः । **असंनिधानसिद्धवत्कारेणेति** । असंनिधानम-धिष्ठाने परमार्थतोऽसत्त्वमिति वक्ष्यते, तेनानृतत्वलाभः । **एतेन**—टीकायां **परत्रेत्यस्य 'सत्ये'** इत्यर्थस्योक्तत्वात् स्मृतिरूपविशेषणरहितस्य **सत्ये पूर्वदृष्टस्यावभास इति लक्षणस्य** पूर्वं यस्यां गवि गोत्वं दृष्टं तस्यामेव गोत्वज्ञा-नेऽतिव्याप्तौ शङ्कितुं शक्यायामतिव्याप्त्यर्थं गोव्यक्त्यन्तरे गोत्वज्ञानस्यान्वेषणं व्यर्थमित्यपि शङ्का—**निरस्ता;** आरोप्यानृ-तत्वसमर्पकस्मृतिरूपपदसमभिव्याहारे हि परशब्दस्य तत्प्रतिद्वन्द्विसत्यार्थकत्वं लभ्यते, तदभावे तु पूर्वदृष्टपदसमभिव्याहा-रात् परशब्दः पूर्वदृष्टदेशादन्यदेशं बोधयेदित्यतिव्याप्त्यर्थं गोव्यक्त्यन्तरविषयगोत्वप्रत्यभिज्ञान्वेषणं युक्तमेवेति । **ननु**—स्मृतावतिव्याप्तिवारणार्थं परत्रेति विशेषणमित्ययुक्तम्; प्रत्यभिज्ञायामिव स्मृतावप्यतिव्याप्तेरतिव्याप्तिशब्दलक्षितायाः प्रमा-त्वेनान्यथासिद्धेर्वा स्मृतिरूपविशेषणेनैव वारणात्; तदर्थस्याधिष्ठाने परमार्थतोऽसत्त्वमिति निरुक्तस्याधिष्ठानसमसत्ताकत्वा-भावरूपस्य प्रत्यभिज्ञाविषयगोत्व इव तत्तायामप्यभावाद्, उभयोरपि गोव्यक्त्यन्तरस्मर्यमाणधर्मिरूपाधिष्ठानसमसत्ताकत्वाद्, अधिष्ठानसत्यत्वार्थकेन परत्रेत्यनेन स्मृतिव्यावर्तनासंभवाच्च, तत्राधिष्ठानस्य स्मर्यमाणस्याप्यप्रातिभासिकतया शुक्तिकादे-रिव सत्यशब्दार्थत्वादित्याशङ्क्याह—**स्मृतिरूपपदेन चेति** । यदि यथाश्रुतटीकानुसारात् स्मृतिरूपपदेनासंनिहितविष-यत्वमात्रं विवक्षितं, नत्वाचार्यैर्निर्वक्तव्यमधिष्ठानसमसत्ताकत्वरहितविषयत्वं, तदेयं स्मृतावतिव्याप्तिशङ्का परत्रेत्यनेन तन्निरासोऽपि भवति । अनृतोपस्थापकपदसमभिव्याहाराभावेन परशब्दस्य पूर्वदृष्टदेशान्यदेशपरत्वस्यासंनिहितसमभिव्याहा-रात् संनिहितपरत्वस्य वा प्राप्तेरिति भावः । एवंचापसिद्धान्तपरिहारार्थमसंनिहितत्वमधिष्ठाने परमार्थतोऽसत्त्वमित्यवश्यं विवक्षणीयत्वात्, तत एव प्रत्यभिज्ञाया इव स्मृतेरपि व्यावृत्तिसिद्धेः, **परत्रेति** विशेषणानपेक्षणेन लक्षणे तदनिवेशन-सूचनात्, शङ्कान्तरमपि व्यावर्तितं भवति । **तन्निवेशने हीत्थं शङ्का स्यात्—यदि** परशब्दः पूर्वदृष्टसमभिव्याहारात् पूर्वदृष्टदेशान्यदेशपरः, तदाहङ्काराध्यासाव्याप्तिः; तदधिष्ठानस्य साक्षिणः पूर्वदृष्टदेशत्वात्, रजताद्यध्यासाव्याप्तिश्च; तत्रा-ध्यसनीयस्य पूर्वदृष्टत्वाभावात् । **पूर्वदृष्टसजातीयत्वविवक्षायां** यथा कथंचित्साजात्यस्य सर्वत्र सत्त्वेन पूर्वदृष्टविशेषण-स्याव्यावर्तकत्वापत्तिः । **यद्धर्मावच्छेदेनावभासविषयत्वं तेन धर्मेण साजात्यविवक्षायां** गोव्यक्त्यन्तरे गोत्वस्य किंचिद्धर्मावच्छेदेनानवभासमानतया तत्प्रत्यभिज्ञायामतिव्याप्त्युक्तेरसामञ्जस्यापत्तिः । **यदि** त्वनृतोपस्थापकपद-समभिव्याहारात् परशब्दः सत्यार्थकः, तदा वियदादिविषयानुमितिशब्दज्ञानरूपव्यावहारिकाध्यासेष्वव्याप्तिः; तेषु प्रत्यक्षे-ष्वपि; सद्रूपाधिष्ठानब्रह्मस्फुरणाभावात् । देहादावनात्मन्यात्माध्यासे चाव्याप्तिः; तत्र स्वरूपतोऽप्यध्यस्तो देहादिः सत्यः, शबलितरूपमात्रेणाध्यस्त आत्मा त्वसत्य, इत्येवं सत्ये अनृतावभास इति लक्षणानुगमस्य कर्तुमयुक्तत्वात् । अध्याससंक्षि-प्तलक्षणक्रोडीकृतेषु विस्तृतलक्षणानुगत्यवश्यंभावश्च—इति ॥ तस्मादधिष्ठानासमसत्ताकस्यावभासोऽध्यास इत्येवानुगतं लक्षणम्' । यद्गतमवभास्यं तदधिष्ठानम् । तथाच गोत्वादिषु गोव्यक्त्यादिरूपाधिष्ठानसमसत्ताकत्वसद्भावेऽपि ब्रह्मरूपाधि-ष्ठानसमसत्ताकत्वसद्भावो नास्तीति लक्षणस्य न क्वाप्यध्यासे अननुगतिः । **एवं** परत्रेति विशेषणरहितमसंनिहितस्यावभास इत्येतावदेव लक्षणमित्याचार्यैरसंनिहितपदस्याधिष्ठाने परमार्थतोऽसत्त्वमित्यर्थविवक्षायां परत्रेति विशेषणस्य फलं नास्तीति सूचनेन, **अथवाऽसंनिधानेनेति** श्लोके असंनिधानावभासाभ्यामेव **परत्रेति** विशेषणनिरसनीयत्वेन टीकोक्ताया असत्ख्यातेरनभिमतसकलख्यात्यन्तराणां च निरसनेन च सूचितं टीकाकाराभिमतं परत्रेति विशेषणसहितं लक्षणं प्राक् प्रदर्शितम् । **इदानीं** तद्रहितलक्षणं स्वाभिमतमभिप्रेत्य तदनुप्रविष्टाभ्यामसंनिधानावभासाभ्यामेवानभिमतसकलख्यात्यन्तर-निरसनं क्रियत इति टीकाकारमतात् स्वमतस्य भेदं सूचयितुम् अथ वेत्युक्तिः । **अथवा** असंनिहितस्यावभास इत्येतावदेव लक्षणम् । तत्रासंनिधानेनासत्ख्यातिव्यतिरिक्ताख्यात्यादिसकलसत्ख्यातिवारणम्, अवभासेनासत्ख्यातिवारणमिति श्लो-कार्थः । भ्रमविषयरजतादिकं तादात्म्येन वा ताद्धर्म्येण वा यद्गतं तत् अधिष्ठानम् । तथाचाख्यात्यन्यथाख्यातिमतयोर्दे-

भामती।

तविषयत्वं च स्मृतिरूपत्वं, संनिहितविषयं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः। नाप्यव्याप्तिः; स्वप्नज्ञानस्यापि स्मृतिविभ्रमरूपस्यैवंरूपत्वात्। तत्रापि हि स्मर्यमाणे पित्रादौ निद्रोपप्लववशादसंनिधानापरामर्शे, तत्र तत्र

वेदान्तकल्पतरुः।

धानेन सत्ख्यातिरिह वारिता। अवभासादसत्ख्यातिर्नृशृङ्गे तददर्शनात्॥' इति। असंनिहितस्य परत्र प्रतीयमानस्य पूर्वदृष्टत्वेऽर्थसिद्धेऽपि पुनर्ग्रहणं पूर्वप्रमितत्वव्यावर्तनफलमित्युक्तमेव। स्वप्नज्ञाने प्रमाणयोग्यशुक्त्याद्यधिष्ठानाभावात्परत्रेति विशेषणाव्याप्तिमाशङ्क्याह—**नापीति**। स्मृतौ विभ्रमः स्मृतिविभ्रमः, स्मर्यमाणे स्मर्यमाणरूपान्तरारोप इति यावत्। अनुभूयमाने पित्रादौ यत्संनिहितत्वं पूर्वदृष्टं तदिहारोप्यम्। अन्यार्थं लक्षणविशेषणतयोक्तपूर्वदृष्टत्वस्य गृह्यमाणविषयत्वेन प्रसिद्धभ्रमेष्वव्या-

कल्पतरुपरिमलः।

शान्तरस्थमधिष्ठानम्, आत्मख्यातिमते ज्ञानम्, सत्ख्यातिमते पुरोवर्ति शुक्त्यादिकम्, अस्मिन्मतचतुष्टयेऽपि सदेव रजतादिकं तत्तदधिष्ठानसमसत्ताकमित्यसंनिधानविशेषणेन चतुर्विधाप्येषासत्ख्यातिर्वार्यत इत्यर्थः। **अवभासाद्** इत्यस्यापरोक्षावभासादित्यर्थः। अतएवाह—**नृशृङ्गे तददर्शनादिति**। नृशृङ्गेपि हि परोक्षावभासः प्रागाचार्यैरङ्गीकृतः। यद्यप्याप-रोक्ष्यं न लक्षणानुप्रविष्टं; तथापि रजताध्यासे लक्षणानुगतौ क्रियमाणायां तत्र लक्षणस्थमवभासपदं वस्तुतोऽपरोक्षावभासे पर्यवस्यदापरोक्ष्यस्फुरणनियतमिति तल्लाभः। **इदं त्ववधेयम्**—शुक्तावसद्रजतं भासत इति सदुपरक्तासत्ख्यातेरपरोक्षावभासेन निरासः शून्यवाद्यभिमतनिरधिष्ठानासत्ख्यातेस्त्वसंनिधानेनापि निरासः; तदर्थस्य स्वाधिष्ठानेन समसत्ताकत्वाभावस्यासति स्वाधिष्ठानाप्रसिद्धौ निरूपयितुमशक्यत्वात्, एवंच सिद्धान्त्यभिमता शशशृङ्गादिशब्दजन्या असत्प्रतीतिः न शुक्तिरजतादिज्ञानवदध्यासो, नापि घटादिज्ञानवत्प्रमा, किंतूभयविलक्षणं ज्ञानमात्रमिति॥ पूर्वदृष्टग्रहणं तु न ख्यात्यन्तरनिरासार्थं, पूर्वदृष्टिसद्भावप्रतिपादनार्थं वा; रजतविभ्रमादिषु पूर्वदृष्टचपेक्षायाः सर्वसंप्रतिपन्नत्वात्, किंतु टीकोक्तप्रयोजनमात्रार्थमित्याह—**असंनिहितस्येति**। पूर्वप्रमितत्वशब्देन पूर्वप्रमितत्वसहचरिता सत्ता लक्ष्यते, आक्षेपभाष्यटीकानुसारात्। **स्वप्नज्ञाने इति**। स्वप्नः प्रातिभासिकविभ्रम इति न तत्रात्माधिष्ठानं; पारमार्थिकाधिष्ठानत्वे वियदादिविभ्रमवद् व्यावहारिकाध्यासत्वापत्तेः, नच रजतविभ्रमादिषु शुक्तिकादिवत् तत्र व्यावहारिकमधिष्ठानमस्तीत्यव्याप्तिशङ्का। **अनुभूयमाने इति**। प्रागनुभूयमाने पित्रादौ यत्संनिहितत्वमनुभूतं, तत्स्वप्ने तात्कालिकत्वेनानुभूयते; अतः पाकरक्ते घटे इदानीं श्याम इति प्रत्ययवत् स्वप्नस्य विभ्रमत्वमिति भावः। नैयायिकमतेनायमव्याप्तिपरिहारः। स्वमते तु स्वप्नदृष्टः पित्रादिः स्वरूपत एव प्रातिभासिकः, तस्यात्माधिष्ठानम्। नच तावता व्यावहारिकत्वापत्तिः; अप्रयोजकत्वात्, साक्षिण्यध्यस्तानामविद्यान्तःकरणतद्धर्मादीनां यावत्सत्त्वं प्रतिभासमानानां प्रातिभासिकत्वाभ्युपगमाच्च। तदेतत्, **आत्मनि चैवं विचित्राश्च हीति** (ब्र. २।१।२८) सूत्रव्याख्यानेन स्फुटं भविष्यतीत्यत्र नोद्घाटितं टीकायाम्। पीतशङ्खविभ्रमादिस्थले संनिकृष्टपित्तपीतिमादिविशिष्टशङ्खादिविषयम् अध्यासरूपमेव ज्ञानं जायते, न तत्रारोप्यस्य पीतिमादेः पूर्वदर्शनमस्ति। नच—तत्र कनकादिषु पीतिमानुभवरूपं पूर्वदर्शनमस्तीति—वाच्यम्; अननुभूतपीतवर्णस्य पित्तोपहतनयनस्य पुंसः प्रथमं पीतशङ्खविभ्रमात्मके एव जायमाने पीतिमानुभवे तदसंभवादित्याशङ्क्य तत्रापि पूर्वदर्शनसद्भावः समर्थ्यते। इदं किमर्थं तस्य लक्षणाननुप्रविष्टत्वेन तदभावेऽपि लक्षणाव्याप्त्यप्रसक्तेरित्याशङ्क्यावतारयति—**अन्यार्थमिति**। अध्यासेषु पूर्वदृष्टिमात्रमपेक्ष्यते, नतु सत्तेत्यध्यसनीयसत्तानिराकरणार्थं तेषु पूर्वदृष्टिः सार्वत्रिकी व्यवहृता; तत्सार्वत्रिकत्वाभ्युपगमो न युक्त इत्याशङ्क्य परिहरतीत्यर्थः। टीकायां पीतशङ्खविभ्रमस्थले तदानीन्तनं नयनरश्मिगतपित्तपीतिमानुभवरूपं प्राचीनं तपनीयपिण्डादिगतपीतिमानुभवरूपं च पूर्वदर्शनमस्तीति समर्थितम्। तत्राद्यपक्षो न युक्तः; नयनरश्मिभिर्निर्गत्य शङ्खमावृण्वतः पित्तद्रव्यस्य पीतिमानुभूयत इत्यङ्गीकारे कनकलिप्तशङ्ख इव अन्येषामपि पीतशङ्खविभ्रमप्रसङ्गात्, शङ्खनयनान्तरालवर्तिरश्मिगतपित्तपीतिमानुभूयत इत्यङ्गीकारेऽन्तरालदेशेऽन्येषामपि तद्ग्रहणप्रसङ्गात्। अतोऽतीन्द्रियनयनरश्मिगतपित्तपीतिम्नो नानुभवः संभवतीत्यस्वारस्यात्प्राचीनानुभवपक्ष उपन्यस्त इत्येतत्सूचयति—**गृह्यमाणविषयत्वेन प्रसिद्धभ्रमेष्विति**। गृह्यमाणविषयतया तार्किकप्रसिद्धिमात्रं, वस्तुतः पीतशङ्खविभ्रमो न तथेति भावः। नच—तस्य गृह्यमाणारोपत्वाभावे स्मर्यमाणारोपत्वं वक्तव्यं, नतु तद्युज्यते; स्मरणस्यानियततया कदाचित्पित्तोपहतनयनस्य पीतिमस्मृत्यनुदये श्वेतः शङ्ख इत्यनुभवप्रसङ्गाद्, इति—वाच्यम्; अतिधवलसिकतातलप्रवहदच्छनदीजलनैल्याध्यासे नीलिम्न इवात्रापि पीतिम्नः स्मृतिनियमकल्पनोपपत्तेः। पूर्वानुभवजन्यसंस्कारमात्रेण नैल्याध्याससमर्थनेऽस्विहापि तथास्तु। अननुभूतपीतवर्णस्य पीतशङ्खविभ्रमे तु जन्मान्तरानुभूतपीतिमस्मरणमुपासनीयम्। एतद्दृशेषु जन्मान्तरानुभूतस्मरणं गतिरिति व्युत्पादयितुमेव पञ्चपादिकायां शिशोः स्तन्ये तिक्तताध्यासो जन्मान्तरानुभूततिक्तरसस्मरणकृत इत्युक्तम्। इत्थं पीतशङ्खविभ्रमो नानुभूयमानारोप इति मतानुसारेण व्याख्यातम्। ये तु नयनरश्मिगतपित्तपीतिम्नोऽनुभवमङ्गीकृत्यानुभूयमानारोपः स इति

भामती ।

पूर्वदृष्टस्यैव संनिहितदेशकालत्वस्य समारोपः । एवं पीतः शङ्खस्तिक्तो गुड इत्यत्राप्येतल्लक्षणं योजनीयम् । **तथाहि—** बहिर्विनिर्गच्छदत्यच्छनयनरश्मिसंपृक्तपित्तद्रव्यवर्तिनीं पीततां पित्तरहितामनुभवन्, शङ्खं च दोषाच्छादितशुक्लिमान-मनुभवन्, पीततायाश्च शङ्खासंबन्धमननुभवन्, असंबन्धाग्रहणसारूप्येण पीतं तपनीयपिण्डं पीतं बिल्वफलमित्यादौ पूर्वदृष्टं सामानाधिकरण्यं पीतत्वशङ्खयोरारोप्याह पीतः शङ्ख इति । **एतेन** तिक्तो गुड इति प्रत्ययो **व्याख्यातः** । एवं विज्ञातृपुरुषाभिमुखेष्वादर्शोदकादिषु स्वच्छेषु चाक्षुषं तेजो लग्नमपि बलीयसा सौर्येण तेजसा प्रतिस्रोतः प्रवर्तितं मुखसंयुक्तं मुखं ग्राहयत्, दोषवशात्तद्देशतामनभिमुखतां च मुखस्याग्राहयत्, पूर्वदृष्टाभिमुखादर्शोदकदेशता-माभिमुख्यं च मुखस्यारोपयतीति प्रतिबिम्बविभ्रमोऽपि लक्षितो भवति । **एतेन** द्विचन्द्रदिङ्मोहालातचक्रगन्धर्वनगर-वंशोरगादिविभ्रमेष्वपि यथासंभवं लक्षणं **योजनीयम्** । **एतदुक्तं भवति**—न प्रकाशमानतामात्रं सत्त्वं, येन देहेन्द्रियादेः प्रकाशमानतया सद्भावो भवेत् । नहि सर्पादिभावेन रज्ज्वादयो वा स्फटिकादयो वा रक्तादिगुणयोगिनो

वेदान्तकल्पतरुः ।

प्तिमाशङ्क्याह—**एवमिति** । अत्र पीतिमशङ्खयोरेकैकशोऽनुभवकाले दृष्टपीतिम्नः पश्चाच्छङ्खे समारोप इति वक्तव्ये, न रूपमारोप्यं, किंतु सामानाधिकरण्यमित्याशङ्क्य तस्यापि पूर्वदृष्टत्वमाह—**तथाहीति** । पीतिमतपनीययोः संसर्गग्रहेणा-संसर्गो न गृह्यते, तथा पीतत्वशङ्खयोरपीति सारूप्यम् । आदर्शादिष्वारोप्यमुखस्य स्वचक्षुषा पूर्वदृष्टत्वाभावादव्याप्तिमा-शङ्क्याह—**एवमिति** । पूर्वदृष्टयोरभिमुखयोरादर्शोदकयोर्देश एव देशो यस्य तस्य भावः तत्ता । तयोरेवाभिमुख्यं चेत्यर्थः ।

कल्पतरुपरिमलः ।

मन्यन्ते, तन्मते तु पित्तपीतिम्नोऽनुभवोपन्यास आरोपार्थः । तपनीयपिण्डादिगतपीतिमप्राचीनानुभवोपन्यासस्तु पूर्वदृष्टपदयथाश्रुतार्थस्वारस्यलाभार्थ इति योज्यम्' । टीकायां सामानाधिकरण्यं पीतिमतादात्म्यमेव, नतु पीति-मसामानाधिकरण्यम् । तदेतत् टीकायां नयनरश्मिगतपित्तपीतिममात्रानुभवस्य शङ्खे पीतिमाऽसंसर्गाग्रहस्य पीतः शङ्ख इति विभ्रमाकारस्य चोपन्यासेन स्पष्टमित्यभिप्रेत्य तथा न व्याख्यातम् । एवंच सति टीकायां पूर्वदृष्टं सामानाधिकरण्यं पीतत्वशङ्खयोरारोप्याहेति युक्ततरः पाठः, नतु पीतत्वशङ्खत्वयोरारोप्याहेति पाठः । **यद्वा** पीतिमशङ्खत्व-योस्तादात्म्यसंबन्धेन शङ्खवर्तित्वे शङ्खगतैकत्वे च भासमाने तयोः सामानाधिकरण्यमपि संसर्गमर्यादया भासत इत्यभिप्रायः स पाठः । अतएव पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरनुमानफलमिति तार्किका अपि वदन्ति ॥ **पीतत्व-शङ्खयोरिति** । अत्र सारूप्यमित्यनेन पीतिमतादात्म्यप्रतीतावन्यत्र संप्रतिपन्नकारणसाम्यमुक्तं, नतु तचाकचक्या-दिवद् भ्रमहेतुदोषरूपं सादृश्यम् । अयं चासंसर्गाग्रहरूपकारणसद्भावः प्रायिकतयोक्तः । अयं शङ्खः पीतो न भवति शङ्खत्वादितरशङ्खवदित्यानुमानिकपीतिमासंसर्गग्रहे सत्यपि पित्तोपहतिदोषप्राबल्यात् पीतशङ्खविभ्रमोऽवश्यं भव-त्येव । **अव्याप्तिमाशङ्क्याहेति** । अव्याप्तिरित्याशङ्क्याहेत्यर्थः । आदर्शादिकमधिष्ठानमिति हि पूर्वपक्षिशङ्कामात्रं, सिद्धान्ते तु मुखमेवाधिष्ठानमिति वक्ष्यते । **अत इत्थं व्याख्या—पूर्वदृष्टाभिमुखादर्शोदकदेशतामिति टीकायां**—पूर्वदृष्टत्वमादर्शोदकदेशताया न विशेषणम्; आदर्शे मुखमिति प्रतीतौ संसर्गविधया प्रतीयमानाया-स्तस्याः शुक्तिरजततादात्म्यस्येव पूर्वदृष्टयनपेक्षणात् । **पीतं बिल्वफलमित्यादौ पूर्वदृष्टं सामानाधिकरण्यम्, पीतत्वशङ्खयोरारोप्याहेति** टीकायां पीतिमतादात्म्यस्यापि पूर्वदर्शनं संभवमात्रेणोपन्यस्तम् । अतएव पित्त-पीतिमानुभवरूपपूर्वदर्शनसमर्थने तन्नोक्तम् । तस्मादधिकरणत्वेन मुखविशेषणतयाऽऽरोप्ययोरादर्शोदकयोरेव तद्वि-शेषणमित्यभिप्रेत्य विगृह्णाति—**पूर्वदृष्टयोरिति । ननु** यत्र पूर्वमदृष्टयोरादर्शोदकयोः प्रतिबिम्बविभ्रमः, तत्र कथं पूर्वदृष्टविशेषणं, **तत्रापि** प्रथमसंनिकृष्टादर्शोदकदर्शने जाते पश्चात् परावर्तितेन चाक्षुषेण तेजसा मुखसंनिकृष्टेन मुख-ग्रहणे सति तस्मिन् प्रतिबिम्बविभ्रमो जायत इति तदुपपत्तिः । **ननु**—यदीन्द्रियसंनिकृष्टम् अनुभूयमानादर्शोदकमधि-करणत्वेन मुखे समारोप्यत इतीष्यते, तदान्यथाख्यात्यापत्तिः; रजतवदनिर्वचनीयस्यादर्शान्तरस्य मुखान्तरस्य वोत्पत्त्यनङ्गी-कारात्—**इति चेद्, न**; तत्रादर्शमुखयोराधाराधेयभावस्यानिर्वचनीयस्योत्पत्त्यान्यथाख्यातिवैषम्यात् । अन्यथा अन्ये-ष्वनुभूयमानारोपेषु का गतिः । यद्यपि रक्तः पट इत्याद्यनुभवो महारजनादिसंबन्धात् पटे वर्णान्तरोत्पत्त्यापि समर्थयितुं शक्यः; दृष्टा हि हरिद्रासंबन्धात् चूर्णे रक्तिम्नः सलिलसंबन्धाद् भूतले नीलिम्नश्चोत्पत्तिः, तत्र हरिद्रासलिलवर्णवैलक्षण्याद् वर्णान्तरोत्पत्तिरिष्यते **चेदि**हापि तुल्यो न्यायः; रञ्जकद्रव्यसंबन्धे सति तद्वर्णविलक्षणस्यैव रञ्जकद्रव्यबहुत्वाल्पभावेनोत्कर्षाप-कर्षापन्नस्य वर्णस्य पटे दर्शनात्; तथापि चूर्णलिप्तशुक्लघटादिषु वर्णान्तरोत्पत्त्यभावात् तेषु शुक्लो घट इत्यादिरनुभूयमान-चूर्णशुक्लिमाद्यारोपरूप एव वाच्यः । टीकायां देशतामनभिमुखतां च मुखस्याग्राहयदिति क्वचित्संभवमात्रेणोक्तम् । **वस्तुतः** प्रतिबिम्बविभ्रमे विरोध्यग्रहणं नापेक्षितम्; तटस्थत्वोर्ध्वाग्रत्वादिना दृश्यमानेऽपि तरौ तटाकजलस्थत्वाधोग्रत्वा-

भामती।

न प्रतिभासन्ते, प्रतिभासमाना वा भवन्ति तदात्मानस्तद्धर्माणो वा। तथा सति मरुषु मरीचिचयं 'उच्चावचमुच्चलत्तुङ्गतरङ्गभङ्गमालेयमभ्यर्णमवतीर्णा मन्दाकिनी' इत्यभिसंधाय प्रवृत्तस्तत्तोयमापीयापि पिपासामुपशमयेत्। तस्मादकामेनाप्यारोपितस्य प्रकाशमानस्यापि न वस्तुसत्त्वमभ्युपगमनीयम्। नच—मरीचिरूपेण सलिलमवस्तुसत्, स्वरूपेण तु परमार्थसदेव, देहेन्द्रियादयस्तु स्वरूपेणाप्यसन्त इत्यनुभवागोचरत्वात्कथमारोप्यत इति—सांप्रतम्; यतो यद्यसन्तो नानुभवगोचराः, कथं तर्हि मरीच्यादीनामसतां तोयतयानुभवगोचरत्वम्, नच स्वरूपसत्त्वेन तोयात्मनापि सन्तो भवन्ति। **यद्युच्येत** नाभावो नाम भावादन्यः कश्चिदस्ति, अपितु भाव एव भावान्तरात्मनाऽभावः स्वरूपेण तु भावः, **यथाहुः**—'भावान्तरमभावो हि कयाचित्तु व्यपेक्षया' इति, **ततश्च** भावात्मनोपाख्येयतयास्य युज्येतानुभवगोचरता, प्रपञ्चस्य पुनरत्यन्तासतो निरस्तसमस्तसामर्थ्यस्य निस्तत्त्वस्य कुतोऽनुभवविषयभावः, कुतो वा चिदात्मन्यारोपः। नच—विषयस्य समस्तसामर्थ्यस्य विरहेऽपि ज्ञानमेव तत्तादृशं स्वप्रत्ययसामर्थ्यासादितादृष्टान्तसिद्धस्वभावभेदमुपजातमसतः प्रकाशनं, तस्मादसत्प्रकाशनशक्तिरेवाविद्येति—सांप्रतम्; यतो येयमसत्प्रकाशनशक्तिर्विज्ञानस्य किं पुनरस्याः शक्यं, असदिति चेत्, किं तत्कार्यमाहोस्विदस्या ज्ञाप्यम्। **न तावत्कार्यम्**; असतस्तत्त्वानुपपत्तेः। **नापि ज्ञाप्यं**; ज्ञानान्तरानुपलब्धेः, अनवस्थापाताच्च। विज्ञानस्वरूपमेवासतः प्रकाश इति चेत्, कः पुनरेष सदसतोः संबन्धः। असदधीननिरूपणत्वं सतो ज्ञानस्यासता संबन्ध इति चेत्, अहो बतायमतिनिर्वृतः प्रत्ययतपस्वी यस्यासत्यपि निरूपणमायतते, नच प्रत्ययस्तत्राधत्ते किंचित्, असत आधारत्वायोगात्। असदन्तरेण प्रत्ययो न प्रथत इति प्रत्ययस्यैवैष स्वभावो न त्वसदधीनमस्य किंचिदिति चेत्, अहो बतास्यासत्पक्षपातो यदयमतदुत्पत्तिरतदात्मा च तदविनाभावनियतः प्रत्यय इति। तस्मादत्यन्तासन्तः शरीरेन्द्रियादयो निस्तत्त्वा नानुभवविषया भवितुमर्ह-

वेदान्तकल्पतरुः।

शीघ्रं भ्रमितालातज्वालासु पूर्वदृष्टचक्राकारताया आरोपः। **अभ्रेषु** ग्रहादेः। मण्डूकवसाक्ताक्षग्राह्यवंशेषु वसावर्णेषु च पूर्वदृष्टोरगतद्वर्णसामानाधिकरण्यारोप इत्यर्थः। **तथा सतीति**। रज्वादीनां सर्पात्मत्वादेः सत्त्वे सतीत्यर्थः। उच्चलन्ती तुङ्गतरङ्गभङ्गानां तरङ्गावच्छेदानां माला यस्याः सा मन्दाकिनी तथा। **अभ्यर्णं** निकटम्। **मरीचीनां तोयात्मत्वं न सदित्युक्ते** यन्मरीचीनां तोयरूपेणासत्त्वं तन्मरीचय एवातो नाऽसत्ख्यातिरिति शङ्कते—**यद्युच्येतेति**। निरस्तसमस्तसामर्थ्यस्येत्यर्थक्रियाकारित्वसत्त्वायोग उक्तः। निस्तत्त्वस्येति स्वरूपसत्ताभावः। तद्द्वयमत्यन्तासत्त्वे हेतुः। अनिर्वचनीयमतं निरस्य शून्यमतं निरस्यति सद्वादी—**नच विषयस्येति**। **स्वप्रत्ययः** स्वसमानाकारः पूर्वप्रत्ययः। **अदृष्टान्तसिद्धः** असाधारणः। ज्ञानस्यापि पूर्वज्ञानाधीनत्वं सत्त्वमतो न क्वापि स्वरूपसत्त्वमित्यर्थः॥ **नन्व**विद्यया असत्प्रकाशनमिति बौद्धाः, तत्कथं विज्ञानमसत्प्रकाशनमत आह—**तस्मादिति**। **ज्ञानान्तरानुपलब्धेरिति**। शक्त्याश्रयत्वेनाभिमताज्ज्ञानाज्ज्ञानान्तरानुपलब्धेरित्यर्थः। उपलब्धौ वा तस्यापि ज्ञापकत्वेन ज्ञानान्तरापेक्षायामनवस्थापाताच्चेत्यर्थः। रति हि कस्मिंश्चित्कस्यचिदुपकारो भवति, प्रत्ययस्य निरूपणं त्वसत्यप्यायतते। नच स्वोपकारिण्यसति प्रत्युपकारं कंचित्करोति इत्यतोऽतिसुखी प्रत्यय इत्युपहासः। अनाधाने हेतुमाह—**असत इति**। असतः प्रत्ययप्रथनस्य चाविनाभावं संबन्धमाशङ्क्य निराचष्टे—**असदन्तरेणेति**। **अहो बतेति**। कार्यकारणभावः स्वभावश्च बौद्धाभिमतमविनाभावमूलमिह

कल्पतरुपरिमलः।

ध्यारोपदर्शनात्। वंशेषु वंशवर्णेषु चेति पाठः। वसावर्णेष्विति पाठस्तु चक्षुस्तेजसा सह पित्तद्रव्यवद्वसावयवस्य निर्गमेन कथंचिदुपपादनीयः। पूर्वदृष्टोरगतद्वर्णारोप इति पाठः। तद्वर्णसामानाधिकरण्यारोप इति पाठे तु सामानाधिकरण्यं तादात्म्यम्। **नासत्ख्यातिरिति शङ्कते इति**। **ननु**—न प्रकाशमानता सत्ता; मरीचिषु तोयात्मत्वस्यासतः प्रकाशादित्युक्ते कथं तेषु तोयानात्मत्वस्य सद्रूपत्वप्रतिपादनेनासत्ख्यात्यभावशङ्का—**सत्यम्**; इदमेव दूषण**मत्र ब्रूम** इत्यादिटीकया प्रतिपादयिष्यते। **ननु** स्फुटे वैयधिकरण्यदूषणे कथमनालम्बना शङ्का, व्यधिकरणोत्तरेणैव सत्ख्यातिवादनिर्वाह इत्युपहासार्थं तदीयशङ्कोद्भाविता। **पूर्वज्ञानाधीनत्वं सत्त्वमिति**। शून्यवादिमते ज्ञानस्याप्यसत्त्वात् तस्य पूर्वज्ञानाधीनत्वं यदस्ति, तत् परं सत्त्वमिति व्यपदिश्यते; अतोऽग्रिमटीकाग्रन्थे तन्मते ज्ञानविषययोः सदसत्त्वव्यवहारो न विरुद्ध इति भावः। **सति हि कस्मिंश्चिदिति**। तेनेति शेषः। **असत्यप्यायतते**। असदधीनमपि भवति। असतीति विषयसप्तमी। क्वचिदायतत इत्येतदनन्तरमभ्यातीति पदान्तरं दृष्टं तत्प्रामादिकम्। आयतत इत्यस्य आगमनार्थत्वाभावात्। असतः सकाशादायातीत्येतदर्थकं फलितार्थकथनपरं वा तद् द्रष्टव्यम्। **नच प्रत्यय** इति वाक्यस्यार्थमाह—**नच स्वोपकारिणीति**। **अतोऽतिसुखीति**। स्वयं कस्यचिदनुपकुर्वन्नेव तेनोपक्रियत इत्ययत्नलभ्योपकारोयमित्यतिसुखी-

भामती।

न्तीति ॥ **अत्र ब्रूमः**—निस्तत्त्वं चेन्नानुभवगोचरः, तत्किमिदानीं मरीचयोऽपि तोयात्मना सतत्त्वाः, यदनुभवगोचराः स्युः। न सतत्त्वाः; तदात्मना मरीचीनामसत्त्वात्। द्विविधं च वस्तूनां तत्त्वं सत्त्वमसत्त्वं च। तत्र पूर्वं स्वतः, परं तु परतः। **यथाहुः**—'स्वरूपपररूपाभ्यां नित्यं सदसदात्मके। वस्तुनि ज्ञायते किंचिद्रूपं कैश्चित्कदाचन॥' इति। तत्किं मरीचिषु तोयनिर्भासप्रत्ययस्तत्त्वगोचरः, तथाच समीचीन इति न भ्रान्तो नापि बाध्येत। अद्धा न बाध्येत, यदि मरीचीनतोयात्मतत्त्वानतोयात्मना गृह्णीयात्, तोयात्मना तु गृह्णन्कथमभ्रान्तः कथं वाऽबाध्यः। हन्त तोयाभावात्मनां मरीचीनां तोयभावात्मत्वं तावन्न सत्; तेषां तोयाभावादभेदेन तोयभावात्मतानुपपत्तेः। **नाप्यसत्**; वस्त्वन्तरमेव हि वस्त्वन्तरस्यासत्त्वमास्थीयते 'भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात्' इति वदद्भिः। नचारोपितं रूपं वस्त्वन्तरम्। तद्धि मरीचयो वा भवेत्, गङ्गादिगतं तोयं वा। **पूर्वस्मिन्कल्पे** मरीचय इति प्रत्ययः स्यान्न तोयमिति। **उत्तरस्मिंस्तु** गङ्गायां तोयमिति स्यात्, नपुनरिहेति। देशभेदास्मरणे तोयमिति स्यान्नपुनरिहेति। नच—इदमत्यन्तमसन्निरस्तसमस्तस्वरूपमलीकमेवास्त्विति—सांप्रतम्; तस्यानुभवगोचरत्वानुपपत्तेरित्युक्तमधस्तात्। तस्मान्न सत्; नापि सदसत्; परस्परविरोधादित्यनिर्वाच्यमेवारोपणीयं मरीचिषु तोयमास्थेयं, तदनेन क्रमेणाध्यस्तं तोयं परमार्थतोयमिव,

वेदान्तकल्पतरुः।

नास्तीत्यर्थः। एवं सदेव भातीति पूर्ववादिनोक्ते सिद्धान्त्याह—**अत्र ब्रूम इति**। पूर्वपक्ष्याह—**न सतत्त्वा इति**। तोयात्मनेत्यनुषङ्गः। अत्र हेतुमाह—**तदात्मनेति**। तदात्मनाऽसत्त्वस्य मयापीष्टत्वादित्यर्थः। तर्हि असत्ख्यातिः स्वीकृता, नेत्याह—**द्विविधं चेति**। तोयमपेक्ष्य ज्ञातं मरीचिरूपमेव तोयरूपेणासत्, तच्च भावरूपमिति नासत्ख्यातिरित्यर्थः। तोयरूपेणासत्त्वं मरीचिरूपमेव; तच्चाबाध्यं, तच्चेद्भ्रमगोचरः, तर्हि न भ्रमबाधप्रसिद्धिः स्यादित्युक्ते पूर्ववाद्याह—**अद्धेति**। बाढम्। मरीचीनामतोयात्मत्वं स्वरूपं तन्नथा भ्रमो न गृह्णाति, किंतु भावान्तरतोयात्मना मरीचींस्तोयाभावरूपान् गृह्णातीति भ्रमत्वमित्यर्थः। तोयाभावात्मकमरीचिरूपे यदारोपितं तोयत्वं तत्तत्र **सदसद्वेति** विकल्प्याद्यं **निरस्यति—हन्तेति**। **द्वितीये** तु किं **तुच्छमसत्सदन्तरं वा**। **नाद्यो**ऽपराद्धान्तात्। **न द्वितीय** इत्याह—**वस्त्वन्तरमेव हीति**। अस्मिन् हि भ्रमे मरीचयस्तोयं चेति द्वे वस्तुनी भासेते। तत्र मरीचितोयतादात्म्यं यदि वस्तु, तर्हि तोयाद्वस्तुनो वस्त्वन्तरभूता मरीचयो वा स्युर्मरीचिभ्यो वस्त्वन्तरं तोयं वा स्यान्नान्यत्। अन्यस्यास्मिन् भ्रमेऽनवभासनादुभयत्र दूषणमाह—**पूर्वस्मिन्नित्यादिना**। एवं सत्ख्यातिं निरस्यासत्ख्यातिनिरासमप्युक्तं स्मारयति—**नचेदमिति**। फलितमाह—**तस्मादिति**। एवं मरीचितोयतादात्म्यमनिर्वाच्यं प्रसाध्य सदेव भातीति नियममभाङ्क्षीत्। तथाच स्वरूपेणानिर्वाच्यमपि तोयं भ्रमेऽवभासितुमर्हतीति मुधामुष्य देशान्तरादौ सत्त्वकल्पनेत्याह—**तदनेनेति**। **नन्व**भिनवतो-

कल्पतरुपरिमलः।

त्युपहासः। तदात्मना न सतत्त्वा इति साध्ये हेतोः साध्याविशेषमाशङ्क्य, हेतुं विशिनष्टि—**तदात्मनाऽसत्त्वस्येति**। ममापीष्टत्वादिति सर्वसंप्रतिपत्त्यर्हः शुद्धः पाठः। **किं तुच्छमसत् सदन्तरं वेति**। असच्छब्दस्यालीकमर्थमभिप्रेत्याद्यो **विकल्पः**। अभावमर्थमभिप्रेत्य **द्वितीयो विकल्पः**। एवं हि टीकायां द्वितीयविकल्पविवरणे भावान्तरमभाव इति तन्मतप्रदर्शनं सङ्गच्छते। **असत्ख्यातिनिरासमिति**। **ननु** सत्ख्यातिवाद्युपन्यस्तोऽसत्ख्यातिवादनिरासो न सिद्धान्त्यनुमोदनार्हः—'अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति ही'ति सिद्धान्ते शाब्दासत्प्रतीत्यङ्गीकारात्, अनिर्वाच्यत्वनिर्वचनप्रविष्टासद्वैलक्षण्य इव असंज्ञानेऽप्यसन्निरूपितत्वोपपत्तेश्च—**इति चेत्, सत्यम्**; शब्दस्यासत्प्रतिपादनक्षमत्वेऽपीन्द्रियस्यासंनिकृष्टग्राहकत्वाभावादसंनिहितस्येव असतोपि नापरोक्षत्वमुपपद्यत इति तात्पर्यम्। **मुधाऽमुष्येति**। **ननु**—देशान्तरस्थरजतस्य भ्रमविषयत्वोपपत्तौ मुधाभिनवरजतकल्पनमिति विपरीतमेव वक्तुं युक्तम्, नच—असंनिहितापरोक्ष्ये संनिकर्षकारणाभावो दोषः; **ज्ञानस्य संनिकर्षत्वे** वह्न्यनुमितिस्थले प्रत्यक्षोदयप्रसङ्गात्, समाने विषये प्रत्यक्षसामग्र्या बलवत्त्वात्, **अलौकिकप्रत्यक्षसामग्र्यपेक्षयाऽनुमितिसामग्र्या बलवत्त्वे** संशयोत्तरभ्रमरूपपुरुषप्रत्यक्षस्थले अनुमितिप्रसङ्गात्; **तस्य संनिकर्षत्वाभ्युपगमेऽपि** यत्र यत्पूर्वमवगतं तस्मिन्नेव पुनर्दृश्यमाने तज्ज्ञानस्य, यदवच्छेदेन यत्पूर्वमवगतं तद्वत्त्वेन दृश्यमाने तज्ज्ञानस्य वा, तदुपनायकत्वेन पूर्वरजतत्ववत्त्वेन रजतत्वावच्छेदकवत्त्वेन वा अनवगते शुक्तिशकले रजतज्ञानस्य संनिकर्षत्वायोगाच्चेति—वाच्यम्; रजतान्तरोत्पत्तावपि संप्रतिपन्नरजतकारणाभावस्य तुल्यत्वात्। **तदभावेऽपि** दोषवशात् प्रसिद्धव्यावहारिकरजतविलक्षणं प्रातिभासिकं रजतमुत्पद्यत इति कल्प्यते **चेत्**, संनिकर्षाभावेऽपि दोषवशादसंनिहितरजतविषयं प्रसिद्धप्रमारूपज्ञानविलक्षणं भ्रमरूपज्ञानमुत्पद्यत इत्येव कल्प्यताम्; लाघवात् **इति चेत्, उच्यते**; अस्ति तावत्प्रतारकवाक्यात् 'शशस्य शृङ्गमस्ति' 'तदेवंलक्षणमरण्ये पतितमन्विष्य लब्धुं शक्यं' 'तेन चेदं प्रयोजनं भवतीत्येवंरूपादवाप्तमोहस्य तथैवारण्यं गत्वा तदन्वेषमाणस्योक्तलक्षणकाष्ठशृङ्गान्त-

भामती ।

अतएव पूर्वदृष्टमिव, तत्त्वतस्तु न तोयं नच पूर्वदृष्टं, किंत्वनृतमनिर्वाच्यम् । एवंच देहेन्द्रियादिप्रपञ्चोऽप्यनिर्वाच्यः, **अपूर्वोऽपि पूर्वमिथ्याप्रत्ययोपदर्शित इव परत्र चिदात्मन्यध्यस्यत** इति उपपन्नम्; अध्यासलक्षणयोगात् । देहेन्द्रियादि-

वेदान्तकल्पतरुः ।

यावभासाभ्युपगमे पूर्वदृष्टत्वं भाष्योक्तं विरुध्येत, तत्राह—**अतएवेति** । अभिनवत्वेऽप्यारोप्यस्य पूर्वदृष्टग्रहणमुपयुज्यते, आरोपणीयसमानमिथ्यावस्त्वन्तरोपदर्शकस्य पूर्वदर्शनसंस्कारद्वारेणोपयोगादिति । 'स्वरूपेण मरीच्यम्भो मृषा वाचस्पतेर्मतम् । अन्यथाख्यातिरिष्टास्येत्यन्यथा जगृहुर्जनाः ॥' **एवं** तावद्देहादिः, सन्, भासमानत्वादात्मवदित्यनुमानस्य मरीचिकोदकादावनेकान्ततोपपादनेन देहादेरनिर्वाच्यत्वमुक्तं; **संप्रत्यबा**धितत्वेन सोपाधिकतामाह—**देहेन्द्रियादीति** । अबाध्यत्वमात्मनः सत्त्वे उपाधिर्न प्रतिभासमानत्वम् । नच साधनव्याप्तिः; देहादिबाधस्य तत्र तत्र वक्ष्यमाणत्वादित्यर्थः । विपक्षस्य मरीचितोयादेः सत्त्वान्न पक्षेतरता । **ननु** प्रत्यक्षादिप्रमाणार्पितदेहादिः यदि मिथ्या, तर्हि आत्मनि को

कल्पतरुपरिमलः ।

रादिदर्शने शशशृङ्गमिदमित्यनुभवः, अस्ति च स्वप्ने मनुष्यपशुपक्षिवृक्षाद्यनेकरूपस्यैकस्यावयविनोऽनुभवः, नच तत्रासंनिहितविषयत्वं कल्पयितुं शक्यमित्यगत्या दोषवशात् प्रातिभासिकस्यैव तस्योत्पत्तिरङ्गीकरणीया; एवमन्यत्र भ्रमस्थले दोषस्य विषयोत्पत्तिकारणत्वक्लृप्तौ तथैव रजतभ्रमेऽपि संभवति। ज्ञानप्रत्यासत्त्याद्यजन्यरजतचाक्षुषप्रत्यक्षमात्रे क्लृप्तस्य रजतचक्षुःसंयोगस्य रजतालोकसंयोगस्य च कारणत्वं परित्यज्य तस्यासंनिहितरजतविषयत्वं न कल्पनीयम् । **ननु**—चैत्रादिव्यक्तिविशेषभ्रमस्य असंनिहितप्रसिद्धचैत्रादिविषयत्वम् अवश्यं कल्पनीयं; रजतसामान्यार्थिप्रवृत्तेः प्रातिभासिकरजतज्ञानादिव प्रसिद्धचैत्रोद्देश्यकप्रवृत्तेः प्रातिभासिकचैत्रज्ञानादुत्पत्त्यसंभवात्—**इति चेद्, न;** प्रातिभासिकरजतज्ञाने रजतत्वप्रकारत्वस्येव प्रातिभासिकचैत्रज्ञाने चैत्रत्वप्रकारकत्वस्य सत्त्वेनेष्टतावच्छेदकप्रकारकात्ततत्तदुद्देश्यकप्रवृत्त्युपपत्तेः । **ननु**—तदेवेदं रजतमिति व्यक्तिविशेषविषयप्रत्यभिज्ञारूपभ्रमस्य व्यवहितपूर्वदृष्टरजतविषयत्वम् अवश्यं कल्पनीयं, तद्रजतमिह केनानीतमित्यपि व्यवहारदर्शनात्—**इति चेद्, न;** तस्य व्यावहारिकरजतान्तर इव प्रातिभासिकरजतेऽपि दुष्टकरणसहकारिसंस्कारोपनीततत्ताविषयत्वोपपत्तेः । नचाभिनवरजतोत्पत्त्यङ्गीकारे जलबुद्बुदादेरिव तस्योत्पत्तिनाशानुभवप्रसङ्गः; भ्रमकाले तस्य प्राक्सिद्धपुरोवर्तितादात्म्येनानुभूयमानतयोत्पत्त्यप्रतीत्युपपत्तेः, बाधावतारे त्रैकालिकनिषेधस्यानुभूयमानतया नाशाप्रतीत्युपपत्तेश्च । नच क्वचिदुत्पद्य कंचित्कालं स्थितस्य तत्र त्रैकालिकनिषेधानुपपत्तिः; फलबलात् समानसत्ताकयोरेव प्रतियोगितदत्यन्ताभावयोर्विरोधः, नतु प्रातिभासिकव्यावहारिकयोरिति कल्पनोपपत्तेः । **एतेन**—यस्य प्रथमं शुक्तिशकले रजतभ्रमानन्तरं बाधो नोत्पन्नः, तत्र शुक्तिसाधारणचाकचक्यावच्छेदेन रजतत्वानुभवस्यानपोदितत्वात् पुनः शुक्तिशकलान्तरे रजतभ्रमोदयेऽन्यथाख्यातिः संभवति; तत्र यदवच्छेदेनेत्याद्युक्तरूपोपनयमानसामग्रीसत्त्वात्, पाकरक्ते घटे श्यामोऽयमिति भ्रमोदये चान्यथाख्यातिः संभवति; यत्र यदनुभूतमित्याद्युक्तरूपोपनयसामग्रीसत्त्वादित्यपि शङ्का—**निरस्ता;** क्वचिद्विभ्रमे देशघटितसामग्रीबलादाविद्यकविषयोत्पत्तिक्लृप्तावन्यत्रापि तदुत्पत्तेरनिवारणात्; पाकरक्ते स्मृत्युपनीतश्यामवर्णप्रत्यक्षस्य पूर्वानुभूतसौरभे पश्चाद् निखननादिना गतसौरभे चन्दनखण्डे सुरभीदं चन्दनखण्डमिति स्मृत्युपनीतसौरभविषयचाक्षुषप्रत्यक्षस्येव प्रमात्वाद्, इदानीं श्याम इति प्रत्यक्षभ्रमस्य विरोधिनि रक्तरूपे स्फुरत्यसंभवात्, श्याममृल्लिप्ते रक्तघटे इदानीं श्याम इति प्रत्यक्षभ्रमस्यानुभूयमानमृद्वर्णारोपलसंभवेन स्मृत्युपनीतविषयत्वस्याकल्पनीयत्वात् । **देहादिः सन्निति** । टीकायां शङ्काग्रन्थलिखितेऽनुमाने नासन्त इति साध्यं निर्दिष्टम् । **तत्रासत्त्वमलीकत्वं चेत्,** तद्व्यतिरेकसाधनमनिर्वचनीयत्ववादिनः सिद्धसाधनम्; असतः प्रतीत्यविषयत्वस्य सत्ख्यातिवाद्यभिमतत्वात्, साध्याप्रसिद्धिश्च । **अनिर्वचनीयत्वं चेत्,** अत्रापि साध्याप्रसिद्धिः; तस्य तन्मते शशशृङ्गायमानत्वादित्यभिप्रेत्य सदिति साध्यं निर्दिष्टम् । **ननु**—किमिह सत्त्वं साध्यं; प्राक् सद्वाद्युक्तं **प्रकाशमानत्वं चेत्,** हेतोः साध्याविशेषः । **स्वरूपसत्त्वं, सत्ता जातिः, अर्थक्रियाकारित्वम्,** इत्येतानि सिद्धसाधनग्रस्तानि । **अबाध्यत्वं त्वात्मनि** सत्त्वे प्रयोजकमित्युपाधित्वेन वक्ष्यते । प्रकाशमानत्वं च **भासमानत्वं चेत्,** असति प्रतिवादिगते न व्यभिचारः । **अपरोक्षतया भासमानत्वं चेत्,** आदिशब्दग्राह्येष्विन्द्रियेषु भागासिद्धिरिति—**चेत्, उच्यते;** प्रमाविषयत्वं ज्ञानानिवर्त्यत्वं वा सत्त्वमिह साध्यं; भासमानत्वसामान्यं हेतुः, सद्वादिना तस्यासति प्रत्याख्यातत्वात् प्रसाध्याङ्को हेतुरिति नात्र व्यभिचारशङ्का । यद्यपि **सिद्धान्तिना कृतं मरीचिकोदकस्यानिर्वचनीयत्वोपपादनं;** प्रकाशमानतैव न सत्ता मरीचिकोदकस्य प्रकाशमानत्वेऽपि सत्त्वाभावादिति, तयोर्व्यतिरेकप्रदर्शनेनाभेदनिरासार्थः **देहेन्द्रियादिबाध्यत्ववर्णनम्** 'प्रकाशमानत्वं सत्त्वं न भवति चेत्, किं तर्हि सत्त्वमित्याकाङ्क्षायामबाध्यत्वं सत्त्वमित्यभिप्रेत्य देहेन्द्रियादिषु तद्व्यतिरेकप्रदर्शनार्थं, देहेन्द्रियाद्यध्यासेष्वध्यासविस्तृतलक्षणानुगतिप्रदर्शनानन्तरं तत्संक्षिप्तलक्षणानुगतिप्रदर्शनार्थं चेति, व्याख्यातुं शक्यं;

भामती ।

प्रपञ्चोऽप्यनिर्वाच्यः, अपूर्वोऽपि पूर्वमिथ्याप्रत्ययोपदर्शित इव परत्र चिदात्मन्यध्यस्यत इति उपपन्नम्; अध्यासलक्षणयोगात्। देहेन्द्रियादिप्रपञ्चबाधनं चोपपादयिष्यते। चिदात्मा तु श्रुतिस्मृतीतिहासपुराणगोचरः तन्मूलतदविरुद्धन्यायनिर्णीतशुद्धबुद्धमुक्तस्वभावः सत्त्वेनैव निर्वाच्यः। अबाधिता स्वयंप्रकाशतैवास्य सत्ता, सा च स्वरूपमेव चिदात्मनः, नतु तदतिरिक्तं सत्तासामान्यसमवायोऽर्थक्रियाकारिता वेति सर्वमवदातम्। स चायमेवंलक्षणकोऽध्यासोऽनिर्वचनीयः सर्वेषामेव संमतः परीक्षकाणां, तद्भेदे परं विप्रतिपत्तिरित्यनिर्वचनीयतां द्रढयितुमाह—**तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति ।**

वेदान्तकल्पतरुः ।

विस्रम्भस्तत्राह—**चिदात्मा त्विति ।** तत्त्वावेदकप्रमाणप्रमितत्वादात्मनः सत्त्वं, न व्यावहारिकप्रमाणसिद्धदेहादेरिति वक्ष्याम इति भावः। **यदुक्त**माक्षेपवादिना प्रकाशमानत्वमेव चिदात्मनोऽपि सत्त्वमिति, तदपि विशेषाभ्युपगमेन परिहरति—**अबाधितेति ।** स्वयंप्रकाशत्वादबाधितमात्मनः सत्त्वं न दृश्यस्य देहादेः दृग्दृश्यसंबन्धानिरूपणादित्यर्थः। नच सत्तातद्वद्भेदादद्वैतहानिरित्याह—**सा चेति । यत्तु**—सत्तासमवायादेः सत्तालक्षणत्वमखण्डि,तदनुमोदते—**न त्विति । यत्तु—कश्चित्प्रललाप**—संसारस्यानृतत्ववचनं न तावद्ब्रह्मज्ञाननिबर्हणीयत्वाय; शास्त्रप्रामाण्यात् सत्यस्यापि ज्ञानान्निवृत्तेः, नच संसारिणोऽसंसारिब्रह्मैकत्वार्थम्; औपाधिकस्य संसारस्य सत्यस्याप्युपाधिनिवृत्त्या निवृत्तौ जीवस्य ब्रह्मैक्यसंभवात्—**इति । तन्न**; सत्यस्यात्मवदनिवृत्तेः। **यत्तु**—सामान्यतो दृष्टमनुमानं—ज्योतिष्टोमो, न स्वर्गफलः, क्रियात्वान्मर्दनवत्—**इति । तन्न**; तत्र स्वर्गोद्देशेन यागविधिना विरोधेन कालात्ययात्, अत्र तु सत्यः प्रपञ्चो ज्ञाननिवर्त्य इत्यागमाभावेन तदभावात्, प्रत्युत मिथ्यात्वस्य बन्धस्य ज्ञाननिवर्त्यत्वश्रुत्यर्थापत्तिसिद्धेः। **यदपि**—तार्क्ष्यध्यानादिना सत्यं विषादि नश्यति—**इति । तदपि न**; विषादेः सत्यत्वासिद्धेः, ध्यानस्य चाप्रमात्वेनादृष्टान्तत्वात्। सेतुदर्शनं च चोदितक्रियात्मनैवैनोनिबर्हकं, न प्रमित्यात्मना; पश्यतामपि सेतुं म्लेच्छानां श्रद्धाविरहिणां वा अघानुपघातात्, आत्मप्रमा तु दृष्टद्वारेण बन्धनिवर्तनी, न विधिद्वारा; तद्विधेः समन्वयसूत्रे (ब्रह्म. अ. १ पा. १ सू. ४) पराकरिष्यमाणत्वात्। **यत्तु**—उपाधिध्वंसात्संसारध्वंस—**इति । तन्न**; सत्योपाधेरारम्भणाद्यधिकरणे (ब्रह्म. अ. २ पा. १ सू. १४) वक्ष्यमाणनयेनासंभवात्, मिथ्योपाधिस्वीकारे चाविवादादिति। **नन्व**ध्यासलक्षणे मतान्तरोपन्यासो मतिसंवादाय, दूषणाय वा। **नाद्यः**; विप्रतिपत्तेः, **न द्वितीयः**; दूषणानभिधानादत आह—**स चायमिति ।** परत्र परावभास इत्युक्तलक्षणे सति संवाद एव क्रियते। एवंलक्षणकत्वं चाध्यासस्यानिर्वाच्यतयैवेति मरुमरीचिकोदकनिरूपणे दर्शितम्। विप्रतिपत्तिस्त्वधिष्ठानारोप्यविशेषविषयेत्यर्थः। **अन्यत्रान्यधर्माध्यास इति भाष्यं** धर्मग्रहणेन बुद्ध्याकारत्वसूचनादा-

कल्पतरुपरिमलः ।

तथापि तद्व्याख्यानं सष्टमिति मत्वा पूर्वपक्ष्याशयस्थमनुमानमुद्भाव्य तत्र व्यभिचारोपाधिप्रदर्शनार्थत्वेन सैद्धान्तिकमिदं ग्रन्थद्वयं व्याख्यातम्। **स्वयंप्रकाशित्वादिति ।** स्वयंप्रकाशमात्मनः स्वरूपं केनापि बाधितुं न शक्यम्; अन्ततो बाधसाक्षिण एव स्वयंप्रकाशमानस्यात्मत्वपर्यवसानादिति भावः। **दृग्दृश्येति ।** दृश्याध्यस्तत्वं विना दृशा दृश्यस्य संबन्धान्तरानिरूपणादित्यर्थः। **सत्यस्यात्मवदिति । विषादेरिति । ननु** सर्वः प्रपञ्चो मिथ्येति त्वन्मते विषस्य सत्यत्वासिद्धिरस्तु नाम; तथापि विषस्य मिथ्यात्वं न तार्क्ष्यध्याननिवर्त्यत्वप्रयुक्तं त्वयेष्यते, किंतु प्रपञ्चमिथ्यात्वसाधकप्रमाणान्तरप्रयुक्तमिष्यते; तथाच तार्क्ष्यध्याननिवर्त्यत्वं विषस्येव ब्रह्मज्ञाननिवर्त्यत्वं संसारस्य मिथ्यात्वे प्रयोजकं न स्यादित्याशङ्क्याह—**ध्यानस्य चेति ।** ब्रह्मज्ञानं हि परीक्षितप्रमाणमूलकं प्रमारूपमेव संसारनिवर्तकम्; 'वेदान्तविज्ञानसुनिश्चितार्थाः' इत्यादिश्रुतेः, ब्रह्मविद्योपक्रमाम्नातगुरुशिष्यनिबन्धवदुपाख्यानगतयावत्संशयनिवृत्तिप्रश्नोपदेशतत्तदुपपत्त्युपन्यासलिङ्गाच्च, तत्प्रमात्वस्थिरीकरणापेक्षिताऽसंभावनादिनिवृत्त्यर्थप्राप्तश्रवणमननध्यानानुवादलिङ्गाच्च। तार्क्ष्यध्यानस्य तु कल्पिताकल्पितसाधारणयथोपदिष्टार्थविषयस्य विषनिवर्तकत्वे प्रमात्वं नापेक्षितमित्यर्थः। **ननु** सेतुदर्शनं प्रमारूपमेवाघनिवर्तकम्; अन्यत्र सेतुभ्रमेण तदनिवृत्तेः, अतः प्रमात्वापेक्षमपि निवर्त्यत्वं न मिथ्यात्वप्रयोजकमित्याशङ्क्याह—**सेतुदर्शनं चेति ।** यद्विषयप्रमात्वमात्रं यन्निवर्तकताप्रयोजकं तत् तत्राध्यस्तमिति नियमस्य न व्यभिचार इत्यर्थः। यद्यपि शुक्तौ रजताध्यासस्य रङ्गाध्यासेनापि निवृत्तिरस्ति; तथापि समूलसकलाध्यासनिवृत्तिरधिष्ठानप्रमापेक्षा, तदन्यानपेक्षा च **दृष्टा; तन्न्याय** इहापि ग्राह्य इति भावः। **ननु** सेतुदर्शनवद् विध्यायत्तं ब्रह्मज्ञानस्य निवर्तकत्वं, न शुक्तिज्ञानवदधिष्ठानप्रमात्वायत्तम् इत्याशङ्क्याह—**आत्मप्रमात्विति ।** विरोधिविषयतया दृष्टद्वारेणाज्ञाननिवृत्तिर्ज्ञानोदयानन्तरमेव भवन्ती निवर्तकज्ञानसमानकाला भवतीति शुक्तिज्ञानजन्यरजतनिवृत्तौ दृष्टं, तद्वदिहापि 'ब्रह्म वेद ब्रह्मैव भवती'त्यादिश्रुतिषु ब्रह्मवेदननिवृत्तसंसारब्रह्मभावापत्त्योर्लडाख्याताभ्यां समानकालता प्रतिपाद्यते। नच 'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ती'त्यत्र सत्रानुष्ठानप्रतिष्ठाफलयौगपद्यप्रत्यायकलडाख्यातयोरिवान्यथानयने कारणं किंचिद्बाधकमस्ति। तस्माद्ब्रह्मज्ञानं

भामती ।

अन्यधर्मस्य, ज्ञानधर्मस्य रजतस्य । ज्ञानाकारस्येति यावत् । **अध्यासोऽन्यत्र** बाह्ये । सौत्रान्तिकनये तावद्बाह्यमस्ति वस्तु सत्, तत्र ज्ञानाकारस्यारोपः । विज्ञानवादिनामपि यद्यपि न बाह्यं वस्तु सत्; तथाप्यनाद्यविद्यावासनारोपितमलीकं बाह्यम्, तत्र ज्ञानाकारस्यारोपः । उपपत्तिश्च यद्यादृशमनुभवसिद्धं रूपं तत्तादृशमेवाभ्युपेतव्यमित्युत्सर्गः; अन्यथात्वं पुनरस्य बलवद्बाधकप्रत्ययवशात्, नेदं रजतमिति च बाधस्येदन्तामात्रबाधेनोपपत्तौ न रजतगोचरतोचिता; रजतस्य धर्मिणो बाधे हि रजतं च तस्य च धर्म इदन्ता बाधिते भवेताम्, तद्वरमिदन्तैवास्य धर्मो बाध्यतां न पुना रजतमपि धर्मि । तथाच रजतं बहिर्बाधितमर्थादान्तरे ज्ञाने व्यवतिष्ठत इति ज्ञानाकारस्य बहिरध्यासः सिध्यति । **केचित्तु**—ज्ञानाकारख्यातावपरितुष्यन्तो वदन्ति—**यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रम इति । अपरितोषकारणं चाहुः**—विज्ञानाकारता रजतादेरनुभवाद्वा व्यवस्थाप्येतानुमानाद्वा । तत्रानुमानमुपरिष्टान्निराकरिष्यते । अनुभवोऽपि रजतप्रत्ययो वा स्यात्, बाधकप्रत्ययो वा । **न तावद्रजतानुभवः**; स हीदंकारास्पदं रजतमावेदयति, न त्वान्तरम्, अहमिति हि तदा स्यात्, प्रतिपत्तुः प्रत्ययादव्यतिरेकात् । भ्रान्तं विज्ञानं स्वाकारमेव बाह्यतयाऽध्यवस्यति । तथाच नाहंकारास्पदमस्य गोचरः । ज्ञानाकारता पुनरस्य बाधकप्रत्ययप्रवेदनीयेति चेत्, हन्त बाधकप्रत्ययमालोचयत्वायुष्मान् । किं पुरोवर्ति द्रव्यं रजताद्विवेचयति, आहो ज्ञानाकारतामप्यस्य दर्शयति । तत्र ज्ञानाकारतोपदर्शनव्यापारं बाधकप्रत्ययस्य ब्रुवाणः श्लाघनीयप्रज्ञो देवानांप्रियः । **पुरोवर्तित्वप्रतिषेधादर्थादस्य ज्ञानाकारतेति** चेन्न; असंनिधानाग्रहनिषेधादसंनिहितो भवति प्रतिपत्तुः, अत्यन्तसंनिधानं त्वस्य प्रतिपत्त्रात्मकं कुतस्त्यम् । नचैष रजतस्य निषेधः, नचेदन्तायाः, किंतु विवेकाग्रहप्रसञ्जितस्य रजतमेव रजतव्यवहारस्य । नच रजतमेव शुक्तिकायां प्रसञ्जितं रजतज्ञानेन । नहि

वेदान्तकल्पतरुः ।

त्मख्यात्यनुवादार्थम् । तत्र बौद्धानां मतभेदेन भ्रमाधिष्ठानविशेषमाह—**सौत्रान्तिकनये इति** । यद्यपि सौत्रान्तिकस्य वैभाषिकवदर्थो न प्रत्यक्षः; तथापि ज्ञानगतार्थसारूप्येणानुनीयमानत्वादस्ति तावदधिष्ठानम्, आरोप्यं तु ज्ञानाकार एव; भ्रान्तिज्ञानाकारसदृशस्य बाह्यार्थस्याभावादित्यर्थः । सहोपलम्भनियमादित्याद्यनुमानमुपरिष्टाद्बौद्धाधिकरणे (ब्रह्म. अ. २ पा. २ सू. २८) निराकरिष्यत इत्यर्थः । **प्रतिपत्तुः प्रत्ययादिति** । समानाधिकरणे पञ्चम्यौ । ज्ञानात्मकात्प्रतिपत्तुरित्यर्थः । **वस्तु**तस्त्वहमुल्लेखयोग्यरजतस्य भ्रमादिदन्तया प्रतीतिरिति शङ्कते—**भ्रान्तमिति** । भ्रान्तिरूपविकल्पस्य हि स्वरूपमविकल्पकं ग्राह्यं, तदेव बाह्यत्वेन सविकल्पकत्वेनाध्यवसेयमित्यर्थः । सिद्धे ज्ञानाकारत्वे एवं कल्पेत, तदेव कुतस्तत्राह—**ज्ञानाकारतेति** । प्रागुक्तन्यायात्प्रवेदनीयेत्यर्थः । बाधकप्रत्ययः किं साक्षाज्ज्ञानाकारतां दर्शयति, अर्थाद्वेति विकल्प्याद्यमनुभवविरोधेन निरस्य **द्वितीयं** शङ्कते—**पुरोवर्तित्वेति** । इदन्ताप्रतिषेधोऽनिदन्तां गमयेत्स च देशान्तरादिसत्त्वेऽपि स्यादित्यन्यथोपपत्तिमाह—**असंनिधानेति** । अख्यातिमते हि रजतस्यासंनिधानाग्रहः संनिहितत्वेन व्यवहारहेतुत्वाद्भ्रमः । तन्निषेधोऽसंनिधानग्रहरूपो बाधः; प्रागभावनिवृत्तिरूपत्वाद्भावस्य । तस्मादारोप्योऽर्थः प्रतिपत्तुरसंनिहितो भवतीत्यर्थः । **यदुक्तं** कल्पनागौरवमिति तत्राह—**नचैष इति** । सर्वसंमतस्य व्यवहारमात्रबाधस्य स्वीकारात्कस्यचिदप्यर्थस्याबाधादतिलाघवमित्यर्थः । **ननु** न व्यवहार एव निषेध्यः, किंतु शुक्तौ प्रतीतं रजतमित्यन्यथाख्यातिमाशङ्क्याह—**नच रजतमेवेत्यादिना** । **ननु** मा भातु रजतज्ञाने शुक्तिः, पुरोदेशसत्तामात्रेण त्वालम्बनं किं न स्यादत आह—

कल्पतरुपरिमलः ।

दृष्टद्वारेणैव संसारं निवर्तयति शुक्तिज्ञानमिव रजताध्यासमित्यवसीयत इति भावः । **मतभेदेनेति** । बाह्यास्तित्ववादिनोर्वैभाषिकसौत्रान्तिकयोः सत् शुक्तिशकलादिकमधिष्ठानम्, तन्नास्तित्ववादिनो योगाचारस्य त्वविद्याकल्पितं तदधिष्ठानमित्येवं मतभेदेनाधिष्ठानभेदमाहेत्यर्थः । **ननु** प्रातिभासिकाध्यासेष्वधिष्ठानग्रहणं नियतं; तद्बाह्यप्रत्यक्षत्ववादिनो वैभाषिकस्य सुघटं, नतु तदतीन्द्रियत्ववादिनः सौत्रान्तिकस्येत्याशङ्क्य तस्यानुमानिकं तदस्तीत्याह—**वैभाषिकवदिति । अस्त्यधिष्ठानमिति** । स्फुरदधिष्ठानमस्तीत्यर्थः । **भ्रान्तिज्ञानाकारसदृशस्येति** । भ्रान्तिज्ञाने सविकल्पके य आकारो रजतादिः तस्य वस्तुतो बाह्यस्य शुक्तिगतस्याभावादित्यर्थः । **समानाधिकरणे पञ्चम्याविति । षष्ठीपञ्चम्यन्तत्वेन व्यधिकरणे चेत्**, रजतस्य विज्ञानाकारत्वे अहं रजतमिति स्यादित्यापादनस्यायुक्तत्वशङ्का विज्ञानाहमर्थभेदप्रयुक्तैव वारिता स्यात्; तथा विज्ञानाकारतया रजतस्य विज्ञानधर्मत्वादहं रजतवानित्यनुभवः स्यादित्यापादनीयमित्येतत्प्रयुक्ता तत उपरि संभवन्ती न वारिता स्यात्; **समानाधिकरणे चेत्** शङ्काद्वयमपि वारितं भवतीत्यभिप्रेत्यैवं व्याख्यातम् । **भ्रान्तिरूपविकल्पस्य हीति । विकल्पः** सविकल्पकं तस्य द्वौ विषयौ; ग्राह्याध्यवसेयभेदात् । तस्याकारेभ्यो निकृष्टं यदविकल्पं स्वरूपमस्ति; तद् ग्राह्यं स्वविषयत्वलक्षणस्वप्रकाशत्वाङ्गीकारात् । तस्य रजताकारस्योपर्यवसेयो बाह्यत्वशब्दोक्त इदंत्वाकारो विकल्परूपोऽध्यवसेय इति साकारवादिनां प्रक्रिया । तथाच पुरोवर्तिन्यधिष्ठाने ज्ञानाकाररूपं रजतमिद-

वेकाग्रहनिबन्धनो भ्रम-इति॥ अन्ये तु-यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनां-आचक्षते;

भामती ।

रजतनिर्भासस्य शुक्तिकालम्बनं युक्तम्; अनुभवविरोधात् । न खलु सत्तामात्रेणालम्बनम्; अतिप्रसङ्गात्, सर्वेषामर्थानां सत्त्वाविशेषादालम्बनत्वप्रसङ्गात् । नापि कारणत्वेन; इन्द्रियादीनामपि कारणत्वात् । तथाच भासमानतैवालम्बनार्थः । नच रजतज्ञाने शुक्तिका भासते इति कथमालम्बनं, भासमानताभ्युपगमे वा कथं नानुभवविरोधः । अपिचेन्द्रियादीनां समीचीनज्ञानोपजनने सामर्थ्यमुपलब्धमिति कथमेभ्यो मिथ्याज्ञानसंभवः । दोषसहितानां तेषां मिथ्याप्रत्ययेऽपि सामर्थ्यमिति चेन्न, दोषाणां कार्योपजननसामर्थ्यविघातमात्रे हेतुत्वात्, अन्यथा दुष्टादपि कुटजबीजाद्वटाङ्कुरोत्पत्तिप्रसङ्गात् । अपिच स्वगोचरव्यभिचारे विज्ञानानां सर्वत्रानाश्वासप्रसङ्गः । तस्मात्सर्वं ज्ञानं समीचीनमास्थेयम् । तथा च रजतं, इदमिति च द्वे विज्ञाने स्मृत्यनुभवरूपे, तत्रेदमिति पुरोवर्तिद्रव्यमात्रग्रहणं, दोषवशात्तद्गतशुक्तित्वसामान्यविशेषस्याग्रहात्, तन्मात्रं च गृहीतं सदृशतया संस्कारोद्बोधक्रमेण रजते स्मृतिं जनयति । सा च गृहीतग्रहणस्वभावापि दोषवशाद्गृहीतत्वांशप्रमोषाद्ग्रहणमाग्रमवतिष्ठते । तथाच रजतस्मृतेः पुरोवर्तिद्रव्यमात्रग्रहणस्य च मिथः स्वरूपतो विषयतश्च भेदाग्रहात्, संनिहितरजतगोचरज्ञानसारूप्येण, इदं रजतमिति भिन्ने अपि स्मरणग्रहणे अभेदव्यवहारं च सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः । क्वचित्पुनर्ग्रहणे एव मिथोऽगृहीतभेदे, यथा पीतः शङ्ख इति । अत्र हि विनिर्गच्छन्नयनरश्मिवर्तिनः पित्तद्रव्यस्य काचस्येव स्वच्छस्य पीतत्वं गृह्यते पित्तं तु न गृह्यते । शङ्खोऽपि दोषवशाच्छुक्लगुणरहितः स्वरूपमात्रेण गृह्यते । तदनयोर्गुणगुणिनोरसंसर्गाग्रहसारूप्यात्पीततपनीयपिण्डप्रत्ययाविशेषणाभेदव्यवहारः समानाधिकरणव्यपदेशश्च । भेदाग्रहप्रसञ्जिताभेदव्यवहारबाधनाच्च नेदमिति विवेकप्रत्ययस्य बाधकत्वमप्युपपद्यते, तदुपपत्तौ च प्राक्तनस्य प्रत्ययस्य भ्रान्तत्वमपि लोकसिद्धं सिद्धं भवति । तस्माद्यथार्थाः, सर्वे विप्रतिपन्नाः संदेहविभ्रमाः, प्रत्ययत्वात् घटादिप्रत्ययवत् । तदिदमुक्तम्—**यदध्यास इति** । यस्मिञ्शुक्तिकादौ यस्य रजतादेरध्यास इति लोकप्रसिद्धिः नासावन्यथाख्यातिनिबन्धना, किंतु गृहीतस्य रजतादेस्तत्स्मरणस्य च गृहीततांशप्रमोषेण, गृहीतमात्रस्य य इदमिति पुरोवस्थिताद्द्रव्यमात्रात्तद्ग्रहणाच्च विवेकः, तदग्रहणनिबन्धनो भ्रमः । भ्रान्तत्वं च ग्रहणस्मरणयोरितरेतरसामानाधिकरण्यव्यपदेशो रजतादिव्यवहारश्चेति । **अन्ये तु**—अत्राप्यपरितुष्यन्तः, **यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते** । **अत्रेदमाकूतम्**—अस्ति तावद्रजतार्थिनो रजतमिदमिति प्रत्यया-

वेदान्तकल्पतरुः ।

न खल्विति । सर्वेषां पुरोवर्तिनां लोष्टादीनामित्यर्थः । **अथ** रजतसदृशशुक्ते रजतज्ञानहेतुसंस्कारोद्बोधकत्वेनालम्बनत्वं, तत्राह—**नापीति** । एवमर्थमारोपितं प्रतिषिध्य, मिथ्याज्ञानमपि निह्नुते—**अपिचेति** । **ननु** मिथ्याव्यवहारसिद्ध्यर्थं विपर्ययो वाच्यस्तत्राह—**तथाचेत्यादिना** । शुक्तिस्वरूपस्य इदमात्मकसामान्यं प्रतिविशेषस्याग्रहादिदमिति द्रव्यमात्रग्रहणं भवतीत्यर्थः । **गृहीतग्रहणस्वभावेति** । गृहीतमिदमिति प्रकाशनस्वभावेत्यर्थः । **संनिहितरजतेति** । संनिहितरजतगोचरं हि ज्ञानमिदमिति रजतमित्याकारयोरसंसर्ग न गृह्णाति; तयोः संसृष्टत्वेनासंसर्गाभावात् । नच स्वगतं विवेकः; एकज्ञानत्वात्, एवमेते अपि ग्रहणस्मरणे परस्परं भिन्ने अपि स्वगतभेदं न गृह्णीतः, नाप्यसंसृष्टौ स्वगोचरौ तथैव निवेदयत इति सारूप्यम् । **काचो** हरितद्रव्यविशेषः । निषेध्यभ्रमाभावे निषेधानुपपत्तिमाशङ्क्याह—**भेदाग्रहेति** । इतरेतराभावबोधादितरेतराभावाग्रहनिवृत्तौ तद्धेतुकव्यवहारनिवृत्तिर्बाधफलमित्यर्थः । **तस्माद्यथार्था इति** । **सर्वे विप्रतिपन्ना** इत्येको धर्मिनिर्देशः । **संदेहविभ्रमा** इत्यपरः । अयथार्थव्यवहारहेतुत्वेन मतद्वयसंमताः प्रत्यया धर्मिण इति नाश्रयासिद्धिः । **अन्ये त्विति** । पुरोवर्तिनि रजतमिदमिति सामानाधिकरण्यव्यपदेशस्तथाविधप्रवृत्तिश्चास्तीति तावत्

कल्पतरुपरिमलः ।

त्वेनारोप्यत इति नाहंत्वोल्लेखप्रसक्तिरिति भावः । **ननु** रजतज्ञाने शुक्तेः कारणत्वेन विषयत्वं नाख्यातिमते शङ्कार्हम्; अन्यथाख्यातिमत एव तस्य विशेष्यत्वेन कारणत्वादित्याशङ्क्याऽख्यातिमतेऽपि रजतज्ञाने शुक्तेः कारणत्वमुपपादयन्नवतारयति—**अथ रजतसदृशेति** । **मिथ्याज्ञानमपीति** । **ननु**—मिथ्याज्ञाननिह्नवो **नच रजतमेव शुक्तिकायां प्रसञ्जितमि**त्यादिपूर्वग्रन्थेनापि कृतः, स ग्रन्थस्तथैवावतारितश्च—**सत्यम्**; स ग्रन्थोऽर्थाध्यासनिह्नवस्यापि साधारणः; यतः शुक्तेर्देशान्तरस्थरजतात्मनेव तद्देशोत्पन्नरजतात्मना भानाङ्गीकारेऽप्यन्यात्मना भानमन्यालम्बनमित्येतदनुभवविरुद्धमित्यर्थाध्यासनिह्नवोऽपि तेन लभ्यते । इन्द्रियसामर्थ्यरूपकारणाभावोपपादनं तु मिथ्याज्ञाननिह्नव एवासाधारणयुक्तिरिति तात्पर्येणैवमवतारितम् । **गृहीतमिदमिति** । पूर्वानुभवविषयत्वं तत्तेति भावः । **नाश्रयासिद्धिरिति** । **एतदुपलक्षणम्**, साध्यमपि सर्वविषयावच्छिन्नयाथार्थ्यं वा, विसंवादीच्छाप्रवृत्तिरूपव्यवहारप्रसिद्धायाथार्थ्यराहित्यं वेति धर्म्यंशया-

भामती ।

त्पुरोवर्तिनि द्रव्ये प्रवृत्तिः, सामानाधिकरण्यव्यपदेशश्चेति सर्वजनीनम् । तदेतन्न तावद्ग्रहणस्मरणयोस्तद्गोचरयोश्च मिथो भेदाग्रहमात्राद्भवितुमर्हति । ग्रहणनिबन्धनौ हि चेतनस्य व्यवहारव्यपदेशौ कथमग्रहणमात्राद्भवेताम् । **ननूक्तं** नाग्रहणमात्रात्, किंतु ग्रहणस्मरणे एव मिथः स्वरूपतो विषयतश्चागृहीतभेदे समीचीनपुरस्थितरजतविज्ञानसादृश्येनाभेदव्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः । **अथ** समीचीनज्ञानसारूप्यमनयोर्गृह्यमाणं वा व्यवहारप्रवृत्तिहेतुः, अगृह्यमाणं वा सत्तामात्रेण । **गृह्यमाणेऽपि**, 'समीचीनज्ञानसारूप्यं अनयोरिदमिति रजतमिति च ज्ञानयोः' इति ग्रहणं, अथवा 'तयोरेव स्वरूपतो विषयतश्च मिथो भेदाग्रहः' इति ग्रहणम् । तत्र **न तावत्समीचीनज्ञानसदृशी इति ज्ञानं** समीचीनज्ञानवद्व्यवहारप्रवर्तकम्; नहि गोसदृशो गवय इति ज्ञानं गवार्थिनं गवये प्रवर्तयति । अनयोरेव भेदाग्रह इति तु ज्ञानं परीहृतं, नहि भेदाग्रहेऽनयोरिति भवति, अनयोरिति ग्रहे भेदाग्रहणमिति च भवति । तस्मात्सत्तामात्रेण भेदाग्रहोऽगृहीत एव व्यवहारहेतुरिति वक्तव्यम् । तत्र किमयमारोपोत्पादक्रमेण व्यवहारहेतुः, आहोऽनुत्पादितारोप एव स्वत इति । **वयं तु पश्यामः**—चेतनव्यवहारस्याज्ञानपूर्वकत्वानुपपत्तेः, आरोपज्ञानोत्पादक्रमेणैवेति । **ननु** सत्यं चेतनव्यवहारो नाज्ञानपूर्वकः, किंत्वविदितविवेकग्रहणस्मरणपूर्वक **इति । मैवम्**—नहि रजतप्रातिपदिकार्थमात्रस्मरणं प्रवृत्तावुपयुज्यते । इदंकारास्पदाभिमुखी खलु रजतार्थिनां प्रवृत्तिरित्यविवादम् । कथं चायमिदंकारास्पदे प्रवर्तेत । यदि तु न तदिच्छेत् । अन्यदिच्छत्यन्यत्करोतीति व्याहतम् । नचेदिदंकारास्पदं रजतमिति जानीयात्कथं रजतार्थी तदिच्छेत् । यद्यतथात्वेनाग्रहणादिति ब्रूयात्स च प्रतिवक्तव्योऽथ तथात्वेनाग्रहणात्कस्मान्नोपेक्षेतेति । सोऽयमुपादानोपेक्षाभ्यामभिमत आकृष्यमाणश्चेतनोऽव्यवस्थित इदंकारास्पदे रजतसमारोपेणोपादान एव व्यवस्थाप्यत इति भेदाग्रहः समारोपोत्पादक्रमेण चेतनप्रवृत्तिहेतुः । **तथाहि**—भेदाग्रहादिदंकारास्पदे रजतत्वं समारोप्य, तज्जातीयस्योपकारहेतुभावमनुचिन्त्य, तज्जातीयतयेदंकारास्पदे रजते तमनुमाय, तदर्थी प्रवर्तत इत्यानुपूर्व्यं सिद्धम् । नच तटस्थरजतस्मृतिरिदंकारास्पदस्योपकारहेतुभावमनुमापयितुमर्हति; रजतत्वस्य हेतोरपक्षधर्मत्वात् । एकदेशदर्शनं खल्वनुमापकं नत्वनेकदेशदर्शनम् । **यथाहुः**—ज्ञातसंबन्धस्यैकदेशदर्शनादिति । समारोपे त्वेकदेशदर्शनमस्ति । तत्सिद्धमेतद्विवादाध्यासितं रजतादिज्ञानं, पुरोवर्तिवस्तुविषयं, रजताद्यर्थिनस्तत्र नियमेन प्रवर्तकत्वात्, यद्यदर्थिनं यत्र नियमेन प्रवर्तयति, तज्ज्ञानं तद्विषयं;

वेदान्तकल्पतरुः ।

सर्वजनीनम् । तत् सामानाधिकरण्यप्रत्ययाद्रजतमिदमित्येवंरूपाद्भवति नान्यथेत्यर्थः । अन्यथासिद्धिमाशङ्क्याह—**तदेतदिति ।** अगृहीतविवेकं स्मरणग्रहणद्वयमयथाव्यवहारहेतुः, एकैकं वा । **नाद्यः**; ज्ञानयोर्यौगपद्यात् । **न द्वितीयः** इत्याह—**नहि रजतप्रातिपदिकार्थेति ।** ग्रहणेऽपि तुल्यमिदं । यदि तदिच्छेत्तर्ह्येव प्रवर्तेतेत्यर्थः । ज्ञातसंबन्धस्य पुंसो लिङ्गविशिष्टधर्म्येकदेशदर्शनाद् लिङ्गे विशिष्टधर्म्येकदेशे बुद्धिरनुमानमिति शबरस्वामिन आहुः । समारोपे तु प्रमित्यभावेऽप्येकदेशदर्शनमस्तीत्यर्थः । पुरोवर्तिनि साधने प्रवर्तके फलज्ञानेऽनैकान्तिकतानिवृत्त्यर्थमाह—**नियमेनेति ।** फलस्य

कल्पतरुपरिमलः ।

थार्थ्यमादाय न सिद्धसाधनमित्यपि द्रष्टव्यम् । **पुरोवर्तिनि साधने इति । ननु**—फलज्ञानवदुपायज्ञानमपि न नियमेन प्रवर्तकं; फलस्य नानोपायसाध्यत्वादेवेति हेतोरसिद्धिः । व्यक्तिनियमेन हेतुसमर्थने व्यभिचारतादवस्थ्यम्; यत्पक्षीकृतं रजतज्ञानं पुरोवर्तिनि नियमेन प्रवर्तकमिष्यते तत्रत्यफलज्ञानस्यापि तस्मिन्नियमेन प्रवर्तकत्वात् । एवंच तत्रेति विशेषणेन न स्मृतेरपि व्यावृत्तिः; आरोपप्राचीनस्यारोप्यस्मरणस्यापि फलसाधनताज्ञानप्राचीनफलज्ञानतुल्यन्यायतया नियमेन पुरोवर्तिनि प्रवर्तकत्वात् । एवं **तावन्नियमेनेति तत्रेति च** विशेषणमयुक्तम् । **बाधादिव्यावृत्त्यर्थं रजतार्थिन इति विशेषण**मित्यप्ययुक्तम्; तृणपर्णजलादिकमिव स्ववेगबलात्पुरुषं नयता वाय्वादिना पुरुषे फलाख्यप्रवृत्तेरजननात्, **प्रवृत्तिफलस्य शरीरक्रियासाधारणव्यापारमात्रपरत्वेऽपि** शरीरात्मकालादृष्टादिव्यभिचारबारणाय प्रवर्तकज्ञानत्वादिति हेतोर्विवक्षणीयत्वेन टीकायामुदाहरणवाक्ये ज्ञानपदनिवेशनया तद्विवक्षायाः सूचितत्वेन च तत एव तन्निरासलाभाच्च, नियमविशेषणेनैव कालादृष्टादिव्यावृत्तौ तत एव वायोरपि व्यावृत्तिसिद्धेश्च—**इति चेत्, उच्यते;** टीकायां फलसाधनतानुमितिहेतुपरामर्शरूपं यद्रजतत्वहेतुविषयं ज्ञानमावश्यकमिति प्रतिपादितं तदत्र पक्षः । तस्य पुरोवर्तिविषयत्वं साध्यम् । स च परामर्शः पुरोवर्तिविषयामेव फलसाधनतानुमितिं तद्द्वारा प्रवृत्तिं च जनयति; फलस्य वस्तुतो नानोपायसाध्यत्वेऽपि तदन्यत्र तदुपायत्वानुसन्धानाभावात्, फलज्ञानं तु तटस्थं न नियमेन पुरोवर्तिनि प्रवर्तकं तस्योपायान्तरगतफलसाधनतानुमितिद्वारान्यत्रापि प्रवर्तकत्वसंभवात्, तथैवारोपप्राचीनरजतस्मरणमपि; सत्यपि तस्मिन्नन्यत्र फलसाधनतानुमित्या प्रवृत्तिसंभवात् । तत्रेति विशेषणं तु स्वयं गेहादिनिहितरजतार्थिप्रवृत्तिनियततद्रजतगतफलसाधनतादिस्मृतौ व्यभिचारनिरासार्थम् । **प्रवर्तकत्वं** शरीरव्यापारप्रयोजकत्वमेव विवक्षितमिति रजतार्थिन इति विशेषणं सफ-

कल्पतरुपरिमलः ।

त्वम्, (हेतौ ज्ञानत्वं न निवेश्यं; नियमविशेषणेन तत्प्रयोजनलाभात् । उदाहरणे ज्ञानमिति नियमविशेषणलब्धार्थानुवादः । साध्ये पुरोवर्तिपदं विसंवादिप्रवृत्तिविषयशुक्त्यादिव्यक्तिविशेषपरम् । अतएव रजतज्ञाने दृष्टान्ते साध्यवैकल्यं मा भूदिति यत्तद्भ्यां सामान्यव्याप्तिरुपन्यस्ता । यदि अर्थिन इत्येतावतैव बाधादिव्यावर्तनाद्रजतविशेषणं न निवेश्यते, तदा रजतभ्रमजन्यप्रवृत्तिविषये पुरोवर्तिनि शुक्त्यर्थिप्रवर्तकशुक्तित्वप्रकारकज्ञानं दृष्टान्तीकृत्य विशेषव्याप्तिरप्युपपादयितुं शक्या ।) नतु प्रयत्नप्रयोजकत्वम्; अख्यातिवादिना तत्रेच्छाप्रयत्नावपि न पुरोवर्तिविषयौ, किंतु तन्मूलरजतज्ञानवद्देशान्तरस्थविषयावित्यपलपितुं शक्यत्वेन हेत्वसिद्धिप्रसङ्गात् । अन्यथा तत्र नियमेन रजतेच्छाकारणत्वस्यैव हेतुत्वसंभवेन रजतार्थिप्रवर्तकत्वपर्यन्तहेत्वनपेक्षणात्, तदपेक्षणेऽपि तत्रत्यरजतेच्छायां विशेषव्याप्त्युदाहरणसंभवेन समीचीनरजतज्ञाने सामान्यव्याप्त्युदाहरणायोगाच्च । एवंच वायुकालादृष्टप्रागभावादिव्यावर्तनाय रजतार्थीति विशेषणम् । यद्यपि वाय्वादीनां पुरोवर्तिविषयप्रवृत्तिं प्रत्यसाधारणकारणत्वाभावाद् नियमविशेषणेनापि भवति व्यावृत्तिः; तथापि प्रागभावस्य न भवति । तस्य प्रतियोगिनि तत्तत्प्रागभावत्वेन कारणत्वाङ्गीकारात्, तद्व्यावृत्तिस्तु पुरोवर्तिविषयरजतार्थिप्रवृत्तित्वावच्छिन्नकार्यप्रयोजकत्वस्य हेतुत्वविवक्षयेति न किंचिदवद्यम् ॥ * टीकायामुदाहरणवाक्ये ज्ञानपदं रजतप्रमैव सामान्यव्याप्तौ दृष्टान्तः, नतु विसंवादिप्रवृत्तिस्थलेच्छा शङ्कितान्यविषयभावाविशेषव्याप्तौ दृष्टान्त इति सूचनाय । यत्र यद्यदर्थिनमित्यत्र यद्रजतार्थिनमित्यर्थो ग्राह्यः । इत्थमिष्टसाधनतानुमितिहेतुपरामर्शरूपस्य रजतत्वप्रकारकज्ञानस्य पक्षत्वम् इष्टसाधनत्वानुमितिहेतोरपक्षधर्मत्वप्रसङ्गमत्र विपक्षबाधकमुपन्यस्यता टीकाग्रन्थेन सूचितम् । **ननु**—अत्र हेतोरपक्षधर्मत्वं न दोषः, नह्यख्यातिवादिभिर्भ्रमस्थले प्रवृत्तिविषयविषयकेष्टसाधनतानुमितिरभ्युपगम्यते; अन्यथाख्यात्यापत्तेः, किंत्विष्टसाधनत्वव्याप्तरजतत्वाश्रयभेदाग्रहादुपस्थितेष्टसाधनभेदाग्रहमात्रं रजतभेदाग्रहवदावश्यकं, तत एव प्रवृत्तिरिति कल्प्यते; लाघवादिति—**चेत्**, यद्येवमनुमितावपि पक्षे लिङ्गवद्भेदाग्रह एव कारणं स्याद्; न्यायतौल्याद्, नतु लिङ्गविशिष्टपक्षज्ञानम् । तथाच विसंवादिप्रवृत्तिस्थले पक्षे इष्टसाधनत्वव्याप्तरजतत्वाश्रयभेदाग्रहादिष्टसाधनत्वानुमितिर्भवन्ती केन वार्यते । **तस्माद्भक्षितेऽपि लशुने न व्याधिशान्तिरिति** न्यायेनान्यथाख्यातिपरिजिहीर्षया भ्रमस्थले विशिष्टज्ञानमपलप्य प्रवृत्तौ भेदाग्रहं कारणमाश्रयतोऽनुमितावपि स एव कारणं स्यादित्यन्यथाख्यातिरूपानुमितेरशक्यप्रतिक्षेपत्वादभावरूपं भेदाग्रहं परित्यज्य भावतया लघु लिङ्गविशिष्टपक्षज्ञानमेवानुमितौ कारणमभ्युपेयमिति युक्तोऽत्र हेतोरपक्षधर्मत्वप्रसङ्गो विपक्षबाधकस्तर्कः । एवमिष्टसाधनत्वानुमितिहेतुपरामर्शरूपरजतज्ञानपक्षकवत् केवलरजतज्ञानपक्षकमपि निरुक्तहेतुसाध्यकमनुमानं युक्तमेव; तत्रापि विशिष्टज्ञानस्य प्रवृत्तिकारणत्वे संभवत्यभावरूपभेदाग्रहस्य तत्कारणत्वकल्पने गौरवमिति विपक्षबाधकसद्भावात् । **ननु**—अत्र विपरीतं गौरवम्; इष्टपुरोवर्तिज्ञानमात्रस्यावश्यकभेदाग्रहविशिष्टस्य प्रवर्तकत्वोपपत्तौ मिथ्याज्ञानतद्विषयकल्पनायोगात्, ततश्च प्रतिकूलतर्कपराहतमनुमानम्; नच मिथ्याज्ञानापलापे भ्रमस्थले भेदाग्रहसाहित्येन प्रवृत्तिवदभेदाग्रहसाहित्येन निवृत्तेरपि प्रसङ्गः; रजतस्मरणस्य रजताभेदविषयत्वेनाभेदाग्रहासिद्धेरिति—**चेद्, मैवम्**; मिथ्याज्ञानापलापे सत्यस्थले इष्टपुरोवर्तिभेदग्रहाप्रसिद्धितस्तदभावाप्रसिद्ध्या सत्यरजतज्ञानादप्रवृत्तिप्रसङ्गात् । **भेदाग्रह**शब्देन पुरोवर्तिनीष्टभिन्नत्वप्रकारकज्ञानविषयत्वाभावो विवक्षित इति **चेत्**, तर्हि तव भ्रमस्थले पुरोवर्तिनीष्टाभिन्नत्वप्रकारकज्ञानविषयत्वस्याप्यभावोऽस्तीति ततो निवृत्तिरपि स्यात् । **टीकायामिदमेव दूषणम्—'अथ तथात्वेनाग्रहणात्कस्मान्नोपेक्षेतेति** ग्रन्थेन दर्शितम् । **किंचैवं** सति रजते नेदं रजतमिति भ्राम्यतोऽपि रजतार्थिनस्तत्र प्रवृत्तिप्रसङ्गः; रजते रजतभेदग्रहे मिथ्याज्ञानप्रसङ्गेन तत्रापीदमिति न रजतमिति च ज्ञानद्वयस्य कल्पनीयत्वात् । **स्वातन्त्र्यमिष्टे विशेषणं**; तच्च भेदप्रतियोगितयोपस्थित्यविषयत्वमिति **चेत्**, तथा विशेषणे कृते स दोषो नितरां दृढीकृतः स्यात् । नेदं रजतमिति भ्रमस्थले पुरोवर्तिगतस्य विशिष्टभावस्येष्टभिन्नत्वप्रकारकज्ञानविषयत्वरूपविशेष्याभावमात्रादपि सिध्यतः स्वातन्त्र्यरूपविशेषणस्याप्यभावे सुतरां सिद्धेः । नेदं रजतमिति प्रमास्थलेऽपि रजतार्थिप्रवृत्तिः स्यादिति दोषश्चात्राधिकः;तत्र विशेषणाभावाद् विशिष्टाभावसिद्धेः । **वस्तुतस्तु**—स्वातन्त्र्यं उक्तविशिष्टाभावप्रतियोगिकोटाविष्टविशेषणं न युक्तम्; इष्टभिन्नत्वज्ञानदशायामिष्टस्य भेदप्रतियोगितोपस्थितिविषयत्वनियमेन तदभावविशिष्टेष्टविशेषितस्य प्रतियोगिनोऽप्रसिद्ध्या तदभावाप्रसिद्ध्यापत्तेः ॥ **ननु**—तर्हि स्वातन्त्र्यमपि प्रवृत्तौ पृथक्कारणान्तरमस्तु, अतस्तदभावाद् नेदं रजतमिति प्रमाभ्रमस्थलयोर्न प्रवृत्तिप्रसङ्गः; प्रतियोगिविशेषणत्वेनानिवेशनाच्च न विशिष्टाप्रसिद्ध्या तदभावाप्रसिद्ध्यापत्तिरिति—**चेद्, न**; तथा सतीदं रजतं घटनिष्ठभेदप्रतियोगीति ज्ञानादप्रवृत्त्यापत्तेः । यद्येतद्दोषपरिहाराय पुरोवर्तिनिष्ठभेदप्रतियोगित्वेनानुपस्थितत्वं स्वातन्त्र्यम् इति निरुच्येत, तदा नेदं रजतमिति भ्रमस्थले रजतार्थिप्रवृत्तिः स्यादिति दोषः पुनरुन्मज्जेत् । **ननु**—पुरोवर्त्यगृहीतासंसर्गभेदप्रतियोगित्वेनानुपस्थितत्वं स्वातन्त्र्यम्, अतस्तदभावान्नेदं रजतमिति भ्रमेण न प्रवृत्तिप्रसङ्गः; तत्र पुरोवर्तिनि रजतभेदासंसर्गाग्रहसत्त्वेन तद्विशेषितभेदप्रतियोगितोपस्थितेर्विद्यमानतया तदभावाभावात्, नापीदं रजतं घटनिष्ठभेदप्र-

भामती ।

यथोभयसिद्धसमीचीनरजतज्ञानं, तथाचेदं, तस्मात्तथेति । यच्चोक्तमनवभासमानतया न शुक्तिरालम्बनमिति, तत्र भवान्पृष्टो व्याचष्टां, किं शुक्तिकात्वस्य इदं रजतमिति ज्ञानं प्रत्यनालम्बनत्वं; आहोस्विद्द्रव्यमात्रस्य पुरःस्थितस्य सितभास्वरस्य । यदि **शुक्तिकात्वस्यानालम्बनत्वम्**, अद्धा । **उत्तरस्यानालम्बनत्वं** ब्रुवाणस्य तवैवानुभवविरोधः । **तथाहि**—रजतमिदमित्यनुभवन्ननुभविता पुरोवर्ति वस्त्वङ्गुल्यादिना निर्दिशति । दृष्टं च दुष्टानां कारणानामौत्सर्गिककार्यप्रतिबन्धेन कार्यान्तरोपजननसामर्थ्यम्; यथा दावाग्निदग्धानां वेत्रबीजानां कदलीकाण्डजनकत्वम्, भस्मकदुष्टस्य चौदर्यस्य तेजसो बह्वन्नपचनमिति । प्रत्यक्षबाधापहृतविषयं च विभ्रमाणां यथार्थत्वानुमानमाभासः, हुतवहानुष्णत्वानुमानवत् । **यच्चोक्तं** मिथ्याप्रत्ययस्य व्यभिचारे सर्वप्रमाणेष्वनाश्वास **इति**; तत् बोधकत्वेन स्वतःप्रामाण्यं नाव्यभिचारेणेति व्युत्पादयद्भिरस्माभिः परिहृतं न्यायकणिकायामिति नेह प्रतन्यते । दिङ्मात्रं चास्य स्मृतिप्रमोषभङ्गस्योक्तम् । विस्तरस्तु ब्रह्मतत्त्वसमीक्षायामवगन्तव्य इति, **तदिदमुक्तम्—'अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इति ।'** यत्र शुक्तिकादौ यस्य रजतादेरध्यासस्तस्यैव शुक्तिकादेर्विपरीतधर्मकल्पनां रजतत्वधर्मकल्पनामिति योजना । **ननु** सन्तु नाम परीक्षकाणां विप्रतिपत्तयः, प्रकृते तु किमायातमित्यत

वेदान्तकल्पतरुः ।

हि नानोपायसाध्यत्वान्न तज्ज्ञानमुपाये नियमेन प्रवर्तकम् । स्मरणे व्यभिचारनिवृत्त्यर्थमाह—**तत्रेति** । वाय्वादौ व्यभिचारमाशङ्क्याह—**अर्थिन इति** । वाय्वादिर्हि प्रसह्य प्रवर्तयति न त्वर्थितामनुरुन्धे । यच्चोक्तं समीचीनज्ञानहेतुभ्यो न मिथ्याज्ञानजन्मेति तत्राह—**दृष्टं चेति । परिहृतं न्यायकणिकायामिति । एवं हि तत्र व्युत्पादितम्**—किमव्यभिचारितैव प्रामाण्यं, उत तद्धेतुः, अथ तद्व्यापिका । येन क्वचिद्व्यभिचारदर्शनाज्ज्ञानानामप्रामाण्यमापतेत् । सर्वथाप्यसंभवः; व्यभिचारिणामपि सितनीलादिषु चक्षुरादीनां बोधकत्वेन प्रामाण्यादव्यभिचारिणामपि दहनादौ धूमादीनां कुतश्चिन्निमित्तादनुपज-

कल्पतरुपरिमलः ।

तियोगीति ज्ञानेनाप्रवृत्तिप्रसङ्गः; तत्र पुरोवर्तिनि रजतभेदासंसर्गरूपरजताभेदग्रहसत्त्वेन तदभावविशेषितभेदप्रतियोगितोपस्थित्यभावसत्त्वादिति—**चेद्, न;** एवमपि यत्रेदं नेति भेदविशिष्टपुरोवर्तिज्ञानं रजतस्मरणं चेति ज्ञानद्वयरूपो नेदं रजतमिति भ्रमः, तत्र रजतार्थिप्रवृत्तिप्रसङ्गाद्, न रजतमित्यधिकरणविशेषानुल्लेखिन इव इदं नेति प्रतियोगिविशेषानुल्लेखिनोऽपि भेदज्ञानस्य संभवात् । **स्यादेतत्**—पुरोवर्त्यगृहीतासंसर्गभेदप्रतियोगित्वासंसर्गाग्रहाभाववत्त्वं स्वातन्त्र्यम् । एवंच न कोऽपि दोषः । **तथाहि**—इदमिति न रजतमिति च ज्ञानद्वयात्मकस्य नेदं रजतमिति भ्रमस्योदये पुरोवर्तिनि रजतभेदस्यासंसर्गाग्रहोऽस्ति, इदं रजतमितिभ्रमोदये रजतस्येव । तथाच तत्र पुरोवर्त्यगृहीतासंसर्गभेदप्रतियोगित्वेन रजतस्य ग्रहणात्तत्प्रतियोगित्वासंसर्गाग्रहोऽस्तीति तदभावाभावाद् न तत्र रजतार्थिप्रवृत्तिप्रसङ्गः । नापीदं नेति रजतमिति च ज्ञानद्वयात्मकस्य नेदं रजतमिति भ्रमस्योदये तत्प्रसङ्गः; तत्र पुरोवर्तिनि गृहीतसंसर्गत्वेनागृहीतासंसर्गो यो भेदस्तत्प्रतियोगित्वस्यासंसर्ग इष्टे यद्यपि विद्यते; तथापि तस्य नेदं रजतमिति भ्रमदशायामग्रहस्य सत्त्वेन तदभावाभावात् । इदं रजतं घटनिष्ठभेदप्रतियोगीति ज्ञानोदये च नाप्रवृत्तिप्रसङ्गः; तत्र रजते भेदप्रतियोगित्वसंसर्गाग्रहणेन तदसंसर्गाग्रहरूपविशेष्यसद्भावेऽपि पुरोवर्तिनि भेदासंसर्गरूपाभेदग्रहणेन विशेषणाभावात्तद्विशिष्टस्य भेदप्रतियोगित्वासंसर्गाग्रहस्याभावसद्भावादिति—**चेद्, मैवम्;** एवमपि यत्रेदं रजतमिति भ्रमकाले रजतं घटनिष्ठभेदप्रतियोगीत्यपि स्मरणं तत्राप्रवृत्तिप्रसङ्गः । तत्र पुरोवर्तिनि रजतभेदासंसर्गग्रहे मिथ्याज्ञानप्रसङ्गेन तदसंसर्गाग्रहोऽस्तीति पुरोवर्त्यगृहीतासंसर्गभेदप्रतियोगित्वसंसर्गग्रहसत्त्वेन तदसंसर्गाग्रहस्य प्रतियोगिनो विद्यमानतया तदभावाभावात् । अरजतरजतयोरिमे रजतारजते इति भ्रमादरजते रजतार्थिप्रवृत्त्यभावप्रसङ्गश्च; तत्र पुरोवर्तिन्यरजते रजतभेदासंसर्गग्रहे मिथ्याज्ञानप्रसङ्गेन अरजतरूपपुरोवर्त्यगृहीतासंसर्गभेदप्रतियोगित्वेन रजतस्य गृह्यमाणतया तदसंसर्गाग्रहस्य प्रतियोगिनः सत्त्वेन तदभावाभावात् । **किं बहुना** इदं रजतमित्येतावन्मात्ररूपात् प्रसिद्धरजतभ्रमादपि प्रवृत्त्यभावप्रसङ्गः । तत्र हि रजतभेदः पुरोवर्त्यगृहीतासंसर्गो भवति; तत्र तदसंसर्गग्रहे मिथ्याज्ञानापत्तेः । रजते तथाभूतभेदप्रतियोगित्वासंसर्गाग्रहोऽप्यस्ति; तत्र रजते भेदप्रतियोगित्वं नास्तीति भेदप्रतियोगित्वासंसर्गग्रहोदयाभावात् । अतो विशिष्टस्य प्रतियोगिनः सत्त्वेन तदभावरूपस्वातन्त्र्याभावाद् न प्रवृत्तिर्घटते । तस्मान्मिथ्याज्ञानापलापेन भेदाग्रहात् प्रवृत्त्युपपादनमयुक्तमेव । **नन्वनाश्वा**सदोषे परेणोद्भाविते निराकर्तव्ये सत्यव्यभिचारस्य प्रामाण्यरूपत्वादिविकल्पः क्वोपयुज्यत इत्याशङ्क्याह—**येन क्वचिदिति । अयमाशयः**—प्रामाण्यनिश्चयादेव प्रवृत्त्यादिकार्योपपत्तेरव्यभिचारनिश्चयस्य नास्त्युपयोग इति परोद्भावितानाश्वासदोषनिराकरणे कृते परेणैवं वाच्यम् । अव्यभिचारनिश्चयः प्रामाण्यनिश्चयपर्यवसायी, तत्पर्यवसानं च त्रेधा संभवति, प्रामाण्यस्याव्यभिचारितारूपत्वेन, तद्धेतुकत्वेन, तद्व्याप्यत्वेन वा । **तद्व्याप्यत्वेऽपि** हि व्यापकनिवृत्तौ व्याप्यं निवर्तेत । एवं प्रकृतोपयोगिनमन्वीक्ष्य त्रेधा विकल्पः कृत इति । **अव्यभिचारिणामपीति** । इदं व्यतिरेकव्यभिचारदूषणमिव न विकल्पत्रयसाधारणं; सहकारिविरहेण प्रतिब-

वेदान्तकल्पतरुः ।

नितदहनादिज्ञानानामप्रामाण्यात् । भवतु ज्ञानकारणं व्यभिचारेऽपि बोधकं, ज्ञानेन त्वव्यभिचारोऽपेक्ष्यः स्वकार्ये इति चेत्, किं ज्ञेयावभासेऽपेक्ष्यः, उत प्रवृत्त्यादिकार्ये । **न प्रथमः**; जन्मनैव ज्ञानस्य ज्ञेयावभासात्मकत्वात् । **न चरमः**; अव्यभिचारग्राहिणोऽर्थक्रियासंवादादिज्ञानस्य ज्ञानान्तरादव्यभिचारनिश्चयेऽनवस्थापातात्, अनिश्चये वाऽनवधृतप्रामाण्यादस्मात्प्रथमज्ञानप्रामाण्यासिद्धेः, स्वतःप्रामाण्ये च प्रथमेऽपि तथात्वापातादिति । **ननु**—किं प्रामाण्यस्य स्वतस्त्वम्; ज्ञानसामग्रीमात्रजत्वं चेद्, न; प्रामाण्यस्य जातित्वे स्मृतित्वानधिकरणज्ञानगतबाधात्यन्ताभावरूपोपाधित्वे वा द्वयोरपि नित्यत्वेन

कल्पतरुपरिमलः ।

न्धेन वा हेतोरपि कार्याजनिसंभवेन **द्वितीयविकल्पे** अन्वयव्यभिचारस्य **तृतीयविकल्पे** व्यापकव्यभिचारस्य चादोषत्वात् । अतः प्रथमविकल्पमात्रे द्वितीयदूषणमिदमिति द्रष्टव्यम् । **ननु**—'अहो बत महानेष प्रमादो धीमतामपि । ज्ञानस्य व्यभिचारित्वे विश्वासः किंनिबन्धनः ॥' इति परेण ज्ञानस्यैव व्यभिचारो दोषत्वेनोक्तः, स च करणव्यभिचारस्यादोषत्वोपपादनेन परिहृतो न भवतीत्याशङ्कते—**भवत्विति । अव्यभिचारोऽपेक्ष्य इति ।** अव्यभिचारश्च ज्ञानानां प्रामाण्यमेवेति भावः । यदि प्रामाण्यस्य परतस्त्वमिष्यते, तत्राह—**अव्यभिचारग्राहिण इति । अर्थक्रियासंवादादिज्ञानस्येति ।** अर्थक्रियासंवादो दूरे वह्निज्ञाने जाते समीपोपसर्पणानन्तरं दाहसामर्थ्यानुभवः । आदिशब्देन तद्वह्निज्ञानं, प्रमा, दाहसमर्थे तद्वह्नित्वप्रकारकत्वादित्यनुमाने यत् प्रवृत्तिसंवादरूपज्ञानघटनीयं लिङ्गज्ञानं, यच्च तज्जन्यानुमितिरूपं प्रामाण्यज्ञानं, तदुभयमपि गृह्यते । **नन्वनवधृतप्रामाण्यमेव संवादिज्ञानं स्वविषयनिश्चयात्मकं भवत्वित्यत्राह—अनिश्चये वेति । प्रामाण्यासिद्धेरिति ।** अनवधृतप्रामाण्यादपि ज्ञानाद्विषयसिद्धौ दूरत्वादिदोषेण शङ्किताप्रामाण्यात् चन्द्रप्रादेशिकत्वादिज्ञानादपि तत्सिद्धिः स्यात् । यदि प्रामाण्याग्रहणेऽपि अप्रामाण्यशङ्काविरहमात्रेण संवादादिज्ञानं स्वविषयनिश्चयात्मकं भवेत्, तदा तथैव प्रथमज्ञानमपि स्वविषयनिश्चयात्मकं सत् प्रवृत्त्यादिकार्योपयोगि भवेदिति भावः । **ननु**—अप्रामाण्यशङ्काविरहापेक्षया प्रामाण्यनिश्चयो लघीयान्, अतो निश्चितप्रामाण्यमेव संवादादिज्ञानं स्वविषयनिश्चयरूपमिति संवादादिज्ञानस्य तथात्वसिद्ध्यर्थं स्वतःप्रामाण्यमिष्यत—**इति चेत्**, तत्राह—**स्वतःप्रामाण्ये चेति ।** संवादादिज्ञाने स्वविषये स्फुरति तद्विषयविशेष्यप्रकारकतदुभयवैशिष्ट्यघटितं योग्यधर्मरूपं तत्प्रामाण्यं ज्ञानत्ववदुत्सर्गतः स्फुरति । यत्र तु क्वचिदनभ्यासदशादिदोषाद् विशेष्यप्रकारवैशिष्ट्यांशे ज्ञानस्य न सत्तानिश्चयरूपत्वं तत्र तद्घटितस्य प्रामाण्यस्य स्थाणुत्वादेरिव स्फुरणं नास्ति तत्र परं प्रामाण्यसंदेह इति खलु संवादादिज्ञाने प्रामाण्यस्य स्वतस्त्वं समर्थनीयं; **तन्न्यायः** प्रथमज्ञानेऽपि तुल्य इति भावः । **ननु** अयं प्रामाण्यस्य स्वतस्त्वाभ्युपगमो न युक्तः; **तथाहि**—सिद्धान्ते ज्ञानं स्वप्रकाशम् । अत इदं जलमिति इदं जलत्वेन जानामीति च व्यवहारहेतौ प्रथमज्ञाने एव तत्प्रामाण्यस्य स्फुरणं वाच्यम्; तत्र प्रामाण्यघटकसर्वोपाधिस्फुरणाभ्युपगमात्, ततश्च तत्र प्रामाण्यवद्विशेष्यकप्रामाण्यप्रकारकत्वरूपं प्रामाण्यान्तरमपि संपद्यत इति तदपि तत्र स्फुरेद्, न्यायतौल्यात्, नचेष्टापत्तिः; तथा सति द्वितीयप्रामाण्यघटितप्रामाण्यान्तरस्य तत्तत्प्रामाण्यघटितप्रामाण्यान्तराणां च स्वप्रकाशज्ञाने स्फुरणापत्त्या तस्यानुभवविरुद्धापर्यवसितानन्तविषयाभ्युपगमापत्तेः—**इति चेत्, उच्यते;** स्वप्रकाशज्ञाने प्रामण्यस्फुरणे सति प्रामाण्यवद्विशेष्यकप्रामाण्यप्रकारकत्वरूपप्रामाण्यान्तरं संपद्यते चेत्, संपद्यतां नाम, न तस्यापि तत्र स्फुरणमिष्यते, प्रामाण्यतदाश्रययोः तदुभयवैशिष्ट्यस्य च तत्र स्फुरणेऽपि तत्प्रकारकत्व—तद्विशेष्यकत्वयोस्तत्रास्फुरणात् । नहि जलज्ञानानन्तरम् 'इदं जल'मिति 'इदं जलत्वेन जाना'मीति च व्यवहारवदिदं ज्ञानं प्रमाणत्वेन जानामीत्यपि व्यवहारो दृश्यते; येन तयोरपि तत्र स्फुरणमिष्येत । न च स्वप्रकाशज्ञानगतत्वेन तत्स्फुरणावश्यंभावः; तद्गतगुणत्वद्रव्यत्वादिवदस्फुरणसंभवात् । **तथापि** प्रामाण्यस्य स्वाश्रयसहभाननियमरूपस्वतस्त्वाभ्युपगमात् स्फुरणावश्यंभाव इति **चेद्, न;** यत्र प्रामाण्यघटकसर्वोपाधिस्फुरणमस्ति, तत्र प्रामाण्यस्य स्फुरणमित्युत्सर्गरूपस्य नियमस्य यत्र तद्घटकस्य कस्यचिदस्फुरणं तत्रापवादाभ्युपगमात् । तस्मात् स्वप्रकाशज्ञाने प्रामाण्यस्फुरणौत्सर्गिकत्वाभ्युपगतौ न काचिदनुपपत्तिः । प्रसङ्गादुत्पत्तावपि स्वतस्त्वं निरूपयितुं पृच्छति—**ननु किमिति । यद्वा**—ज्ञानमुत्पद्यमानमुत्सर्गतः प्रमारूपमेवोत्पद्यते चेदेवं प्रमाप्रायिकत्वाधीनसमुत्कटतद्वासनावशादप्रामाण्यशङ्कानुदयः प्रामाण्यस्फुरणं चेत्युभयमौत्सर्गिकं भवति, अतः **स्वतःप्रामाण्ये चेति** पूर्ववाक्येनोपक्षिप्तमौत्सर्गिकत्वरूपं ज्ञप्तिस्वतस्त्वमुपपादयितुमुत्पत्तावपि स्वतस्त्वं निरूपयितुं पृच्छति—**ननु किमिति । इयं रूपप्रमेति । ननु**—स्वतस्त्वनिर्वचनप्रश्ने तदप्रदर्श्य किमिति प्रमाणमुपन्यस्यते; **अथ** ज्ञानसामग्रीमात्रजन्यत्वमेव स्वतस्त्वं, तत्तु प्रामाण्यस्य नेष्यते, किंतु तदधिकरणज्ञानव्यक्तेः, अतो नोक्तदोष इति प्रमापक्षीकरणेन सूचितमिति **चेत्, न;** उपन्यस्तनिर्वचनस्य परतस्त्वसाधारण्यात् । नहि परतस्त्वपक्षे प्रमा न ज्ञानं; येन सा ज्ञानसामग्रीमात्रजन्या न स्यात् । **अथ** ज्ञानसामान्यसामग्रीमात्रजन्यत्वं विवक्षितमिति **चेद्, न;** ज्ञानसामान्यसामग्र्यनुप्रविष्टात्ममनःसंयोगाद्यतिरिक्तेन्द्रि-

इति ॥ सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति । तथाच लोकेऽनुभवः—शुक्तिका हि

भामती ।

आह—सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति । अन्यस्यान्यधर्मकल्पनाऽनृतता, सा चानिर्वच-

वेदान्तकल्पतरुः ।

जन्माभावादिति—तदुच्यते; इयं रूपप्रमा, अर्थसंप्रयोगत्वानधिकरणैतच्चक्षुर्गतगुणजन्या न भवति, प्रमात्वात्, श्रोत्रज-

कल्पतरुपरिमलः ।

त्यलिङ्गपरामर्शादिजन्यासु प्रत्यक्षानुमित्यादिप्रमास्वसंभवापत्तेः—इति चेद्, मैवम्; ज्ञानसामग्रीशब्देन प्रमाभ्रमसाधारण-ज्ञानकारणकलापस्य विवक्षितत्वात्, इन्द्रियादीनां च प्रमावद् भ्रमेष्वपि कारणत्वात्, चक्षुषा रजतं पश्यामीति प्रातिभासि-कस्यापि चाक्षुषत्वानुभवात् । प्रमायाः प्रमाभ्रमसाधरणकारणातिरिक्तकारणजन्यत्वाभावरूपं स्वतस्त्वं यथा सिध्यति तथा साध्यं दर्शयति—अर्थेति । अत्र साध्ये संयुक्तसमवायान्तर्गतसंयोगरूपचक्षुर्गुणजन्यत्वेन विषयभूतरूपगुणजन्यत्वेन च बाधवारणयाऽसंप्रयोगत्वानधिकरणेति चक्षुर्गतेति च गुणविशेषणम् । सामान्याभावविवक्षया चक्षुरन्तरगतगुण-जन्यत्वाभावेनार्थान्तरवारणायैतदिति चक्षुर्विशेषणं, तदविवक्षायां तु नोपादेयम् । न चैवमपि व्यञ्जकतेजोरूपत्वादालोकरूपव-च्चक्षूरूपमपि रूपप्रमाहेतुरिति बाधः; तेजोगतमुद्भूतरूपमेव रूपादिज्ञानहेतुः नतु ऊष्मरूपवदनुद्भूतं चक्षूरूपमिति मतानु-सरणात् । मतान्तरे तु रूपभिन्नेत्यपि विशेषणं देयम् । ननूक्तरूपं स्वतस्त्वं कथमनेन साध्यनिर्देशेन सिध्यति, नहि प्रमाभ्रमसाधारणज्ञानसामान्यकारणकलापाननुप्रविष्टप्रमायां विशेषकारणं संप्रयोगातिरिक्तचक्षुर्गुणरूपं परतस्त्ववादिभि-रिष्यते, येन तज्जन्यत्वाभावसाधनं स्वतस्त्वसाधनं भवेत्; परतस्त्ववादिभिर्हि स्थूलावयविप्रत्यक्षप्रमायां भूयोवयवेन्द्रिय-संनिकर्षो जन्यप्रत्यक्षप्रामाण्यं, यावद्विषयसंनिकर्षो जन्यप्रमामात्रे, भ्राह्ययथार्थज्ञानं च विशेषकारणमिष्यते; नच तद्व्या-वर्तनमुदाहृतसाध्यनिर्देशेन लभ्यते, तत्रादिमस्य विशेषकारणद्वयस्य व्यावर्तनं चक्षुर्गतविशेषणलभ्यं संप्रयोगातिरिक्त-

१ अत्र विवरणप्रस्थानम्—केयमख्यातिरितिचेत्, अविविक्तानेकपदार्थविषयकज्ञानं; स्वरूपतो विषयतश्चागृहीतभेदे ग्रहणस्मरणे इति यावत् । ग्रहणस्मरणार्थकत्वेऽपि दोषविशेषान्नार्थविवेक इत्येकत्वावभासो विभ्रमो भवति । प्रवृत्तिबाध एव नेदं रजतमिति ज्ञानविषयः न रजतज्ञानादिबाध इति निष्फलप्रवृत्तिप्रयोजकाविवेक एव भ्रमशब्देन व्यपदिश्यते । निरन्तरोत्पन्नत्वाच्च ज्ञानद्वयस्यापि प्रवर्तकत्वं इति । तन्निराकरणप्रकारस्त्वयम्—अविवेकस्याभावरूपस्य न प्रवृत्तिप्रयोजकत्वम् । अविविक्तानेकपदार्थविषयकज्ञानत्वं तु खण्डो गौरित्यादिप्रमासाधारणं । संसर्गविषयकत्वं तु प्रत्यभिज्ञादाविव इदं रजतमिति ज्ञानस्यापि विद्यत इति तदविशिष्टोक्तरूपत्वमसं-भवग्रस्तम् । किंच ग्रहणमेव स्मर्यमाणात् स्वार्थं किं न विविंच्यात्; गृहीतमात्रस्य रजताद्भेदे सति धर्म्याकारभेदरूपविशेषदर्शनसत्वात् । एवं किमिति स्मृतिर्वा गृह्यमाणात्स्वार्थं न विविनक्ति । स्मरणाभिमानस्य पूर्वानुभवसंभेदरूपत्वं न वर्णयितुं शक्यते, स इत्याकारेणानु-विद्धत्वं तु यद्यपि स्मरणाभिमानः; तथापि तत्प्रमोषार्थाविवेको न विकल्पसहः । विद्यमानेऽपि तस्मिन् प्रत्यभिज्ञादौ अर्थाविवेकदर्श-नात् । नच स्वप्नेऽहं नीलमिति गृह्यमाणाविवेकः । स्मर्यमाणानामन्योन्याविवेके परोक्षमेव सर्वमवभासते । अतः न प्रमाणस्मृति-द्वैराश्यमेव ज्ञानस्य, किंतु तृतीयं भ्रान्तिज्ञानमपीत्यन्यथाख्यातिपक्ष एव समीचीनः । तत्रहि—दोषोपहितमिन्द्रियं रजतं देशान्तरस्थं गृह्णाति । तच्च शुक्तिकात्मना गृह्यते सादृश्यादिति रजतज्ञानमपि ग्रहणात्मकमेव । शुक्त्यात्मना तु ग्रहणाद्भ्रमत्वव्यपदेशः । नेदं रज-तमिति बाधोऽपि संसर्गमेव गोचरयति, इति न कोऽपि दोष इति नैयायिकाः । तत्र—ज्ञानान्यथाभावः किमन्यथाख्यातिः, उत स्फुरणान्यथाभावः, आहो विषयान्यथाभावः । प्रथमे अन्याकारं ज्ञानमन्यालम्बनं भ्रम इति भवति । तत्र आलम्बनशब्दार्थस्य तदाकारसमर्पकत्वरूपत्वे इदं रजतमिति ज्ञानस्य भ्रमत्वानापत्तिः शुक्तिज्ञानस्य रजताकारसमर्पकत्वाभावात् । संवित्प्रयुक्तव्यवहारयो-ग्यत्वं नालम्बनशब्दार्थः; व्याघ्रादिज्ञानालम्बनत्वस्य दण्डादावापत्तेः । तृतीयस्तु पक्षः वस्तुनो वस्त्वन्तरात्मनावभासः । अन्यथा-परिणतवस्तुविषयकज्ञानं वा अन्यथाख्यातिरिति । तत्र प्रथमपक्षे अन्यस्यान्यात्मकत्वं पारमार्थिकं वा उतापारमार्थिकं वेति विचा-रणायां बाधानुपपत्त्या अपारमार्थिकत्वे प्रतीत्यन्यथानुपपत्त्या अनसद्रूपत्वे च प्रातिभासिकत्वे पर्यवसानम् । तत्रैवंसति संसर्गस्येव संसर्गोपहितस्यापि प्रातिभासिकत्वमेव युक्तमिति नान्यथाख्यातिसिद्धिः । द्वितीयपक्षे क्षीरपरिणामस्येव दध्नो न बाधो युक्तः; निमि-त्तापगमेऽपि दध्यादीनामिव दोषापगमेऽपि रजताद्यवस्थानं च स्यात् । द्वितीयस्तु पक्षः दुष्टकरणजन्यप्रतीतिपरिणाम एव रजतमिति । तदपि न युक्तं; तद्विषयकत्वेन लब्धात्मना प्रत्ययेन तदुत्पत्तिवर्णनासंभवात्, इत्यन्यथाख्यातिवादोऽपि न समीचीनः । आत्मख्या-तिवादोऽप्येवमेव निराकरणीयः । एवंच संस्कारदुष्टकरणसंवलिताविद्याविलसितमेव भ्रमज्ञानमिति स्वविषयरजतादीनामनिर्वच-नीयत्वमुपपादयति । भिन्नजातीयज्ञानहेतुभ्यो लैङ्गिकज्ञानप्रत्यभिज्ञानचित्रज्ञानादिवदेकज्ञानमपि संभवत्येवेति मायामयमेव रजतम् । मायाविद्ययोस्तु भेदाभावात् मिथ्याज्ञाननिमित्तत्वं न विहन्यते । स्वप्नेपि निद्रादिदोषोपप्लुतमानसादृष्टादिसमुद्बोधितसंस्कारविशेषस-हकार्यनुरूपं तदवच्छिन्नचैतन्यस्थाविद्यापरिणामो ज्ञानमुत्पद्यते इति न कोऽपि दोषः । इति ॥

वेदान्तकल्पतरुः।

प्रमावत्। तथा एषा प्रमा, उक्तविधगुणज्ञानाधीनज्ञाना न भवति, तथाविधगुणज्ञानाधीनप्रवृत्तिकरी च न भवति, तत

कल्पतरुपरिमलः।

विशेषणेन विरुद्धम्, संप्रयोगातिरिक्तविशेषणलभ्यं तृतीयस्य व्यावर्तनं चक्षुर्गतविशेषणेन विरुद्धम्; तस्माद् नानेनानुमाने स्वतस्त्वसिद्धिरिति—**चेत्, उच्यते**; चक्षुर्गतपित्तदोषाभावे शङ्खे श्वेत्यप्रमा तदभावे न, चक्षुर्गतमण्डूकवसाञ्जनाभावे वंशवर्णप्रमा तदभावे नेत्यन्वयव्यतिरेकाभ्यां रूपचाक्षुषप्रमायां विशेषकारणत्वेन शङ्कार्हस्तथैव परतस्त्ववादिभिरिष्यमाणश्चक्षुर्दोषाभावरूपो यस्तद्धर्मस्तज्जन्यत्वाभाव इह साध्यः। अन्यत्तु प्रमायां विशेषकारणत्वेन शङ्कार्हमेव न भवति। नहि भूयोवयवेन्द्रियसंनिकर्षं विना स्थूलावयविप्रत्यक्षप्रमा नोत्पद्यते; तदभावेऽपि संनिकृष्टकिंचित्प्रदेशावच्छेदेन तदुत्पत्तिदर्शनात्। अतस्तत्तत्प्रदेशप्रत्यक्षमात्रार्थं तत्तत्प्रदेशसंनिकर्षापेक्षेति न भूयोवयवेन्द्रियसंनिकर्षस्य स्थूलावयविप्रत्यक्षप्रमायां विशेषकारणत्वे मानमस्ति। **एतेन**—स्थूलावयवावच्छेदेन संनिकर्षस्तस्यां विशेषकारणमित्यपि—**निरस्तम्**; स्थूलावयविनि परमाणुद्व्यणुकरूपसूक्ष्मावयवावच्छेदेन संनिकर्षे भ्रमस्याप्यनुदयाद्, यावद्विषयसंनिकर्षोऽपि न प्रमायां विशेषकारणम्; असंनिकृष्टभाने अतिप्रसङ्गेन शुक्तिरजतादिष्वपि संस्कारस्य स्मृतेर्वा संनिकर्षत्वस्याभ्युपेयत्वात्, असंनिकृष्टमपि रजतादिकं दोषाद्भासत इति समर्थने तथैवासंनिकृष्टमपि निध्यादिकमञ्जनादिगुणाद् भासत इति समर्थयितुं शक्यत्वेन प्रमायामपि तस्यानुगतविशेषकारणत्वाभावप्रसङ्गात्। विशेष्यवृत्तिविशेषणसंनिकर्षोपि न जन्यप्रत्यक्षप्रमानुगतो गुणः; परंपरासंबन्धेन स्फटिकवृत्तेर्लौहित्यस्य तत्र साक्षात्संबन्धावगाहिनि भ्रमे तस्य साधारण्यात्, तत्तत्संबन्धविशेषेण वृत्तिविवक्षायामननुगमात्। **एतेन**—विशेषणवद्विशेष्यसंनिकर्षस्तस्यां गुण इत्यपि—**निरस्तम्**; ग्राह्ययथार्थज्ञानस्य तु जन्यप्रमामात्रे नान्वयव्यतिरेकाभ्यां विशेषकारणत्वं, व्यभिचारेण तदसिद्धेः। **लोके** शाब्दप्रमायां वक्तृवाक्यार्थयथार्थज्ञानस्य कारणत्वदर्शनात् यद्विशेषयोः कार्यकारणभावः बाधकं विना तत्सामान्ययोरपीति व्याप्त्या तत्र तस्य कारणत्वसिद्धिः। नच व्यभिचारः; यत्रास्मदादिगतग्राह्ययथार्थज्ञानं नास्ति, तत्र सर्वत्रोक्तव्याप्तिबलेन परमेश्वरज्ञानस्य तथात्वेनापि कारणत्वकल्पनोपपत्तेरिति **चेद्, न**; अप्रयोजकत्वात्। नच जन्यप्रमात्वावच्छिन्नकार्यस्याकस्मिकत्वप्रसङ्गो विपक्षबाधकस्तर्कः; जन्यज्ञानत्वावच्छिन्नज्ञानसामान्यकारणकलापस्य सत्त्वात्, तत्र तद्वद्विशेष्यकतत्प्रकारकत्वस्याव्यवस्थितघटत्वपटत्वादिप्रवेशेनाऽननुगतस्यावच्छेदककोटिप्रवेशायोगात्। अन्यथा वक्तृवाक्यार्थायथार्थज्ञानस्य शाब्दभ्रमे कारणत्वाद् 'यद्विशेषयो-'रित्युक्तव्याप्त्यैव भ्रममात्रे ग्राह्यभ्रमो हेतुः कल्पनीय इति परमेश्वरे नित्यप्रमावद् नित्यभ्रान्तिरप्यङ्गीकरणीया स्यात्। **यत्तु**—तदभाववति तत्प्रकारकज्ञानमपेक्ष्य लघु तदभाववज्ज्ञानमेव भ्रमेषु दोषोस्तु, तत्तु भ्रमे धर्मिज्ञानरूपं सर्वत्र सुलभमिति नेश्वरे भ्रान्तिकल्पना प्रसज्यते, नचैवं-प्रमायामपि लघु तद्वज्ज्ञानमेव गुणः स्यादिति—**वाच्यम्; इष्टा**पत्तेः, तावतापि परतस्त्वसिद्धेस्तत्फलेश्वरसिद्धेश्चाप्रत्यूहत्वात्—**इति। तन्न**; तदभाववत्त्वेन ज्ञानस्य भ्रमविरोधिनस्तत्र कारणत्वायोगात्, वस्तुतो यत् तदभाववत् तज्ज्ञानस्य विशेषणज्ञानादिरूपस्य प्रमासाधारण्येन भ्रमासाधारणकारणत्वरूपदोषत्वायोगात्। तदभाववद्विशेष्यकं ज्ञानं दोष इति चेद्, **न**; तदभाववद्विशेष्यकानामपि ज्ञानानां प्रमाकारणानां बहुलमुपलम्भात्। तदभाववद्भ्रमविशेष्यविशेष्यकं ज्ञानं दोष इति **चेद्, न**; तदभाववत्त्वविशेषणवैयर्थ्यात्, भ्रमविशेष्यस्यारोप्याभाववत्त्वनियमात्। अस्तु तर्हि भ्रमविशेष्यविशेष्यकमेव ज्ञानं दोष इति **चेद्, न**; एतदपेक्षया भ्रम एव भ्रमे दोष इति कल्पनाया लघीयस्त्वात्। तस्माद् भूयोवयवेन्द्रियसंनिकर्षादीनां शङ्कानर्हत्वात् प्रमान्वयव्यतिरेकशालितया तदर्हस्येन्द्रियदोषाभावस्यैवाधिककारणत्वनिराकरणमनेनानुमानेन कृतम्। चक्षुर्दोषाभावस्य तन्निराकरणमिदम् इन्द्रियान्तरदोषाभावानामधिककारणत्वनिराकरणार्थानामप्येतच्छायापन्नानामनुमानान्तराणामुपलक्षणम्। का तर्हि दोषाभावान्वयव्यतिरेकयोर्गतिः? दोषस्य प्रमाप्रतिबन्धकत्वमेव। सत्यां सामग्र्यां कार्यविरोधि हि प्रतिबन्धकं लोके प्रसिद्धं, नतु नैयायिककल्पितं कारणीभूताभावप्रतियोगि; तैरपि साक्षादविरोधिनो ज्ञानस्य जनकज्ञानविघटकस्यैव प्रतिबन्धकत्वम् इत्यादि वदद्भिः कारणीभूताभावप्रतियोगित्वेनानभ्युपगतमपि कार्यानुत्पत्तिव्याप्यमात्रं प्रतिबन्धकमिष्यत एवेत्यलं विस्तरेण॥ ज्ञप्तिस्वतस्त्वमपि अनुमानारूढं करोति—**तथेति। उक्तविधेति।** चक्षुर्गतगुणज्ञानाधीनप्रथमप्रामाण्यज्ञानं न भवतीत्यर्थः। स्वतस्त्ववादे प्रथमं प्रामाण्यस्य करणगुणज्ञानानपेक्षज्ञानत्वेऽपि पश्चात् करणगुणेनापि तदनुमानं संभवतीति बाधवारणाय **प्रथमविशेषणम्।** परतस्त्ववादे प्रथममपि प्रमारूपधर्मिज्ञानं करणगुणज्ञानानधीनं संभवतीति सिद्धसाधनवारणाय प्रामाण्यपदम्। **गुणपदं** पूर्ववद् निर्दोषत्वधर्मपरम्। **ननु**—परतस्त्ववादिभिः करणदोषाभावलिङ्गादिव समर्थप्रवृत्तिलिङ्गसंवादाभ्यामपि प्रथमं प्रामाण्यस्य ज्ञेयत्वमिष्यते, तदुभयज्ञेयत्वनिरासोऽनेनानुमानेन न सिध्यतीति—**चेत्, सत्यम्**; समर्थप्रवृत्तिसंवादौ तदयोग्यवैदिकार्थादिज्ञानप्रामाण्यावधारणे न संभवतः, करणदोषाभावाज्ञानं तु सर्वत्र संभवतीति तदधीनप्रथमज्ञानत्वमनेनानुमानेन निरस्तम्। तथा च यस्यां प्रमायां करणदोषाभावलिङ्गकमेव परतस्त्ववाद्य-

रजतवदवभासते, एकश्चन्द्रः सद्वितीयवदिति । कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्ध-

भामती ।

नीयतेत्यधस्तादुपपादिम् । तेन सर्वेषामेव परीक्षकाणां मतेऽन्यस्यान्यधर्मकल्पनानिर्वचनीयतावश्यंभाविनीत्यनिर्वचनीयता सर्वतन्त्राविरुद्धार्थः इत्यर्थः । आख्यातिवादिभिरकामैरपि सामानाधिकरण्यव्यपदेशप्रवृत्तिनियमस्नेहादिदमभ्युपेयमिति भावः । न केवलमियमनृतता परीक्षकाणां सिद्धा, अपितु लौकिकानामपीत्याह—**तथाच लोकेऽनुभवः—शुक्तिका हि रजतवदवभासत इति** । न पुना रजतमिदमिति शेषः । **स्यादेतत्**—अन्यस्यान्यात्मताविभ्रमो लोकसिद्धः, एकस्य त्वभिन्नस्य भेदभ्रमो न दृष्ट इति कुतश्चिदात्मनोऽभिन्नानां जीवानां भेदविभ्रम इत्यत आह—**एकश्चन्द्रः सद्वितीयवदिति** । पुनरपि चिदात्मन्यध्यासमाक्षिपति—**कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणाम्** । **अयमर्थः**—चिदात्मा प्रकाशते, न वा । **न चेत्प्रकाशते**, कथमस्मिन्नध्यासो विषयतद्धर्माणाम् ? न खल्वप्रतिभासमाने पुरोवर्तिनि द्रव्ये रजतस्य वा तद्धर्माणां वा समारोपः संभवतीति । **प्रतिभासे वा** न तावदयमात्मा जडो घटादिवत्पराधीनप्रकाश इति युक्तम् । न खलु स एव कर्ता च कर्म च भवति; विरोधात् । परसमवेतक्रियाफलशालि हि कर्म, नच ज्ञानक्रिया परसमवायिनीति कथमस्यां कर्म । नच तदेव स्वं च परं च; विरोधात् । आत्मान्तरसमवायाभ्युपगमे तु ज्ञेयस्यात्मनोऽनात्मत्वप्रसङ्गः, एवं तस्य तस्येत्यनवस्थाप्रसङ्गः । **स्यादेतत्**—आत्मा जडोऽपि सर्वार्थज्ञानेषु भासमानोऽपि कर्तैव न कर्म, परसमवेतक्रियाफलशालित्वा-

वेदान्तकल्पतरुः ।

एव, तद्वदेवेति ज्ञप्तिव्यवहारयोरपि स्वतस्त्वसिद्धिरिति । **भाष्ये**ऽन्यथाख्यातिः स्वीकृतेति भ्रमं व्यावर्तयन्व्याचष्टे—**अन्यस्यान्यधर्मकल्पनेति** । अवभासपदव्याख्यानं **कल्पनेति** । **सर्वतन्त्राविरुद्धोऽर्थः** सर्वतन्त्रसिद्धार्थः, यथाप्रमाणं प्रमेयमिति । रजतवदिति न सादृश्यविवक्षा, अपितु भासते परं रजतवत्, नहि वस्तुतो रजतमिति, मिथ्यात्वं विवक्षितमित्याह—**न पुनरिति** । एवमारोप्यसिद्ध्यसंभवप्रयुक्ते आक्षेपे परिहृते पुनरात्मनोऽधिष्ठानत्वानुपपत्त्याध्यास आक्षिप्यत इत्याह—**पुनरपीति** । आत्मनो ग्राह्यत्वे स्वग्राह्यत्वं, परग्राह्यत्वं वा । **नाद्य** इत्याह—**न खल्विति** । **न द्वितीय** इत्याह—**आत्मान्तरेति** । संविदाश्रयत्वेन सिद्धिमाशङ्कते—**स्यादेतदिति** ।

कल्पतरुपरिमलः ।

भिमतं प्रामाण्यग्राहकं प्रवर्तते सैवात्र पक्षो, नतु समर्थप्रवृत्तिसंवादावसितप्रामाण्येति न सिद्धसाधनम् । **तदवसितप्रामाण्यायां तु प्रमायां स्वतस्त्वे** एतद्धटप्रमा, एतद्धटविषयसमर्थप्रवृत्तिसंवादाधीनप्रथमप्रामाण्यनिश्चया न भवति, प्रमात्वात्, पटप्रमावदित्यनयैव रीत्या तत्राप्यनुमानमुन्नेतुं शक्यमिति न प्रदर्शितम् । एवंच परतस्त्वनिषेधे प्रामाण्यस्य स्वाश्रयसहभाननियमरूपस्वतस्त्वसिद्धिः । **ननु**—एवं सति यस्यां रूपप्रमायां करणदोषशङ्कया प्रामाण्यसंशये सति तन्निर्दोषत्वनिश्चयेन प्रामाण्यनिश्चयः, तत्र साध्यस्य बाधः स्यादिति—**चेद्, न**; अतथाभूताया इह पक्षीकरणात्, तत्प्रतिपत्त्यर्थत्वादेवेति पक्षविशेषणस्य । **तथाविधेति** । **ननु**—इह साक्षात्प्रवृत्तेः करणगुणज्ञानाधीनत्वं **न** निषेध्यम्; परतस्त्ववादिभिरपि तस्याः साक्षात्समानविषयरजतादिज्ञानजन्यत्वस्यैवाभ्युपगतत्वात् । नापि प्रामाण्यनिश्चयद्वारा; प्रामाण्यनिश्चयो न प्रवृत्त्यर्थमपेक्षितः, अनवस्थाप्रसङ्गात्, किंत्वप्रामाण्यशङ्काशून्यं समानविषयज्ञानमेवेति तैरभ्युपगतत्वात् । नच वाच्यं—करणदोषसंशयेन प्रवर्तकज्ञानस्याप्रामाण्यशङ्कया प्रवृत्तिप्रतिबन्धे प्रसक्ते निर्दोषत्वरूपकरणगुणज्ञानजन्येन प्रामाण्यनिश्चयेन तच्छङ्कानिरासपूर्विका यत्र प्रवृत्तिः तत्र तस्याः करणगुणज्ञानाधीनत्वं परतस्त्ववाद्यभिमतं निषेध्यं—इति; स्वतस्त्ववादिभिरपि तस्याङ्गीकर्तव्यत्वेन तन्निषेधे बाधापत्तेरिति—**चेत्, सत्यम्**; प्रामाण्यनिश्चयवत् प्रवृत्तिरपि करणगुणज्ञानाधीनेति परतस्त्ववादिषु केषांचिन्मतमालक्ष्य तन्निषेधार्थमिदमनुमानम् । **सर्वतन्त्रसिद्धार्थ इति** । यद्यप्यख्यातिमते अन्यस्यान्यात्मतया भानमेव न सिद्धम्; अन्यथाख्यातिमते तत्सिद्धावप्यन्यात्मताऽनिर्वचनीयेत्येतदसिद्धम्; तथापि प्रागुक्तयुक्त्या तथाऽवश्याभ्युपगन्तव्यतामापाद्य सर्वतन्त्रसिद्धार्थत्वोक्तिः । **रजतवदिति न सादृश्यविवक्षेति** । **ननु**—'तेन तुल्यं क्रिया चेद्वति'रिति सूत्रेण क्रियया सदृशे वतिरनुशिष्टः, नतु मिथ्याभूते, **अथ** सदृशवाचिनो मिथ्याभूते लक्षणेत्युच्येत, **नैतद्युक्तम्**; यथा रजतं रजतात्मना भासते, तथा शुक्तिकापि रजतात्मना भासत इति वतिना रजतताादात्म्यभानविषयत्वरूपे रजतसादृश्ये शुक्तिकायाः प्रतिपादिते सति असंनिहितस्य रजतस्य तत्तादात्म्यस्य चात्र प्रत्यक्षायोगेनार्थान्मिथ्याभूतरजततत्तादात्म्यसिद्धिसंभवादिति—**चेत्, सत्यम्**; अर्थतः सिध्यति, रजततत्तादात्म्यमिथ्यात्वे रजतवदवभासत इति व्यवहर्तुर्लोकस्यैतात्पर्यं, न तु द्वारभूते शुक्तिकागतरजतसादृश्ये इत्याशये न सादृश्येन विवक्षा किंतु मिथ्यात्वे इत्युक्तम् । **यद्वा**—यथा सादृश्यवाचिन इवशब्दस्य वतेश्च दूरादागच्छन् देवदत्तवद्भातीत्यादिप्रयोगादुत्कटकोटिकसंशयरूपा तादात्म्यसंभावनाऽप्यर्थः । एवं शुक्तिका मिथ्यारजतात्मनावभासत इत्यर्थविवक्षावतां रजतवदवभासत-

भामती ।

भावात्, चैत्रवत् । यथाहि चैत्रसमवेतक्रियया चैत्रनगरप्राप्तावुभयसमवेतायामपि क्रियमाणायां नगरस्यैव कर्मता; परसमवेतक्रियाफलशालित्वात्, नतु चैत्रस्य क्रियाफलशालिनोऽपि, चैत्रसमवायाद्गमनक्रियाया **इति**—**तन्न**; श्रुतिविरोधात् । **श्रूयते हि** 'सत्यं ज्ञानमनन्तं ब्रह्म' इति । **उपपद्यते च** । **तथाहि**—योऽयमर्थप्रकाशः फलं, यस्मिन्नर्थश्च आत्मा च प्रथेते, स किं जडः, स्वयंप्रकाशो वा । **जडश्चेद्**विषयात्मानावपि जडाविति कस्मिन्किं प्रकाशेताविशेषात्, इति॰प्राप्तमान्ध्यमशेषस्य जगतः । **तथाचाभाणकः**—'अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे' । **नच**—निलीनमेव विज्ञानमर्थात्मानौ ज्ञापयति—चक्षुरादिवदिति; वाच्यम् । ज्ञापनं हि ज्ञानजननम्, जनितं च ज्ञानं जडं सन्नोक्तदूषणमतिवर्तेतेति । एवमुत्तरोत्तराण्यपि ज्ञानानि जडानीत्यनवस्था । तस्मादपराधीनप्रकाशा संविदुपेतव्या । **तथापि**

वेदान्तकल्पतरुः ।

स्वप्रकाशफलस्य जन्मादिनिषेधेनात्मत्वमुपपादयति—**तथाहीत्यादिना** । **नन्वभ्युपेयते** संविदपराधीनप्रकाशेति; आत्मा तु जडः किं न स्यादिति मन्वानं संविदाश्रयत्ववादिनंप्रति आत्मस्वप्रकाशत्ववाद्याह—**तथापीति** । अर्थात्मसंब-

कल्पतरुपरिमलः ।

इत्यादिव्यवहारदर्शनान्मिथ्यात्वमपि तदर्थं इत्याशयेन तथोक्तमिति सर्वमनवद्यम् । **स्वप्रकाशफलस्येति** । **ननु**—**तथा ही**त्यादिग्रन्थेन प्रथमं संविदः स्वप्रकाशत्वमेवोपपाद्यते, तत्कथं प्रतिपाद्यत्वेन नावतार्यते ? कथं च स्वप्रकाशत्वप्रतिपादनानन्तरं प्रतिपाद्यमानः परपक्षे संविदोऽर्थप्रकाशत्वासंभवः, स्वपक्षे एवार्थजातस्य संविद्विवर्ततया संविदभेदेन संविदः स्वाभिन्नार्थप्रकाशत्वसंभवश्च प्रतिपाद्यत्वेन नावतार्यते ? तदनन्तरं संविदो जन्मादिनिषेधेन प्रतिपाद्यमानम् आत्मत्वमेव केवलं प्रतिपाद्यत्वेनावतार्यते ?—**उच्यते**; संविदाश्रयत्वेनात्मसिद्धिं वदतां संविदः स्वप्रकाशत्वमभिमतमेवेति तदुपपादनमनुवादमात्रमित्याशयेन तत् स्वप्रकाशफलस्येत्यनुवाद्यकोटौ निवेशितम् । संविदः परपक्षे अर्थप्रकाशत्वासंभवप्रदर्शनपूर्वकम् अर्थजातस्यानिर्वचनीयत्वपक्ष एव तत्संभवोपपादनम् अर्थजातस्यानिर्वचनीयत्वव्यवस्थापनपर्यवसन्नं सत्स्वरूपतोऽननुभूयमानभेदायाः संविदो नार्थोपाधिको भेदस्तस्य मिथ्यात्वादिति संविदो नित्यात्मस्वरूपत्वोपपादकतयैव प्रकृतोपयोगीति । अन्यथा कथं 'सत्यं ज्ञानमिति' श्रुतेर्ज्ञानात्माभेदे तात्पर्यं द्रागेव निश्चेतुं शक्यम् ? इह हि ज्ञानपदमन्तोदात्तमधीयते । अन्तोदात्तस्वरश्च केवलं ल्युडन्ततायां नोपपद्यते । **तथाहि**—ल्युडादेशस्य अन इत्यस्य 'आद्युदात्तश्चे'ति प्रत्ययस्वरेण प्रथमाकारे उदात्ते 'लितीति' लित्स्वरेण प्रकृत्याकारे चोदात्ते 'अनुदात्तं पदमेकवर्जं'मिति शेषनिघातस्वरेण प्रत्ययस्थयोरकारयोरनुदात्तयोः 'एकादेश उदात्तेनोदात्त' इत्येकादेशस्वरेण प्रकृत्याकारप्रत्ययाद्याकारयोरेकादेशे चोदात्ते सति प्रत्ययान्त्याकारस्यानुदात्तस्य विभक्त्यकारस्य च 'अनुदात्तौ सुप्पिता'विति सुप्स्वरेणानुदात्तस्य 'अमि पूर्वं' इत्येकादेशो भवन् स्थानेऽन्तरतम इति परिभाषयाऽनुदात्तः स्यात् । तस्य चानुदात्तस्य 'उदात्तादनुदात्तस्य स्वरित' इति स्वरितादेशो भवेत् । अत एतद् ज्ञानमिति पदं केवलल्युडन्तत्वे स्वरितान्तं स्यात् । यथा काठके 'संज्ञानं विज्ञानं प्रज्ञानमिति' । तस्मादन्तोदात्तनिर्वाहार्थमिदं ज्ञानपदं ल्युडनन्तरं मत्वर्थीयाच्प्रत्ययान्तं वाच्यम्; अर्शआदेराकृतिगणत्वात् । तथा सत्यन्तोदात्तस्वर उपपद्यते । अर्शआद्यच्प्रत्यये 'यस्येति चेति' प्रकृतावन्त्यस्याकारस्य लोपे 'चित' इति चित्स्वरेण मत्वर्थीयप्रत्ययस्योदात्तत्वे च सति तस्य विभक्त्यकारस्य चैकादेशस्यापि 'एकादेश उदात्तेनोदात्त' इत्युदात्तस्यैव भावात् । एवमिह ज्ञानपदप्रक्रियाश्रयणे ज्ञानवत्त्वमेवात्मनः सिध्येद्; न ज्ञानरूपत्वं, किं त्वौणादिकनप्रत्ययान्तत्वेन तत्सिध्येत् । ज्ञाधातोराहत्य नप्रत्ययविधानाभावेऽप्युणादयो बहुलमिति बहुलग्रहणेन यतो विहितास्ततोऽन्यत्रापि ते भवन्तीति सिद्धेः। औणादिकप्रत्ययान्तत्वे भावार्थत्वमप्युपपद्यते, अर्त्यादिसूत्रविहितमन्प्रत्ययान्तस्य होमशब्दस्येव अन्तोदात्तस्वरश्च युज्यते;नप्रत्ययाकारस्य प्रत्ययस्वरेणोदात्तत्वे सति तस्य तद्विभक्त्यकारेण भवत एकादेशस्याप्युदात्तस्यैव भावात् । एवमुभयथेह ज्ञानपदप्रक्रियाश्रयणसंभवे कथमस्याः श्रुतेः संविदात्माभेदे तात्पर्यं निर्णीयत इत्याकाङ्क्षायां तत्र तत् तात्पर्यनिर्णयार्थामुपपत्ति**मुपपद्यते चेति** प्रतिज्ञाय तामेवोपपत्तिं प्रदर्शयितुं टीकायां **तथा हीत्यादि**ग्रन्थः प्रवर्तितः । अतोऽत्र स्वप्रकाशत्वादिव्यवस्थापनस्य न साक्षादन्वयसंघटनेतीत्थमवतारिका—**नन्वभ्युपेयते इति** । **ननु**—चाभ्युपगमे को हेतुः; स्वयमभासमानमपि ज्ञानमर्थप्रकाशरूपमस्तु, **नच**—तथात्वे तस्य चक्षुरादिवदर्थप्रकाशकत्वमेव स्याद्, नतु तत्प्रकाशरूपत्वमित्यनवस्थेति—वाच्यम्; अप्रयोजकत्वेनोक्तनियमासिद्धेरिति—**चेद्, न**; तथा सति घटज्ञानादिषु सत्सु कदाचित्संदेहविपर्यासापत्तेः प्रकाशाव्यभिचारिण्येव सुखादौ संशयविपर्यासानुदयदर्शनात्, एतावन्तं कालं मनसा रुद्रानुवाकानावर्तयन्नासमिति परामर्शानुपपत्तेश्च । न हि तत्तद्वर्णस्मृतीनां स्वस्वकाले भानाभावे तासामग्रिमपरामर्शो भवितुमर्हति। न ब्वेच्छाघटितसामग्रीजन्यनिरन्तरक्रमिकवर्णविषयस्मरणसन्तानोदयकाले मध्ये मध्ये प्रतिस्मरणमनुव्यवसायोत्पत्तिः संभवति । **आत्मस्वप्रकाशत्ववाद्याहेति** । अभ्युपेतव्या इत्येतदन्तमुक्तवानात्मस्वप्रकाशवाद्येव । आत्मनः प्रकाशमानत्वं स्वप्रकाशफलाभेदेनैव उपपादनीयं, नान्यथा तस्य

भामती ।

किमायातं विषयात्मनोः स्वभावजडयोः ? एतदायातं यत्तयोः संविदजडेति । तत्किं पुत्रः पण्डित इति पितापि पण्डितोऽस्तु । स्वभाव एष संविदः स्वयं प्रकाशाया यदर्थात्मसंबन्धितेति चेत्, हन्त पुत्रस्यापि पण्डितस्य स्वभाव एष यत्पितृसंबन्धितेति समानम् । सहार्थात्मप्रकाशेन संवित्प्रकाशो न त्वर्थात्मप्रकाशं विनेति तस्याः स्वभाव इति चेत्, तत्किं संविदो भिन्नौ संविदर्थात्मप्रकाशौ ? तथाच न स्वयंप्रकाशा संवित्, नच संविदर्थात्मप्रकाश इति । **अथ** संविदर्थात्मप्रकाशौ न संविदो भिद्येते, संविदेव तौ । एवं चेत् यावदुक्तं भवति संविदात्मार्थौ सहेति तावदुक्तं भवति संविदर्थात्मप्रकाशौ सहेति, तथाच न विवक्षितार्थसिद्धिः । नचातीतानागतार्थगोचरायाः संविदोऽर्थसहभावोऽपि । तद्विषयहानोपादानोपेक्षाबुद्धिजननादर्थसहभाव इति चेन्न; अर्थसंविद इव हानादिबुद्धीनामपि तद्विषयत्वानुपपत्तेः । हानादिजननाद्धानादिबुद्धीनामर्थविषयत्वम्; अर्थविषयहानादिबुद्धिजननाच्च अर्थसंविदस्तद्विषयत्वमिति चेत्, तत्किं देहस्य प्रयत्नवदात्मसंयोगो देहप्रवृत्तिनिवृत्तिहेतुरर्थ इत्यर्थप्रकाशोऽस्तु । जाड्याद्देहात्मसंयोगो नार्थप्रकाश इति चेत्, नन्वयं स्वयंप्रकाशोऽपि स्वात्मन्येव खद्योतवत्प्रकाशः, अर्थे तु जड इत्युपपादितम् । नच प्रकाशस्यात्मानो

वेदान्तकल्पतरुः ।

न्धिन्यां संविद्यजडायामपि नार्थात्मनोः प्रकाशमानतासिद्धिः; पण्डितेपि पुत्रे पितुरपाण्डित्यवदित्युक्ते वैषम्यं शङ्कते—**स्वभावेति** । आश्रयविषययोः पारतन्त्र्यनियमात्स्वभावसंबद्धा संवित्, न पुत्रः; पित्रभावेऽपि भावादित्यर्थः । पुत्रगतजन्यत्वमपि नित्यं पितृगतजनकत्वसापेक्षमिति साम्यमाह—**हन्तेति** । अर्थात्मनोः प्रकाशेन सह संवित्प्रकाश इत्युक्ते यः संविदः प्रकाशो यश्चार्थात्मनोस्तौ संविदः सकाशाद्भिन्नौ, अभिन्नौ वा । **नाद्य** इत्याह—**तत्किमिति** । संविदः प्रकाशव्यतिरेके संविदप्रकाशरूपा सती घटवदस्वप्रकाशा स्यात् । आत्मार्थप्रकाशयोः संविद्व्यतिरेके संविदर्थात्मप्रकाशरूपा न भवेत् किंतु ज्ञापिका स्यात् तथाचानवस्थेत्याशयः । अभेदमाशङ्कते—**अथेति** । संविदश्चार्थात्मनोश्च प्रकाशावित्यर्थः । कथंभूतौ तावित्यपेक्षायां स एवाह—**संविदेवेति** । दूषयति—**एवमिति** । संविदतिरिक्तप्रकाशानङ्गीकारे संविदर्थात्मनां साहित्यमुक्तं स्यात् । तथाच पुत्रपाण्डित्यतुल्यतेत्यर्थः । अर्थसंविदो सहभावमङ्गीकृत्याऽनुपयोग उक्तः, स एव क्वचिदसिद्ध इत्याह—**नचेति** । अतीतादिबुद्धिस्तत्सहिता तद्विषयहानादिबुद्धिजनकत्वाद्वर्तमानबुद्धिवदिति शङ्कते—**तद्विषयेति** । तद्विषयाश्च ताः हानादिबुद्धयश्च इति विग्रहः । तद्विषयहानादिबुद्धिजनकत्वादिति हेतौ तद्विषयत्वविशेषणस्यासिद्धिमाह—**नेति** । तां परिहरति—**हानादिजननादिति** । सिद्धे च हेतावतीतादिसंविदामर्थसहभावसिद्धेस्तद्विषयत्वसिद्धिरित्याह—**अर्थविषयेति** । अर्थविषयहानादिप्रवृत्तिजननाद्धानादिबुद्धेरर्थविषयप्रकाशत्वेऽतिप्रसङ्गं दर्शयन्विशेषणासिद्धिं द्रढयति—**तत्किमिति** । **अर्थ इति** सप्तमी । प्रयत्नवदात्मदेहसंयोगोऽर्थविषयप्रवृत्तिहेतुरपि जडत्वान्नार्थविषयप्रकाशश्चेत्संवित्प्रकाशोपि स्वप्रकाशत्वात् स्वमात्रे साक्षी अर्थे त्वप्रकाशनाद् जड एव; अर्थस्यापि स्वप्रकाशरूपान्तर्भावेन सिद्धिश्चेदर्थसंविद्भेदो न स्यादित्यभिप्रेत्याह—**नन्वयमिति** । मा भूद्भेद इति वदन्तं बौद्धगन्धिनमेकदेशिनं निराकरोत्याक्षेप्ता—**नच प्रकाशस्येति** । सिद्धान्त्यभिमतां संविद्विवर्ततया तदभेदेनार्थसिद्धिमध्यासासंभवं वक्ष्यामीति मन्वानोऽनुवदति—

कल्पतरुपरिमलः ।

प्रकाशमानत्वं भवतीत्येवमुपपादयितुमाहेत्यर्थः । **अनुपयोग उक्त इति** । सहभावस्य प्रकाशमानतायामनुपयोग उक्तः । उपयोगमङ्गीकृत्य तस्याव्यापकत्वमाहेत्यर्थः । **विशेषणस्यासिद्धिमाहेति** । बाधदोषः स्फुट इति मत्वा दोषान्तरमाहेत्यर्थः । **तां परिहरतीति** । असिद्धिं परिहरन् पूर्ववादी शङ्कत इत्यर्थः । **जडत्वान्नार्थविषयप्रकाशश्चेदिति** । अर्थविषयहानादिजनकत्वमात्रं न ज्ञानस्यार्थविषयतानियामकं, किंतु तज्जनकप्रकाशत्वम्; तथाच जडे देहात्मसंयोगे न प्रसङ्ग इति शङ्कार्थः । **स्वप्रकाशत्वात् स्वमात्रे साक्षीति** । दृश्यवर्गस्य संविद्भिन्नताभ्युपगमे संविदः स्वात्मानं प्रति प्रकाशत्वं ह्यभेदसंबन्धेनैव क्लृप्तमिति तं प्रति सा जडरूपा देहात्मसंयोगतुल्या न प्रकाशरूपेति नोक्तनियामकेन तस्या दृश्यवर्गविषयत्वसिद्धिरित्यर्थः । **ननु**—यद्विषयत्वनियामकमन्विष्यते तं प्रति प्रकाशत्वं प्रकाशशब्देन न विवक्षितम्; तथा सति ह्यात्माश्रयः स्यात्, किंतु ज्ञानत्वसामान्यं विवक्षितम्, अतो नोक्तदोष इति—**चेद्, न**; एवमपि गगनादीनामतीतानागतयोश्च ज्ञानाद्यविषयत्वेन तद्विषयज्ञानाव्यापनात्, ताम्रादिज्ञाने तदुपष्टम्भककालिकादेरप्युपादानजनके कालिकादिविषयत्वस्याप्यापत्तेश्च । **एतेन**—परोक्षापरोक्षवृत्तीनामिच्छाद्वेषवृत्तीनां हानादिव्यापाराणां च तत्तद्भिन्नेऽपि तद्विषये विषयत्वनियमार्थं कस्यचिन्नियामकस्यावश्याम्वेष्यत्वेन तथाभूतं नियामकं संविद्भिन्नेऽपि संविदस्तत्तद्विषयत्वनियामकं भविष्यतीत्यपि शङ्का—**निरस्ता**; संविदः स्वप्रकाशतायामभेदस्य नियामकस्य क्लृप्तत्वेन दृश्यवर्गप्रकाशतायां नियामकान्तरस्याननुगमावहस्य कल्पयितुमयुक्तत्वात् । **ननु** संविदः स्वभिन्ने नास्ति प्रकाशरूपतेति ब्रूषे, संवित्प्रपञ्चयोरभेदं च तात्त्विकमपाकुरुषे, अध्यासप्रतिक्षेपार्थं प्रवृत्तश्च नाध्यासिकं तमङ्गीकुरुषे, किंतु जगदान्ध्यमेव वक्तुमध्यवसितोसीत्याशङ्क्याह—**सिद्धान्त्यभिमतामिति** ।

र्माणाम्? सर्वो हि पुरोवस्थिते विषये विषयान्तरमध्यस्यति, युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनो-

भामती ।

विषयाः; ते हि विच्छिन्नदीर्घस्थूलतयानुभूयन्ते, प्रकाशश्चायमान्तरोऽस्थूलोऽनणुरह्स्वोऽदीर्घश्चेति प्रकाशते । तस्मा-च्चन्द्रेऽनुभूयमान इव द्वितीयश्चन्द्रमाः स्वप्रकाशादन्योऽर्थोऽनिर्वचनीय एवेति—**युक्तमुत्पश्यामः** । नचास्य प्रकाश-स्याजानतः स्वलक्षणभेदोऽनुभूयते । नचानिर्वाच्यार्थभेदः प्रकाशं निर्वाच्यं भेत्तुमर्हति; अतिप्रसङ्गात् । नचार्थानामपि परस्परं भेदः समीचीनज्ञानपद्धतिमध्यास्ते इत्युपरिष्टादुपपादयिष्यते । तदयं प्रकाश एव स्वयंप्रकाश एकः कूटस्थनित्यो निरंशः **प्रत्यगात्मा** अशक्यनिर्वचनीयेभ्यो देहेन्द्रियादिभ्य आत्मानं प्रतीपं निर्वचनीयमञ्चति जानातीति प्रत्यङ्, स चात्मेति प्रत्यगात्मा, स चापराधीनप्रकाशत्वात्, अनंशत्वाच्च अविषयः, तस्मिन्नध्यासो विषयधर्माणां, देहेन्द्रियादि-धर्माणां, कथम्, किमाक्षेपे । अयुक्तोऽयमध्यास इत्याक्षेपः । कस्मादयमयुक्त इत्यत आह—**सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति । एतदुक्तं भवति**—यत्पराधीनप्रकाशमंशवच्च तत्सामान्यांशग्रहे कारणदोषवशाच्च विशेषाग्रहेऽन्यथा प्रकाशते । प्रत्यगात्मा त्वपराधीनप्रकाशतया न स्वज्ञाने कारणान्यपेक्षते, येन तदाश्रयैर्दोषैर्दूष्येत । नचांशवान्; येन कश्चिदस्यांशो गृह्येत कश्चिन्न गृह्येत । नहि तदेव तदानीमेव तेनैव गृहीतमगृहीतं च संभवतीति न स्वयंप्रकाशपक्षेऽध्यासः । सदातनेऽप्यप्रकाशे पुरोऽवस्थितत्वस्यापरोक्षत्वस्याभावान्नाध्यासः । नहि शुक्तावपुरःस्थितायां रजतमध्यस्यतीदं रजतमिति । तस्मादत्यन्तग्रहेऽत्यन्ताग्रहे च नाध्यास इति सिद्धम् । **स्यादेतत्**—अविषयत्वे हि चिदात्मनो नाध्यासः, विषय एव तु चिदात्मास्मत्प्रत्ययस्य, तत्कथं नाध्यास इत्यत आह—**युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि** । विषयत्वे हि चिदात्मनोऽन्यो विषयी भवेत् । तथाच यो विषयी स एव

वेदान्तकल्पतरुः ।

तस्मादिति । एवं संविदः स्वप्रकाशतां विषयस्य च तदध्यस्ततामुक्त्वा तस्या आत्मत्वसिद्ध्यर्थमद्वितीयतामाह—**नचा-स्येति । आजानतः** स्वभावतः । इत्थं तर्किते आत्मस्वप्रकाशत्वे प्रयुज्यते—देवदत्तसुप्तिकालः, देवदत्तात्मास्तीति व्यवहारहेतुसाक्षात्कारवान्, कालत्वादितरकालवदिति । नच सुप्तावहंवृत्तिरस्ति; नच पुरुषान्तरं साक्षात्कर्तुमर्हति; ईश्वर-मते योगिमते वाऽनैश्वरेत्ययोगजेति च विशेषणीयमिति स्वप्रकाशत्वसिद्धिरिति । तदेवं पक्षान्तरनिरासेन स्वप्रकाश आत्मेति स्थापितम् । अस्मिन् पक्षेऽध्यासाक्षेपकतया भाष्यं योजयति—**तदयमिति** । प्रत्यक्छब्दार्थमाह—**अश-क्येति । प्रतीपं** प्रातिलोम्येन । तदेव दर्शयति—**निर्वचनीयमिति । कथमिति** थमुप्रत्ययान्तस्य किंशब्दस्य रूपम् । तत्र किंशब्द आक्षेपार्थ इत्यर्थः । अप्रथमानत्वपक्षे दूषणं **सर्वो हीति** । भाष्योक्तमाह—**सदातनेऽपीति** ।

कल्पतरुपरिमलः ।

सर्वोऽयं सिद्धान्त्यभिमत एवार्थ आत्मनोऽधिष्ठानत्वासंभवोपपादनार्थमनूद्यते । **सिद्धान्ती खलु**—संवित् स्वप्र-काशेति तस्याः स्वाभिन्न एव प्रकाशरूपत्वस्य क्लृप्तत्वात् स्वभिन्ने दृश्यवर्गे तस्याः प्रकाशरूपता न संभवति, तात्त्विकश्च दृग्दृश्ययोरभेदो न युज्यते, अतो दृश्यवर्गस्य संविद्विवर्ततयाऽनिर्वचनीयेन तदभेदेन प्रकाशमानता । एवं चानुभवा-मीत्येकरूपप्रत्ययदर्शनेन संविदां स्वतो भेदाप्रतीतेरर्थानामनिर्वाच्यतया तद्भेदेन रङ्गरजतादिभ्रमविषयभेदेन भ्रमाधिष्ठान-शुक्तिशकलस्येव भास्करमतरीत्यौपाधिकवस्तुकृतभेदासंभवाच्च नित्या संविदिति नित्यसंविदतिरेकेणात्मकल्पनायां प्रमा-णाभावात् संवित्प्रकाश एव स्वयंप्रकाश एकः कूटस्थो निरंशः प्रत्यगात्मेति—**मन्यते** । तस्य मते प्रत्यगात्मरूपस्य प्रका-शस्य करणदोषाजन्यतया निरंशतया च सामान्यग्रहणविशेषाग्रहणासंभवात् कथमध्यासाधिष्ठानतेत्येवं सिद्धान्तिमता-नुसारेणैवायम् अध्यासाक्षेपः क्रियत इत्याशयः । **आजानतः स्वभावत इति** । तथाच स्वाभाविकभेदो नानुभूयते, किंत्वनुभवामीत्येकरूपप्रत्ययेनाऽभेद एवावसीयते । नचानुगतप्रत्ययो जात्यैक्यविषयः;व्यक्तिभेदाप्रतीतौ लाघवेन तस्य व्यक्त्यैक्यविषयत्वकल्पनौचित्यात् । नचेच्छाया अपीच्छामीत्यनुगतप्रत्ययात् स्वतो भेदाप्रतीतेश्च नित्यत्वप्रसङ्गः; ममैत-दिच्छा नष्टा एतदिच्छा उत्पन्नेति नाशोत्पत्त्यनुभवविरोधेनानुगतप्रत्ययस्य जातिविषयत्वकल्पनात् । नच ज्ञान इवेच्छाया मपि नाशोत्पत्त्यनुभवस्यावच्छेदकवृत्तिविषयत्वं कल्पयितुं शक्यम्; इच्छायामवच्छेदकवृत्तिकल्पने प्रमाणाभावात् । ज्ञाने तत्कल्पने त्वस्ति प्रमाणम् । सर्वस्य हि प्रपञ्चस्य नित्यैकदृगध्यस्तत्वेन प्रकाशमानतोपयोग्यभेद उपपादनीयः, नतु तत्तद्वि-षयस्य तत्तद्दृगध्यस्तत्वेन; लब्धात्मन्यधिष्ठाने भासमाने पश्चादध्यासस्य वक्तव्यत्वेन विषयाध्यासात् पूर्वं चाक्षुषादिज्ञानानां विषयं विनापि भानप्रसङ्गात् । नच सर्वस्य प्रपञ्चस्यैकदृगध्यस्तत्वे तत्तज्ज्ञानानां विषयनियमासंभवः; अवच्छेदकवृत्ति-कृतविषयनियमोपपत्तेरिति भावः । **नन्वहं**वृत्तिरूपसाक्षात्कारेणार्थान्तरदुष्टमनुमानं; सुखमहमस्वाप्समिति परामर्शानु-पपत्त्या सुषुप्तावहंवृत्तेरवश्याभ्युपगन्तव्यत्वात् तथाभूतपरामर्शदर्शनस्यैवानुमानग्राहकतर्कतया तवाप्युपजीव्यत्वात्, इत्या-शङ्क्याह—**नच सुप्ताविति** । सुषुप्तावन्तःकरणलयस्य श्रुतिसिद्धत्वेन तदानीमहंवृत्त्यसंभवात् स्वरूपतः सुषुप्तौ साक्षा-

ऽविषयत्वं ब्रवीषि। उच्यते–न तावदयमेकान्तेनाविषयः अस्मत्प्रत्ययविषयत्वात्, अपरोक्षत्वाच्च

भामती ।

चिदात्मा। विषयस्तु ततोऽन्यो युष्मत्प्रत्ययगोचरोऽभ्युपेयः। तस्मादनात्मत्वप्रसङ्गादनवस्थापरिहाराय युष्मत्प्रत्ययापेतत्वम्, अतएवाविषयत्वमात्मनो वक्तव्यम्, तथाच नाध्यास इत्यर्थः। परिहरति—**उच्यते—न तावदयमेकान्तेनाविषयः**। कुतः, **अस्मत्प्रत्ययविषयत्वात्**। **अयमर्थः**—सत्यं प्रत्यगात्मा स्वयंप्रकाशत्वादविषयोऽनंशश्च; तथाप्यनिर्वचनीयानाद्यविद्यापरिकल्पितबुद्धिमनःसूक्ष्मस्थूलशरीरेन्द्रियावच्छेदेनानवच्छिन्नोऽपि वस्तुतोऽवच्छिन्न इव, अभिन्नोऽपि भिन्न इव, अकर्तापि कर्तेव, अभोक्तापि भोक्तेव, अविषयोऽप्यस्मत्प्रत्ययविषय इव, जीवभावमापन्नोऽवभासते, नभ इव घटमणिकमल्लिकाद्यवच्छेदभेदेन भिन्नमिवानेकविधधर्मकमिवेति। नहि चिदेकरसस्यात्मनः चिदंशे गृहीते अगृहीतं किंचिदस्ति। न खल्वानन्दनित्यत्वविभुत्वादयोऽस्य चिद्रूपाद्वस्तुतो भिद्यन्ते, येन तद्ग्रहे न गृह्येरन्। गृहीता एव तु कल्पितेन भेदेन न विवेचिता इत्यगृहीता इवाभान्ति। नचात्मनो बुद्ध्यादिभ्यो भेदस्तात्त्विकः, येन चिदात्मनि गृह्यमाणे सोऽपि गृहीतो भवेत्; बुद्ध्यादीनामनिर्वाच्यत्वेन तद्भेदस्याप्यनिर्वचनीयत्वात्। तस्माच्चिदात्मनः स्वयंप्रकाशस्यैव अनवच्छिन्नस्य अवच्छिन्नेभ्यो बुद्ध्यादिभ्यो भेदाग्रहात्, तदध्यासेन जीवभाव इति। तस्य

वेदान्तकल्पतरुः ।

भाष्यकारेणात्मनोऽस्मत्प्रत्ययविषयत्वोपवर्णनेनाविषयत्वस्यासिद्धिरुक्ता, सा न युक्ता, स्वप्रकाशस्य विषयत्वायोगादित्याशङ्क्यौपाधिकरूपेण विषयतामाह—**सत्यमित्यादिना**। बुद्धिमनःप्राणेन्द्रियाणां परलोकगतौ आश्रयभूतानि भूतसूक्ष्माणि **सूक्ष्मं शरीरम्। इन्द्रियाणि** बाह्यानि। **ननु** स्वतोऽविषयत्वमौपाधिकरूपेण विषयत्वमिति किमिति व्यवस्थाप्यते, स्वत एव शुक्तिवद्ग्रहणाग्रहणे किं न स्यातामित्याशङ्क्य निरंशत्वान्नेत्याह—**नहि चिदेकरसस्येति**। **ननु** चिद्रूपे भात्यप्यानन्दादि न भातीति दृष्टम्, नेत्याह—**न खल्विति**। तर्हि साक्षिप्रतिभासे आनन्दाद्युल्लेखोपि स्यादित्याशङ्क्याह—**गृहीता एवेति**। यथा खल्वभिज्ञायां भासमानमपि देवदत्तैक्यं तत्तेदन्तोपाधिद्वारकसामानाधिकरण्यापरामर्शाद्विविक्तं नोल्लिख्यते, एवं चिद्रूपभानेऽपि दुःखप्रत्यनीकत्वादिरूपेणापरामृष्टा आनन्दादयोऽप्यगृहीता इव भान्तीत्यर्थः। **ननु** चित्प्रतिभासे तदात्मत्वादानन्दादयो भान्ति चेत्, तर्हि बुद्ध्यादिभ्यश्चैतन्यस्य भेदोऽपि प्रतीयेत; तत्र विद्यमानत्वात्, तथाच बुद्ध्याद्यध्यासायोग इत्याशङ्क्याह—**नचात्मन इति**। आनन्दादीनां वास्तवत्वाच्चैतन्यैकरसता न भेदस्यापीत्यभानमित्यर्थः। **यदुक्तं**—विषयत्वे युष्मत्प्रत्ययविषयत्वापत्तिः ततश्चानात्मत्वमिति, तत्राह—**तस्य चेति**। इदमात्मकत्वेन विषयत्वमनिदमात्मकत्वेनास्मदुल्लेखश्चोपपद्यते इत्यर्थः। इदमनिदमात्मकत्वं जीवस्य

कल्पतरुपरिमलः ।

त्कृते प्रत्यगात्मनि सुप्तोत्थितपरामर्शस्तात्कालिकाहमर्थानुरागविषयो वक्तव्य इत्याशयः। **यथा खल्वभिज्ञायामिति**। **ननु**—देवदत्तोऽयमित्यभिज्ञायामिदमर्थे यद् देवदत्तैक्यं भासते, तद्विविक्तमुल्लिख्यत एव; यत्तु तत्र तत्ताविशिष्टैक्यं विविक्तं नोल्लिख्यते, तन्नभासत एव; अतो भासमानस्य विविक्तोल्लेखाभावे नेदमुदाहरणमिति—**चेद्, न**; एकस्मिन्निदमर्थे ऐक्यद्वयाभावेन भासमान एव देवदत्तैक्ये तत्तोपाधिपरामर्शाभावेन तत्तेदन्ताविशिष्टाभेदरूपतयोल्लेखाभावरूपस्य विविक्तानुल्लेखस्य विवक्षितस्य सत्त्वात्। **दुःखप्रत्यनीकत्वादिरूपेणेति**। **ननु**—दुःखप्रत्यनीकत्वं दुःखविरोधित्वं, दुःखव्यावर्तकसुखत्वं वा। **नाद्यः**; स्रक्चन्दनादिविषयभोगदशायां दुःखस्मरणरहितानां तज्जन्यानन्दे दुःखविरोधित्वपरामर्शासंभवात्, तदनुभवस्यासत्कल्पत्वेनापुरुषार्थत्वप्रसङ्गात्, मुक्तौ कथमपि दुःखस्मरणप्रसक्त्यभावेन मुक्त्यानन्दानुभवस्यापुरुषार्थत्वप्रसङ्गाच्च। **अतएव न द्वितीयोपि**, मुक्तौ सुखत्वादिप्रकारकानुभवाभावात्—**इति चेत्; उच्यते**; निरतिशये स्वरूपानन्दे संसारदशायामविद्यान्तःकरणोपधानदोषादस्त्यध्यस्तोऽपकर्षस्तं विनाऽनुभवाभावादिति विवक्षितम्। तथा चाध्यस्तापकर्षयुक्ततया गृहीतोऽप्यानन्दो मेघावरणकृतापकर्षसौरालोकवदगृहीत इव भातीति तात्पर्यम्। **यद्वा**—सकलसांसारिकदुःखविरोधि यत् स्वरूपानन्दे निरतिशयानन्दत्वं तदनुभवाभावादिति विवक्षितम्। तच्च स्वरूपाभिन्नमेव मुक्त्यानन्दानुभवे प्रकारो महावाक्यजन्यब्रह्माभिन्नस्वस्वरूपसाक्षात्कार इवाभेदप्रतियोगिब्रह्मरूपमिति न कश्चिद्दोषः। **आनन्दादय** इत्यादिशब्देन नित्यत्वादयो गृह्यन्ते। **आनन्दादीनामिति**। **ननु**—आनन्दादीनामिव बुद्ध्यादिभेदस्यापि वास्तवत्वेनाद्वितीयचैतन्यैकरसतावश्याभ्युपगन्तव्या; आत्मनि बुद्ध्याद्यभेदाध्यासवादिनस्तत्र तद्भेदोऽप्यध्यस्त इत्युक्त्ययोगात्, अभेदाभावे तदात्मकभेदप्रतिक्षेपासंभवात्। नच—बुद्ध्यादेः स्वरूपतोऽध्यस्तत्वादात्मनि वस्तुतो न तद्भेदो, नापि तदभेद इति—वाच्यम्; अध्यस्तादपि रजतात् शुक्तौ तज्ज्ञानाबाध्यबाधगोचरभेददर्शनात्—**इति चेद्, न**; शुक्त्यादिगतरजतादिभेदस्यापि सर्वप्रपञ्चनिवर्तकब्रह्मज्ञानबाध्यत्वाभ्युपगमेन तद्वत् संसारदशायामबाध्यस्यापि बुद्ध्यादिभेदस्य तद्बाध्यत्वोपपत्तेः। यदि च स वास्तव एवाद्वितीयचैतन्यैकरसस्य इष्यते, तथापि न दोषः; बुद्ध्यादिप्रतियोगिकत्वापरामर्शात् सो-

प्रत्यगात्मप्रसिद्धेः । नचायमस्ति नियमः पुरोवस्थित एव विषये विषयान्तरमध्यसितव्यमिति; अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति। एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः।

भामती ।

च्चानिदमिदमात्मनोऽस्मत्प्रत्ययविषयत्वमुपपद्यते । **तथाहि**—कर्ता भोक्ता चिदात्माऽहंप्रत्यये प्रत्यवभासते । न चोदासीनस्य तस्य क्रियाशक्तिर्भोगशक्तिर्वा संभवति । यस्य च बुद्ध्यादेः कारणसंघातस्य क्रियाभोगशक्ती न तस्य चैतन्यम् । तस्माच्चिदात्मैव कार्यकारणसंघातेन ग्रथितो लब्धक्रियाभोगशक्तिः, स्वयंप्रकाशोऽपि बुद्ध्यादिविषयविच्छुरणात्, कथंचिदस्मत्प्रत्ययविषयोऽहंकारास्पदं जीव इति च, जन्तुरिति च, क्षेत्रज्ञ इति चाख्यायते । न खलु जीवश्चिदात्मनो भिद्यते । **तथाच श्रुतिः**—'अनेन जीवेनात्मना' इति । तस्माच्चिदात्मनोऽव्यतिरेकाज्जीवः स्वयंप्रकाशोऽप्यहंप्रत्ययेन कर्तृभोक्तृतया व्यवहारयोग्यः क्रियत इत्यहंप्रत्ययालम्बनमुच्यते । नच—अध्यासे सति विषयत्वं विषयत्वे चाध्यास, इत्यन्योन्याश्रयत्वमिति—सांप्रतं; बीजाङ्कुरवदनादित्वात्, पूर्वपूर्वाध्यासतद्वासनाविषयीकृतस्योत्तरोत्तराध्यासविषयत्वाविरोधादित्युक्तम्—'नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्यग्रन्थेन। तस्मात् सुष्ठूक्तम्—**न तावदयमेकान्तेनाविषय इति**। जीवो हि चिदात्मतया स्वयंप्रकाशतयाऽविषयोऽप्यौपाधिकेन रूपेण विषय इति भावः। **स्यादेतत्**—न वयमपराधीनप्रकाशतयाऽविषयत्वेनाध्यासमपाकुर्मः, किंतु प्रत्यगात्मा न स्वतो नापि परतः प्रथत इत्यविषय इति ब्रूमः। तथाच सर्वथाऽप्रथमाने प्रत्यगात्मनि कुतोऽध्यास इत्यत आह—**अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः**। प्रतीच आत्मनः प्रसिद्धिः प्रथा; तस्या अपरोक्षत्वात्। यद्यपि प्रत्यगात्मनि नान्या प्रथास्ति, तथापि भेदोपचारः, यथा पुरुषस्य चैतन्यमिति। **एतदुक्तं भवति**—अवश्यं चिदात्माऽपरोक्षोऽभ्युपेतव्यः, तदप्रथायां सर्वस्याप्रथनेन जगदान्ध्यप्रसङ्गादित्युक्तम्। **श्रुतिश्चात्र भवति**—'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति। तदेवं परमार्थपरिहारमुक्त्वाऽभ्युपेत्यापि चिदात्मनः परोक्षतां प्रौढवादितया परिहारान्तरमाह—**नचायमस्ति नियमः पुरोऽवस्थित एव** अपरोक्ष एव **विषये विषयान्तरमध्यसितव्यम्**। कस्मादयं न नियम इत्यत आह—**अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति**। हिर्यस्मादर्थे। नभो हि द्रव्यं सत् रूपस्पर्शविरहान्न बाह्येन्द्रियप्रत्यक्षम्। नापि मानसम्; मनसोऽसहायस्य बाह्येऽप्रवृत्तेः। तस्मादप्रत्यक्षम्। अथ च तत्र बाला अविवेकिनः परदर्शितदर्शिनः कदाचित्पार्थिवच्छायां श्यामतामारोप्य कदाचित्तैजसं शुक्लत्वमारोप्य नीलोत्पलपलाशश्याममिति वा राजहंसमालाधवलमिति वा निर्वर्णयन्ति। तत्रापि पूर्वदृष्टस्य तैजसस्य वा तामसस्य रूपस्य परत्र नभसि स्मृतिरूपोऽवभास इति। एवं तदेव तलमध्यस्यन्ति अवाङ्मुखीभूतं महेन्द्रनील-

वेदान्तकल्पतरुः ।

तद्धर्मान्वयप्रदर्शनेनोपपादयति—**तथाहीति** । **विच्छुरणात्** मिश्रणात् । **ननू**पाधिपरिच्छेदमन्तरेणान्य एव परमात्मनो जीवोऽहंप्रत्ययविषयोऽस्तु तत्राह—**न खल्विति**। अस्मत्प्रत्ययविषयत्वमपि जीवस्याहंप्रत्ययविशिष्टेऽन्तःकरणे व्यवहारयोग्यत्वापत्तिर्न कर्मत्वमतो न कर्मकर्तृत्वविरोध इत्युपसंहारव्याजेनाह—**तस्मादिति** । स्वप्रकाशे यावत्सत्त्वं प्रकाशनान्नारोप इति पक्षः पूर्वपूर्वाध्यासवशादप्रकाशसमर्थनेन निरस्तः । इदानीमप्रथमाने नास्त्यारोप इति पक्षमुपन्यस्यति—**स्यादेतदित्यादिना** । अपरोक्षत्वाभावश्चाप्रथमानता । अपरोक्षभ्रमाधिष्ठानत्वे ह्यपरोक्षेणात्मना भवितव्यम्, स चेन्नापरोक्षस्तस्मिन्नध्यासोपयोगिप्रथनाभावान्नाध्यास इत्यर्थः । रूपरहितद्रव्यत्वात् स्पर्शरहितद्रव्यत्वादिति द्वौ हेतू वक्ति—**नभो हीति** । वायुः स्पार्शनप्रत्यक्ष इति पक्षे द्वितीय एव हेतुः ।

कल्पतरुपरिमलः ।

ऽप्यगृहीत इव भातीति वक्तुं शक्यत्वात्। अयमपि टीकाकाराणामाचार्याणां च संमतः पक्षः। अतएव सौत्राथशब्दविचारप्रस्तावेऽन्तःकरणाद्यभावस्य ब्रह्मस्वरूपानतिरिक्ततया वास्तवत्वेनैव शुद्धत्वाद्यवगाहिब्रह्मसाक्षात्कारविषयत्वं समर्थयिष्यते। **अस्मत्प्रत्ययविषयत्वमपीति**। **ननु**—चैतन्यस्याखण्डानन्दात्मकशुद्धस्वरूपेणाहंवृत्त्यविषयत्वेऽप्यौपाधिकरूपेण तद्विषयत्वं प्रागनुपदमेवोक्तं, वक्ष्यते च शब्दापरोक्षनिराकरणे, औपाधिकरूपापन्नश्च जीवः, तस्य कथमिह तद्विषयत्वम् औपचारिकमित्युच्यते, तस्य तद्विषयत्वाभावे च तस्यास्मदुल्लेखो न स्यादन्तःकरणमात्रविषयत्वादिदमुल्लेख एव स्यात्—**सत्यम्**; अहमर्थानुप्रविष्टानिदमंशरूपस्य सुखादिसाक्षिणः स्वप्रकाशस्याज्ञानोपाधिकस्य जीवस्याहंवृत्तिविपयत्वं प्रागुक्तं, वक्ष्यते च, इह तु तस्येदमंशस्येव अहंवृत्त्यवच्छिन्नचैतन्यविषयत्वं मुख्यं नास्तीति तदौपचारिकमित्युच्यते । **एवंच न कर्मकर्तृत्वविरोध**—इति चैतन्यकर्मत्वप्रयुक्तस्य विरोधस्य परिहारः । वृत्तिकर्मत्वप्रयुक्तस्य तु पञ्चाग्निविद्यायामुपासनाकर्मत्वप्रयुक्तस्येव कथंचिद्रूपभेदेन परिहार आस्थेयः । अहं सुखीत्याद्यनुभवात्सुखादिविशिष्टरूपेण कर्मत्वम्, अन्तःकरणविशिष्टरूपेण कर्तृत्वमिति । **अप्रकाशसमर्थनेनेति** । निरतिशया-

तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते; तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः। तत्रैवं सति यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणापि स न संबध्यते। तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि। कथं पुनरविद्यावद्विषयाणि प्र-

भामती।

मणिमयमहाकटाहकल्पमित्यर्थः। उपसंहरति—**एवम्**—उक्तेन प्रकारेण सर्वाक्षेपपरिहारात्, **अविरुद्धः प्रत्यगात्मन्यप्यनात्मनाम्**—बुद्ध्यादीनाम् **अध्यासः**। **ननु** सन्ति च सहस्रमध्यासाः, तत्किमर्थमयमेवाध्यास आक्षेपसमाधानाभ्यां व्युत्पादितः, नाध्यासमात्रमित्यत आह—**तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते**। अविद्या हि सर्वानर्थबीजमिति श्रुतिस्मृतीतिहासपुराणादिषु प्रसिद्धम्। तदुच्छेदाय वेदान्ताः प्रवृत्ता इति वक्ष्यति। प्रत्यगात्मन्यनात्माध्यास एव सर्वानर्थहेतुः न पुना रजतादिविभ्रमा इति स एवाविद्या, तत्स्वरूपं चाविज्ञातं न शक्यमुच्छेत्तुमिति तदेव व्युत्पाद्यं नाध्यासमात्रम्। अत्र च 'एवंलक्षणम्' इत्येवंरूपतयाऽनर्थहेतुतोक्ता। यस्मात्प्रत्यगात्मन्यशनायादिरहितेऽशनायाद्युपेतान्तःकरणाद्यहितारोपेण प्रत्यगात्मानमदुःखं दुःखाकरोति, तस्मादनर्थहेतुः। नचैवं पृथग्जना अपि मन्यन्तेऽध्यासं, येन न व्युत्पाद्येतेत्यत उक्तम्—**पण्डिता मन्यन्ते**। **नन्वियमनादिरतिनिरूढनिबिडवासनानुबद्धाऽविद्या न शक्या निरोद्धुं;** उपायाभावादिति यो मन्यते तं प्रति तन्निरोधोपायमाह—**तद्विवेकेन च वस्तुस्वरूपावधारणं**—निर्विचिकित्सं ज्ञानं **विद्यामाहुः**, पण्डिताः। प्रत्यगात्मनि खल्वत्यन्तविविक्ते बुद्ध्यादिभ्यः बुद्ध्यादिभेदाग्रहनिमित्तो बुद्ध्याद्यात्मत्वतद्धर्माध्यासः। तत्र श्रवणमननादिभिर्यद्विवेकविज्ञानं तेन विवेकाग्रहे निवर्तिते, अध्यासापबाधात्मकं वस्तुस्वरूपावधारणं विद्या चिदात्मरूपं स्वरूपे व्यवतिष्ठत इत्यर्थः। **स्यादेतत्**—अतिनिरूढनिबिडवासनानुविद्धाऽविद्या विद्ययापबाधितापि स्ववासनावशात्पुनरुद्भविष्यति, प्रवर्तयिष्यति च वासनादि कार्यं स्वोचितमित्यत आह—**तत्रैवं सति** एवंभूतवस्तुतत्त्वावधारणे सति, **यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणापि स न संबध्यते** अन्तःकरणादिदोषेणाशनायादिना चिदात्मा, चिदात्मनो गुणेन चैतन्यानन्दादिनान्तःकरणादि न संबध्यते। **एतदुक्तं भवति**—तत्त्वावधारणाभ्यासस्य हि स्वभाव एव स तादृशः, यदनादिमपि निरूढनिबिडवासनमपि मिथ्याप्रत्ययमपनयति। तत्त्वपक्षपातो हि स्वभावो धियाम्। **यथाहुर्बाह्या अपि**—'निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः। न बाधोऽयत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः॥' इति। विशेषतस्तु चिदात्मस्वभावस्य तत्त्वज्ञानस्यात्यन्तान्तरङ्गस्य कुतोऽनिर्वाच्ययाऽविद्यया बाध इति। **यदुक्तं**—सत्यानृते मिथुनीकृत्य विवेकाग्रहादध्यस्याहमिदं ममेदमिति लोकव्यवहार—इति। तत्र व्यपदेशलक्षणो व्यवहारः कण्ठोक्तः। इतिशब्दसूचितं लोकव्यवहारमादर्शयति—**तमेतमविद्याख्यमिति**। निगदव्याख्यातम्। आक्षिपति—**कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि**। तत्त्वपरिच्छेदो हि प्रमा विद्या, तत्साधनानि प्रमाणानि कथमविद्यावद्विषयाणि। नाविद्यावन्तं प्रमाणान्याश्रयन्ति, तत्कार्यस्य विद्याया अविद्याविरोधित्वादिति भावः। सन्तु वा प्रत्यक्षादीनि संवृत्त्यापि यथा तथा,

वेदान्तकल्पतरुः।

दुःखाकरोति वस्तुवृत्तेनादुःखिनं दुःखिनं करोतीत्यर्थः। वस्तुस्वरूपं च तदवधारणं चेति कर्मधारयमभिप्रेत्याभिव्यक्तं **स्वरूपज्ञानमाह—चिदात्मरूपमिति। निरुपद्रवभूतार्थेति**। भावनाप्रकर्षाद्विशदाभं सर्वविषयं ज्ञानमुत्पद्यते। तेन विषयीकृतस्य निरुपद्रवपरमार्थस्वभावस्य संस्कारबलादनुवर्तमानविपर्ययैर्न बाधः; कुतः? बुद्धेः परमार्थभावनाजन्याया वस्तुपक्षपातित्वेन प्राबल्यात्। **ननु**—लङ्घनाभ्यासवन्नैरात्म्यादिभावनापि सातिशयमेव कार्यं जनयति, कथं सर्वविषयज्ञानलाभ? इति शङ्कामपाकर्तुम**यत्नवत्त्वेऽपीत्युक्तम्**। लङ्घनाभ्यासे हि यो युगमात्रदेशलङ्घने प्रयत्नस्ततोऽधिको द्वियुगदेशलङ्घनेऽपेक्ष्यते। नैरात्म्यादितत्त्वविषयप्रत्ययाभ्यासे तु यादृशः प्रथमप्रत्ययोत्पादे प्रयत्नः तादृश एव द्वितीयादावपि वैशद्याधिक्यं च दृश्यते। तच्च निरतिशयं भवितुमर्हति। यत्र हि योऽभ्यासः कार्योत्कर्षकरः प्राचः प्रयत्नादधिकप्रयत्नानपेक्षश्च, स तत्र निरतिशयकार्योत्कर्षं करोति, पुटपाकाभ्यास इव सुवर्णस्य रक्तसारतामिति। **अयत्नवत्त्वेऽप्यधिकप्रयत्नानपेक्षत्वेऽपि** बुद्धेस्तत्पक्षपातित्वेनोदयान्निरतिशयोत्कर्षसिद्धिश्चेत्यर्थः। 'तमेत'मित्यादिभाष्यस्या'ध्यस्य लोकव्यवहार' इति भाष्येण पौनरुक्त्यमाशङ्क्याह—**यदुक्तमिति**। प्रमाकरणानि प्रमाणानि नाविद्यावन्तं प्रेरकत्वेनाश्रयन्त्यनुपयोगादित्याक्षेपाभिप्रायमाह—**तत्त्वपरिच्छेदो हीति**। विरोधाभिप्रायमाह—**नाविद्यावन्तमिति**।

कल्पतरुपरिमलः।

नन्दात्मकस्य शुद्धस्वरूपस्येति शेषः। **अभिव्यक्तं स्वरूपज्ञानमिति**। चरमसाक्षात्काररूपायां वृत्तावभिव्यक्तं स्वरूपज्ञानमेवाविद्यानिवर्तकम्; यथा सूर्यकान्तारूढं सौरं तेज एव तृणदाहकं तद्वत्, नतु वृत्तिरविद्यानिवर्तिका जडत्वादित्याशयेन

त्यक्षादीनि प्रमाणानि शास्त्राणि चेति। उच्यते—देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः। नहीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति। नचाधिष्ठानमन्तरेणेन्द्रियाणां व्यवहारः संभवति। नचानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते। नचैतस्मिन्सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते। नच प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिर-

भामती।

शास्त्राणि तु पुरुषहितानुशासनपराण्यविद्याप्रतिपक्षतया नाविद्यावद्विषयाणि भवितुमर्हन्तीत्याह—**शास्त्राणि चेति।** समाधत्ते—**उच्यते—देहेन्द्रियादिष्वहंममाभिमानहीनस्य** तादात्म्यतद्धर्माध्यासहीनस्य **प्रमातृत्वानुपपत्तौ सत्यां प्रमाणप्रवृत्त्यनुपपत्तेः।** **अयमर्थः**—प्रमातृत्वं हि प्रमां प्रति कर्तृत्वं, तच्च स्वातन्त्र्यम्। स्वातन्त्र्यं च प्रमातुरितरकारकाप्रयोज्यस्य समस्तकारकप्रयोक्तृत्वम्। तदनेन प्रमाकरणं प्रमाणं प्रयोजनीयम्। नच स्वव्यापारमन्तरेण करणं प्रयोक्तुमर्हति। नच कूटस्थनित्यश्चिदात्माऽपरिणामी स्वतो व्यापारवान्। तस्माद्व्यापारवद्बुद्ध्यादितादात्म्याध्यासात् व्यापारवत्तया प्रमाणमधिष्ठातुमर्हतीति भवत्यविद्यावत्पुरुषविषयत्वमविद्यावत्पुरुषाश्रयत्वं प्रमाणानामिति। **अथ** मा प्रवर्तिषत प्रमाणानि, किं नश्छिन्नमित्यत आह—**नहीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति।** व्यवह्रियतेऽनेनेति व्यवहारः फलं, प्रत्यक्षादीनां प्रमाणानां फलमित्यर्थः। 'इन्द्रियाणि' इति, इन्द्रियलिङ्गादीनीति द्रष्टव्यम्, दण्डिनो गच्छन्तीतिवत्। एवं हि 'प्रत्यक्षादि' इत्युपपद्यते। व्यवहारक्रियया च व्यवहार्याक्षेपात्समानकर्तृकता। अनुपादाय यो व्यवहार इति योजना। किमिति पुनः प्रमातोपादत्ते प्रमाणानि? अथ स्वयमेव कस्मान्न प्रवर्तेत इत्यत आह—**नचाधिष्ठानमन्तरेणेन्द्रियाणां व्यापारः**—प्रमाणानां व्यापारः **संभवति।** न जातु करणान्यनधिष्ठितानि कर्त्रा स्वकार्ये व्याप्रियन्ते, मा भूत्कुविन्दरहितेभ्यो वेमादिभ्यः पटोत्पत्तिरिति। अथ देह एवाधिष्ठाता कस्मान्न भवति, कृतमत्रात्माध्यासेनेत्यत आह—**नचानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते।** सुषुप्तेऽपि व्यापारप्रसङ्गादिति भावः। स्यादेतत्। यथानध्यस्तात्मभावं वेमादिकं कुविन्दो व्यापारयन्पटस्य कर्ता, एवमनध्यस्तात्मभावं देहेन्द्रियादि व्यापारयन्भविष्यति तदभिज्ञः प्रमातेत्यत आह—**नचैतस्मिन्सर्वस्मिन्**—इतरेतराध्यासे इतरेतरधर्माध्यासे च **असति, आत्मनोऽसङ्गस्य**—सर्वथा सर्वदा सर्वधर्मधर्मिवियुक्तस्य **प्रमातृत्वमुपपद्यते।** व्यापारवन्तो हि कुविन्दादयो वेमादीनधिष्ठाय व्यापारयन्ति, अनध्यस्तात्मभावस्य तु देहादिष्वात्मनो न व्यापार-

वेदान्तकल्पतरुः।

अहमभिमानहीनस्येति भाष्यपदं व्याचष्टे—**तादात्म्येति।** तादात्म्याध्यासो देहादिधर्म्यैक्याध्यासः। ममाभिमानहीनस्येत्येतद्व्याकरोति—**तद्धर्मेति।** अध्यासहीनस्य प्रमातृत्वानुपपत्तिमुपपादयति—**प्रमातृत्वं हीति।** निर्व्यापारे चिदात्मनि प्रमाणप्रेरणं व्यापारः परोपाधिरध्यस्त इति प्रमाणानामविद्यावत्प्रेर्यत्वमित्यर्थः। **दण्डिन इति।** यथा दण्ड्यदण्डिसमुदायलक्षणद्वारेण समूहिपरो दण्डिशब्दः, एवमिन्द्रियशब्दोऽपि इन्द्रियाऽनिन्द्रियप्रमाणपर इति व्यवहार इति। क्रियामात्रोपादानात्समानकर्तृकक्रियापेक्षक्त्वाप्रत्ययायोगमाशङ्क्यार्थाक्षिप्तकर्तुरुपादानेन परिहरति—**व्यवहारक्रिययेति। व्यवहार्याक्षेपादिति।** व्यवहारिण आक्षेपादित्यर्थः। अनुपादाय व्यवहारो न संभवतीत्यनुपपन्नम्, अनुपादानस्य प्रमातृकर्तृकत्वेनासंभवनस्य व्यवहारकर्तृकत्वेन कर्तृभेदादित्याशङ्क्याह—**अनुपादायेति।** नैवमिह संबन्धोऽनुपादाय न संभवतीति, किं तर्हि? अनुपादाय यो व्यवहारः स न संभवतीति। **किमिति पुनरिति** साङ्ख्यस्य शङ्का। **अथ स्वयमेवेति** स्वभाववादिनः। **अथ देह एवेति** लौकायतिकस्य।

कल्पतरुपरिमलः।

कर्मधारयोक्तिः। **स्वयमेवेति स्वभाववादिन इति।** वत्सविवृद्ध्यर्थं क्षीरमिव पुरुषभोगापवर्गार्थं प्रधानं स्वयमेव प्रवर्तते इति वदतः साङ्ख्यस्य शङ्कायाः विवरणार्थत्वेन योजयितुं शक्यत्वेऽपि साङ्ख्यमते पुरुषसन्निधानमात्रस्यापेक्षितत्वात्त-

१ अत्र **विवरणप्रस्थानम्**—देहेन्द्रियादिष्विति संग्रहवाक्यस्य प्रपञ्चः नहीन्द्रियाण्यनुपादायेत्यादिवाक्यम्। तत्र **नहीन्द्रियाण्यनुपादायेति** वाक्यं इन्द्रियव्यापारः प्रत्यक्षप्रयोजक इति, **नचाधिष्ठानमिति वाक्यं** तस्य देहाधिष्ठितैरेवेन्द्रियैरुत्पत्तिरिति, **नचानध्यस्तात्मभावेन देहानासङ्गस्यात्मनः प्रमातृत्वमुपपद्यत इति** वाक्यं तु देहाधिष्ठितेन्द्रियजन्यप्रत्यक्षादिप्रमाश्रयत्वं देहात्मनोः परस्पराध्यासंविना न संभवतीति च बोधयति। तत्रात्मनोऽसङ्गस्येति विशेषणं अध्यासंविना न कथमपि देहात्मनोः संबन्ध इति बोधयितुम्, शुक्तिरजतादाविव केवलनिमित्तकारणत्वं प्रतिक्षेप्तुं चेति मन्तव्यम् इति। **अत्रपक्षे—नचानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते; नचैतस्मिन्सर्वस्मिन्नसतीत्यत्रादृतपाठो विरुध्यते। भामतीप्रस्थानेतु—देहेन्द्रियादिष्विति** वाक्यं प्रमाकर्तृत्वरूपं प्रमातृत्वं देहाद्यध्यासाक्षेपकमिति। **नचेन्द्रियाण्यनुपादायेति** प्रत्यक्षादिप्रमाणव्यवहारानुपपत्तिर्विशिष्येन्द्रियाध्यासमाक्षिपतीति, **नचानध्यस्तेति** वाक्यं तु विशिष्यदेहादेरात्मन्यध्यासाक्षेपकमिति, **नचैतस्मिन्निति तु** प्रमाश्रयत्वानुपपत्तिरप्यध्यासाक्षेपकमिति बोधयतीत्युपरितनपाठ एवादृतः।

स्ति। तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च। पश्वादिभिश्चाविशेषात्। यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां संबन्धे सति, शब्दादिविज्ञाने प्रतिकूले

भामती।

योगोऽसङ्गत्वादित्यर्थः। आतश्चाध्यासाश्रयाणि प्रमाणानीत्याह—**नच प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति।** प्रमायां खलु फले स्वतन्त्रः प्रमाता भवति। अन्तःकरणपरिणामभेदश्च प्रमेयप्रवणः कर्तृस्थश्चित्स्वभावः प्रमा। कथं च जडस्यान्तःकरणस्य परिणामश्चिद्रूपो भवेत्, यदि चिदात्मा तत्र नाध्यस्येत। कथं चैष चिदात्मकर्तृको भवेत्, यद्यन्तःकरणं व्यापारवच्चिदात्मनि नाध्यस्येत्। तस्मादितरेतराध्यासाच्चिदात्मकर्तृस्थं प्रमाफलं सिध्यति। तत्सिद्धौ च प्रमातृत्वम्, तामेव च प्रमामुररीकृत्य प्रमाणस्य प्रवृत्तिः। प्रमातृत्वेन च प्रमोपलक्ष्यते। प्रमायाः फलस्याभावे प्रमाणं न प्रवर्तेत। तथाच प्रमाणमप्रमाणं स्यादित्यर्थः। उपसंहरति—**तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि। स्यादेतत्**—भवतु पृथग्जनानामेवम्। आगमोपपत्तिप्रतिपन्नप्रत्यगात्मतत्त्वानां व्युत्पन्नानामपि पुंसां प्रमाणप्रमेयव्यवहारा दृश्यन्त इति कथमविद्यावद्विषयाण्येव प्रमाणानीत्यत आह—**पश्वादिभिश्चाविशेषादिति।** विदन्तु नामागमोपपत्तिभ्यां देहेन्द्रियादिभ्यो भिन्नं प्रत्यगात्मानम्। प्रमाणप्रमेयव्यवहारे तु प्राणभृन्मात्रधर्मान्नातिवर्तन्ते। यादृशो हि पशुशकुन्तादीनामविप्रतिपन्नमुग्धभावानां व्यवहारस्तादृशो व्युत्पन्नानामपि पुंसां दृश्यते। तेन तत्सामान्यात्तेषामपि व्यवहारसमयेऽविद्यावत्त्वमनुमेयम्। चशब्दः समुच्चये। उक्तशङ्कानिवर्तनसहितपूर्वोक्तोपपत्तिः अविद्यावत्पुरुषविषयत्वं प्रमाणानां साधयतीत्यर्थः। एतदेव विभजते—**यथा हि पश्वादय इति।** अत्रच **शब्दादिभिः श्रोत्रादीनां संबन्धे सति** इति प्रत्यक्षं प्रमाणं दर्शितम्। **शब्दादिविज्ञाने** इति तत्फलमुक्तम्। **प्रतिकूले** इति चानुमानफलम्। **तथाहि**—शब्दादिस्वरूपमुपलभ्य तज्जातीयस्य प्रतिकूलतामनुस्मृत्य तज्जातीयतयोपलभ्यमा-

वेदान्तकल्पतरुः।

एवं प्रमाणप्रेरकत्वेनाध्यासं समर्थ्य प्रमाश्रयत्वेनापि समर्थयति—**आतश्चेति।** अवश्यं चेत्यर्थः। मा भूत्प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिः, एतावता कथं प्रमाणानामध्यासाश्रितत्वमित्याशङ्क्य चिदचिद्रूपसंवलितप्रमाया आश्रयः प्रमातापि तत्स्वभावो भवितुमर्हति, नच चिदचित्संवलनमध्यासमन्तरेणेति संभवन्ति प्रमाणान्यध्यासाश्रयाणीत्याह—**प्रमायां खल्विति। परिणामविशेष** उद्भूतसत्त्वः। **प्रमेयप्रवण** इति सुखादेर्व्यवच्छिनत्ति। परिणामतया च जाड्यमुक्तम्। यदि चिदात्मा तत्रान्तःकरणेऽध्यस्येत, तर्ह्येव तत्परिणामश्चिद्रूपो भवेदित्यर्थः। **तत्सिद्धौ चेति।** प्रमाश्रयत्वं हि प्रमातृत्वमित्यर्थः। अनेन **नाऽविद्यावन्तमिति** ग्रन्थस्याक्षेपः परिहृतः। **तत्त्वपरिच्छेदो हीति** ग्रन्थस्थं परिहरति—**तामेव चेति। प्रमातृत्वेन चेति।** अनुपलक्षणे हि [1]प्रमातृत्वशक्तिः स्वयमेव कल्प्या नाध्यासोपपादिका, प्रमा तु चिदचिद्रूपगर्भिणी कल्पयत्यध्यासमिति। **तथाच पारमर्षमिति। शेषलक्षणेऽभिहितम्**—'शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात्स्वयं प्रयोगे स्यात्' (जै. अ. ३ पा. ७ सू. ४)। **दर्शपूर्णमासाभ्यां स्वर्गकामो यजे**तेत्यत्र संशयः; किं साङ्गे प्रधाने यजमान एव कर्ता, उतोद्देशत्यागात्मकप्रधाने एव यजमा-

कल्पतरुपरिमलः।

स्यापेक्षामवदतः स्वभाववादिनो मते स्वयमेवेत्येवकारस्य स्वारस्यमस्तीति स्वभाववादिमतपरतया योजितम्। **प्रमाश्रयत्वेनापि समर्थयतीति। नच प्रमातृत्वमन्तरेणेति** भाष्यं पूर्वभाष्यशेषत्वेन प्रतीयमानमपि **प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरिति** पूर्वभाष्यगतवाक्येन पौनरुक्त्यपरिहाराय युक्त्यन्तरपरत्वेन व्याख्यायत इति भावः। **प्रमाश्रयत्वं हीति। नहीन्द्रियाण्यनुपादायेत्या**दिभाष्ये प्रमातृत्वं प्रमाकरणादिप्रयोक्तृत्वरूपं प्रमाकर्तृत्वमिति प्रमाणप्रेरकत्वेनाध्याससमर्थनार्थमुक्तम्, इह तु चिद्रूपतया परिणामत्वेनाचिद्रूपतया च चिदचित्संवलनरूपा या प्रमा तदाश्रयत्वं केवलचितः केवलाचितश्च न संभवतीति प्रमाश्रयत्वेनाध्याससमर्थनार्थं प्रमातृत्वं प्रमाश्रयत्वमिति व्याख्यायते। यद्यप्युभयथाप्यध्याससमर्थनं प्रत्यगात्मनः कौटस्थ्यं सिद्धं कृत्वा प्रवृत्तं तत्कौटस्थ्ये विप्रतिपद्यमानं प्रति नोपन्यासार्हं; तथापि श्रुतिसिद्धं तत्कौटस्थ्यं प्रामाणिकानां न विप्रतिपत्त्यर्हमिति तात्पर्यम्। **अनेनेति।** नाविद्यावन्तमिति शङ्काग्रन्थो हि विरोधाभिप्रायः। स तु विद्याया एवाचित्संवलितरूपत्वेनाविद्यागर्भत्वान्नास्ति विरोध इति परिहृत इत्यर्थः। अनुपयोगपरिहारार्थ**स्तामेवे**ति ग्रन्थः। अध्यासमपेक्ष्य प्रमाणप्रवृत्तेस्तेन प्रमोपयोगकथनादित्यवतारयति—**तत्त्वेति।** इह यदि प्रमातृत्वं प्रमाकरणादिप्रेरकत्वरूपं प्रमायां स्वातन्त्र्यं, तदा प्रमाणप्रेरकत्वेनाध्याससमर्थनमेवास्यापि भाष्यस्यार्थः स्यादिति पूर्वभाष्येण पौनरुक्त्यं भवेद्; यदि तु तत्प्रेरणानुकूला शक्तिरिह प्रमातृत्वं तत्राह—**प्रमातृत्वशक्तिरिति। नच**—प्रेरणव्यापारेण कल्पितया शक्त्याध्यास उपपाद्यतामिति—वाच्यम्; प्रथमोपस्थितेन तस्य कल्पकेनैव तदुपपादनसंभवात्, तस्य च कृतत्वादिति भावः। **प्रमा त्विति।** तुशब्दः प्रमाणप्रेरणव्यापारोपस्थित्यनपेक्षोपस्थितिकत्वविशेषद्योतनार्थः। **उद्देशत्यागात्मकेति।**

---

१ अत्र प्रमायाः प्रमातृत्वशक्तिः स्वयमेवोपकल्प्येति पाठान्तरं दृष्टं चेदपि प्रमायां प्रमातृत्वशक्तेः स्वयमक्लृप्तत्वेनानन्वयादसंगतमिति प्रतिभाति.

जाते, ततो निवर्तन्ते अनुकूले च प्रवर्तन्ते; यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हन्तुमयमिच्छतीति पलायितुमारभन्ते, हरिततृणपूर्णपाणिमुलमभ्य तं प्रत्यभिमुखीभवन्ति; एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान्बलवत उपलभ्य ततो निवर्तन्ते, तद्विपरीतान्प्रति प्रवर्तन्ते, अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः। पश्वादीनां च प्रसिद्धोऽविवेकपुरःसरः प्रत्यक्षादिव्यवहारः, तत्सामान्यदर्शनाद्व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति निश्चीयते। शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वात्मनः परलोकसंबन्धमधिक्रियते; तथापि न वेदान्तवेद्यमशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदमसंसार्यात्मतत्त्वमधिकारेऽपेक्ष्यते; अनुपयोगादधिकारविरोधाच्च।

भामती।

नस्य प्रतिकूलतामनुमिमीत इति। उदाहरति—**यथा दण्डेति**। शेषमतिरोहितार्थम्। **स्यादेतत्**-भवन्तु प्रत्यक्षादीन्यविद्यावद्विषयाणि, शास्त्रं तु 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादि न देहात्माध्यासेन प्रवर्तितुमर्हति। अत्र खल्वामुष्मिकफलोपभोगयोग्योऽधिकारी प्रतीयते। **तथाच पारमर्षं सूत्रम्**—'शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात् स्वयं प्रयोगे स्यात्' (अ. ३ पा. ७ सू. १८) इति। नच देहादि भस्मीभूतं पारलौकिकाय फलाय कल्पत इति देहाद्यतिरिक्तं कंचिदधिकारिणमाक्षिपति शास्त्रं, तदवगमश्च विद्येति कथमविद्यावद्विषयं शास्त्रमित्याशङ्क्याह—**शास्त्रीये त्विति**। तुशब्दः प्रत्यक्षादिव्यवहाराद्भिनत्ति शास्त्रीयम्। अधिकारशास्त्रं हि स्वर्गकामस्य पुंसः परलोकसंबन्धं विना न निर्वहतीति तावन्मात्रमाक्षिपेत्, नत्वस्यासंसारित्वमपि, तस्याधिकारेऽनुपयोगात्। प्रत्युत औपनिषदस्य पुरुषस्याकर्तुरभोक्तुरधिकारविरोधात्। प्रयोक्ता हि कर्मणः कर्मजनितफलभोगभागी कर्मण्यधिकारी स्वामी भवति। तत्र कथमकर्ता प्रयोक्ता, कथं वाऽभोक्ता कर्मजनितफलभोगभागी। तस्मादनाद्यविद्यालब्धकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभिमानिनं नरमधिकृत्य विधिनिषेधशास्त्रं प्रवर्तते। एवं वेदान्ता अप्यविद्यावत्पुरुषविषया एव। नहि प्रमात्रादिविभागादृते तदर्थाधिगमः। ते त्वविद्यावन्तमनुशासन्तो निर्मृष्टनिखिलाविद्यमनुशिष्टं स्वरूपे व्यवस्थापयन्तीत्येतावानेषां विशेषः। तस्मादविद्यावत्पुरुषविषयाण्येव शास्त्राणीति सिद्धम्।

वेदान्तकल्पतरुः।

नस्य कर्तृत्वं अङ्गेषु यथायथमृत्विजामिति। **तत्रेदं पूर्वपक्षसूत्रम्**—साङ्गप्रधानस्य प्रयोगेऽनुष्ठाने स्वयं यजमानः कर्ता स्यात्, यतः **शास्त्रगम्यं** फलं **प्रयोक्तरि** प्रतीयते, कुतः, ? **तल्लक्षणत्वाच्छ**ब्दप्रमाणकत्वादर्थस्य। स्वर्गकामो यजेतेति स्वर्गोद्देशेन भावनां विदधदाख्यातं भावनाक्षिप्तकर्तृसंबद्धं फलमवगमयति। आत्मनेपदेन च फलस्य कर्तृगामिता गीयते। साङ्गं प्रधानं फलसाधनमिति सर्वत्र याजमानत्वे **प्राप्ते, सिद्धान्तः-अन्यो वा स्यात्परिक्रयाम्नानाद्विप्रतिषेधात्प्रत्यगात्मनि** (जै. अ. ३ पा. ५ सू. २०)। यदि यजमान एव सर्वत्र कर्ता स्यात् तर्हि दक्षिणाभिः परिक्रयणमृत्विजामनर्थकं स्यात्। स्वस्मिंश्च परिक्रयो विप्रतिषिद्धः। अत आध्वर्यवादिकमृत्विग्भिरेव कार्यं, तस्मिंश्च परिक्रयद्वारा प्रयोजककर्तृत्वाद्यजमान एव साङ्गफलभागिति। अत्र च पूर्वपक्षसिद्धान्तयोः कर्तृगामिनि फले न विगानमिति पूर्वपक्षसूत्रमपि तावत्यंशे प्रमाणमित्युदाहृतम्। अशनायाद्यतीतपदसूचिताकर्तृत्ववैपरीत्यमाह—**प्रयोक्ता हीति**। असंसार्यात्मपदसूचिताभोक्तृत्ववैपरीत्यमाह—**कर्मजनितेति**। अपेतब्रह्मेत्याद्युक्ताऽनधिकाररूपवैपरीत्यमाह—**अधिकारीति**। अधिकारित्वस्य व्याख्यानं **स्वामीति। अकर्ता** कर्तृत्वशक्तिरहितः। **ननु** ब्रह्मज्ञानेन कर्मविधयो यदि यदा कदापि

कल्पतरुपरिमलः।

यजमानद्रव्यस्वत्वत्यागोऽन्येन कर्तुमशक्य इति तस्मिन्प्रधाने यजमानस्यैव कर्तृत्वं, तथैव ऋत्विगानमनार्थं दक्षिणादानेपि। **उपलक्षणमेतत्**, फलप्रतिग्रहयोग्यतापादकतपःप्रभृतेश्च। एवकारस्तदितराङ्गकलापव्यवच्छेदार्थः। **भावनाक्षिप्तेति। ननु**—पचन्ति पाचका इत्यत्र भावनाक्षिप्तपाचकरूपकर्तृगामित्वं पाकफलस्य नास्तीति दृष्टमिति—**चेद्, न**; तत्राकर्तृगामिक्रियाफलार्थकपरस्मैपदबलात्पाकफलस्यान्यगामित्वेऽप्यत्र बाधकाभावेनौत्सर्गिककर्तृगामित्वत्यागायोगादिति भावः। न केवलं कर्तृगामित्वे बाधकाभावमात्रं, तत्र साधकान्तरमप्यस्तीत्याह—**आत्मनेपदेन चेति। अनर्थकं स्यादिति।** भूतिदानं हि स्वफलार्थं कर्म परैः कारयितुमित्येवं लोके दृष्टार्थमवगतम्; अतो दृष्टार्थपरिक्रयविधिबलात् परिक्रीतैः कर्म कारणीयमिति नियमोऽवसीयत इति भावः। **आध्वर्यवादिकमिति।** आध्वर्यवादिसमाख्यायुक्तकाण्डाम्नातमङ्गजातं समाख्यावशादध्वर्य्वादिभिः कर्तव्यमित्यधिकरणान्तरव्युत्पादनीयार्थस्य बुद्धिसौकर्यार्थमिहोपन्यासः। **प्रयोजककर्तृत्वादिति।** स्वतन्त्रप्रयोजकसाधारणकर्तृसामान्यपरं साङ्गप्रधानानुष्ठापकप्रयोगविधिगतमाख्यातमिति भावः। अप्रयोक्तृत्वेन पौनरुक्त्यपरिहारायाह—**अकर्ता कर्तृत्वशक्तिरहित इति। पातकं ब्रह्मवधादीति।** अत्र पातकशब्देन

प्राक्च तथाभूतात्मविज्ञानात्प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तते। तथाहि—'ब्राह्मणो यजेत' इत्यादीनि शास्त्राण्यात्मनि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्ते। अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम। तद्यथा—पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यति। तथा देहधर्मान्-स्थूलोऽहं, कृशोऽहं, गौरोऽहं, तिष्ठामि, गच्छामि, लङ्घयामि चेति। तथेन्द्रियधर्मान्-मूकः, काणः, क्लीबः, बधिरः, अन्धोऽहमिति। तथाऽन्तःकरणधर्मान्-कामसंकल्पविचिकित्साध्यवसायादीन्। एवमहंप्रत्ययिन-

भामती ।

स्यादेतत्—यद्यपि विरोधानुपयोगाभ्यामौपनिषदः पुरुषोऽधिकारे नापेक्ष्यते; तथाप्युपनिषद्भ्योऽवगम्यमानः शक्नोत्यधिकारं निरोद्धुम् । तथाच परस्परापहतार्थत्वेन कृत्स्न एव वेदः प्रामाण्यमपजह्यादित्यत आह—**प्राक् च तथाभूतात्मेति** । सत्यमौपनिषदपुरुषाधिगमोऽधिकारविरोधी, तस्मात्तु पुरस्तात्कर्मविधयः स्वोचितं व्यवहारं निर्वर्तयन्तो नानुपजातेन ब्रह्मज्ञानेन शक्या निरोद्धुम्। नच परस्परापहतिः; विद्याविद्यावत्पुरुषभेदेन व्यवस्थोपपत्तेः। यथा 'न हिंस्यात्सर्वा भूतानि' इति साध्यांशनिषेधेऽपि 'श्येनेनाभिचरन् यजेत' इति शास्त्रं प्रवर्तमानं न हिंसादिष्वनेन न विरुध्यते, तत्कस्य हेतोः, पुरुषभेदादिति। अवजितक्रोधारातयः पुरुषा निषेधेऽधिक्रियन्ते, क्रोधारातिवशीकृतास्तु श्येनादिशास्त्र इति। अविद्यावत्पुरुषविषयत्वं नातिवर्तत इति यदुक्तं तदेव स्फोरयति—**तथाहीति**। **वर्णाध्यासः**—'राजा राजसूयेन यजेत' इत्यादिः। **आश्रमाध्यासः**—'गृहस्थः सदृशीं भार्यां विन्देत' इत्यादिः। **वयोऽध्यासः**—'कृष्णकेशोऽग्नीनादधीत' इत्यादिः। **अवस्थाध्यासः**—'अप्रतिसमाधेयव्याधीनां जलादिप्रवेशेन प्राणत्यागः' इति। आदिग्रहणं महापातकोपपातकसंकरीकरणापात्रीकरणमलिनीकरणाद्यध्यासोपसंग्रहार्थम्। तदेवमात्मानात्मनोः परस्पराध्यासमाक्षेपसमाधानाभ्यामुपपाद्य प्रमाणप्रमेयव्यवहारप्रवर्तनेन च दृढीकृत्य तस्यानर्थहेतुतामुदाहरणप्रपञ्चेन प्रतिपादयितुं तत्स्वरूपमुक्तं स्मारयति—**अध्यासोनाम अतस्मिंस्तद्बुद्धिरित्यवोचाम**। '**स्मृतिरूपः** परत्र पूर्वदृष्टावभासः' इत्यस्य संक्षेपाभिधानमेतत्। तत्राहमिति धर्मितादात्म्याध्यासमात्रं ममेत्यनुत्पादितधर्माध्यासं नानर्थहेतुरिति धर्माध्यासमेव ममकारं साक्षादशेषानर्थसंसारकारणमुदाहरणप्रपञ्चेनाह—**तद्यथा पुत्रभार्यादिष्विति**। देहतादात्म्यमात्मन्यध्यस्य देहधर्मं पुत्रकलत्रादिस्वाम्यं च कृशत्वादिवदारोप्य आह—**अहमेव विकलः सकल इति**। स्वस्य खलु साकल्येन स्वाम्यसाकल्यात् स्वामीश्वरः सकलः संपूर्णो भवति। तथा स्वस्य वैकल्येन स्वाम्यवैकल्यात् स्वामीश्वरो विकलोऽसंपूर्णो भवति। बाह्यधर्मा ये वैकल्यादयः स्वाम्यप्रणालिकया संचारिताः शरीरे तानात्मन्यध्यस्यतीत्यर्थः। यदा च परोपाध्यपेक्षे देहधर्मे स्वाम्ये इयं गतिः, तदा कैव कथानौपाधिकेषु देहधर्मेषु कृशत्वादिष्वित्याशयवानाह—**तथा देहधर्मानिति**। देहादेरप्यन्तरङ्गाणामिन्द्रियाणामध्यस्तात्मभावानां धर्मान्मूकत्वादीन् ततोऽप्यन्तरङ्गस्यान्तःकरणस्य अध्यस्तात्मभावस्य धर्मान्कामसंकल्पादीन् आत्मन्यध्यस्यतीति योजना। तदनेन प्रपञ्चेन धर्माध्यासमुक्त्वा तस्य मूलं धर्म्यध्यासमाह—**एवमहंप्रत्ययिनम्**—अहंप्रत्ययो वृत्तिर्यस्मिन्नन्तःकारणादौ

वेदान्तकल्पतरुः ।

बाधिष्यन्ते, तर्ह्यप्रमाणं स्युस्तत्राह-**नच परस्परेति**। **महापातकेति**। **महापातकं** ब्रह्मवधादि । **उपपातकं** गोवधादि । **संकरीकरणादीनि** च मनुनोक्तानि । 'खराश्वोष्ट्रवराहाणामजाविकवधस्तथा । संकरीकरणं ज्ञेयं मीनाऽहिमहिषस्य च ॥ निन्दितेभ्यो धनाऽऽदानं वाणिज्यं शूद्रसेवनम् । अपात्रीकरणं ज्ञेयमसत्यस्याभिभाषणम्' 'मनुस्मृतिः (अ. ११ श्लो. ६८–६९) 'कृमिकीटवयोहत्या मद्यानुगतभोजनम् । फलैधःकुसुमस्तेयमधैर्यं च मलावहम् ॥' (मनु–अ. ११ श्लो. ७०) इति। आदिशब्दात्तदुक्तं जातिभ्रंशकरादि गृह्यते । 'ब्राह्मणस्य रुजः कृत्यं घ्रातिरघ्रेयमद्ययोः। जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं हि तत्॥' (मनु. अ. ११ श्लो. ६७) इति । अभ्यर्हितत्वाद्धर्म्यध्यासः प्रथमं वक्तव्य इत्याशङ्क्याह—**तत्राहमिति**। गृहीतविवेकत्वात्पुत्रादीनामात्मनि तद्धर्माध्यासासंभवमाशङ्क्याह—**देहतादात्म्यमिति** । देहगतस्वामित्वस्यारोपे कथं साकल्यवैकल्यारोपसिद्धिस्तत्राह—**स्वस्य खल्विति**। देहगतस्वामित्वस्य ये सकलत्वविकलत्वे ते चेदात्मन्यध्यस्ते, कथं बाह्यग्रहणं भाष्ये ? तत्राह—**बाह्येति**।

कल्पतरुपरिमलः ।

महापातकमतिपातकं समपातकं चेति त्रिविधं पातकं गृह्यते । **जातिभ्रंशकरादि** इत्यादिशब्देन प्रकीर्णकं गृह्यते। अनुक्तान्ताष्टविधपापानन्तर्भूतं पापं **प्रकीर्णकम्**। एवमेकैकसंज्ञया केषांचित्केषांचित्पापानां क्रोडीकारस्तेषु तेष्वेकरूपनरकादिफलप्रायश्चित्तोपदेशार्थः। **देहगतस्वामित्वस्येति**। **ननु**—पुत्रभार्यादिस्वामित्वं देहगतं न भवति; तस्य पुत्रभार्याद्युपचाराधीनभोगाभावात्, तदधीनभोगभाक्त्वव्यतिरेकेण तद्वैकल्यसाकल्यप्रयुक्तवैकल्यसाकल्याईस्य स्वामित्वस्याभावात्—

मशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यति । एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः । अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते । यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां

भामती ।

सोऽयमहंप्रत्ययी तम् । **स्वप्रचारसाक्षिणि**—अन्तःकरणप्रचारसाक्षिणि, चैतन्योदासीनताभ्यां, **प्रत्यगात्मन्यध्यस्य** । तदनेन कर्तृत्वभोक्तृत्वे उपपादिते । चैतन्यमुपपादयति—**तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेण** अन्तःकरणादिविपर्ययेण, **अन्तःकरणाद्य**चेतनं तस्य **विपर्ययः** चैतन्यं तेन। इत्थंभूतलक्षणे तृतीया। **अन्तःकरणादिष्वध्यस्यति** । तदनेनान्तःकरणाद्यवच्छिन्नः प्रत्यगात्मा इदमनिदंरूपश्चेतनः कर्ता भोक्ता कार्यकारणाविद्याद्वयाधारोऽहंकारास्पदं संसारी सर्वानर्थसंभारभाजनं जीवात्मा इतरेतराध्यासोपादानः, तदुपादानश्चाध्यास इत्यनादित्वाद्बीजाङ्कुरवच्चेतरेतराश्रयत्वमित्युक्तं भवति । प्रमाणप्रमेयव्यवहारदृढीकृतमपि शिष्यहिताय स्वरूपाभिधानपूर्वकं सर्वलोकप्रत्यक्षतयाऽध्यासं सुदृढीकरोति—**एवमयमनादिरनन्तः**—तत्त्वज्ञानमन्तरेणाशक्यसमुच्छेदः । अनाद्यनन्तत्वे हेतुरुक्तः—**नैसर्गिक इति**। **मिथ्याप्रत्ययरूपः**—मिथ्याप्रत्ययानां रूपमनिर्वचनीयत्वं तद्यस्य स तथोक्तः। अनिर्वचनीय इत्यर्थः । प्रकृतमुपसंहरति—**अस्यानर्थहेतोः प्रहाणाय** । विरोधिप्रत्ययं विना कुतोऽस्य प्रहाणमित्यत उक्तम्—**आत्मैकत्वविद्याप्रतिपत्तये**। **प्रतिपत्तिः** प्राप्तिः तस्यै, नतु जपमात्राय, नापि कर्मसु प्रवृत्तये, **आत्मैकत्वं** विगलितनिखिलप्रपञ्चत्वं आनन्दरूपस्य सतः, तत्प्रतिपत्तिं निर्विचिकित्सां भावयन्तो वेदान्ताः समूलघातमध्यासमुपघ्नन्ति। **एतदुक्तं भवति**—अस्मत्प्रत्ययस्यात्मविषयस्य समीचीनत्वे सति ब्रह्मणो ज्ञातत्वान्निष्प्रयोजनत्वाच्च न जिज्ञासा स्यात् । तदभावे च न ब्रह्मज्ञानाय वेदान्ताः पठ्येरन् । अपित्वविवक्षितार्था जपमात्रे उपयुज्येरन् । नहि तदौपनिषदात्मप्रत्ययः प्रमाणतामश्नुते। न चासावप्रमाणमभ्यस्तोऽपि वास्तवं कर्तृत्वभोक्तृत्वाद्यात्मनोऽपनेतुमर्हति । आरोपितं हि रूपं तत्त्वज्ञानेनापोद्यते, नतु वास्तवमतत्त्वज्ञानेन। नहि रज्वा रज्जुत्वं सहस्रमपि सर्पधाराप्रत्यया अपवदितुं समुत्सहन्ते । मिथ्याज्ञानप्रसञ्जितं च स्वरूपं शक्यं तत्त्वज्ञानेनापवदितुम् । मिथ्याज्ञानसंस्कारश्च सुदृढोऽपि तत्त्वज्ञानसंस्कारेणादरनैरन्तर्यदीर्घकालतत्त्वज्ञानाभ्यासजन्मनेति । **स्यादेतत्**—प्राणाद्युपासना अपि वेदान्तेषु बहुलमुपलभ्यन्ते, तत्कथं सर्वेषां वेदान्तानामात्मैकत्वप्रतिपादनमर्थ इत्यत आह—**यथाचायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः** । शरीरमेव शरीरकं तत्र निवासी शारीरको जीवात्मा, तस्य त्वंपदाभिधेयस्य तत्पदाभिधेयपरमात्मरूपतामीमांसा या सा तथोक्ता । **एतावानत्रार्थसंक्षेपः**—**यद्यपि** च स्वाध्यायाध्ययनविधिना स्वाध्यायपदवाच्यस्य

वेदान्तकल्पतरुः ।

साक्षिशब्दार्थमाह—**चैतन्योदासीनताभ्यामिति** । सक्रियोपाधेरात्मन्यारोपादात्मनि कर्तृत्वभोक्तृत्वे उपपादिते इत्यर्थः । **चैतन्यमिति** । अन्तःकरणादिगतमित्यर्थः । साक्षिणि इति निर्देशात् शुद्धेऽध्यास इति भ्रममपनयति—**तदनेनेति** । **प्रकृतमिति** । उपोद्घातरूपेणाध्यासं वर्णयतो भाष्यकारस्य प्रथमं बुद्धिस्थत्वेन प्रकृतं विषयप्रयोजनमित्यर्थः । एवमध्यासे समर्थिते सति प्रसिद्धत्वादजिज्ञास्यत्वमाक्षेपावसरोक्तं निरस्तमित्याह—**एतदुक्तमिति** । **पठ्येरन्निति** भाष्यगतारभ्यन्त इतिपदस्य व्याख्या । अतत्परवेदान्तप्रत्ययो यद्यप्यप्रमा; तथाप्यभ्यस्तो वास्तवकर्तृत्वादिनिवर्तक इत्याशङ्क्याह—**नचासाविति** । अधिकरणमारचयति—**एतावानिति** । वेदान्तशास्त्रमनारभ्यमारभ्यं वेति विषयप्रयोजनासंभवसंभवाभ्यां संशयः । वेदान्तैरध्ययनविधिना सामान्यतः प्रयोजनवदर्थावबोधपरतां नीतैर्विशेषतश्च संदिह्यमानार्थतया विचाराकाङ्क्षैराक्षेपादस्याधिकरणस्य श्रुतिसङ्गतिः । समन्वयाद्यशेषविचारहेतुत्वाच्छास्त्रप्रथमाध्यायप्रथमपादसङ्गतयः । आशङ्कापनयनपूर्वकं पूर्वपक्षमाह—**यद्यपीत्यादिना** । अविवक्षितार्थत्वं वेदान्तानां शङ्कितुमशक्यम् ।

---

१ अभ्युदयाद्यर्थसगुणोपासनादीनामपि वेदान्तप्रतिपाद्यत्वेऽपि तत्पराणां वाक्यानामध्यारोपापवादन्यायेन निर्गुणस्वरूपप्रतिपत्त्यैव पर्यवसानात् पशुकामस्यापि गोदोहनादेः दर्शपूर्णमासाङ्गाप्प्रणयनश्रितत्वेन दर्शपूर्णमासेष्वप्युपयोगवत्तेषामपि ज्ञानद्वारा मुक्तावप्युपयोगात्सर्वे वेदान्ता इत्युक्तमित्यवसेयम् । २ 'तद्गुणसारत्वात्, यथाच तक्षोभयथा, तदनन्यत्वमारम्भणशब्दादिभ्य' इत्याद्यधिकरणैः साधयिष्यमाणस्यापि प्रपञ्चमिथ्यात्वस्येह स्मरणं शास्त्रारम्भोपयोगितया नवमाध्यायसिद्धाध्ययनदृष्टार्थत्वस्याथातो धर्मजिज्ञासेत्यत्रेवात्र न परिदुष्यति । अथवा औदुम्बराधिकरणन्यायेन पर्णमय्यधिकरणन्यायेन च प्रकारभेदमादाय पौनरुक्त्यपरिहारः । यथाहि—"औदुम्बरो यूपो भवतीति" वाक्यशेषतया श्रूयमाणस्य "ऊर्ग्वा उदुम्बरः ऊर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनाप्नोत्यूर्जोवरुद्ध्यै" इति वाक्यस्य फलसमर्पकत्वे गौरवापादकानुपपन्नगुणफलसंबन्धविधानं, एवमेव "यस्य पर्णमयी जुहूर्भवतीति" वाक्यशेषतया श्रूयमाणस्य "न स पापं श्लोकं शृणोतीति" वाक्यस्य फलसमर्पकत्वेऽपि तदित्यौदुम्बराधिकरणन्यायेनैव गतार्थत्वेऽपि यथा द्रव्यसंस्कारकर्मसु फलश्रुतिरर्थवादः स्यादित्यधिकरणप्रवृत्तिः, रात्रिसत्रन्यायावलम्बेनाशङ्कान्तरनिराकरणादिमुखभेदसत्वादेवम्—इति **न्यायरक्षामणिः** ।

प्रदर्शयिष्यामः । वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम्—

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

भामती ।

वेदराशेः फलवदर्थावबोधपरतामापादयता कर्मविधिनिषेधानामिव वेदान्तानामपि स्वाध्यायशब्दवाच्यानां फलवदर्थावबोधपरत्वमापादितं; **यद्यपि च 'अविशिष्टस्तु वाक्यार्थः'** इति न्यायात् मन्त्राणामिव वेदान्तानामर्थपरत्वमौत्सर्गिकं; **यद्यपिच** वेदान्तेभ्यश्चैतन्यानन्दघनः कर्तृत्वभोक्तृत्वरहितो निष्प्रपञ्च एकः प्रत्यगात्मावगम्यते; **तथापि** कर्तृत्वभोक्तृत्वदुःखशोकमोहमयमात्मानमवगाहमानेनाहंप्रत्ययेन संदेहबाधविरहिणा विरुध्यमाना वेदान्ताः स्वार्थात्प्रच्युता उपचरितार्था वा जपमात्रोपयोगिनो वेत्यविवक्षितस्वार्थाः । तथाच तदर्थविचारात्मिका चतुर्लक्षणी शारीरकमीमांसा नारब्धव्या। नच सर्वजनीनाहमनुभवसिद्ध आत्मा संदिग्धो वा सप्रयोजनो वा, येन जिज्ञास्यः सन् विचारं प्रयुञ्जीतेति **पूर्वः पक्षः । सिद्धान्तस्तु**—भवेदेतदेवं यद्यहंप्रत्ययः प्रमाणम् । तस्य तूक्तेन क्रमेण श्रुत्यादिबाधकत्वानुपपत्तेः, श्रुत्यादिभिश्च समस्ततीर्थकरैश्च प्रामाण्यानभ्युपगमादध्यासत्वम् । एवं वेदान्ता नाविवक्षितार्थाः, नाप्युपचरितार्थाः किंतूक्तलक्षणाः । प्रत्यगात्मैव तेषां मुख्योऽर्थः । तस्य च वक्ष्यमाणेन क्रमेण संदिग्धत्वात्, प्रयोजनवत्त्वाच्च युक्ता जिज्ञासा,—इत्याशयवान्सूत्रकारः तज्जिज्ञासामसूत्रयत्—

अथातो ब्रह्मजिज्ञासेति । जिज्ञासया संदेहप्रयोजने सूचयति । तत्र साक्षादिच्छाव्याप्यत्वाद्ब्रह्मज्ञानं कण्ठोक्तं प्रयोजनम् । नच कर्मज्ञानात्पराचीनमनुष्ठानमिव ब्रह्मज्ञानात्पराचीनं किंचिदस्ति, येनैतदवान्तरप्रयोजनं भवेत्, किंतु ब्रह्ममीमांसाख्यतर्केतिकर्तव्यतानुज्ञातविषयैर्वेदान्तैराहितं निर्विचिकित्सं ब्रह्मज्ञानमेव समस्तदुःखोपशमरूपमानन्दैकरसं परमं प्रयोजनम्। तमर्थमधिकृत्य हि प्रेक्षावन्तः प्रवर्तन्तेतराम्। तच्च प्राप्तमप्यनाद्यविद्यावशादप्राप्तमिवेति प्रेप्सितं भवति। यथा स्वग्रीवागतमपि ग्रैवेयकं कुतश्चिद्भ्रमान्नास्तीति मन्यमानः परेण प्रतिपादितमप्राप्तमिव प्राप्नोति। जिज्ञासा तु संशयस्य कार्यमिति स्वकारणं संशयं सूचयति। संशयश्च मीमांसारम्भं प्रयोजयति। तथाच शास्त्रे प्रेक्षावत्प्रवृत्तिहेतुसंशयप्रयोजनसूचनात् युक्तमस्य सूत्रस्य शास्त्रादित्वमित्याह भगवान्भाष्यकारः—**वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्य** अस्माभिः **इदमादिमं सूत्रम्**। पूजितविचारवचनो मीमांसाशब्दः। परमपुरुषार्थहेतुभूतसूक्ष्मतमार्थनिर्णयफलता विचारस्य पूजितता।

वेदान्तकल्पतरुः ।

अध्ययनविधेर्दृष्टार्थत्वस्य तुल्यत्वात् । नच कार्यपरत्वात्सर्ववेदस्य सिद्धरूपे ब्रह्मणि वेदान्तानामप्रामाण्यशङ्का; लोकवेदयोर्वाक्यार्थस्याविशेषेण सिद्धरूपे ब्रह्मणि वेदान्तानां मन्त्राणामिव देवतादौ प्रामाण्यसंभवात् । नाप्यनुत्पत्तिलक्षणाप्रामाण्यं शङ्क्यम्; ब्रह्मात्मैक्यबोधित्वाद्वेदान्तानाम्। अतो नानारभ्यं शास्त्रमित्यर्थः। परिहरति—**तथापीति**। प्रमाणस्वरूपपर्यालोचनेन मीमांसानारम्भमुक्त्वा प्रमेयस्वरूपालोचनयापि तमाह—**नचेति । वक्ष्यमाणेनेति** । तत्पुनर्ब्रह्मेत्यादावित्यर्थः ॥

अथातो ब्रह्मजिज्ञासा ॥ १ ॥ वृत्तिव्यक्तस्वरूपज्ञानमभिप्रेत्याह—**तत्र साक्षादिति** । इष्यमाणत्वेन ज्ञानस्य प्रयोजनसूचनमुपपाद्य संशयसूचनमुपपादयति—**जिज्ञासा त्विति । सा हीति** । सा न्यायात्मिका मीमांसा अनेन

कल्पतरुपरिमलः ।

इति चेद्, न; तदुपचाराधीनयोषादिभाक्तत्वरूपस्य तथाभूतस्य स्वामित्वस्य देहेपि संभवात् । **प्रमेयस्वरूपालोचनयापि तमाहेति । नच**—अहंप्रत्ययसिद्धेन कर्तृत्वभोक्तृत्वादिना निश्चितस्यापि भोक्तृरूपस्य नित्यत्वविभुत्वादिना संदिग्धतया विषयत्वं स्यादिति—वाच्यम्; सिद्धान्ते तन्निर्णयस्य मोक्षफलत्वानङ्गीकारादिति भावः ॥

अथातो ब्रह्मजिज्ञासा ॥ १ ॥ **ननु** सूत्रे जिज्ञासापदप्रकृतिप्रतिपाद्यं किम् अखण्डानन्दरूपब्रह्मस्वरूपज्ञानं, किंवा विचारसाध्यं ब्रह्मनिर्णयरूपं वृत्तिज्ञानम् ? **नाद्यः**; संशयानाक्षेपेण विषयसूचनालाभप्रसङ्गात् । नहि बहुशो दृष्टेऽपि पुनः पुनरुदित्वरी विषयसौन्दर्यप्रयुक्ता जिज्ञासा संशयमूला । **न द्वितीयः**; प्रयोजनसूचनालाभप्रसङ्गादित्याशङ्क्योभयमपि विवक्षितं, सौत्रपदानाम् अनेकार्थत्वस्यालङ्कारत्वादित्याह—**वृत्तिव्यक्तेति** । वृत्तिश्च व्यक्तस्वरूपज्ञानं चेति द्वन्द्वैकवद्भावः ।

---

१ **अथातो ब्रह्मजिज्ञासा**—अत्र जिज्ञासापदं 'इदमतो जिज्ञासन्ते' 'इदं जिज्ञास्यम्' 'धर्मं जिज्ञासितुमिच्छेत्' इत्याद्यभियुक्तप्रयोगानुसारेणावयवार्थपरित्यागेन विचारे रूढमित्याशङ्क्य नायं जिज्ञासाशब्दः परित्यक्तावयवार्थः केवलविचारपर्यायः प्रयुज्यते, किंतु विचारसाध्यज्ञानविषयेच्छापरः, नह्युपदेशसाध्यज्ञानविषयेच्छायां जिज्ञासापदप्रयोगो दृश्यते इत्यन्तर्णीतविचारपरकमपि तत्पदं प्राधान्येनेच्छामेव बोधयतीति पञ्चपादिकादिषूपपादनात् भामतीप्रस्थान इव विवरणप्रस्थानेऽपि साधनचतुष्टयसंपत्त्यनन्तरं ब्रह्मजिज्ञासा भवतीत्येव शाब्दः सूत्रार्थः, नतु जिज्ञासापदेन विचारलक्षणया ब्रह्मविचारः कर्तव्य इति। सूचितश्चायमर्थः 'अधिक्रियायोग्यस्य ब्रह्मणस्तज्ज्ञानस्य वा प्राधान्येनानिर्देशात् प्रधानस्य चेच्छाया अनधिकार्यत्वात्' इति वर्णयता **पद्मपादाचार्येण** । तस्माद्ब्रह्म जिज्ञासितव्यमित्यादिकं तु अन्तर्णीतविचारविधेयत्वाभिप्रायं इत्युपसंहारभाष्यव्याख्यानमप्यतएवोपपद्यते । **यत्तु रामानन्दीये**—तस्माद्ब्रह्म जिज्ञासितव्यमिति भाष्यव्याख्यानावसरे 'अत्र सन्प्रत्ययस्य विचारलक्षकत्वं तव्यप्रत्ययेन सूच्यते' इत्युक्तम्, तत्तव्यप्रत्ययघटितपदाभिप्रायं, शाधातुना केवलज्ञानमेव विवक्ष्यत इति मताभिप्रायं **वेति द्रष्टव्यम्** ।

तत्राथशब्द आनन्तर्यार्थः परिगृह्यते, नाधिकारार्थः; ब्रह्मजिज्ञासाया अनधिकार्यत्वात् । मङ्ग-

भामती ।

तस्या मीमांसायाः शास्त्रम्, सा ह्यनेन शिष्यते शिष्येभ्यो यथावत्प्रतिपाद्यत इति । सूत्रं च बह्वर्थसूचनात् भवति । **यथाहुः—** 'लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च । सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ॥' इति । तदेवं सूत्रतात्पर्यं व्याख्याय तस्य प्रथमपदमथेति व्याचष्टे—**तत्राथशब्द आनन्तर्यार्थः परिगृह्यते** । तेषु सूत्रपदेषु मध्ये योऽयमथशब्दः स आनन्तर्यार्थ इति योजना । **नन्वधिकारार्थो**ऽप्यथशब्दो दृश्यते, यथा 'अथैष ज्योतिः' इति वेदे, यथा वा लोके 'अथ शब्दानुशासनम्' 'अथ योगानुशासनम्' इति, तत्किमत्राधिकारार्थो न गृह्यत इत्यत आह—**नाधिकारार्थः;** कुतः ? **ब्रह्मजिज्ञासाया अनधिकार्यत्वात्** । जिज्ञासा तावदिह सूत्रे ब्रह्मणश्च तत्प्रज्ञानाच्च शब्दतः प्रधानं प्रतीयते । नच—यथा 'दण्डी प्रैषानन्वाह' इत्यत्राप्रधानमपि दण्डशब्दार्थो विवक्ष्यते, एवमिहापि ब्रह्मतज्ज्ञाने इति—युक्तम्; ब्रह्ममीमांसाशास्त्रप्रवृत्त्यङ्गसंशयप्रयोजनसूचनार्थत्वेन जिज्ञासाया एव विवक्षितत्वात् । तदविवक्षायां तदसूचनेन काकदन्तपरीक्षायामिव ब्रह्ममीमांसायां न प्रेक्षावन्तः प्रवर्तेरन् । नहि तदानीं ब्रह्म वा तज्ज्ञानं वाभिधेयप्रयोजने भवितुमर्हतः; अनध्यस्ताहंप्रत्ययविरोधेन वेदान्तानामेवंविधेऽर्थे प्रामाण्यानुपपत्तेः, कर्मप्रवृत्त्युपयोगितयोपचरितार्थानां वा जपोपयोगिनां वा 'हुम्' इत्येवमादीनामविवक्षितार्थानामपि स्वाध्यायाध्ययनविध्यधीनग्रहणत्वस्य संभवात् । तस्मात्संदेहप्रयोजनसूचनी जिज्ञासा इह पदतो वाक्यतश्च प्रधानं विवक्षितव्या । नच तस्या अधिकार्यत्वम्; अप्रस्तूयमान-

वेदान्तकल्पतरुः ।

ग्रन्थेन शिष्यत इत्यर्थः । विषयप्रयोजनब्रह्मस्वरूपप्रमाणयुक्तिसाधनफलविचाराणां च प्रतिज्ञानाद्बह्वर्थसूचनता । **लघूनि** असंदिग्धार्थानि । सांशयिकं हि नानार्थस्फोरकत्वेन गुरु । सूचितार्थत्वे हि मुख्यार्थस्याप्यवश्यंभावित्वाद्बह्वर्थत्वसिद्धिः । बहूनामप्रकृतत्वात्तत्रेति निर्धारणायोगमाशङ्क्याह—**तेष्विति** । अथैष ज्योतिरित्यत्रापूर्वसंज्ञायोगिविधास्यमानकर्मप्रारंभार्थोऽथशब्दः । अधिकरणं तु (जै. अ. २ पा. २ सू. २२) गुणोपसंहारेऽनुक्रमिष्यते । प्रधानस्य जिज्ञासायाः शास्त्रेणाप्रतिपाद्यमानत्वात्तत्प्रतिपादनप्रारंभार्थो मा भूत्, ब्रह्मतज्ज्ञानप्रारंभार्थो भवत्वित्याशङ्क्याह—**नचेति** । 'दण्डी प्रैषानि-' त्यत्र हि 'मैत्रावरुणः प्रेष्यति चान्वाहेति' मैत्रावरुणस्य प्रैषानुवचने प्राप्तत्वादविवक्षा, इह तु जिज्ञासाया नाविवक्षा कारणम्; प्रत्युत तदविवक्षायां विषयप्रयोजनसूचनं न स्यादित्यर्थः । **ननु** किं संशयसूचनेन ? निर्दिष्टे ब्रह्मतज्ज्ञाने एव विषयप्रयोजने सिध्यतस्तत्राह—**नहीति** । **अप्रस्तूयमानत्वात्** प्रत्यधिकरणमप्रतिपाद्यमानत्वात् । 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्ये'ति सूत्रे 'मान्जाने' इत्यस्य डानुबन्धस्य धातोर्नान्तत्वं निपातितम् । अस्य च पूजितविचारार्थत्वं प्रसिद्धिबला-

कल्पतरुपरिमलः ।

स्वरूपज्ञानविवक्षायां ब्रह्मणो यज्ज्ञानं तदिच्छेत्यर्थकथने राहोः शिर इतिवदुपचारो द्रष्टव्यः । **ब्रह्मतज्ज्ञानप्रारम्भार्थ इति** । ब्रह्म तावत् स्वरूपतो जन्मादिसूत्रेण (ब्र. अ. १ पा. १ सू. २) प्रयोजनरूपतया फलाध्यायेन च प्रतिपाद्यते । तद्विषये प्रमाणयुक्ती ब्रह्मतज्ज्ञानेत्यत्र करणव्युत्पत्तिमता ज्ञानपदेन संगृहीते समन्वयाविरोधलक्षणाभ्यां प्रतिपाद्येते । मुक्तिसाधनब्रह्मज्ञानं भावव्युत्पत्तिमता तेनैव ज्ञानपदेन संगृहीतं सपरिकरं साधनाध्यायेन प्रतिपाद्यते । तस्मादिहाथशब्दस्य ब्रह्मतज्ज्ञानप्रतिपादनप्रारम्भार्थत्वं वक्तुं शक्यमिति शङ्कार्थः । **दण्डी प्रैषानिति** । इष्टिषु प्रैषस्याध्वर्युः कर्ता, अनुवचनस्य होता; तद्विकृतौ पशावुभयोरपि मैत्रावरुणः कर्ता विधीयते **मैत्रावरुणः प्रेष्यति चान्वाह चेति** । तेन प्राप्तत्वाद्दण्डिवाक्ये मैत्रावरुणकर्तृके प्रैषानुवचने विध्यन्वयित्वेन न विवक्षा, किंतु प्रैषानुवचनाङ्गं दण्डग्रहण इत्यर्थः । यद्यपि "क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति" विहितस्य दण्डदानस्य मैत्रावरुणकार्यार्थत्वावगमात् तेन स्थित्वोच्चैः कर्तव्ये प्रैषानुवचने बलार्थमवष्टम्भतया दण्डग्रहणस्य सामर्थ्यादपि प्राप्तिर्भवेत्; तथापि सामर्थ्याद्भवन्ती प्राप्तिस्तेन कर्तव्ये रात्रिसंचारादावपि भवेत्, सा मा भूदिति कार्यान्तरपरिसंख्याफलकः प्रैषानुवचनरूपे कार्ये तस्य दण्डविधिरिति दण्ड एव विध्यन्वयित्वेन विवक्षित इति भावः । **प्रत्युत तदविवक्षायामिति** । **ननु**—विध्यन्वयित्वेनाविवक्षितमपि प्रैषानुवचनमनुवाद्यतया यथा विधेयदण्डान्वयि, एवमिच्छापि प्रारभ्यमाणब्रह्मज्ञानान्वयिनी सती ब्रह्मज्ञानस्य प्रयोजनत्वं ब्रह्मणः संदिग्धत्वं च गमयेत्; इच्छेष्यमाणसमभिव्याहारे चेष्यमाणप्राधान्यं 'यजेत स्वर्गकाम' इत्यादौ क्लृप्तम्, अत इहापीच्छाप्राधान्यं विहायेष्यमाणप्राधान्यमभ्युपगन्तुं युक्तम्; तस्मात्प्रारम्भार्थतायां न कश्चिद्दोष—**इति चेत्; उच्यते,** एवं सति वृत्त्यभिव्यक्तनिरतिशयानन्दरूपस्वरूपज्ञानस्येच्छाविषयत्वेनाग्रहणात्परमपुरुषार्थः सूत्रेण साक्षाद्दर्शितो न स्याद्, विविदिषन्तीत्यत्रेव मुक्तिसाधनज्ञानस्य गौणपुरुषार्थताज्ञापनार्थेनेच्छासमभिव्याहारेण निर्णिनीषोक्त्यैव संदेहानाक्षेपाद्विषयसूचनं च न सिध्येत्; अतः स्वरूपज्ञानप्रेप्साप्रतिपादनेन तस्य परमपुरुषार्थत्वब्रह्मविषयनिर्णयेच्छाप्रतिपादनेन ब्रह्मणः प्रागविज्ञाततया संदिग्धत्वेन विषयत्वं च सूचयितुं पूर्वोक्तरीत्या जिज्ञासापदस्य स्वरूप-

लस्य च वाक्यार्थे समन्वयाभावात्। अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो

भामती।

त्वात्, येन तत्समभिव्याहृतोऽथशब्दोऽधिकारार्थः स्यात्, जिज्ञासाविशेषणं तु ब्रह्मतज्ज्ञानमधिकार्यं भवेत्। नच तदप्यथशब्देन संबध्यते; प्राधान्याभावात्। नच जिज्ञासा मीमांसा, येन योगानुशासनवदधिक्रियेत; नान्तत्वं निपात्य 'माङ् माने' इत्यस्माद्वा 'मान पूजायाम्' इत्यस्माद्वा धातोः 'मान्बध—' इत्यादिनाऽनिच्छार्थे सनि व्युत्पादितस्य मीमांसाशब्दस्य पूजितविचारवचनत्वात्। ज्ञानेच्छावाचकत्वाजिज्ञासापदस्य, प्रवर्तिका हि मीमांसायां जिज्ञासा स्यात् नच प्रवर्त्यप्रवर्तकयोरैक्यम्; एकत्वे तद्भावानुपपत्तेः। नच स्वार्थपरत्वस्योपपत्तौ सत्यामन्यार्थपरत्वकल्पना युक्ता; अतिप्रसङ्गात्। तस्मात् सुष्ठूक्तं **'जिज्ञासाया अनधिकार्यत्वात्'** इति। अथ मङ्गलार्थोऽथशब्दः कस्मान्न भवति॥ तथाच मङ्गलहेतुत्वात् प्रत्यहं ब्रह्मजिज्ञासा कर्तव्येति सूत्रार्थः संपद्यत इत्यत आह—**मङ्गलस्य च वाक्यार्थे समन्वयाभावात्।** पदार्थ एव हि वाक्यार्थे समन्वीयते, स च वाच्यो वा लक्ष्यो वा। नचेह मङ्गलमथशब्दस्य वाच्यं वा, लक्ष्यं वा, किंतु मृदङ्गशङ्खध्वनिवदथशब्दश्रवणमात्रकार्यम्। नच कार्यज्ञाप्ययोर्वाक्यार्थे समन्वयः शब्दव्यवहारे दृष्ट इत्यर्थः। तत्किमिदानीं मङ्गलार्थोऽथशब्दस्तेषु तेषु न प्रयोक्तव्यः—**तथाच** 'ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ॥' इति स्मृतिव्याकोप इत्यत आह—**अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति।** अर्थान्तरेष्वानन्तर्यादिषु प्रयुक्तोऽथशब्दः श्रुत्या श्रवणमात्रेण वेणुवीणाध्वनिवन्मङ्गलं कुर्वन्, मङ्गलप्रयोजनो भवति, अन्यार्थमानीयमानोदकुम्भदर्शनवत्, तेन न स्मृतिव्याकोपः। नचेहानन्तर्यार्थस्य सतो न श्रवणमात्रेण मङ्गलार्थतेत्यर्थः। **स्यादेतत्**—पूर्वप्रकृतापेक्षोऽथशब्दो भविष्यति, विनैवानन्तर्यार्थत्वम्। तद्यथेममेवाथशब्दं प्रकृत्य विमृश्यते किमयमथशब्द आनन्तर्ये, अथ अधिकार इति। **अत्र विमर्शवाक्ये**ऽथशब्दः पूर्वप्रकृतमथशब्दमपेक्ष्य प्रथमपक्षोपन्यासपूर्वकं पक्षान्तरोपन्यासे। नचास्यानन्तर्यमर्थः; पूर्वप्रकृतस्य प्रथमपक्षोपन्यासेन व्यवायात्, नच प्रकृतानपेक्षा; तदनपेक्षस्य तद्विषयत्वाभावे-

वेदान्तकल्पतरुः।

त्स्वतो नान्तस्य तदर्थत्वम्। **स्मृतिसिद्धमिति।** मानित्यादिधातुभ्यः सन् भवत्यभ्यासस्य च दीर्घ इत्यर्थः। धातोः कर्मण इत्युत्तरसूत्रे इच्छार्थे सन्विधानादयमनिच्छार्थ इति गम्यते। लक्षितविचारप्रारंभार्थोऽथशब्दोऽस्तु नेत्याह—**नच स्वार्थपरस्येति** वाच्याया जिज्ञासायाः संशयसूचनेन वाक्यार्थान्वयोपपत्तौ न लक्षणा, अधिगतविषयप्रयोजनस्तु स्वत एव विचारे प्रवर्त्स्यतीत्यर्थः। **अथा**धिकारार्थ इत्यत्राथशब्दस्यानन्तर्यार्थत्वं वदन् प्रष्टव्यः; किं पूर्वप्रकृतादथशब्दादानन्तर्यमुत निरन्तरादानन्तर्यपक्षात्, **नाद्य** इत्याह—**पूर्वप्रकृतस्येति। द्वितीये** पूर्वप्रकृतमथशब्दमपेक्ष्य किं निरन्तरानन्तर्यार्थत्वपक्षादानन्तर्यं ब्रूयाद् द्वितीयोऽथशब्दोऽधिकारार्थत्वपक्षस्य, उतानपेक्ष्यैव। **नाद्यः**; अवश्यापेक्षणीयत्वात्पूर्वप्रकृतापेक्षाया अथशब्दस्य तादर्थ्ये सत्यर्थान्तरकल्पनानवकाशात्। **न द्वितीय** इत्याह—**नच प्रकृतानपेक्षेति।** एकधर्म्यपेक्षणे हि तन्निरूपकयोः पक्षयोस्तुल्यार्थत्वेन विकल्पः कल्प्यत इत्यर्थः। नानेन भाष्येण पूर्वप्रकृतापेक्षाया आनन्तर्यरूपत्वमुच्यते; आनन्तर्यरूपत्वपक्षे विकल्पाप्रतिभानात्, किंतूभयत्रापि ब्रह्मजिज्ञासाहेतुभूतप्रकृतसिद्धिरस्ति प्रयोजनमतः फलद्वारेणाव्य-

कल्पतरुपरिमलः।

ज्ञाननिर्णयज्ञानेच्छाद्वयप्राधान्यमेवाभ्युपेयमिति भावः। **स्वतो नान्तस्य त्विति।** यद्यपि तस्य पूजितविचारवचनत्वं न व्याकरणस्मृतिसिद्धं; 'मान पूजाया'मिति धातोः पूजामात्रवाचित्वात्, 'मान विचारे' इति चुरादिपठितस्य धातोर्विचारमात्रवाचित्वात्; तथापि तयोरन्यतरस्य ग्रहणे धात्वर्थतया विशेषणविशेष्यान्यतरलाभोऽस्तीत्यभिप्रायेणैवमुक्तम्। **प्रवर्त्स्यति** प्रवर्तिष्यते। 'वृद्भ्यः स्यसनो'रिति वैकल्पिकं परस्मैपदम्। परस्मैपदे 'न वृद्भ्यश्चतुर्भ्यः' इति प्रतिषेधादिडागमाभवः। **किं पूर्वप्रकृतादिति।** किमयमथशब्द आनन्तर्यार्थ इति प्रथमविकल्पोपन्यासपरे पूर्ववाक्ये विकल्पधर्मित्वेन प्रकृतादित्यर्थः। **द्वितीये इति।** अथशब्दविशिष्टात्पूर्वोक्तकल्पादानन्तर्यशुद्धकल्पाद्वेत्यर्थः। पूर्वप्रकृतस्याथशब्दस्यावश्यमपेक्षणे तमेवोपेक्ष्याथशब्दस्य तादर्थ्ये कल्पान्तरोपन्यासार्थकत्वे संभवत्यर्थान्तरस्य विशिष्टापेक्षयानन्तर्यस्य कल्पनानवकाशात्। **यद्वा**—पूर्वप्रकृतस्य प्रथमकल्पस्यापेक्षाया आवश्यकत्वे द्वितीयाथशब्दस्य तादर्थ्ये तन्मात्रापेक्षया आनन्तर्यार्थकत्वे संभवति अर्थान्तरस्य विशिष्टानन्तर्यस्य कल्पनानवकाशादित्यर्थः। **आनन्तर्यरूपत्वपक्षे विकल्पाप्र-**

---

१ मङ्गलस्याथशब्दावाच्यत्वे तदलक्ष्यत्वे च सिद्धे 'मङ्गलानन्तरारम्भे'ति कोशवचनमनादरणीयमेवेति मिश्राणामाशयः। विवरणाचार्याणां तु वाच्यत्वेऽपि मङ्गलस्य ब्रह्मजिज्ञासायां कर्तृकरणभावादिना, अर्थवादत्वप्रसङ्गेन सामानाधिकरण्येन वान्वयासंभवान्नात्र मङ्गलार्थोऽथशब्द इति।

भवति । पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकात् । सति चानन्तर्यार्थत्वे यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षत एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षते,

भामती ।

नासमानविषयतया विकल्पानुपपत्तेः, नहि जातु भवति किं नित्य आत्मा, अथ अनित्या बुद्धिरिति; तस्मादानन्तर्यं विना पूर्वप्रकृतापेक्ष इहाथशब्दः कस्मान्न भवतीत्यत आह—**पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकात्** । **अस्यार्थः**—न वयमानन्तर्यार्थतां व्यसनितया रोचयामहे, किंतु ब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतसिद्धये । सा च पूर्वप्रकृतार्थापेक्षत्वेऽप्यथशब्दस्य सिध्यतीति व्यर्थ आनन्तर्यार्थत्वावधारणाग्रहोऽस्माकमिति । **तदिदमुक्तं 'फलतः' इति । परमार्थतस्तु**—कल्पान्तरोपन्यासे पूर्वप्रकृतापेक्षा, नचेह कल्पान्तरोपन्यास इति पारिशेष्यादानन्तर्यार्थ एवेति युक्तम् । भवत्वानन्तर्यार्थः, किमेवं सतीत्यत आह—**सतिचानन्तर्यार्थत्व इति** । न तावद्यस्य कस्यचिदत्रानन्तर्यमिति वक्तव्यं; तस्याभिधानमन्तरेणापि प्राप्तत्वात्, अवश्यं हि पुरुषः किंचित्कृत्वा किंचित्करोति । नचानन्तर्यमात्रस्य दृष्टमदृष्टं वा प्रयोजनं पश्यामः । तस्मात्तस्यात्रानन्तर्यं वक्तव्यं यद्विना ब्रह्मजिज्ञासा न भवति, यस्मिन्सति तु भवन्ती भवत्येव, **तदिदमुक्तम्—यत्पूर्ववृत्तं नियमेनापेक्षत इति । स्यादेतत्**— । धर्मजिज्ञासाया इव ब्रह्मजिज्ञासाया अपि योग्यत्वात् स्वाध्यायानन्तर्यं; धर्मवद्ब्रह्मणोऽप्याम्नायैकप्रमाणगम्यत्वात्, तस्य चागृहीतस्य स्वविषये विज्ञानाजननात्, ग्रहणस्य च स्वाध्यायोऽध्येतव्य इत्यध्ययनेनैव नियतत्वात् । तस्माद्वेदा-

वेदान्तकल्पतरुः ।

तिरेक इत्युच्यत इत्याह—**अस्यार्थ इति । ननु** उभयथा फलाभेदे किमित्यानन्तर्याग्रहस्तत्राह—**परमार्थतस्त्विति** । अन्यदप्यदृष्टादिकमपेक्ष्य भवन्ती जिज्ञासा यस्मिन्सति भवत्येवेत्यर्थः । **ब्रह्मेति** । स्वाध्यायाध्ययनानन्तरं ब्रह्मजिज्ञासाया भवितुं योग्यत्वात्तदानन्तर्यमथशब्देन वक्तुं युक्तमित्यर्थः । योग्यत्वे कारणमाह—**ब्रह्मणोऽपीति । अत्रचेति** । स्वाध्यायस्य नित्यत्वात्तदानन्तर्यमयुक्तमिति तद्विषयमध्ययनं लक्षयतीत्यर्थः । **ननु** धर्मजिज्ञासासूत्रे ब्रह्मानुपादानात्कथं

कल्पतरुपरिमलः ।

तिभानादिति । यत्र विकल्पप्रतिभानं तत्रैव पूर्व विकल्पप्रकृततद्धर्म्यपेक्षार्थको विकल्पान्तरमुखेऽथशब्दः प्रसिद्धो नान्यत्रेत्याशयः । **ननु**—'अथैष ज्योतिरेतेन सहस्रदक्षिणेन यजेते'त्यत्र प्रकृतज्योतिष्टोमानुवादेन सहस्रदक्षिणालक्षणगुणविधानं, नतु तद्विशिष्टकर्मान्तरविधानमिति पूर्वपक्षोपपादकत्वेन पूर्वप्रकृतापेक्षार्थत्वमथशब्दस्य वार्तिककृतोक्तम् । (तन्त्रवार्तिके जै. अ. २ पा. २ सू. २२) अतो विकल्पाभावेऽपि तादर्थ्यप्रसिद्धिरस्तीति—**चेद्** , **न**; तत्रानन्तर्यार्थत्वमेव पूर्वपक्षेऽभिमतम् । आनन्तर्यमपि हि पूर्वप्रकृतमपेक्ष्य वर्ण्यते । **अतएव तृतीयाध्यायटीकायां संज्ञाधिकरणा** (ब्र. अ. ३ पा. ३ सू. ६–८) नुक्रमणेऽथशब्दस्यानन्तर्यार्थस्यासंबन्धेऽनुपपत्तेरित्यानन्तर्यार्थमादायैव पूर्वपक्षसमर्थनं कृतम् । **आचार्यैश्च तद्व्याख्यानसमये वार्तिककारीयपूर्वप्रकृतापेक्षोक्तेरानन्तर्य एव पर्यवसानमुक्तिभङ्ग्या दर्शितम्**—आनन्तर्यं हि पूर्वप्रकृतापेक्षं, गुण विधिपरत्वे चाश्रयदानार्थमस्ति ज्योतिष्टोमापेक्षा, न कर्मान्तरत्वे; नहि क्रतुः क्रत्वन्तरमपेक्षत इत्यर्थ—इति । यस्मिन् सति भवन्ती भवत्येवेति ग्रन्थमध्याहारव्यवहितयोजनाभ्यां व्याचष्टे—**अन्यदपीति** । ब्रह्मजिज्ञासाया अपि योग्यत्वादिति ग्रन्थमपेक्षिताध्याहारेण व्याचष्टे—**स्वाध्यायाध्ययनानन्तरमिति** । इत्थं प्रतीकमनुपादाय व्याख्यानं व्याख्यानेनैव व्याख्येयमूलांशो ज्ञातुं शक्य इति ग्रन्थलाघवार्थम् । एवमुत्तरत्रापि तत्र तत्र दृश्यते । **नन्विति** । धर्मजिज्ञासासूत्रे ब्रह्म विचार्यत्वेन नोपात्तं, किंतु धर्ममात्रम्; अतस्तत्रत्याथशब्दस्य धर्मपरवेदाध्ययनानन्तर्यमर्थः, इह तु ब्रह्मविचारे वेदान्ताध्ययनमपेक्षितमिति तत्साधारणाध्ययनानन्तर्यं ब्रह्मविचारस्य प्रतिपादयितुमिदं सूत्रमारब्धव्यमिति शङ्कार्थः । **ननु**—धर्मशब्दस्य वेदार्थमात्रोपलक्षणत्वमङ्गीकृत्य तेन तत्रत्याथशब्दस्य सकलवेदाध्ययनानन्तर्यमर्थमुपपाद्यास्याथशब्दस्य तेन गतार्थत्वपरिहारार्थमर्थान्तरं वर्णनीयमित्युपपादनमयुक्तम्; तथा सति हि सकलवेदार्थविचारप्रतिज्ञानं तत्रैव कृतमिति स्यात्, एवंच कृत्स्नमेवेदं शास्त्रं गतार्थत्वेनानारभ्यं भवेदिति कुतोऽस्याथशब्दस्यार्थान्तर-

---

१ **फलतः**—कार्यात् यन्नियमेन पूर्वप्रकृतो हेतुः तदपेक्षाबलात् हेतोरर्थान्तरत्वमथशब्दार्थ इति वर्णनमपि न संभवति; अथशब्देनानन्तर्ये निर्दिष्टे पुष्कलकारणादर्थान्तरत्वस्याप्यर्थसिद्धत्वेन पृथक्तदपेक्षाभावात् । नह्यानन्तर्यमिव पूर्वप्रकृतादर्थान्तरत्वमथशब्दार्थ इति कोशादवगम्यते—**इति विवरणप्रस्थानम्** । 'अथैष ज्योति'रित्यत्र प्रकृतज्योतिष्टोमानुवादेन सहस्रदक्षिणागुणविधानमिति पूर्वपक्षोपपादकतया पूर्वप्रकृतार्थापेक्षत्वमथशब्दस्य वार्तिककृतोक्तमिति तद्वदत्रापि भवत्विति शङ्काया **न्यायसुधाकारा**दिभिरानन्तर्यार्थत्वमादायैव पूर्वपक्षसमर्थनात्पूर्वप्रकृतात् कल्पात्कल्पान्तरोपन्यासस्थल एव पूर्वप्रकृतस्यार्थान्तरस्याथशब्देन बोधनेनात्र कल्पान्तरानुपन्यासात्पारिशेष्यात् आनन्तर्यार्थ एव पर्यवसानमिति **तु—भामतीप्रस्थानम्** ।

कल्पतरुपरिमलः।

वर्णनप्रत्याशा, नहि कृत्स्नवेदार्थविचारं प्रतिज्ञाय तदेकदेशविचारस्त्यक्तो बुद्धिपूर्वमिति वक्तुं शक्यम्ः न वा धर्मविचारार्थं द्वादशलक्षणीं कृत्वा तत्रासूत्रितान् कांश्चिन्न्यायानालक्ष्य तत्संग्रहार्थं द्वादशलक्षणीं शेषं संकर्षकाण्डमपि कृतवतो महर्षिवरस्य भगवतो जैमिनेर्ब्रह्मपरवेदभागविचारे विस्मरणं विघ्नजातं वोत्प्रेक्षितुं शक्यमिति—**चेत्, उच्यते**; धर्मजिज्ञासासूत्रस्य (जै. अ. १ पा. १ सू. १) सकलवेदार्थविचारप्रतिज्ञापरत्वमात्रेणास्य शास्त्रस्य गतार्थत्वं नापद्यते; इह व्युत्पादयिष्यमाणानां सिद्धब्रह्मपरवाक्यार्थनिर्णायकन्यायानां पूर्वतन्त्रव्युत्पादितेभ्यः कर्मपरवाक्यार्थनिर्णायकन्यायेभ्यो विलक्षणत्वात्, किंतु शास्त्रारम्भप्रतिज्ञैक्येन वक्तृभेदेऽप्येकप्रबन्धतामात्रं तदानीमापद्यते; समयबन्धपूर्वकानेककविकर्तृकैककाव्यवत् । तदपि सिद्धान्ते प्रौढ्याभ्युपगम्य मतान्तरमिष्यत एव; तदाश्रित्य हि भाष्यटीकयो'रेक आत्मनः शरीरे भावात्' (जै. ब्र. अ. ३ पा. २ सू. ५३) इत्यधिकरणे देहातिरिक्तात्मास्तित्वस्य शास्त्रप्रथमपादे व्यवस्थापनादत्र तद्व्यवस्थापनं पुनरुक्तमिति शङ्कोद्घाटनं, भाष्यकृता शबरस्वामिना तत्र तत्कृतं न तत्सूत्रारूढमिति समाधानं च करिष्यते । **ननु**—प्रौढ्यापि कथमैकशास्त्र्यमभ्युपगतं; विरुद्धयोरेकप्रबन्धत्वायोगात्, अस्ति हि जैमिनिबादरायणमतयोर्विरोधः, बादरायणेन हि 'शेषत्वात्; पुरुषार्थवादो यथान्येष्विति जैमिनिः' (ब्र. अ. ३ पा. ४ सू. २) 'परामर्शं जैमिनिः' (ब्र. अ. ३ पा. ४ सू. १८) इति च सूत्रे ब्रह्मसंन्यासापलपनं जैमिन्यभिमतमनूद्य दूषितं, **नच**—जैमिनेरन्वारुह्यवादमात्रमनूद्य दूषितं, नतु तन्मतम्, 'परं जैमनिर्मुख्यत्वात्' (ब्र. अ. ४ पा. ३ सू. १२) 'तद्भूतस्य तु नातद्भावो जैमिनेरपि' (ब्र. अ. ३ पा.४ सू. ४०)इत्यादिसूत्रैः जैमिनेर्ब्रह्मसंन्यासाभ्युपगमस्य बादरायणेनैव प्रतिपादितत्वादिति—वाच्यम्ः 'तस्य विप्रतिषेधाच्चासमञ्जसम्' (ब्र. अ. २ पा. २ सू. १०) इति साङ्ख्याधिकरणोक्तन्यायेन जैमिनिमतस्य परस्परविरुद्धतयानुपादेयत्वसूचनार्थत्वोपपत्तेः । **किंच** देवताधिकरणे (ब्र. अ. १ पा. ३ सू. २६–३३) जैमिन्यभिमतं बहुशो देवताप्रत्याख्यानमनूद्य दूषितम् । 'आम्नायस्य क्रियार्थत्वात्' (जै. सू. अ. १पा.२ सू.१) इत्यादिसूत्रेण वेदस्य क्रियार्थत्वेनैव प्रामाण्यं वक्तव्यमित्यविशेषेणाक्रियार्थानामप्रामाण्यमाशङ्क्य 'विधिना त्वेकवाक्यत्वात्' (जै. अ.१ पा.२ सू. ७) इति सूत्रेण केवलसिद्धार्थविषयत्वेन भासमानानां वाक्यानां विध्येकवाक्यतया क्रियार्थतामुपपाद्य जैमिनिना यत्प्रामाण्यसमर्थनं कृतं, तदपि बादरायणेन समन्वयसूत्रे (ब्र. अ. १ पा. १ सू. ४) ब्रह्मविषयाणां वाक्यानामनपेक्ष्य विधिशेषतामक्रियार्थानामेव सतां प्रामाण्यसमर्थनेन प्रत्याख्यातम्; एवं विरुद्धयोरेकप्रबन्धत्वं प्रौढ्यापि कथमभ्युपगतमिति—**चेत्, उच्यते**; ब्रह्मसंन्यासदेवतापलापविषये विरोधस्तावद् नैकप्रबन्धत्वापवादकः; तस्य द्वादशलक्षण्यामसूत्रिततत्वेन परस्परविरुद्धमताभिमान्यनेककविकृतरामायणादिवदेकप्रबन्धतोपपत्तेः । **किंच** जैमिनिना तिर्यगधिकरणे 'न देवता देवतान्तराभावादिति' सूत्रेण देवताः कर्मसु नाधिक्रियन्ते; इन्द्रादीनां हविस्त्यागोद्देश्यस्येन्द्रान्तरादेरभावात्, स्वात्मने संकल्प्यमानस्य द्रव्यस्य स्वत्वत्यागासंभवेन यागाद्यनिर्वृत्तेः, इत्येवमुपपादयता देवताभ्युपगम एव स्पष्टीकृतः । देवतानां युगपदनेकयागदेशसंनिधानमप्याधानपवमानेष्टिजन्यसंस्कारनिचयम् आहवनीयादिशब्दार्थमभ्युपगच्छता तस्य संप्रतिपन्नमेव; आहवनीयाद्यभिमानिदेवतां विना निरुक्तसंस्काराधारस्य वक्तुमशक्यत्वात्, नहि प्रत्यक्षाग्निस्तदाधारः; आधानकाले निहितस्याहवनीयादेः पावमानेष्ट्यनन्तरं त्यागेन तद्गतस्य संस्कारस्य तन्नाशतो नाशादाहवनीयाद्यननुवृत्तिप्रसङ्गात्, अजस्रपक्षेऽप्यनुगतस्य मथनादिना पुनरुत्पादने तदनुवृत्त्यभावप्रसङ्गात् । **नच** प्रणयनमथनादिजन्यसंस्कारोऽप्याहवनीयादिशब्दस्यार्थः; अनेकार्थत्वप्रसङ्गात्पशावौत्तरवेदिकप्रणयनानन्तरमाहवनीयगार्हपत्यताप्राप्त्या प्रणयनस्याहवनीयशब्दप्रवृत्तिनिमित्तत्वायोगाच्च । तस्मादाहवनीयाद्यभिमानिदेवता एव तत्तदायतनविशेषनिहितेषु संभारेषु मथिताग्निनिधानरूपेणाधानेन संस्क्रियन्ते । ताश्च संस्कृता देवता अजस्रपक्षे यजमानशरीरे अग्निदानपर्यन्तं मध्येऽग्निसंस्कारविच्छेदनिमित्तोपजने तत्पर्यन्तं च तेष्वग्निषु संनिदधते । अग्नीनामजस्रधारणाभावे तत्तत्कर्मावसानेष्वाहवनीयादिदेवता गार्हपत्यमनुप्रविशन्ति । पशावौत्तरवेदिकप्रणयने क्रियमाणे तम् आहवनीयोऽनुप्रविशति, तेन प्रागधिष्ठितमग्निं गार्हपत्य इत्येवमादिकमभ्युपगन्तुं युक्तम् । एवं सत्येव 'नान्तराग्निं संचरति यदि पूर्वोऽनुगतः संचर्यं पश्चाद्धि स तर्हि गत' इति 'गार्हपत्याज् ज्वलन्तमाहवनीयमुद्धरती'ति च कल्पसूत्रकारवचनं सामञ्जस्यमश्नुते । नहि संस्कारमात्रस्य पश्चाद्गमनं संभवति । नाप्याहवनीयस्य गार्हपत्यानुप्रवेशाभावे गार्हपत्यात् तत्र सत आहवनीयस्योद्धरणं संभवति । **नच** तथा सत्यग्निद्वयसंसर्गनिमित्तकप्रायश्चित्तप्रसङ्गः; तस्य प्रत्यक्षाग्निसंसर्गनिमित्तकत्वात् । **नच** देवतानामाहवनीयादिशब्दार्थतायां "आहवनीये जुहोति" "गार्हपत्ये हवींषि श्रपयती"त्यादिवाक्यश्रुतं हविःप्रक्षेपश्रपणाद्याधारत्वमपि तासां भवेदित्ययं दोषः; इष्टापत्तेः, 'अभून्नो दूतो हविषो जातवेदा अवाड्ढव्यानि सुरभीणि कृत्वेति' मन्त्रवर्णतः पाकेन हविषां सुरभीकरणस्योद्देश्यदेवतार्थं नयनस्य चैककर्तृकत्वावगतेश्च । **तत्रा**भिमान्यभिमानविषयाणामभेदाध्यवसायेन समानकर्तृकत्वव्यपदेश इति **चेद्**, इहापि तदभेदाध्यास एव गतिरस्तु । एवमग्निसंस्काराधारदेवतानामिव हविरुद्देश्यदेवतानामपि

तद्वक्तव्यम् । स्वाध्यायानन्तर्यं तु समानम् । नन्विह कर्मावबोधानन्तर्यं विशेषः । न धर्मजिज्ञा-

भामती ।

ध्ययनानन्तर्यमेव ब्रह्मजिज्ञासाया अप्यथशब्दार्थ इत्यत आह—**स्वाध्यायानन्तर्यं तु समानं** धर्मब्रह्मजिज्ञासयोः । अत्रच स्वाध्यायेन विषयेण तद्विषयमध्ययनं लक्षयति । तथाच 'अथातो धर्मजिज्ञासा' इत्यनेनैव गतमिति नेदं सूत्रमारब्धव्यम् । धर्मशब्दस्य वेदार्थमात्रोपलक्षणतया धर्मवद्ब्रह्मणोऽपि वेदार्थत्वाविशेषेण वेदाध्ययनानन्तर्योपदेशसाम्यादित्यर्थः । **चोदयति—नन्विह कर्मावबोधानन्तर्यं विशेषः,** धर्मजिज्ञासातो ब्रह्मजिज्ञासायाः । **अस्यार्थः**—'विविदिषन्ति यज्ञेन' इति तृतीयाश्रुत्या यज्ञादीनामङ्गत्वेन ब्रह्मज्ञाने विनियोगात्, ज्ञानस्यैव कर्मलयेच्छां

वेदान्तकल्पतरुः ।

तेन गतार्थता, तत्राह—**धर्मशब्दस्येति** । **नन्विच्**छायां विनियोगो न ज्ञाने इति, तत्राह—**ज्ञानस्यैवेति** ।

कल्पतरुपरिमलः ।

बहुषु यागदेशेषु संनिधानम् आवाहनादिमन्त्रार्थवादावगतं जैमिनिनाप्युक्तप्रायमेव; मानान्तरप्राप्तिबाधाभावे मन्त्रार्थवादादिप्रतिपन्नस्य देवतादेस्तेनाप्यभ्युपगतत्वात् । **नच** तथापि देवतानां कर्मसु गुणत्वप्राधान्याभ्यां विरोधः; बादरायणमतेऽपि फलकरणत्वेन प्रधानतया शब्दबोधितं यागादिकं प्रत्युद्देश्यतया तच्छरीरनिवर्तकत्वेन देवतानां संनिपात्याङ्गत्वरूपतद्गुणत्वसत्त्वात् । सिद्धार्थविषयवाक्यानां विधिशेषत्वं तु जैमिनिनोक्तं विधिसमभिव्याहृतवायुर्क्षेपिष्ठादिवाक्यमात्रविषयम् । **तथाहि**—धर्मजिज्ञासासूत्रे (जै. अ. १ पा. १ सू. १) ब्रह्ममीमांसासाधारणी वेदार्थविचारप्रतिज्ञा धर्ममीमांसामात्रासाधारणी धर्मविचारप्रतिज्ञा चेति द्विविधा प्रतिज्ञा विवक्षिता; सूत्राणामावृत्त्यानेकार्थप्रतिपादकत्वस्यालंकारत्वात् । **अतएव—'अथातः शेषलक्षणम्'** (जै. अ. ३ पा. १ सू. १) **इति तृतीयाध्यायाद्यसूत्रं वार्तिककृता**—'द्विलक्षण्याः परं शिष्टं यावत्किंचन लक्षणम् । तत्सर्वं वृकुमारब्धमथातः शेषलक्षणम्' इत्यवशिष्टदशाध्यायार्थविचारप्रतिज्ञापरं व्याख्यायानन्तरं तृतीयाध्यायार्थशेषशेषिभावविचारप्रतिज्ञापरत्वेनापि—**व्याख्यातम् ।** एवंच यथा शेषः परार्थत्वादिति द्वितीयसूत्रमारभ्य तृतीयाध्यायसूत्राणि शेषशेषिभावमात्रविषयाणि, एवं चोदनासूत्रं (जै. अ.१ पा. १ सू. २) आरभ्य द्वादशलक्षणीसूत्राणि धर्ममात्रविषयाणि । अतएव चोदनासूत्रे धर्मस्यैव विधिगम्यत्वं लक्षणमुक्तं, नहि ब्रह्मणो विधिगम्यत्वमस्ति, अतः 'तस्य निमित्तपरीष्टिः' (जै. अ. १ पा.१ सू. ३)इति सूत्रे धर्मप्रमाणमेव परीक्ष्यत्वेन प्रतिज्ञातमिति तदनुसारेण 'आम्नायस्य क्रियार्थत्वात्' (जै. अ. १ पा. २ सू. १) इति सूत्रे धर्मप्रमाणत्वेनाभिमतस्य क्रियार्थत्वेनैव तत्रप्रामाण्यं वक्तव्यमित्येतत्परम् । 'विधिना त्वेकवाक्यत्वा' (जै. अ. १ पा. २ सू. ७)दिति सूत्रमपि धर्मप्रमाणत्वाभिमतक्रियाविधिसमभिव्याहृतवायुर्क्षेपिष्ठादिवाक्यमात्रविषयमिति न कश्चिद्विरोधः । नचैवं—कर्मब्रह्मविचारशास्त्रयोरैकशास्त्र्याभ्युपगमे ब्रह्मजिज्ञासासूत्रगताथशब्दस्य कर्मविचारानन्तर्यमर्थः स्यादिति—वाच्यम्; भाष्योक्तरीत्या ब्रह्मविचारे कर्मानुष्ठानस्यापेक्षानियमाभावेन तदप्रसक्तेः । नहि ज्वरादिवाजीकरणान्तचिकित्साप्रतिपादकानां वैद्यकसंहिताग्रन्थानामेकग्रन्थत्वमात्रेण वा तच्चिकित्साप्रकरणं विचारयिष्यता ज्वरचिकित्सामारभ्य विचारणीयम् । तत्तद्विचाराधिकारिवैलक्षण्यमिहापि तुल्यम् । तस्मादनपेक्षितं हि वेदार्थविचारत्वोपाधिकल्प्यमैकशास्त्र्यं नातिविरुद्धमिति प्रौढ्या तदभ्युपगमे न कश्चिद्दोषः । **यद्वा**—धर्मशब्दस्येत्यादिटीकाग्रन्थेन जिज्ञास्यसमर्पणार्थस्य धर्मशब्दस्य वेदार्थमात्रोपलक्षणत्वं नोक्तं; किंत्वतःशब्दोक्ते

१ धर्मविचारस्वाध्यायाध्ययनयोरेकविधिमूलकत्वात् स्वाध्यायाध्ययनमेव धर्मजिज्ञासासूत्रेऽथशब्दार्थ इति युक्तं, नैवं ब्रह्मजिज्ञासासूत्रे; ब्रह्मविचारवेदाध्ययनयोरेकविधिमूलकत्वाभावात् । ब्रह्मविचारो हि श्रोतव्य इति विधिमूलको न स्वाध्यायविधिमूलक इति तु प्रथमवर्णक एव निरूपितम् । एवंच स्वाध्यायविधिमूलके धर्मविचारे तद्विधिसिद्धं वेदाध्ययनमेव यथाधिकारिविशेषणं, एवं श्रोतव्यविधिमूलके ब्रह्मविचारे तद्विध्येकवाक्यतापन्नेन 'शान्तो दान्त' इत्यादिवाक्येन सिद्धा साधनचतुष्टयसंपत्तिरेवाधिकारिविशेषणम्; तस्या एव पुष्कलकारणत्वात्, नतु स्वाध्यायाध्ययनम्; तस्यातथात्वात्, **तत्रेत्थमक्षरयोजना**—वेदाध्ययनं तु **समानं**—अत्यन्तमनपेक्षितं न पुष्कलकारणमित्यर्थ—इति—**विवरणप्रस्थानम् ।**

अस्तु वा ब्रह्मविचारोऽपि 'स्वाध्यायोऽध्येतव्य' इति विधिमूलकः, भवतु वा च धर्मजिज्ञासासूत्रेणैव ब्रह्मविचारप्रतिज्ञापि, अभ्युपगम्यतां वा पूर्वोत्तरमीमांसयोरैकशास्त्र्यं च; तथापि न ब्रह्मजिज्ञासासूत्रे स्वाध्यायाध्ययनानन्तर्यमथशब्दार्थः, अथशब्दवैयर्थ्यप्रसङ्गात् । ऐकशास्त्र्याभ्युपगमेऽपि यथाकर्मविचारानन्तर्यं नाथशब्दार्थः, तथा भाष्य एव व्यक्तम्—**इत्येका योजना । वस्तुतस्तु**—न धर्मजिज्ञासासूत्रेण ब्रह्मविचारोऽपि प्रतिज्ञायते; नापि पूर्वोत्तरमीमांसयोरैकशास्त्र्यं, तथापि धर्मजिज्ञासासूत्रे अतःशब्देन वेदस्य विवक्षितार्थत्वमेव हेतुत्वेन बोध्यते, न धर्मपरभागस्य; अन्यथा वेदान्तभागस्येव तस्याप्यविवक्षितार्थत्वशङ्काप्रसरादिति तदुपपादकतया सकलवेदाध्ययनानन्तर्यमेवाथशब्देन विवक्षणीयमिति अथशब्दवैयर्थ्यप्रसङ्गान्न स्वाध्यायानन्तर्यमथशब्दार्थ इति **त्वपरा योजनेति** विवेक—**इति भामतीप्रस्थानम् ।**

भामती।

प्रति प्राधान्यात्, प्रधानसंबन्धाच्चाप्रधानानां पदार्थान्तराणाम्। तत्रापि च न वाक्यार्थज्ञानोत्पत्तावङ्गभावो यज्ञादीनां; वाक्यार्थज्ञानस्य वाक्यादेवोत्पत्तेः। नच—वाक्यं सहकारितया कर्माण्यपेक्षत इति—युक्तम्; अकृतकर्मणामपि विदितपदतदर्थसंगतीनां समधिगतशाब्दन्यायतत्त्वानां गुणप्रधानभूतपूर्वापरपदार्थाकाङ्क्षासंनिधियोग्यतानुसंधानवतामप्रत्यूहं वाक्यार्थप्रत्ययोत्पत्तेः। अनुत्पत्तौ वा विधिनिषेधवाक्यार्थप्रत्ययाभावेन तदर्थानुष्ठानपरिवर्जनाभावप्रसङ्गः। तद्बोधतस्तु तदर्थानुष्ठानपरिवर्जने परस्पराश्रयः, तस्मिन्सति तदर्थानुष्ठानपरिवर्जनं ततश्च तद्बोध इति। नच—वेदान्तवाक्यानामेव स्वार्थप्रत्यायने कर्मापेक्षा न वाक्यान्तराणामिति— सांप्रतम्; विशेषहेतोरभावात्। ननु—'तत्त्वमसि' इतिवाक्यात् त्वंपदार्थस्य कर्तृभोक्तृरूपस्य जीवात्मनो नित्यशुद्धबुद्धोदासीनस्वभावेन तत्पदार्थेन परमात्मनैक्यमशक्यं द्रागित्येव प्रतिपत्तुम्; आपाततोऽशुद्धसत्त्वैर्योग्यताविरहनिश्चयात्। यज्ञतपोदानतनूकृतान्तर्मलास्तु विशुद्धसत्त्वाः श्रद्दधाना योग्यतावगमपुरःसरं तादात्म्यमवगमिष्यन्तीति—**चेत्**, तत्किमिदानीं प्रमाणकारणं योग्यतावधारणमप्रमाणात्कर्मणो वक्तुमध्यवसितोऽसि, प्रत्यक्षाद्यतिरिक्तं वा कर्मापि प्रमाणम्। वेदान्ताविरुद्धतन्मूलन्यायबलेन तु योग्यतावधारणे कृतं कर्मभिः। तस्मात् 'तत्त्वमसि' इत्यादेः श्रुतमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा तन्मूलया चोपपत्त्या व्यवस्थाप्य तदुपासनायां भावनापराभिधानायां दीर्घकालनैरन्तर्यवत्यां ब्रह्मसाक्षात्कारफलायां यज्ञादीनामुपयोगः। **यथाहुः**—'स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः' इति। ब्रह्मचर्यतपःश्रद्धायज्ञादयश्च सत्कारः। **अतएव श्रुतिः**—'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति। विज्ञाय तर्कोपकरणेन शब्देन, प्रज्ञां भावनां कुर्वीतेत्यर्थः। अत्र च यज्ञादीनां श्रेयःपरिपन्थिकल्मषनिबर्हणद्वारेणोपयोग इति **केचित्**। पुरुषसंस्कारद्वारेणेत्यन्ये। यज्ञादिसंस्कृतो हि पुरुष आदरनैरन्तर्यदीर्घकालैरासेवमानो ब्रह्मभावनामनाद्यविद्यावासनां समूलकाषं कषति, ततोऽस्य प्रत्यगात्मा सुप्रसन्नः केवलो विशदीभवति। **अतएव स्मृतिः**—'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः' 'यस्यैतेऽष्टाचत्वारिंशत्संस्काराः' इति च। **अपरे तु**, ऋणत्रयापाकरणे ब्रह्मज्ञानोपयोगं **कर्मणामाहुः। अस्ति हि स्मृतिः**

वेदान्तकल्पतरुः।

अर्थतः प्राधान्याद् ज्ञानस्य तत्रैव विनियोग इत्यर्थः। साक्षात्कारोपयोगं यज्ञादीनामाह—**तत्रापीत्यादिना**। विशेषहेतुभावोऽसिद्ध इत्याह—**तत्त्वमसीति**। योग्यतावधारणे कर्म किमप्रमाणतयोपयुज्यते, उत प्रमाणतया। **नाद्यः**; अप्रमाणात्प्रमाणकार्योत्पादव्याघातादित्याह—**तत्किमिति**। प्रमाणं कारणं यस्य तत्तथा। **न द्वितीयः**; कर्मणः प्रमाणत्वप्रसिद्ध्यभावादित्याह—**प्रत्यक्षादीति**। पातञ्जलसूत्रे **स** इति चित्तवृत्तिनिरोध उक्तः। **दृढभूमिः** तत्त्वप्रतिपत्तौ दृढ उपाय इत्यर्थः। नित्यानामेव संस्कारद्वारा भावनाङ्गत्वमुक्त्वा सर्वकर्मणामुत्पत्तिविधिविहितरूपमुपादाय भावनाङ्गतां विनियोगवच-

कल्पतरुपरिमलः।

वेदस्य विवक्षितार्थत्वरूपे धर्मविचारप्रतिज्ञाहेतौ धर्मरूपस्यैवार्थस्य विवक्षितत्वं न विशेषणं, किं तर्हि, कृत्स्नस्य वेदार्थस्य; अतो धर्मविचारप्रतिज्ञायां यागादिकार्यसमर्पकोऽपि धर्मशब्दो हेतुशरीरगतमथशब्दं समभिव्याहारवशात्तावन्मात्रपरं न कुर्याद्, अपितु वेदार्थसामान्यपरमेव कुर्यादित्येतावदुक्तम्। तदेतत्प्रथमसूत्रार्थव्याख्यानावसाने टीकावाक्यैराचार्यवाक्यैस्तद्व्याख्यानेन च स्पष्टीभविष्यति। **ननुच**—विवक्षितार्थत्वे हेतौ वेदार्थसामान्यस्य प्रवेशोपदर्शनेन कृत्स्नवेदाध्ययनानन्तर्यमथशब्दार्थ इति प्रकृते सिषाधयिषितोऽर्थः कथं सिध्येदिति—**चेत्**, इत्थम्; धर्मशब्दसमभिव्याहारे विद्यमानेऽपि यथा हेतावर्थशब्दो वेदार्थमात्रपरोऽङ्गीकृतः, विशिष्य धर्मपरवेदभागस्यार्थविवक्षोपन्यासे वेदान्तभागस्यार्थविवक्षा नाङ्गीकृतेति तद्वद्धर्मपरभागोऽप्यविवक्षितार्थोऽस्त्विति शङ्कानिरासोपयोगात्; एवमध्ययनानन्तर्यमपि कृत्स्नवेदस्याध्ययनानन्तर्यरूपमङ्गीकर्तव्यम्; अध्ययनविधेरेकदेशाध्ययनानुष्ठापनेन पर्यवसानाभावादिति दृष्टान्तमुखेन सिद्धेरित्यलं विस्तरेण। **अर्थतः प्राधान्यादिति। प्रत्ययार्थः प्रधानमिति** सामान्यन्यायादिच्छेष्यमाणसमभिव्याहृताविष्यमाणं प्रधानमिति स्वर्गकामपदादिषु क्लृप्तो विशेषन्यायो बलवानिति भावः। **साक्षात्कारोपयोगमिति।** ब्रह्मोपासनाकालेऽपि तदङ्गतया कर्माण्यनुष्ठेयानीति समुच्चयवादी तदनुष्ठानापेक्षितकर्मावबोधानन्तर्यमथशब्दार्थमिच्छति; अतस्तस्य तादर्थ्यसिद्ध्यर्थं कर्मणामुपासनाङ्गत्वमुपपादयितुं तेषामुपासनाजन्यसाक्षात्कारोपयोगमाहेत्यर्थः। **असिद्ध इत्याहेति।** शङ्कावादीति शेषः। **प्रमाणत्वप्रसिद्ध्यभावादिति।** यद्यपि प्रमाणत्वाभावेऽप्यसंभावनादिमूलकल्मषनिर्हरणद्वारा योग्यतावधारणे तज्जन्यमहावाक्यार्थज्ञाने वा प्रमाणसहकारित्वेन कारणत्वमुपपद्यते, अन्यथा वक्ष्यमाणस्य कर्मणां साक्षात्कारोपयोगस्यापि निर्वोढुमशक्यत्वात्; तथापि विविदिषन्तीत्यत्र फलरूपवेदनमानन्दसाक्षात्कारतया मुख्यपुरुषार्थरूपमेव ग्राह्यं, मुख्यसंभवे गौणग्रहणस्यान्याय्यत्वादिति तात्पर्यम्। **संस्कारद्वारेति।** यद्यपि कल्मषनिबर्हणमृणत्रयापाकरणमिति संस्कारपक्षाद्भिन्नमपि पक्षद्वयमुक्तं; तथापि तदपि पक्षद्वयं सामान्यतः संस्कारपक्ष एवानुप्रविशति, प्रथमाधानवत्कल्मषनिबर्हणादेरपि

भामती।

—'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्' इति। **अन्येतु** 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन' इत्यादिश्रुतिभ्यस्तत्तत्फलाय चोदितानामपि कर्मणां संयोगपृथक्त्वेन ब्रह्मभावनां प्रत्यङ्गभावमाचक्षते, क्रत्वर्थस्यैव खादिरत्वस्य वीर्यार्थताम्, **'एकस्य तूभयत्वे संयोगपृथक्त्वम्' इति न्यायात्**। अतएव पारमर्षं सूत्रम्—'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' (ब्र. अ. ३ पा. ४ सू. २६) इति। **यज्ञतपोदानादि सर्वं तदपेक्षा** ब्रह्मभावनेत्यर्थः। तस्माद्यदि श्रुत्यादयः प्रमाणं, यदि वा पारमर्षं सूत्रं, सर्वथा यज्ञादिकर्मसमुच्चिता ब्रह्मोपासना विशेषणत्रयवती अनाद्यविद्यातद्वासनासमुच्छेदक्रमेण ब्रह्मसाक्षात्काराय मोक्षापरनाम्ने कल्पत इति तदर्थं कर्माण्यनुष्ठेयानि। नचैतानि दृष्टादृष्टसामवायिकारादुपकारहेतुभूतौपदेशिकातिदेशिकक्रमपर्यन्ताङ्गग्रामसहितपरस्परविभिन्नकर्मस्वरूपतदधिका-

वेदान्तकल्पतरुः।

नवशेनाह—**अन्ये त्विति।** **संयोगः** शेषत्वबोधनं **चतुर्थे चिन्तितम्।** **एकस्य त्विति।** 'खादिरे पशुं बध्नाति' 'खादिरं वीर्यकामस्य यूपं कुर्वीते'ति च श्रूयते। **तत्र संशयः**, किं काम्ये इव खादिरता नित्येपि स्यादुत नेति; तत्र फलार्थत्वेनानित्याया नित्यप्रयोगाङ्गता न युक्ता। यत्तु नित्येपि खादिरत्वश्रवणं, तत्काम्यस्यैव पशुबन्धनयुक्तयूपरूपाश्रयदानार्थं, ततो न नित्ये खादिरतेति प्राप्ते—राद्धान्तः; **एकस्य** खादिरत्वस्य **उभयत्वे** क्रत्वर्थपुरुषार्थत्वरूपोभयात्मकत्वे वचनद्वयेन क्रतुशेषत्वफलशेषत्वलक्षणसंयोगभेदावगमान्न नित्यानित्यसंयोगविधिविरोधः। नचाश्रयदानाय नित्यवाक्यम्; संनिधानादेवाश्रयलाभात्। तत उभयार्था खादिरतेति (जै. अ. ४ पा. ३ सू. ५)। **विशेषणत्रयवतीति।** आदरनैरन्तर्यदीर्घकालत्ववतीत्यर्थः। कर्मापेक्षत्वेन ब्रह्मभावनायास्तदवबोधापेक्षामुपपादयन् कर्मावबोधानन्तर्यमिति भाष्यं घटयति—**नचेति।** **दृष्ट उपकार**स्तुषविमोकादिः, **अदृष्टः** प्रोक्षणादिजः प्रयाजादिजश्च। स चासौ यथायोगं **सामवायिकः** क्रतुस्वरूपसमवायी, **आराद्** दूरे फलापूर्वसिद्धावुपकारश्च; तस्य **हेतुभूतानि औपदेशिकानि** प्रत्यक्षविहितानि **आतिदेशिकानि** प्रकृतेर्विकृतावतिदेशप्राप्तानि **क्रमपर्यन्तानि** क्रमेणाप्यवच्छिन्नान्यङ्गानि तेषां **ग्रामः** समूह**स्तत्सहितं** परस्परविभिन्नं कर्मस्वरूपं, तदपेक्षिताधिकारिविशेषश्च, तयोः परिज्ञानं विना कर्माणि न शक्यान्यनुष्ठातुमित्यन्वयः। **औपदेशिकातिदेशिकेति** शेषलक्षणादारभ्योपरितनतन्त्रस्यापेक्षोक्ता। **क्रमपर्यन्तेति** पञ्चमनयस्य। **अङ्गग्रामेति**

कल्पतरुपरिमलः।

संस्कारत्वाऽविशेषादिति तात्पर्यम्। **किं काम्यैव खादिरता नित्येऽपि स्यादिति** सिद्धान्तकोटिः पूर्वपक्षाद्विशेषसिद्धये। काम्यैवेत्यवधारणम्। अन्यथा यदा क्वचित्प्रयोगे वीर्यकामनया काम्या खादिरतोपादीयते, तदा तया पशुनियोजनरूपस्य नित्योपकारस्यापि प्रसङ्गात्सिद्धेः काम्या क्वचिन्नित्येऽपि भवतीत्यस्मिन्नर्थे पूर्वपक्षिणोऽपि संप्रतिपत्त्या ततः सिद्धान्तकोटेर्विशेषो न सिध्येत्। किं केवलकाम्यैव खादिरतेत्यङ्गीकृत्य सा सर्वत्र नित्येऽपि स्यादित्युच्यते, अथवा यथा खादिरता वीर्यकामवाक्येन फलार्थतया काम्या, एवं खादिरे पशुमिति वाक्येन क्रत्वर्थतया नित्यापीत्यभ्युपेत्येति विकल्प्याद्यं नित्यानित्यसंयोगविरोधेन निराकृत्य **द्वितीयमाशङ्कते—यत्त्विति।** सिद्धरूपः खदिरतरुरननुष्ठीयमानो वीर्यफलाय न प्रभवेदिति तस्य पशुबन्धनयुक्तयूपरूपाश्रयानुरागेण साध्यतोपपादनीया। यद्यपि यूपप्रातिपदिकार्थोऽपि सिद्धरूपः; तथापि पशुबन्धनक्रियायुक्तत्वाकारेण भवति खदिरतरोरपि तदनुरागे सति साध्यता। एवंच खदिरस्य फलसंबन्धं बोधयद् वीर्यकामवाक्यं तस्याश्रयसंबन्धमपि बोधयितुं न शक्नोति, वाक्यभेदप्रसङ्गादित्याश्रयसंबन्धस्यान्यतः प्राप्त्यपेक्षायामपेक्षितसमर्पणेन फलवाक्यान्वयि खादिरे पशुमिति वाक्यं न खदिरस्य क्रत्वर्थतामपि बोधयितुं शक्नोतीति न ततः क्रत्वर्थत्वसिद्धिरित्यर्थः। **नच**—यथा 'अपः प्रणयन्ती'त्यस्य संनिधाने 'गोदोहनेन पशुकामस्येति' फलार्थं विधीयमानस्य सिद्धरूपस्य गोदोहनस्यापां प्रणयनं संनिधानादाश्रयो भवति, एवमिहापि संनिधानादेव यूप आश्रयो लभ्यत इति—वाच्यम्; अपां हि गार्हपत्यदेशे ग्राह्याणामाहवनीयदेशं प्रति नयनरूपं यत् प्रकृष्टनयनं प्रणयनशब्दवाच्यं तस्य गोदोहपात्रस्य चाधाराधेयभावो लोकसिद्ध इति युक्तस्तत्र योग्यतया संनिहितस्याश्रयत्वलाभः, इह त्वतीन्द्रियातिशयविशेषविशिष्टस्य यूपस्याहवनीयवदलौकिकत्वात् तं प्रति न लोकसिद्धः खदिरस्य प्रकृतिभाव इति खादिरे पशुमिति वाक्येनैव तस्याश्रयसंबन्धो बोधनीय इति भावः। अत्र खादिरे पशुमित्यस्य नित्यवाक्यत्वं सिद्धान्त्यभिमतमनूदितम्; पूर्वपक्षे फलवाक्यैकवाक्यतापन्नस्य तस्य नित्यवाक्यत्वाभावात्। **एकस्य खादिरत्वस्येत्यादिना** एकस्योभयात्मकत्वे नित्यानित्यसंयोगविरोधो नास्ति, विनियोजकप्रमाणभेदादिति सिद्धान्तयुक्ति'रेकस्य तूभयत्वे' (जै. अ. ४ पा. ३ सू. ५) इति सूत्रारूढा दर्शिता। **संनिधानादेवेति।** यूपशब्दार्थस्यालौकिकत्वेऽपि यस्मिन्नष्टाश्रित्वाद्याकृतिविशिष्टे काष्ठविशेषे यूपशब्दो वर्तते, तस्य खदिरतरोश्च प्रकृतिविकृतिभावो लोकसिद्ध इति तावतैव संनिधानात् पशुबन्धनार्थो यूप आश्रयत्वेनान्वेतुं योग्य इति भावः। **शेषलक्षणादिति।** **शेषलक्षणं** तृतीयाध्यायः। तत आरभ्य **चतुर्भिरध्यायैः** शेषत्वप्रयुक्तिकर्माधिकारनि-

भामती।

रिभेदपरिज्ञानं विना शक्यान्यनुष्ठातुम्। नच धर्ममीमांसापरिशीलनं विना तत्परिज्ञानम्। तस्मात्साधूक्तं 'कर्मावबोधानन्तर्यं विशेषः' इति। कर्मावबोधेन हि कर्मानुष्ठानसाहित्यं भवति ब्रह्मोपासनाया इत्यर्थः। **तदेतन्निराकरोति—न।** कुतः, कर्मावबोधात् **प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः। इदमत्राकूतम्**—ब्रह्मोपासनया भावनापराभिधानया कर्माण्यपेक्ष्यन्त इत्युक्तं, **तत्र ब्रूमः**—क्व पुनरस्याः कर्मापेक्षा, किं कार्ये, यथाग्नेयादीनां परमापूर्वे चरमभाविफलानुकूले जनयितव्ये समिदाद्यपेक्षा। स्वरूपे वा, यथा तेषामेव द्विरवत्तपुरोडाशादिद्रव्याग्निदेवताद्यपेक्षा। **न तावत्कार्ये**; तस्य विकल्पासहत्वात्। **तथाहि**—ब्रह्मोपासनाया ब्रह्मस्वरूपसाक्षात्कारः कार्यमभ्युपेयः, स चोत्पाद्यो वा स्यात्, यथा संयवनस्य पिण्डः। विकार्यो वा, यथावघातस्य व्रीहयः। संस्कार्यो वा, यथा प्रोक्षणस्योलूखलादयः। प्राप्यो वा, यथा दोहनस्य पयः। **न तावदुत्पाद्यः**; न खलु घटादिसाक्षात्कार इव जडस्वभावेभ्यो घटादिभ्यो भिन्न इन्द्रियाद्याधेयो ब्रह्मसाक्षात्कारो भावनाधेयः संभवति; ब्रह्मणोऽपराधीनप्रकाशतया तत्साक्षात्कारस्य तत्स्वाभाव्येन नित्यतयोत्पाद्यत्वानुपपत्तेः, ततो भिन्नस्य वा भावनाधेयस्य साक्षात्कारस्य प्रतिभाप्रत्ययवत्संशयाक्रान्ततया प्रामाण्यायोगात्, तद्विधस्य तत्सामग्रीकस्यैव बहुलं व्यभिचारोपलब्धेः। न खल्वनुमानविबुद्धं वह्निं भावयतः शीतातुरस्य शिशिरभरमन्थरतरकायकाण्डस्य स्फुरज्ज्वालाजटिलानलसाक्षात्कारः प्रमाणान्तरेण संवाद्यते; विसंवादस्य बहुलमुपलम्भात्। तस्मात् प्रामाणिकसाक्षात्कारलक्षणकार्याभावान्नोपासनाया उत्पाद्ये कर्मापेक्षा। नच कूटस्थनित्यस्य सर्वव्यापिनो ब्रह्मण उपासनातो **विकारसंस्कारप्राप्तयः संभवन्ति। स्यादेतत्—मा भूद्ब्रह्मसाक्षात्कार उत्पाद्यादिरूप उपासनायाः, संस्कार्यस्तु** अनिर्वचनीयानाद्यविद्याद्वयपिधानापनयनेन भविष्यति, प्रतिसीरापिहिता नर्तकीव प्रतिसीरापनयद्वारा रङ्गव्यापृतेन। तत्र च कर्मणामुपयोगः। **एतावांस्तु विशेषः**—प्रतिसीरापनये पारिषदानां नर्तकीविषयसाक्षात्कारो भवति, इह तु अविद्यापिधानापनयमात्रमेव नापरमुत्पाद्यमस्ति, ब्रह्मसाक्षात्कारस्य ब्रह्मस्वभावस्य नित्यत्वेन अनुत्पाद्यत्वात्। **अत्रोच्यते**—का पुनरियं ब्रह्मोपासना। किं शाब्दज्ञानमात्रसंततिः, आहो निर्विचिकित्सशाब्दज्ञानसंततिः। **यदि शाब्दज्ञानमात्रसंततिः**, किमियमभ्यस्यमानाप्यविद्यां समुच्छेत्तुमर्हति। तत्त्वविनिश्चयस्त-

वेदान्तकल्पतरुः।

तार्तीयस्य। **सहितेति** चातुर्थिकस्य प्रयोज्यप्रयोजकविचारस्य। **परस्परविभिन्नस्येति** द्वितीयलक्षणार्थस्य। **तदधिकारीति** षष्ठाध्यायार्थस्य। **दृष्टादृष्टेति** संस्कारकर्मत्वगुणकर्मत्वप्रधानकर्मत्वादिचिन्तायाश्च द्वितीयाध्यायगताया अपेक्षेत्युक्तम्। **द्विरवत्तेति**। आग्नेययागः स्वोत्पत्तये 'द्व्यवदानं जुहोती'ति वचनाद् द्विर्हविषोऽवद्यतीति विहितं द्विरवत्तपुरोडाशमपेक्षत इति। भावनासाध्ये साक्षात्कारे यदि कर्मापेक्षा, तर्हि स ब्रह्मस्वरूपमन्यो वा। स्वरूपत्वे न कर्मापेक्षेत्याह—**स चेत्यादिना**। पिष्टं संयौतीति विहितमिश्रणस्य पिण्ड उत्पाद्यः, गां दोग्धीति विहितदोहनेन प्राप्यं पयः। साक्षात्कारस्य ब्रह्मस्वरूपाद्भेदे ब्रह्म जडं स्यात्तच्चेन्द्रियाद्यगोचरः शब्दश्च परोक्षप्रमा हेतुरिति केवलभावनाभूः साक्षात्कारोऽप्रमा स्यादित्याह—**ततो भिन्नस्य चेति। मन्थरः** स्तिमितः। स्फुरन्त्यो ज्वाला जटाकारा अस्य सन्तीति जटिलः। **नच कूटस्थेति**। कूटस्थनित्यतया पूर्वरूपापायलक्षणो विकारोऽभिनवगुणोदयरूपसंस्कारश्च न स्तः, सर्वव्यापितया न प्राप्तिः। कूटस्थनित्यत्वाविरुद्धं दोषविघातसंस्कारमाह—**अनिर्वचनीयेति। प्रतिसीरा** तिरस्करिणी। **रङ्गव्यापृतो** नटः। **आरोह**

कल्पतरुपरिमलः।

रूपणार्थैरुपदेशविचारः। **सप्तमाद्यैश्चतुर्भिः** सामान्यातिदेशविशेषातिदेशोहबाधनिरूपणार्थैरतिदेशविचारः। **एकादशद्वादशाभ्यामु**पदेशातिदेशसाधारणतन्त्रप्रसङ्गविचारः। **चातुर्थिकेति**। यद् येन प्रयुज्यते अनुष्ठाप्यते, तत्तेन सहितमुपकार्योपकारकभावरूपसंबन्धवद्भवति; अनुपकार्येणानुपकारकस्यानुष्ठापनादिति साहित्योक्त्या **चातुर्थिकप्रयुक्तिसंग्रहः। संस्कारकर्मत्वेति**। संस्कारकर्मणस्तानि द्वैधाधिकरण (जै. अ. २ पा. १ सू. ६–८) निरूपितगुणकर्मविशेषत्वेऽपि दृष्टप्रयोजनाभावेन त्रिविधगुणकर्मवैषम्यात्, धर्ममात्रे तु कर्म स्यात् (जै. अ.२ पा. १ सू. ९) इत्यधिकरणान्तरविषयत्वाच्च पृथग् ग्रहणम्। **द्विरवत्तेति**। इदं भाष्यकारमतम्, यत्साक्षाद् व्यवदानसाधनको यागः पुरोडाशस्तत्प्रकृतितया यागसाधनमिति **आचार्यमते तु** कृत्स्नः पुरोडाशो यागसाधनं, द्विरवत्तस्याग्नौ प्रक्षेपरूपो होमस्तु हविष एकदेशद्वारा संस्कारकर्म। तथाच होमकाले कृत्स्नः पुरोडाशो देवतोद्देशेन मनसा त्यक्तव्यः; वचनबलादग्न्युद्देशेन त्यक्तैकदेशस्य स्विष्टकृति पुनर्देवतान्तरोद्देशेन त्याग इत्येवं विशेषः। **जडं स्यादिति**। दृग्भिन्नस्य प्रकाशमानत्वं दृगध्यस्ततया तदभेदेनोपपादनीयमिति प्राक् प्रसाधितत्वादध्यस्तस्य च जडत्वनियमादिति भावः। **ननु** टीकोक्तप्रामाण्यायोगयुक्तिरयुक्ता; इन्द्रियशब्दादिप्रमाकरणजन्यत्वेन प्रामाण्योपपत्तेरित्याशङ्क्य तामुपपादयति—**तच्चेन्द्रियाद्यगोचर इति**।

भामती ।

दभ्यासो वा सवासनं विपर्यासमुन्मूलयेत्, न संशयाभ्यासः, सामान्यमात्रदर्शनाभ्यासो वा। नहि स्थाणुर्वा पुरुषो वेति वा आरोहपरिणाहवत् द्रव्यमिति वा शतशोऽपि ज्ञानमभ्यस्यमानं पुरुष एवेति निश्चयाय पर्याप्तं, ऋते विशेषदर्शनात् । ननूक्तं श्रुतमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा युक्तिमयेन च व्यवस्थाप्यत इति । तस्मान्निर्विचिकित्स-शाब्दज्ञानसंततिरूपोपासना कर्मसहकारिण्यविद्याद्वयोच्छेदहेतुः ॥ नचासावनुत्पादितब्रह्मानुभवा तदुच्छेदाय पर्याप्ता; साक्षात्काररूपो हि विपर्यासः साक्षात्काररूपेणैव तत्त्वज्ञानेनोच्छिद्यते, न तु परोक्षावभासेन; दिङ्मोहालातचक्रचलद्वृक्ष-मरुमरीचिसलिलादिविभ्रमेष्वपरोक्षावभासिषु अपरोक्षावभासिभिरेव दिगादितत्त्वप्रत्ययैर्निवृत्तिदर्शनात्, नो खल्वाप्त-वचनलिङ्गादिनिश्चितदिगादितत्त्वानां दिङ्मोहादयो निवर्तन्ते । तस्मात् त्वंपदार्थस्य तत्पदार्थत्वेन साक्षात्कार एषितव्यः । एतावता हि त्वंपदार्थस्य दुःखिशोकित्वादिसाक्षात्कारनिवृत्तिः नान्यथा । नचैष साक्षात्कारो मीमांसासहितस्यापि

वेदान्तकल्पतरुः ।

उच्छ्रयः । विस्तारपरिमाणं **परिणाहः** । उपासना किमापातज्ञानाभ्यासो, निश्चयाभ्यासो वा । **आद्यं** भङ्क्त्वा **द्वितीयं** शङ्कते—**नन्विति । ननू**पासनैवाविद्यां निवर्तयतु, किं साक्षात्कारेण, तत्र कर्मोपयोगस्तत्राह—**नचेति । ननु** रज्जुस-र्पादिभ्रमा अपरोक्षा अप्याप्तवचनादिजनितपरोक्षज्ञानैर्निवर्तन्ते—**सत्यं**; ते निरुपाधिकाः, कर्तृत्वादिस्तु सोपाधिक इत्य-भिप्रेत्य तथाविधमुदाहरति—**दिङ्मोहेति** । नौस्थस्य तटगततरुषु चलद्वृक्षभ्रमः । अपरोक्षे ब्रह्मणि शब्द एवापरोक्षज्ञान-हेतुरन्यथा तु तत्र परोक्षज्ञानस्य भ्रमत्वापातादिति, तत्राह—**नचैष इति । अयमभिसंधिः**—स्वतोऽपरोक्षस्यापि ब्रह्मणः पारोक्ष्यं भ्रमगृहीतम् । तत्रापरोक्षप्रमाकरणादेव तत्साक्षात्कारः । अन्तःकरणं च सोपाधिके आत्मनि जनयत्यहंवृत्ति-मिति सिद्धमस्यात्मन्यपरोक्षधीहेतुत्वम् । तत्तु शब्दजनितब्रह्मात्मैक्यधीसन्ततिवासितं तत्पदलक्ष्यब्रह्मात्मतां जीवस्य साक्षात्कारयति, अक्षमिव पूर्वानुभवसंस्कारावसितं तत्तेदन्तोपलक्षितैक्यविषयप्रत्यभिज्ञाहेतुः, शब्दस्तु नापरोक्षप्रमाहेतुः

कल्पतरुपरिमलः ।

'न चक्षुषा गृह्यते' 'यन्मनसा न मनुत' इत्यादिश्रुतेरिति भावः । **तथाविधमिति** । दिङ्मोहेऽपि पुरुषविशेषस्यापरिशी-लितप्रदेशविशेषप्राप्तिरुपाधिः । शाब्दापरोक्षशङ्कामुपस्कुर्वन्नवतारयति—**अपरोक्षे ब्रह्मणीति । अयमर्थः**—अभिव्य-क्तचैतन्याभिन्नत्वमर्थस्यापरोक्ष्यं, तत्तु नित्याभिव्यक्तजीवचैतन्याभिन्ने ब्रह्मणि स्वाभाविकम् । अतएव 'यत्साक्षादपरोक्षा-द्ब्रह्मे'ति श्रुतिः । घटादीनामपरोक्षचैतन्याभेदाध्यासोपाधिकं तदेव प्रत्यक्षोऽयं घटः प्रत्यक्षं घटं पश्यामीत्यादिव्याहारालम्ब-नम् । ज्ञानस्यापरोक्ष्यमपरोक्षार्थव्यवहारानुकूलज्ञानत्वं तत्स्वस्य सुखादेश्च प्रकाशरूपे नित्याभिव्यक्तसाक्षिचैतन्ये वानुगतं स्वाभाविकं, चाक्षुषादिवृत्तिषु तत्तदभिव्यक्तचैतन्याभेदाध्यासोपाधिकं, नतु जातिरूपम् इन्द्रियजन्यत्वाद्युपाधिरूपं वा ज्ञाना-नामापरोक्ष्यम् । अपरोक्षज्ञानविषयत्वमर्थापरोक्ष्यमिति न युक्तम्; तत्तांशविषयप्रत्यभिज्ञायां तत्तांशे चातिप्रसक्तेः, साक्ष्यव्या-पनाच्च । एवंच तत्त्वमस्यादिशब्दजन्यम् अपरोक्षजीवाभिन्नब्रह्मज्ञानमपरोक्षमेव भवति । नचैवं सति—**अनुमितेरप्यपरोक्ष-**पर्वतादावापरोक्ष्यं स्यादिति—वाच्यम्; इष्टापत्तेरिति । **शब्द एवे**त्येवकारेण प्रथमं श्रवणजन्ये ब्रह्मज्ञाने क्लृप्तकरण-भावस्य शब्दस्यैवाविद्यानिवर्तके चरमसाक्षात्कारेऽपि करणत्वोपपत्तेर्न तत्र करणान्तरं कल्पनीयमिति सूचितम् । **नन्वप-**रोक्षजीवाभेदतः श्रुतेश्चापरोक्षेऽपि ब्रह्मणि परोक्षत्वावगाहि ज्ञानं लोकसिद्धमनुभूयते, अतएव निरतिशयानन्दरूपं ब्रह्म ममापरोक्षं न प्रकाशत इति व्यवहारः । एवं श्रुतितोऽपि ब्रह्मणि परोक्षत्वावगाहि परोक्षमेव ज्ञानं भवेदित्याशङ्क्याह— **अन्यथेति** । लोकत इव श्रुतितो नापरोक्षे ब्रह्मणि परोक्षत्वावगाहि भ्रमरूपं ज्ञानं युक्तमिति भावः । **स्वतोऽपरो-क्षस्यापीति** । यदि ब्रह्म स्वतोऽपरोक्षमिति तद्विषयशब्दजन्यमपि ज्ञानमपरोक्षं भवेत्, तदा श्रवणजन्यज्ञानमप्य-परोक्षमिति श्रुतवेदान्तस्य पुंसः तस्मिन्पारोक्ष्यभ्रमानुवृत्तिर्न स्यात् । अनुवर्तते च तदनन्तरमपि भ्रमगृहीतं ब्रह्मणि पारो-क्ष्यमिति न शब्दादपरोक्षज्ञानम् । तस्मादपरोक्षज्ञानजननसमर्थादन्यत एव तदेष्टव्यम् । क्लृप्तं चान्तःकरणस्य तत्सामर्थ्यं; ब्राह्मलौकिकभोगानुभवे 'मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके मनोऽस्य दैवं चक्षु' रिति श्रुतेः । विशिष्य चाहंवृ-त्तिरूपे स्वात्मज्ञानेऽपि तस्य करणत्वं क्लृप्तम्; चरमसाक्षात्कारस्य शब्दजन्यत्वाभ्युपगमेऽपि तस्य व्यापारोऽवश्यमपेक्ष-णीयः । तस्मादावश्यकेनान्तःकरणेनैव तदुत्पत्त्युपपत्तौ तदर्थं तत्त्वमस्यादिवाक्यस्य तत्कालेऽपि पुनरनुसंधानकल्पन एव गौरवमिति भावः । **ननु** तर्हि तत्त्वमस्यादिवाक्यश्रवणनिरपेक्षमेवान्तःकरणं ब्रह्मात्मैक्यमपरोक्षयेदित्यत्राह—**तत्तु शब्दजनितेति । उक्तंच गीताविवरणे भाष्यकारैः**—शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करण-मिति । **नन्वप**रोक्षब्रह्मविषयस्य शब्दस्यापरोक्षप्रमाहेतुत्वं न शक्यं प्रत्याख्यातुम्, श्रवणजन्यापरोक्षज्ञाने सत्यपि पारो-क्ष्यभ्रमानुवृत्तिस्त्वसंभावनादिदोषप्रतिबद्धस्य भ्रमनिवर्तनकार्याक्षमतया भवेदित्याशङ्क्याह—**शब्दस्त्विति** । अभिव्यक्त-चैतन्याभिन्नत्वमर्थापरोक्ष्यमिति तावन्न युक्तम्; **स्वरूपसदभेदमात्रविवक्षायां** चाक्षुषवृत्त्यभिव्यक्तपर्वतावच्छिन्न-

वेदान्तकल्पतरुः ।

क्लृप्तः; प्रमेयापरोक्ष्ययोग्यत्वेन प्रमायाः साक्षात्कारत्वे देहात्मभेदविषयानुमितेरपि तदापत्तिः, दशमस्त्वमसीत्यत्रापि तत्सचिवादक्षादेव साक्षात्कारः, अन्धादेस्तु परोक्षधीरेव । **अपिच**—'वेदान्तवाक्यजज्ञानभावनाजापरोक्षधीः । मूलप्रमाणदार्ढ्येन न भ्रमत्वं प्रपद्यते ॥' नच प्रामाण्यपरतस्त्वापातः; अपवादनिरासाय मूलशुद्ध्यनुरोधात् । दृश्यते त्वग्र्यया बुद्ध्येत्यादेर्नयबृंहितवचनादित्थमुररीकारः । साक्षादपरोक्षादित्येवमाकारैव धीः शब्दादुदेति, नतु परोक्षं ब्रह्मेति; सा तु करणस्वभावात्परोक्षावतिष्ठते न भ्रम इति सर्वमवदातम् ॥ स्वरूपप्रकाशस्याभिव्यक्तिसंस्कारमुपपाद्य व्यञ्जकान्तःकरणवृत्तेरुत्पाद्य-

कल्पतरुपरिमलः ।

चैतन्येन व्यवहितवह्न्यवच्छिन्नचैतन्यस्य तेन व्यवहितवह्नेश्च स्वाभाविकाध्यासिकाभेदसत्त्वेन व्यवहितवह्नेरप्यपरोक्षत्वापत्तेः, **निरस्तभेदोपाधिकाभेदविवक्षायां** चरमसाक्षात्कारनिवर्त्याविद्योपाधेः चरमसाक्षात्कारोत्पत्तिदशायामपि सत्त्वेन ब्रह्मणस्तदानीमापरोक्ष्याभावापत्तेः, **स्फुरदभेदविवक्षायां** ताद्धर्म्याध्यासविषये दुःखशोकादौ तदानीं सद्रूपब्रह्माभेदास्फुरणादापरोक्ष्याभावापत्तेः, **स्वव्यवहारानुकूलं यदभिव्यक्तचैतन्यं तदभेदविवक्षाया**मनुमेयवह्न्यादिव्यवहारानुकूलेन जीवचैतन्येन प्रागुक्तरीत्यैवाभिन्नस्य वह्न्यादेरापरोक्ष्यापातात्, **स्वव्यवहारानुकूलो योऽभिव्यक्तचैतन्याभेदस्तद्वत्त्वविवक्षायां** तत्तदाकारधीवृत्तिसमुल्लासमात्रादपि भवति व्यवहारे चैतन्याभेदस्यानपेक्षितत्वेनासंभवापत्तेः, **स्वावरणनिवृत्त्यनुकूलचैतन्याभेदवत्त्वविवक्षायामा**वरणनिवर्तकत्वग्रहणाधीनमापरोक्ष्यग्रहणम् आपरोक्ष्यग्रहणाधीनमावरणनिवर्तकत्वग्रहणमिति परस्पराश्रयापत्तेः, एवमुक्तरूपार्थापरोक्ष्यनिर्वचनायोगात् तदपेक्षमपरोक्षार्थव्यवहारानुकूलज्ञानत्वं ज्ञानापरोक्ष्यमिति निर्वचनमप्ययुक्तम्; तस्मात्स्वाविषयविषयकज्ञानाजन्यज्ञानत्वं ज्ञानापरोक्ष्यमिति निर्वक्तव्यम् । तच्चाक्षुषादिवृत्त्यभिव्यक्तचैतन्येषु नित्याभिव्यक्तसाक्षिचैतन्येषु चानुगतम्, अनुमितिशाब्दज्ञानादिभ्यश्च तत्तदविषयलिङ्गशब्दादिज्ञानजन्येभ्यो व्यावृत्तम् । **नच** विशिष्टज्ञानं विशेषणज्ञानजन्यमित्यभ्युपगमे दण्डकुण्डलोभयस्मृतिजन्यदण्डिप्रत्यक्षाव्याप्तिः; वस्तुगत्या यः स्वाविषयः तद्विषयत्वं यस्य ज्ञानस्य जनकतायामवच्छेदककोटिप्रविष्टं तदजन्यत्वस्य विवक्षितत्वात्, उक्तस्मृतेर्दण्डिप्रत्यक्षे तदविषयकुण्डलविषयत्वेनाजनकतया तत्रापि लक्षणसत्त्वात् । यदीश्वरज्ञानमुपादानगोचरज्ञानतया 'बहु स्यां प्रजायेये'तिवदिदं ज्ञानमस्य स्यादिति संकल्परूपतया वा कारणमिष्यते, तदा तज्जन्येषूक्तज्ञानेष्वव्याप्तिवारणाय समानाधिकरणत्वं ज्ञाने विशेषणं देयम् । **नच** कोलाहले बुभुत्सितशब्दग्रहो बुभुत्साजन्यस्तन्मूलबोधेष्टसाधनताज्ञानेनापि जन्य इति तत्राव्याप्तिः; बुभुत्सयान्यथासिद्धस्य तस्य शब्दग्रहे कारणत्वाभावाद्, बुभुत्सयेतरशब्दग्रहप्रतिबन्धे सति क्लृप्तकारणादेव बुभुत्सितशब्दग्रह इति तत्र बुभुत्साया अप्यकारणत्वाच्च । **नच** व्याप्तिज्ञानत्वावच्छिन्नं सर्वमनुमितिजनकं व्याप्तिज्ञानत्वादित्यनुमितावतिव्याप्तिः; तत्रानुमितेः सामान्यतः सर्वव्याप्तिविषयायाः स्वकारणज्ञानविषयव्याप्तिविषयत्वसत्त्वेऽपि स्वकारणव्याप्तिज्ञानवत् प्रकृतहेतुसाध्यविशेषोपरक्ततया तद्विषयत्वाभावेन तस्याः स्वाविषयविषयकज्ञानजन्यत्वात् । **नचैव**मपि हेतुतावच्छेदकसाध्यतावच्छेदकविशेषावच्छिन्नहेतुसाध्योपरक्तव्याप्तिज्ञानत्वावच्छिन्नसर्वपक्षीकरणे सत्युक्तानुमितावतिव्याप्तिः; सामान्यधर्ममात्रानवच्छिन्नतया यः स्वविषयो न भवति तद्विषयत्वस्य विवक्षितत्वात्, तस्यामनुमितौ हेतुतावच्छेदकसाध्यतावच्छेदकयोः सामान्यधर्ममात्रावच्छिन्नत्वेन विषयतया सामान्यधर्ममात्रानवच्छिन्नतया तदविषयत्वस्य सत्त्वात् । **नचानु**पलब्धिप्रमाणजन्याभावज्ञानेऽतिव्याप्तिः; योग्यानुपलब्धेः प्रमाणत्वात्, योग्यतायाश्च यद्यत्राधिकरणे प्रतियोग्यभविष्यत्, तदा भूतलमिवाद्रक्ष्यतेति तर्करूपत्वेनानुपलब्धिज्ञानस्य स्वाविषयविषयकतर्करूपज्ञानजन्यत्वात्, स्मृतौ स्वसमानविषयपूर्वानुभवसंस्कारजन्यायामतिव्याप्तिवारणार्थमग्रिमज्ञानपदमनुभवपरं बोध्यम् । एवंच प्रत्यभिज्ञायास्तत्तांशेऽपि नातिव्याप्तिः; तस्यास्तदंशे स्मृतित्वाङ्गीकारात् । एवमपरोक्षज्ञानलक्षणव्यवस्थितौ तज्जन्यव्यवहारयोग्यत्वमर्थापरोक्ष्यमिति तन्निर्वचनं द्रष्टव्यम् । एवंच शब्दप्रमाणं स्वाविषयविषयकज्ञानजन्यां परोक्षप्रमामेव जनयतीति नापरोक्षप्रमाहेतुरिति भावः । **ननु** दशमस्त्वमसीत्यादौ शब्दस्याप्यपरोक्षज्ञानजनकत्वं सिद्धमस्तीत्याशङ्क्याह—**दशम इति** । एवमनुमितेरपि पर्वताद्यंशे नापरोक्ष्यं, तत्रापरोक्षभ्रमस्तु तदानीन्तनापरोक्षज्ञानभेदाग्रहादिति द्रष्टव्यम् । **अन्धादेस्त्विति** । अभ्युपेत्यायं परिहारः । दशमोऽहमस्मीत्यपरोक्षज्ञानम् अन्तःकरणे न संभवति; शरीरविषयं चेत्, स्पर्शनेन्द्रियेण वा ज्ञानान्तरोपनयसहितान्तःकरणेन वा संभवति । **ननु** भावनाजन्यसाक्षात्कारः कामिनीसाक्षात्कारवद्भ्रमः स्याद्, नचान्तःकरणसाहित्येन विशेषः; तत्रापि तत्सत्त्वादित्यत आह—**अपिचेति** । **ननु** ब्रह्मसाक्षात्कारस्य मनःकरणकत्वाभ्युपगमो 'यन्मनसा न मनुत' इति श्रुतिविरुद्ध इत्यत्राह—**दृश्यत इति** । प्रागुपन्यस्तन्यायोपबृंहितायां 'दृश्यत' इति श्रुतावग्र्यया सूक्ष्मयेति विशेषणाद्यन्मनसेति श्रुतिरनवहितमनोविषया, यथा 'तं त्वौपनिषद'मिति श्रुतावौपनिषदमिति विशेषणा'द्यद्वाचानभ्युदित'मिति श्रुतिर्विशिष्टशक्तिकशब्दविषयेति भावः । **साक्षादपरोक्षादिति** । यथा प्रत्यक्षस्पर्शाश्रयत्वादिलिङ्गजन्या वायोः प्रत्यक्षत्वानुमितिः स्वयं प्रत्यक्षत्वरहितेत्येतावदेव, नतु वायौ प्रत्यक्षत्वाभावमवगाहत इति न भ्रमत्वं प्रतिपद्यते, एवमिहापि योजनीयम् । **स्वरूपप्रकाशस्येति** । **आविर्भावयतीत्यन्तेन ग्रन्थेन** जीवस्वरूपप्रकाशस्य ब्रह्माभेदसाक्षात्कारेण तदभेदति-

भामती ।

शाब्दस्य प्रमाणस्य फलं, अपि तु प्रत्यक्षस्य; तस्यैव तत्फलत्वनियमात् । अन्यथा कुटजबीजादपि वटाङ्कुरोत्पत्तिप्रसङ्गात् । तस्मान्निर्विचिकित्सवाक्यार्थभावनापरिपाकसहितमन्तःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थताभनुभावयतीति युक्तम् । नचायमनुभवो ब्रह्मस्वभावो, येन न जन्येत, अपि त्वन्तःकरणस्यैव वृत्तिभेदो ब्रह्मविषयः । नचैतावता ब्रह्मणोऽपराधीनप्रकाशता । नहि शाब्दज्ञानप्रकाश्यं ब्रह्म स्वयंप्रकाशं न भवति; सर्वोपाधिरहितं हि स्वयंज्योतिरिति गीयते, न तूपहितमपि । **यथाह स भगवान् भाष्यकारः—'नायमेकान्तेनाविषयः' इति ।** नचान्तःकरणवृत्तावप्यस्य साक्षात्कारे सर्वोपाधिविनिर्मोकः; तस्यैव तदुपाधेर्विनश्यदवस्थस्य स्वपरोपाधिविरोधिनो विद्यमानत्वात् । अन्यथा चैतन्यच्छायापत्तिं विनाऽन्तःकरणवृत्तेः स्वयमचेतनायाः स्वप्रकाशत्वानुपपत्तौ साक्षात्कारत्वायोगात् । नचानुमितभावितवह्निसाक्षात्कारवत् प्रतिभात्वेनास्याप्रामाण्यं, तत्र वह्नित्वलक्षणस्य परोक्षत्वात्, इह तु

वेदान्तकल्पतरुः ।

त्वामाह—**नचेति** । वृत्तिविषयत्वे ब्रह्मणोऽस्वप्रकाशत्वमाशङ्क्यासमुच्चयमतेन कर्मोपयोगाय साम्यमाह—**न चैतावतेति ।** स्वप्रकाशस्यैव शाब्दज्ञानविषयत्वं त्वयापीष्टमित्यर्थः । परिहारसाम्यमाह—**सर्वेति** । **ननु** निरुपाधिब्रह्मसाक्षात्कारगोचरे, कथमुपहिततेति, तत्राह—**नचान्तःकरणेति** । निरुपाधि ब्रह्मेति विषयीकुर्वाणा वृत्तिः स्वस्वेतरोपाधिनिवृत्तिहेतुरुदयते; स्वस्या अप्युपाधित्वाविशेषात् । ततः स्वसत्तायां विनाशहेतुसांनिध्याद्विनश्यदवस्थत्वम् । एवं च नानुपहितस्य विषयता, न चोपाधिर्निवर्तकान्तरापेक्षेति भावः । **ननु**—वृत्तिविशिष्टस्य शबलतया न तत्त्वसाक्षात्कारगोचरता; वृत्त्यवच्छिन्नात्मविषयत्वे च वृत्तेः स्वविषयत्वापातः, विशेषणाग्रहे विशिष्टाग्रहात्, उपलक्षितस्य तु न वृत्त्युपाधिकता—**इति । उच्यते**; वृत्त्युपरागोत्र सत्तयोपयुज्यते न प्रतिभास्यतयातो वृत्तिसंसर्गे सत्यात्मा विषयो भवति, न तु स्वत इति न दोषः । **ननू**पाधिसंबन्धाद्विषयत्वं, विषयत्वे चोपाधिसंबन्धो विषयविषयित्वलक्षण इतीतरेतराश्रयमत आह—**अन्यथेति** । न ब्रह्मसाक्षात्कारस्य ब्रह्मविषयत्वप्रयुक्तं चैतन्यप्रतिबिम्बितत्वं, किं तु स्वतः; घटादिवृत्तिष्वपि साम्यात् । चैतन्यं च ब्रह्मेति स्वाभाविको

कल्पतरुपरिमलः ।

रोधायकाविद्यानिवृत्तिरूपाभिव्यक्तिसंस्कारमुपपाद्याभिव्यञ्जकस्य तस्य साक्षात्कारस्य **नचासावनुत्पादितब्रह्मानुभवेति टीकया** प्रागुपक्षिप्तामुत्पाद्यतामन्तःकरणवृत्तिरूपत्वप्रदर्शनेनोपपादयतीत्यर्थः । **असमुच्चयमते** कर्मोपासनयोः कालैक्येन समुच्चयो नास्तीति सिद्धान्ते । **परिहारसाम्यमाहेति** । वृत्तिविषयत्वं स्वप्रकाशत्वं च विरुद्धमित्याशङ्कायामुपहितानुपहितरूपभेदेन समाधानं मतद्वयेऽपि समानं दर्शयतीत्यर्थः । **नन्वेवं**—सत्यविद्योपहितो जीवः कथं स्वप्रकाशः स्यादिति—**चेत्, उच्यते**; उपहितमुपधानकाले स्वरूपेणापि न स्वप्रकाशमिति नार्थः, किंतूपहितरूपेण न स्वप्रकाशमिति, अतो न दोषः । **ननु निरुपाधि ब्रह्मेति** । उपहितं वृत्तिविषय इति न युक्तं; ब्रह्म शुद्धं निरुपाधिकमिति हि वृत्तिरूपसाक्षात्कारस्याकार इष्यते, नचोपाधौ विद्यमाने तदाकारः संभवितुमर्हतीति शङ्कार्थः । मिथ्याभूतेषूपाधिषु विद्यमानेष्वपि न वास्तवनिरुपाधिकत्वाकारसाक्षात्कारोदयो निरुच्यत इति समाधानाभिप्रायमाह—**निरुपाधीति । ननु** मिथ्याभूतानां तेषामुपाधीनां केन निवृत्तिः ? साक्षात्कारेणेति चेत्, तस्य केन निवृत्तिरित्याकाङ्क्षायामाह—**स्वस्वेतरेति** । अनेन चरमवृत्त्युदयकाले उपाध्यन्तराण्यपि सन्त्येव । **टीकायां**—वृत्तेरेवोपाधित्ववर्णनम् अन्ततो वृत्तिमात्रमस्तीत्यभ्युपेत्यवाद इति सूचितम् । **ननूपा**धीनां निवृत्तावनुपहितमेव साक्षात्कारविषय इति स्यादित्याशङ्क्य साक्षात्कारदशायां विनश्यदवस्थतामात्रं, नतु विनाशोदय इत्याह—**ततः स्वसत्तायामिति । वृत्त्युपहितं** वृत्त्या विशिष्टं, तदुपलक्षितं वा । **आद्यं** दूषयित्वा **द्वितीयं** दूषयति—**उपलक्षितस्य त्विति** । अविद्यमानेनाप्युपलक्षितत्वं भवति; यथोड्डीय गतेनापि काकेन गृहस्य; वृत्त्या तु विद्यमानयैवोपहितता विषयताघटनार्थमिष्यते; अतः प्रसिद्धोपलक्षणवैलक्षण्याद् न वृत्तिरुपलक्षणमिति विद्यमानव्यावर्तकत्वनियमाद्विशेषणमेव वाच्या, अतः पूर्वोक्तदोषद्वयं प्रादुःष्यादिति भावः । **वृत्त्युपरागोत्रेति । नन्वत्र**—विशेषणोपलक्षणपक्षयोः कं पक्षं परिगृह्य परिहारो वर्ण्यते, **उच्यते**, सत्तयोपयुज्यते इत्यविद्यमानव्यावर्तकत्वनिषेधान्नोपलक्षणं, न प्रतिभास्यतयेति कार्यान्वयनिषेधान्न विशेषणं, किंतु कार्यानन्वयी सत्त्वनियत उपाधिर्विशेषणोपलक्षणाभ्याम् अन्यस्तृतीयः प्रकार इति वाक्यान्वयाधिकरणे (ब्र. अ. १ पा. ४ सू. १९) वक्ष्यमाणं तृतीयं प्रकारं परिगृह्य परिहारः । **विषयविषयित्वलक्षणः** विषयविषयित्वोपाधिकस्तत्प्रयोज्य इति यावत् । एवंहि इतरेतराश्रयं इति घटते । लक्षणशब्दस्य स्वरूपवाचित्वे तु विषयविषयिभाव एव तत्प्रयोजक उक्त इत्यात्माश्रय एव भवेत् । **चैतन्यप्रतिबिम्बितत्वमिति ।** प्रतिबिम्बितचैतन्यकत्वमित्यर्थः । आहिताग्न्यादेराकृतिगणत्वान्निष्ठान्तस्य पूर्वनिपातानियमः । संजातचैतन्यप्रतिबिम्बत्वमिति वार्थः; तारकादेराकृतिगणत्वात् तारकितं नभ इतिवदितच्प्रत्ययः । तथा च चैतन्यवृत्त्योः प्रतिबिम्बतदुपाधित्वलक्षणसं-

भामती ।

ब्रह्मरूपस्योपाधिकलुषितस्य जीवस्य प्रागप्यपरोक्षत्वात् । नहि शुद्धबुद्धत्वादयो वस्तुतस्ततोऽतिरिच्यन्ते, जीव एव तु तत्तदुपाधिरहितः शुद्धबुद्धादिस्वभावो ब्रह्मेति गीयते । नच तत्तदुपाधिविरहोऽपि ततोऽतिरिच्यते । तस्माद्यथा गान्धर्वशास्त्रार्थज्ञानाभ्यासाहितसंस्कारसचिवश्रोत्रेन्द्रियेण षड्जादिस्वरग्राममूर्च्छनाभेदमध्यक्षमनुभवति, एवं वेदान्तार्थज्ञानाभ्यासाहितसंस्कारो जीवस्य ब्रह्मभावमन्तःकरणेनेति । अन्तःकरणवृत्तौ ब्रह्मसाक्षात्कारे जनयितव्येऽस्ति तदुपासनायाः कर्मापेक्षेति चेत्, न; तस्याः कर्मानुष्ठानेन सहभावाभावेन तत्सहकारित्वानुपपत्तेः । न खलु 'तत्त्वमसि' इत्यादेर्वाक्यान्निर्विचिकित्सं शुद्धबुद्धोदासीनस्वभावं अकर्तृत्वाद्युपेतं अपेतब्राह्मणत्वादिजातिं देहाद्यतिरिक्तं एकमात्मानं प्रतिपद्यमानः कर्मस्वधिकारमवबोद्धुमर्हति । अनर्हश्च कथं कर्ता वाधिकृतो वा । यद्युच्येत—निश्चितेऽपि तत्त्वे विपर्यासनिबन्धनो व्यवहारोऽनुवर्तमानो दृश्यते, यथा गुडस्य माधुर्यविनिश्चयेऽपि पित्तोपहतेन्द्रियाणां तिक्तावभासानुवृत्तिः; आस्वाद्य थूत्कृत्य त्यागात्, तस्मादविद्यासंस्कारानुवृत्त्या कर्मानुष्ठानं, तेन च विद्यासहकारिणा तत्समुच्छेद उपपत्स्यते । नच—कर्माविद्यात्मकं कथमविद्यामुच्छिनत्ति, कर्मणो वा तदुच्छेदकस्य कुत उच्छेदक इति—वाच्यम्, सजातीयस्वपरविरोधिनां भावानां बहुलमुपलब्धेः । **यथा पयः पयोऽन्तरं जरयति, स्वयं च जीर्यति । यथा विषं विषान्तरं शमयति, स्वयं च शाम्यति । यथा वा कतकरजो रजोऽन्तराविले पाथसि प्रक्षिप्तं रजोऽन्तराणि भिन्दत् स्वयमपि भिद्यमानमनाविलं पाथः करोति ।** एवं कर्माविद्यात्मकमपि अविद्यान्तराण्यपगमयत् स्वयमप्यपगच्छतीति । **अत्रोच्यते**—सत्यं, 'सदेव सोम्येदम्' इत्युपक्रमात् 'तत्त्वमसि' इत्यन्ताच्छब्दात्, ब्रह्ममीमांसोपकरणादसकृदभ्यस्तात्, निर्विचिकित्सेऽनाद्यविद्योपादानदेहाद्यतिरिक्तप्रत्यगात्मतत्त्वावबोधे जातेऽपि अविद्यासंस्कारानुवृत्तावनुवर्तन्ते सांसारिकाः प्रत्ययास्तद्व्यवहाराश्च; तथापि तानप्ययं व्यवहारप्रत्ययान्मिथ्येति मन्यमानो विद्वान्न श्रद्धत्ते पित्तोपहतेन्द्रिय इव गुडं थूत्कृत्य त्यजन्नपि तस्य तिक्तताम् । तथाचायं क्रियाकर्तृकर-

वेदान्तकल्पतरुः ।

वृतेस्तत्संबन्ध इत्यर्थः । यच्च स्वरूपव्यतिरिक्तसाक्षात्कारस्य भ्रमत्वमिति तत्राह—**नचेति** । विषयविसंवादाभावात् प्रमात्वमित्यर्थः । जीवचैतन्यमात्रापरोक्षेपि शुद्धानन्दात्मत्वादेः पारोक्ष्यान्न तदाकारसाक्षात्कारो यथार्थ इत्याशङ्क्याह—**नहीति** । शुद्धादीनां स्वभावत्वेप्युपाधितिरोधानादविभावनम् । वेदान्तजज्ञानेन तत्तदुपाध्यपगमे यथावदभिव्यक्तो जीवो ब्रह्मेति गीयते, स चेदुपाध्यभावस्तर्हि तदतिरिक्तः परोक्षः कथं साक्षात्कारे भायादत आह—**नचेति** । यथा परैरन्योन्याभावो न भवति घट इति व्यपदिश्यमानोपि घटतदन्योन्याभावव्यतिरिक्तो नाभाव उपेयते; नच घटतदन्योन्याभावयोरेकता, एवमस्माकं निरुपाधिकं ब्रह्म, न चोपाध्यभावस्ततोन्य इत्यर्थः । **ननु** चैतन्याभिन्नाश्चेदानन्दादयस्तद्वदविद्यादशायां विभाव्येरन्, उपाधिरुद्धाश्चेच्चैतन्येपि निरोधस्तुल्यस्तदभेदादिति शङ्कामुपसंहारव्याजेन परिहरति—**तस्मादिति** । यथा षड्जादयो गान्धर्वशास्त्राभ्यासात् प्रागपि स्फुरन्तस्तद्रूपेणानुल्लिखिता न श्रोत्रेण व्यज्यन्ते, व्यज्यन्ते तु शास्त्रवासितेन तेनः एवं वेदान्तवाक्यजन्यब्रह्मात्मैकताकारज्ञानवासितान्तःकरणेन तद्भावाभिव्यक्तिर्न प्रागिति । निषादर्षभगान्धारषड्जमध्यमधैवतपञ्चमाः स्वराः । एषां समुदायो ग्रामः । **मूर्च्छना तु** तेषामारोहावरोहौ । समुच्चयपक्षमिदानीं निराकरोति—**नेति** । **तत्र** किमिह वा जन्मान्तरे वानुष्ठितं कर्म संस्कारद्वारा ज्ञानोत्पत्तावुपयुज्यते, उतेहैवावगते ब्रह्मणि कृतकर्मणां भावनया समुच्चय इति । **द्वितीये** किं भावनाफलसाक्षात्कारे कर्मोपयोगः, उत भावनास्वरूपे इति । **न तावत्कार्ये** इत्याह—**तस्या इत्यादिना** । तदुच्छेदकस्य कर्मण इति समानाधिकरणे षष्ठ्यौ । **सजातीयेति** । सजातीयाश्च ते स्वयं च परे च तेषां विरोधिनस्तथोक्ताः । अवगते तत्त्वे विपर्यासदर्शनेन कर्मानुष्ठानसंभवात् समुच्चय इति प्रत्यवस्थानं दूषयति—**अत्रोच्यत इति** । **विदुष इति** । क्रियाकर्त्रादिर्वास्तव इति निश्चयवत इत्यर्थः । **ननु** विदुषश्चेदधिकारस्तर्हि क्रियाक-

कल्पतरुपरिमलः ।

बन्धो न विषयविषयिभावप्रयोज्यः, स्वयमेव तु तत्प्रयोजक इति नान्योन्याश्रय इत्यर्थः । **भ्रमत्वमिति** । संसारदशायामप्रकाशमानं ब्रह्म परोक्षमिति तत्रापरोक्ष्यावगाहितया भ्रमत्वमभिप्रेतम् । **वेदान्तजज्ञानेन** वेदान्तजन्यज्ञानमूलभावनापरिपाकसहितान्तःकरणजन्यज्ञानेनेत्यर्थः । **तत्तद्रूपेण** षड्जत्वादिरूपेण । यद्यपि गान्धर्वशास्त्राभ्यासरहितैरपि सूक्ष्ममतिभिः श्रूयमाणाः स्वराः किंचित्परस्परवैलक्षण्येनानुभूयन्ते, तदेव षड्जत्वादिकमिति तैस्तदवगम्यत एव, षड्जादिशब्दविशेषवाच्यत्वं परं न ज्ञायते; तथापि ये स्थूलमतयः स्वरानाकर्णयन्तोऽपि समवर्णपरिमाणान् केशादीनिव परस्परविविक्ततयावगन्तुं न प्रभवन्ति, तेषामपि गान्धर्वशास्त्रपरिचये सति क्रमेण विविक्तोल्लेखो दृश्यते स इहोदाहरणम् । **निषादेति** । वीणादिषु प्रथमश्रूयमाणश्रुत्याख्यशब्दावयवानुरणनात्मका घण्टानादानुरणनसदृशाः स्वराः सप्त । तेषां स्वराणां समुदायाः षड्जमध्यमगान्धारस्वरप्रभावा नन्द्यावर्तजीमूतसुभद्राख्यास्त्रिविधा ग्रामाः स्तेषु, ग्रामेषु क्रमेण

भामती ।

णेतिकर्तव्यताफलप्रपञ्चमतात्त्विकं विनिश्चिन्वन्कथमधिकृतो नाम, विदुषो ह्यधिकारः, अन्यथा पशुशूद्रादीनामप्यधिकारो दुर्वारः स्यात् । क्रियाकर्त्रादिस्वरूपविभागं च विद्वस्यमान इह विद्वानभिमतः कर्मकाण्डे । अतएव भगवानविद्वद्विषयत्वं शास्त्रस्य वर्णयांबभूव भाष्यकारः । तस्माद्यथा राजजातीयाभिमानकर्तृके राजसूये न विप्रवैश्यजातीयाभिमानिनोऽधिकारः । एवं द्विजातिकर्तृक्रियाकरणादिविभागाभिमानिकर्तृके कर्मणि न तदनभिमानिनोऽधिकारः । नचानधिकृतेन समर्थेनापि कृतं वैदिकं कर्म फलाय कल्पते; वैश्यस्तोम इव ब्राह्मणराजन्याभ्याम् । तेन दृष्टार्थेषु कर्मसु शक्तः प्रवर्तमानः प्राप्नोतु फलं; दृष्टत्वात्, अदृष्टार्थेषु तु शास्त्रैकसमधिगम्यं फलमनधिकारिणि न युज्यत इति नोपासनाकार्ये कर्मापेक्षा । **स्यादेतत्**—मनुष्याभिमानवदधिकारिके कर्मणि विहिते यथा तदभिमानरहितस्यानधिकारः, एवं निषेधविधयोऽपि मनुष्याधिकारा इति तदभिमानरहितस्तेष्वपि नाधिक्रियेत, पश्वादिवत् । तथाचायं निषिद्धमनुतिष्ठन् न प्रत्यवेयात्, तिर्यगादिवदिति भिन्नकर्मतापातः । **मैवम्**; न खल्वयं सर्वथा मनुष्याभिमानरहितः, किं त्वविद्यासंस्कारानुवृत्त्यास्य

वेदान्तकल्पतरुः ।

त्रादेर्वास्तवत्वमित्याशङ्क्याह—**क्रियाकर्त्रादीति । विद्वस्यमानः** अविद्वानेव विद्वान्भवन्विद्वदाभास इत्यर्थः । लोहितादिडाज्भ्यः क्यषिति क्यषन्तस्य रूपम् । अतएवाविद्वान्कर्मकाण्डेधिकार्यभिमत इति । **अविद्वद्विषयत्वं शास्त्रस्य वर्णयांबभूवेति ।** प्राक् चेत्यादिभाष्येणेत्यर्थः । यदि प्रतीयमानाधिकारनिमित्तस्य ब्राह्मण्यादेः शास्त्रनिमित्तमिथ्यात्वप्रत्ययादश्रद्दधानो विध्यनधिकारी, तर्ह्यतिप्रसङ्ग इति शङ्कते—**स्यादेतदिति ।** भिन्नमुल्लङ्घितं शास्त्रनिषिद्धं कर्म येन स तथा तस्य भावस्तत्ता अतिक्रान्तनिषेधतेत्यर्थः । अवगतमिथ्याभावस्याप्यधिकारनिमित्तस्य प्रतीयमानत्वान्निषेधाधिकारहेतुता । नच श्रद्दधानता; इहाधिकारहेतुरतत्त्वविदोऽपि नास्तिकत्वेनाश्रद्दधतो निषेधाधिकारात्, इतरथा निषेधलङ्घिनस्तस्य प्रत्यवायाभावापाताद्विधिषु तु श्रद्धाप्यधिकारहेतुरिति । ब्रह्मविदो नाधिकार इत्याह—**मैवमित्यादिना ।** यद्यपि यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति श्रद्धारहितमपि कर्म वीर्यवदिति स्थास्यति; तथापि सा श्रद्धा भक्तिरूपा,

कल्पतरुपरिमलः ।

स्वराणामारोहाऽवरोहाभ्यां निवेशाः प्रतिग्रामं सप्तधा भिन्ना एकविंशतिमूर्च्छनाः । **तदुक्तम्**—'प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः । सा श्रुतिः संपरिज्ञेया स्वरावयवलक्षणा ॥ श्रुत्यनन्तरभावी यः शब्दोऽनुरणनात्मकः । स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते ॥ श्रुतिभ्यः स्युः स्वराः षड्जर्षभा गान्धारमध्यमाः । पञ्चमो धैवतश्चापि निषाद इति सप्तमः ॥ यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि । तथा स्वराणां संदोहो ग्राम इत्यभिधीयते ॥ षड्जग्रामो भवेदादौ मध्यमग्राम एव च । गान्धारग्राम इत्येतद्ग्रामत्रयमुदाहृतम् ॥ नन्द्यावर्तोऽथ जीमूतः सुभद्रो ग्रामकास्त्रयः । षड्जमध्यमगान्धारास्त्रयाणां जन्महेतवः ॥ क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् । मूर्च्छनेत्युच्यते ग्रामस्था एताः सप्त सप्त च ॥' इति । **क्यषन्तस्य रूपमिति ।** लोहितादेराकृतिगणत्वादिति भावः । **ननु**—क्यषन्तत्वे विद्वदाभास इत्यर्थो न लभ्यते; यथा पूर्वमलोहितः पश्चाल्लोहितो भवन् लोहितायमानः, एवं पूर्वमविद्वान् पश्चाद्विद्वान् भवन् विद्वस्यमान इत्येतदर्थो लभ्यते, अभूततद्भावे क्यषो विधानात्, विद्वदाभास इत्यर्थस्तु क्यङन्तत्वे लभ्यते; कर्तुः क्यङ् सलोपश्चेति सूत्रेण हि उपमानात् कर्तुस्तद्वदाचरतीत्यर्थे क्यङ्प्रत्ययो विहितः, श्येनायते काक इत्यादि च तदुदाहरणं लिखितं, तथेह क्यङन्तत्वे विद्वानिवाचरन्नविद्वान् विद्वस्यमान इत्यस्य सोऽर्थो लभ्यते । **नच**—'ओजसोऽप्सरसो नित्यं पयसस्तु विभाषयेति' वृत्तावुक्तत्वाद् ओजोप्सरःपयोव्यतिरिक्तेभ्यः सकारान्तेभ्यः क्यङ् न भवतीति—**शङ्कनीयम्**; तेभ्यः सलोपो न भवतीत्येव ततः सिद्ध्या क्यङभावाप्रसक्तेर्वार्तिककृता सलोपो वेति सामान्यतः सलोपस्य विकल्पितत्वमुक्त्वा ओजसोऽप्सरसो नित्यमिति सकारान्तविशेषयोस्तन्नित्यत्वस्योक्ततया तदनुसारेण तत्र पयोग्रहणस्य ओजोप्सरोव्यतिरिक्तसकलसकारान्तोपलक्षणतया वक्तव्यत्वाच्चेति—**चेत्, उच्यते;** क्रियाकर्त्रादिस्वरूपविभागं च विद्वस्यमानः इह विद्वानभिमत इति टीकावाक्येऽस्मिन् विद्वस्यमान इत्यस्य क्यङ्प्रत्ययान्तता न संभवति; विद्वानिवाचरन्नित्युपमेयगतसादृश्योपसर्जनस्य प्रकृत्यर्थस्य विदुषः क्रियाकर्त्रादिस्वरूपविभागमिति निर्दिष्टकर्मसापेक्षत्वेनासामर्थ्यात्, सविशेषणानां वृत्तिर्नेति महाभाष्यवचनात् । अत एव महान्तं पुत्रमिच्छतीति वाक्यस्यार्थे महान्तं पुत्रीयतीति न वृत्तिः । **ननु**—क्यषन्तत्वेऽपि विद्वदाभास इत्यर्थालाभ उक्तः, **नैष दोषः;** शास्त्रसिद्धेन मिथ्यात्वेन क्रियाकर्त्रादिविभागमविद्वानेव सन् यः कर्मानुष्ठानोपयोगिनं तं सत्यत्वेन वेत्ति स विद्वस्यमान इत्युक्त्या विद्वदाभास इत्यर्थलाभात् । एवमेव ह्युक्तमाचार्यैरविद्वानेव विद्वान् भवन्नित्यनेन । नह्येकेनैव रूपेण क्वचिदर्थे कस्यचित्समानकाले विद्याऽविद्ये संभवतः । अतोऽस्य वाक्यस्य रूपमे-

---

एते श्लोकाः तदुक्तं रत्नाकरे इत्युक्त्वा रणद्भिराघट्टनयेति माघ १ सर्गदशमश्लोकव्याख्यावसरे मल्लिनाथेन प्रदर्शिता इति रत्नाकरनामकग्रन्थादुद्धृता इति स्फुटम् ।

भामती ।

मात्रया तदभिमानोऽनुवर्तते । अनुवर्तमानं च मिथ्येति मन्यमानो न श्रद्धत्त इत्युक्तम् । किमतो यद्येवम्, एतदतो भवति—विधिषु श्राद्धोऽधिकारी नाश्राद्धः । ततश्च मनुष्याद्यभिमानेनाश्रद्दधानो न विधिशास्त्रेणाधिक्रियते । **तथाच स्मृतिः**—'अश्रद्धया हुतं दत्तम्' इत्यादिका । निषेधशास्त्रं तु न श्रद्धामपेक्षते, अपि तु निषिध्यमानक्रियोन्मुखो नर इत्येव प्रवर्तते । तथाच सांसारिक इव श्रद्धावगतब्रह्मतत्त्वोऽपि निषेधमतिक्रम्य प्रवर्तमानः प्रत्यवैतीति न भिन्नकर्मदर्शनाभ्युपगमः । तस्मान्नोपासनायाः कार्ये कर्मापेक्षा । **अतएव नोपासनोत्पत्तावपि;** निर्विचिकित्सशाब्दज्ञानोत्पत्त्युत्तरकालमनधिकारः कर्मणीत्युक्तम् । **तथा च श्रुतिः**—'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।'

वेदान्तकल्पतरुः ।

इयं तु प्रमाणद्वारा विश्वासात्मिकैव तदभावेऽनधिकार एवेति । **न श्रद्दधान इति ।** नकारोयं प्रतिषेधवाची । यत एवावगतब्रह्मभावो विधिषु नाधिकार्यत एव । ज्ञानानन्तरं कर्मानुष्ठानासंभवान्नोपासनोत्पत्तौ कर्मापेक्षेति द्वितीयकल्पानवकाश इत्याह—**अतएवेति ।** एतद्विभजते—**निर्विचिकित्सेति ।** पितृमनुष्यदेवलोकाप्तिहेतुभिः कर्मप्रजाधनशब्दवाच्यापरविद्याभिर्नामृतत्वमाप्तवन्तः, किंतु त्यागसाध्यज्ञानेनेत्यर्थः । **तथा हि श्रुत्यन्तरम्**—'पुत्रेणैवायं लोको जय्यो विद्यया देवलोकः कर्मणा पितृलोक' इति । इह भवान्तरे वाऽनुष्ठितं कर्म सत्त्वशुद्धिद्वारेण ज्ञानोत्पत्तिहेतुरिति पक्षमङ्गीकर्त्तुं शङ्कते

कल्पतरुपरिमलः ।

दाभिप्रायत्वसिद्धौ सत्यत्वमिथ्यात्वे एव विद्याविद्याऽविषयरूपे पर्यवस्यतः । विद्वदाभास इत्यर्थ इति वाक्यशेषात्, क्रियाकर्त्रादिविभागे सत्यत्वबुद्धेरेव कर्मानुष्ठानोपयोगित्वाच्च, तस्याश्चाभूततद्भावः कादाचित्कत्वेन प्रागभूततयोपपादनीयः । न चालोहितो लोहितो भवतीत्यत्रैव अभूततद्भावे सर्वत्र उपात्तपूर्वावस्थोपमर्दनियमः; मृदं घटीकरोति तपनो लोहितायतीत्याद्युदाहरणे घटाद्यवस्थासु मृत्त्वाद्युपमर्दाभावात् । तस्मादविद्वानेव विद्वान्भवन्निति क्यषन्तस्य रूपमिति च युक्तमेव । यदितु लोहितादिसूत्रे भाष्यकारैर्नायं हलन्ताद्विधीयत इति हलन्तात् क्यषोऽनङ्गीकृतत्वादिह न भवति क्यषित्यपरितोषः, तदा विदेः कर्मणि नित्यापेक्षासत्वान्नित्यसापेक्षेषु चासामर्थ्येऽपि तत्र तत्र भूयसा समासादिवृत्तिदर्शनात् 'सुडनपुंसकस्ये'ति सौत्रासमर्थसमासरूपज्ञापकाच्च विद्वस्समानशब्द आचारक्यङन्त इत्येव रामर्थनीयम् । **नकारोऽयं प्रतिषेधवाचीति ।** पर्युदासवाचित्वे समासनियमस्य वार्तिककारेणोक्तत्वादिह च नञः समासाभावात् प्रतिषेधवाच्येवायम् । ततश्च प्रतिषेध्यक्रियाया यत्तदोश्चाध्याहारेण यः श्रद्दधानो न भवति स नाधिक्रियत इति वाक्यं पूरणीयमित्याशयः । पर्युदासवाचित्वमपि शक्यमुपपादयितुम्; सूत्रकारपक्षे महाविभाषाधिकारेण तद्वाचित्वेऽपि नञः समासनियमाभावात्, मीमांसकैर्यजतिषु येयजामहं करोति नानूयाजेष्वित्यस्यानूयाजव्यतिरिक्तेषु यज्ञेषु येयजामहं करोतीत्यर्थनिर्णयेन दीक्षितो न जुहोतीत्यस्यादीक्षितो जुहोतीत्यर्थनिर्णयेन च नञः समासाभावेऽपि पर्युदासवृत्तित्वस्याङ्गीकृतत्वात्, वृत्तानुपूर्वं च नचातिदीर्घं इत्यादिमहाकविप्रयोगदर्शनाच्च, समासनियमेऽपि गमिकर्मीकृतनैकनीवृतेतिवन्नसमास इति कल्पनोपपत्तेश्च । **अत एव ज्ञानानन्तरमिति । ननु**—सगुणज्ञानानन्तरं तदुपासनानिष्ठस्य कर्मानुष्ठानं संभवति; फलभूयस्त्वार्थं सहकारित्वेन तदपेक्षितं च भवति, **तथैव चाचार्यैः**—'**अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शना**'दित्यधिकरणे (ब्र. अ. ४ पा. १ सू. १६) वक्ष्यते, सगुणतदुपासनातत्फलविचारश्चात्रैव शास्त्रे महता प्रबन्धेन करिष्यते, तद्विचारसाध्यं च तदनुष्ठानमतः सगुणोपासनासहकारिकर्मानुष्ठानापेक्षितः कर्मावबोध इति तदानन्तर्यमथशब्दार्थः कुतो न भवेत्? सगुणविचारस्यानुषङ्गिकत्वात्प्रधाननिर्गुणविचारापेक्षितानन्तर्यमेव वक्तव्यमिति **चेत्**, तर्हि सगुणविद्यानुष्ठानं कस्यापि न सिध्येत्; एतच्छास्त्रविचारमन्तरेण हि तदनुष्ठानं न संभवति, एतच्छास्त्रविचारे च ब्रह्मलोकप्राप्त्यन्तसकलफलविरक्तस्य त्यक्तसमस्तकर्मणो निर्विशेषप्रेप्सया तज्जिज्ञासोरेवाधिकार इष्यते, तस्माद्विरुद्धमिदमापतितमिति—**चेत्, उच्यते;** सगुणविद्यापेक्षिणाम् अङ्गावबद्धोपासनापेक्षिणां केवलकर्मठानां च तदनुष्ठानप्रकाराद्यवगतिर्विचारितैतच्छास्त्रेभ्यो गुरुभ्योऽन्वेषणीया, गत्यन्तराभावात् । अभ्युपगम्यते हि कर्मविचारप्राचीनसंध्यावन्दनाध्ययननियमाद्यनुष्ठानार्थं निषादरथकारकर्तृकस्थपतीष्ट्याधानानुष्ठानार्थं च तत्तदवगतिः स्वयमविचारिततत्तद्वाक्यानामेव हितैषिवचनमात्रादिति । **ननु** श्रुतौ धनशब्दस्य देवलोकावाप्तिहेतुपरविद्या वाच्येति कुतोऽवगतमित्याकाङ्क्षायामाह—**तथा हि श्रुत्यन्तरमिति । प्रधानेन प्रत्ययार्थेनेति ।** विविदिषन्तीत्यत्र पञ्चमलकारकल्पनया विध्यवरुद्धायां यज्ञदानादिकरणान्वितायां भावनायां धात्वर्थस्य भाव्याकाङ्क्षापूरकत्वेनान्वये वक्तव्ये प्राधान्यादिच्छाया एव तथान्वयो न वेदनस्येति भावः । **ननु**—'यजेत' 'दद्याज्' 'जुहुया' दित्यादौ सर्वत्र धात्वर्थस्य भावनायां कारणत्वेनान्वयस्य दृष्टत्वादिहापि वेदनेच्छायास्तथैवान्वयो युक्तः; यज्ञादिषु तृतीयाश्रवणं तु सोमेन यजेतेत्यादिष्विव धात्वर्थविशेषणतया भविष्यति । **नच** सोमपयोदध्यादीनां यागहोमनिर्वर्तकतया क्रियाकारकभावो लोकसिद्ध इति युक्तस्तत्र विशेष्यविशेषणभावः, इह वेदनेच्छाया यज्ञादीनां च स न लोकसिद्ध इति न युक्तो

भामती ।

तत्किमिदानीमनुपयोग एव सर्वथेह कर्मणाम्, तथाच 'विविदिषन्ति यज्ञेन' इत्याद्याः श्रुतयो विरुध्येरन् । न; आरादुपकारकत्वात्कर्मणां यज्ञादीनाम् । **तथाहि—तमेतमात्मानं वेदानुवचनेन** नित्यस्वाध्यायेन ब्राह्मणा **विविदिषन्ति** वेदितुमिच्छन्ति, नतु विदन्ति । वस्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वात्, इच्छायाश्च प्रत्ययार्थतया प्राधान्यात् प्रधानेन च कार्यसंप्रत्ययात् । नहि राजपुरुषमानयेत्युक्ते वस्तुतः प्रधानोऽपि राजा पुरुषविशेषणतया शब्दत उपसर्जन आनीयतेऽपितु पुरुष एव, शब्दतस्तस्य प्राधान्यात् । एवं वेदानुवचनस्येव यज्ञस्यापीच्छासाधनतया विधानम् । एवं तपसोऽनाशकस्य । कामानशनमेव तपः, हितमितमेध्याशिनो हि ब्रह्मणि विविदिषा भवति, नतु सर्वथाऽनश्नतो मरणात् । नापि चान्द्रायणादितपःशीलस्य; धातुवैषम्यापत्तेः । एतानि च नित्यान्युपात्तदुरितनिबर्हणेन पुरुषं संस्कुर्वन्ति । **तथाच श्रुतिः**—'स ह वा आत्मयाजी यो वेद इदं मेऽनेनाङ्गं संस्क्रियत इदं मेऽनेनाङ्गमुपधीयते' इति । **अनेनेति** प्रकृतं यज्ञादि परामृशति । **स्मृतिश्च**—'यस्यैतेष्टाचत्वारिंशत्संस्काराः' इति । नित्यनैमित्तिकानुष्ठानप्रक्षीणकल्मषस्य च विशुद्धसत्त्वस्याविदुष एव उत्पन्नविविदिषस्य ज्ञानोत्पत्तिं दर्शयत्याथर्वणी **श्रुतिः**—'विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः' इति । **स्मृतिश्च**—'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य

वेदान्तकल्पतरुः ।

—तत्किमिति । आरात् दूरे । इमं पक्षमुपपादयति—**तथाहीति** । प्रधानेन प्रत्ययार्थेनेच्छयाऽऽख्यातोपात्तभावनायाः कार्यस्य संप्रत्ययात्समन्वयादिति । **अनेन** कर्मणा **इदं** ममाङ्गमन्तःकरणं संस्क्रियते **पुण्येन चोपधीयत** उपचीयत इति यो विदित्वा चरति कर्म, स आत्मशुद्ध्यर्थं यजनात्मयाजी, स च देवयाजिनः काम्यकर्तुः श्रेयानिति शातपथश्रुत्यर्थः । **स यदेव** यजेतेत्यत्र प्रकृतं यज्ञादि । श्रुत्यन्तरमाह—**नित्येति** । नित्यानां संस्कारद्वारा ज्ञानोत्पादकतोक्ता, इदानीं यदुक्तं

कल्पतरुपरिमलः ।

विशेषणविशेष्यभाव **इति—**वाच्यम्; देवताधिकरणे (ब्र. अ. १ पा. ३ सू. २६–३२) वक्ष्यमाणेन न्यायेनैतस्यैव रेवतीषु वारवन्तीयमिति वाक्ये रेवतीनां वारवन्तीयस्य चाधाराधेयभावस्येव यज्ञादीनां विविदिषायाश्च क्रियाकारकभावस्यापि समभिव्याहारादेव सिद्ध्युपपत्तेः । एवंच भाव्याकाङ्क्षायामिच्छाविषयभूतं वेदनमेव भाव्यत्वेनान्वेति । **नच** वेदनतदिच्छयोः कार्यकारणभावस्य लोके सिद्धत्वाद्विधिवैयर्थ्यं शङ्कनीयम्; प्रतिबन्धकपापापनोदनद्वारा यज्ञादिभिः संपन्नया स्थिरविविदिषया वेदनं भावयेदित्येतदर्थकतया विधिसार्थक्यादिति—**चेत्, उच्यते**; भावनायाः प्रथमं भाव्याकाङ्क्षायां समानपदोपात्ता प्रधानभूता वेदनसाधनत्वेन निर्ज्ञातगौणपुरुषार्थभावा विविदिषा भाव्यत्वेनान्वेतीति युक्तं, यागादिषु समानपदोपात्तत्वेऽपि स्वयं क्लेशात्मकत्वात् फलसाधनत्वेनान्यतोऽनवगतत्वाच्च भाव्यत्वेनान्वेतुमयोग्य इति तमतिक्रम्य स्वर्गादेर्भाव्यत्वेन ग्रहणे सति तं केन भावयेदित्याकाङ्क्षायां फलशिरस्कभावनाकरणत्वेनान्वितो भवति । इह यदि भावनायां करणान्तरं श्रुतं न लभ्येत, तदा विविदिषामेव करणं गृहीत्वा तत्साध्यं वेदनं फलं कल्पयेद्, नत्वेतदस्ति; यज्ञादीनां तृतीयया करणत्वेन समर्पणात् । तेषां भावनाकरणत्वेनान्वये मत्वर्थलक्षणा च परिहृता भवति; अन्यथा तेषां करणविशेषणत्वे सोमवता यागेनेतिवद् यज्ञवत्या विविदिषयेत्यादिरूपेण यज्ञेनेत्यादिसर्वेषु तृतीयान्तेषु मत्वर्थलक्षणा प्रसज्येत । एवं क्लिष्टयोजनायामपि विविदिषा भाव्येति पक्षात् फलतो न विशेषः; दध्ना जुहोतीति दधिविशिष्टहोमविधेः प्राप्ताप्राप्तविवेकेन होमसाधनतया दधिविधान इव स्थिरविविदिषासाधनतया यज्ञादिविधान एवास्य पर्यवसानात् । तस्माद्यज्ञादिभिर्विविदिषां भावयेदिति वेदनेच्छायाः फलत्वेनान्वय इत्येव युक्तम् । **ननु**—इच्छायाः प्रधानत्वेऽपि फलत्वेन नान्वयः, किंत्विष्यमाणस्यैवेति स्वर्गकामादिवाक्येषु संप्रतिपन्नं; तत्कस्य हेतोः ? लिङादिभिर्विधिशब्दैः कर्मणामिष्टसाधनत्वे प्रतीते किं तत्कर्मसाध्यमिष्टमितीष्टविशेषाकाङ्क्षायां यदिच्छाविषयत्वेन निबद्धं विशिष्योपात्तं च तदेव फलत्वेनान्वेतुं योग्यमिति योग्यतावधारणाद्, योग्यतानुसारेणेच्छामुल्लङ्घ्य तद्विषये करणान्वयस्य अश्वेन जिगमिषतीत्यादौ क्लृप्तत्वाच्च; अयं हेतुरिहापि तुल्य इति—**चेत्, उच्यते**; यज्ञादीनां ज्ञाने विनियोगेऽपि जिज्ञासा यज्ञादिद्वारवर्गमध्ये अवश्यं निवेशनीया, निवेशिता च टीकायाम्; तथाच जिज्ञासाया यज्ञादिफलत्वेनावश्याभ्युपगन्तव्यत्वात् कामोपबन्धेषु यागादिवाक्येषु स्वर्गादेर्भाव्यत्वेनानन्वयेऽन्यतः स्वर्गादिसाधनानवगत्या कामनाया निर्ज्ञातस्वविषयसाधनप्रवर्तकत्वेन गौणपुरुषार्थत्वाप्रतीत्या तस्या भाव्यत्वेनान्वयाऽयोग्यत्वात्, नामोपात्तस्वर्गकामनावैलक्षण्येनेहाख्यातोपात्ताया इच्छायाः फलत्वान्वययोग्यत्वात्, हेतुसाध्यत्वप्रतीतिसद्भावाच्च प्रधानभूतां तामुल्लङ्घ्य ज्ञानस्य फलत्वाभ्युपगमो न युक्तः; तदभ्युपगमे शास्त्रान्तरसिद्धपापक्षयरूपद्वारातिरिक्तस्यापूर्वरूपस्य कर्मणां द्वारान्तरस्यापि कल्पनापत्तेर्वक्ष्यमाणत्वात् । **ननु**—जिज्ञासायाः फलत्वान्वययोग्यत्वमसिद्धम्, स्वतःफलत्वरहितायास्तस्याः फलत्वं हि ज्ञानरूपफलजनकत्वोपाधिकं वाच्यम्; तथाच जिज्ञासाफले ज्ञाने प्रागेवेच्छासत्त्वे सैव जिज्ञासेति तस्याः सिद्धत्वात्प्राक् तदसत्त्वे तस्याः फलजनकत्वोपाधिकपुरुषार्थत्वाऽप्रतीतेश्चेति न तस्याः फलत्वान्वययोग्यतेति—**चेत्,**

भामती ।

कर्मणः' इत्यादिका । क्लृप्तेनैव च नित्यानां कर्मणां नित्येहितेनोपात्तदुरितनिबर्हणेन पुरुषसंस्कारेण ज्ञानोत्पत्तावङ्गभावोपपत्तौ न संयोगपृथक्त्वेन साक्षादङ्गभावो युक्तः; कल्पनागौरवापत्तेः । **तथाहि**—नित्यकर्मानुष्ठानाद्धर्मोत्पादः, ततः पाप्मा निवर्तते, स ह्यनित्याशुचिदुःखरूपे संसारे नित्यशुचिसुखख्यातिलक्षणेन विपर्यासेन चित्तसत्त्वं मलिनयति,

वेदान्तकल्पतरुः ।

समुच्चयवादिना सर्वेषां कर्मणां ज्ञानकार्ये मोक्षे समुच्चय इति तत्राह—**क्लृप्तेनैवेति** । नित्यानां फलं पापक्षयं ज्ञानमाकाङ्क्षते, न स्वर्गादि । **तत्र** यथा प्रकृतौ क्लृप्तोपकाराणाम् अङ्गानामतिदेशेन प्रकृतोपकारातिरिक्तोपकारकल्पनमेवं ज्ञाने विनियुक्तयज्ञादीनां क्लृप्तनित्यफलपापक्षयातिरेकेण न नित्यकाम्यकर्मसाधारणमोक्षोपयोग्युपकारः कल्प्यः । पापक्षयस्य च ज्ञानोत्पत्तिद्वारत्वं ततस्तु तमित्यादिशास्त्रसिद्धम् । नच वाच्यं–नित्येभ्यः पापक्षयस्य तस्माच्च ज्ञानोत्पत्तेरन्यतः सिद्धौ किं यज्ञेनेत्यादिना—इति; नित्यानां ज्ञानोत्पत्तिप्रतिबन्धकदुरितनिबर्हकत्वस्य विशेषतः शास्त्रान्तरादसिद्धेः । अस्मिंश्च विनियोगे सति ज्ञानोद्देशेन नित्यान्यनुतिष्ठतोऽवश्यं ज्ञानं भवति, इतरथा शुद्धिमात्रमनियता च ज्ञानोत्पत्तिरिति विनियोगोपयोगः । 'ज्ञान-

कल्पतरुपरिमलः ।

उच्यते; द्विविधा ब्रह्मज्ञानेच्छारूपा जिज्ञासा; **एका** साङ्गाध्ययनादिप्रयुक्तब्रह्मज्ञानपुरुषार्थत्वावगतिमात्रमूला, साऽनित्यदुःखमये संसारे नित्यसुखमयत्वभ्रममुत्पाद्य चित्तसत्त्वं मलिनयता पाप्मना प्रतिबद्धा सती ज्ञानोद्देशेन तदुपायेषु प्रवृत्तिं जनयितुं न प्रभवति । यदा प्रवृत्तिपर्यन्तजिज्ञासादिप्रतिबन्धकपाप्मसद्भावं शास्त्रतः पुरुषोऽवगच्छति, तदा तथाभूतजिज्ञासोपायमन्विच्छन्विविदिषावाक्येन तदुपायं यज्ञादिकमुपलभ्य तथाभूतजिज्ञासोद्देशेन यज्ञादीननुष्ठाय ततः संसारसुखमयत्वप्रदर्शकपाप्मनिवृत्त्या तस्य वस्तुसद्दुःखैकरूपत्वं निश्चित्य तदसहमानस्तज्जिहासामूलामपि ब्रह्मजिज्ञासां लभते, सा **द्वितीया** । तया ब्रह्मज्ञानोपायेषु प्रवृत्तिः । यथा भोजने सत्येव देहस्थितिबलपुष्ट्यादिकं भवेदिति तादर्थ्यावगतिमात्रमूला धातुवैषम्यकृतरोगविशेषप्रतिबद्धा भोजनेच्छा भोजनार्थप्रवृत्तिं जनयितुं न प्रभवति; तत्प्रवृत्तिपर्यन्तबुभुक्षाप्रतिबन्धकरोगसद्भावं यदा वैद्यकादवगच्छति पुरुषः, तदा रोगनिवृत्तिपूर्वकबुभुक्षोत्पत्त्युपायमन्विच्छन् वैद्यकशास्त्रेणैव तथाभूतमौषधमुपलभ्य तत्सेवनेन रोगनिवृत्त्या क्षुधामुपलभ्य तामसहमानः तन्निवृत्त्यर्थमपि बुभुक्षां लभते, तया च भोजने प्रवर्तते । अतो नात्र काचिदनुपपत्तिः । **पापक्षयं ज्ञानमाकाङ्क्षत इति** । विविदिषाद्वारेति शेषः । **ज्ञाने विनियुक्तेति** । ज्ञानार्थविविदिषाविनियुक्तेत्यर्थः । **ननु** क्लृप्तपापक्षयातिरेकेणोपकारान्तरस्याऽकल्प्यत्वेऽपि यानि पवित्रेष्ट्यभिष्टुदश्वमेधादीनि कृष्णाजिनदानादीनि कृच्छ्रचान्द्रायणादीनि च सामान्यतः पापक्षयार्थत्वेन चोदितानि काम्यकर्माणि तत्साधारण्यमिह यज्ञादिशब्दानामवर्जनीयमित्याशङ्क्य नित्यफलपापक्षयातिरेकेणेति पापक्षयो नित्यफलत्वेन विशेषितः ॥ अवश्यकर्तव्यनित्यानुष्ठानजो हि पापक्षयः स्वतः प्राप्तः; अतः प्रयुक्तिलाघवात् तमेव विविदिषार्थयज्ञादिविधिर्द्वारं गृहीत्वा निर्वृणोति, न त्ववश्यानुष्ठेयपवित्रेष्ट्यादिफलभूतमपि पापक्षयं द्वारं गृहीत्वा तत्संपादनं प्रयोजयति; अतो नित्यफलस्यैव पापक्षयस्येह द्वारता, यथा ऋत्विगपेक्षः क्रतुविधिर्धनार्जने याजनं स्वकीयोपाय इति तादर्थ्येन स्वतः प्राप्तान्ब्राह्मणानेव गृहीत्वा निर्वृणोति, नतु क्षत्रियवैश्यानपि ऋत्विजो गृहीत्वा तानार्त्विज्ये प्रयोजयतीति ब्राह्मणानामेव कृतावार्त्विज्यं तद्वत् । एवंच यस्य यदा यन्नित्यमनुष्ठेयं प्राप्तं, तेन तदा तदेव विविदिषितार्थतयानुष्ठितं फलार्थं भवति; काम्यानुष्ठानतः प्रसङ्गान्नित्यसिद्धेर्नित्यप्रयुक्तं पापक्षयद्वारमपि लभत इति प्रयुक्तिलाघवान्नित्यानामेव विनियोग इति भावः । **ननु**—प्राकृतोपकारदृष्टान्तेन पापक्षयस्येह द्वारत्वकल्पनं न युज्यते; वैषम्यात्, प्राकृतपदार्थानाम् उपकारमुखेनैव विकृतिष्वतिदेशः; **ननु** पदार्थानामतिदेशानन्तरमुपकारकल्पनेति न तत्र प्राकृतोपकारातिरिक्तोपकारकल्पनाप्रसक्तिः, इहतु प्रत्यक्षश्रुत्या प्रथममेव विनियुक्तानां यज्ञादीनामुपदिष्टाङ्गानामिव पश्चात्कल्पनीय उपकारः प्रथमाऽवगतविनियोगनिर्वाहायाक्लृप्तोऽपि सामान्यशब्दोपात्तसकलनित्यकाम्यसाधारणः कथं न कल्प्येतेत्याशङ्क्याह—**पापक्षयस्य चेति** । **स्यादेतदेवं**–यत्र पदार्थशक्तिमालोच्योपकारः कल्प्यः स्याद्, नत्वेवम्; इह पापक्षय एवोपकार इत्यपि प्रत्यक्षशास्त्रेणैव सिद्धत्वादित्यर्थः । **ननु** ततस्तु तमिति शास्त्रेण पापक्षयस्य ज्ञानोत्पत्तौ द्वारत्वं सिद्धं, नतु विविदिषोत्पत्तौ । **उच्यते**; विविदिषावाक्यानुरोधेन विशुद्धसत्त्वस्ततो विविदिषाद्वारेण पश्यतीति तस्य शास्त्रस्यार्थ इति तात्पर्यम् । एवं ततस्तु तमित्यादिश्रुतौ विविदिषान्तर्भावस्तदवतारणार्थं टीकाग्रन्थे विशुद्धसत्त्वस्येत्येतदनन्तरमुत्पन्नविविदिषस्येति विशेषणेन स्फुट इत्याचार्यैरिह न विशेषितम् । **अत्र केचित्**—संस्कारपक्षमेव सिद्धान्तमभिमन्यमाना विविदिषन्तिवाक्ये विधिर्न कल्प्यः; नित्यकर्मभिः पापक्षयस्य तद्विधिभिः पापक्षयाज्ज्ञानोत्पत्तेस्ततस्तु तं ज्ञानमुत्पद्यत इति श्रुतिस्मृतिभ्यां च सिद्धेः, अतो विविदिषन्तिवाक्यं तत्सिद्धानुवादकं—**इत्याहुः** । तन्मतमनूद्य निराकरोति **न च वाच्यमित्यादिना** । **विशेषतः शास्त्रान्तरादसिद्धेरिति** । पापान्तरनिवर्तनेनापि चरितार्थान्नित्यानुष्ठानान्न ज्ञानोत्पत्तिप्रतिबन्धकपापव्यक्तिविशेषनिबर्हणनियमः सिध्यति; अतस्तत्सिद्धये विनियोगा-

सायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः । यथाच हृदयाद्यवदानानामानन्तर्यनियमः;

भामती ।

अतः पापनिवृत्तौ प्रत्यक्षोपपत्तिद्वारापावरणे सति प्रत्यक्षोपपत्तिभ्यां संसारस्य अनित्याशुचिदुःखरूपतामप्रत्यूहमवबुध्यते, ततोऽस्य अस्मिन्ननभिरतिसंज्ञं वैराग्यमुपजायते, ततस्तज्जिहासोपावर्तते, ततो हानोपायं पर्येषते, पर्येषमाणश्चात्मतत्त्वज्ञानमस्योपाय इत्युपश्रुत्य तज्जिज्ञासते, ततः श्रवणादिक्रमेण तज्जानातीत्यारादुपकारकत्वं तत्त्वज्ञानोत्पादं प्रति चित्तसत्त्वशुद्ध्या कर्मणां युक्तम् । **इममेवार्थमनुवदति भगवद्गीता**—'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते ॥' एवंचाननुष्ठितकर्मापि प्राग्भवीयकर्मवशाद्यो विशुद्धसत्त्वः संसारासारतादर्शनेन निष्पन्नवैराग्यः, कृतं तस्य कर्मानुष्ठानेन वैराग्योत्पादोपयोगिना; प्राग्भवीयकर्मानुष्ठानादेव तत्सिद्धेः । **इममेव च पुरुषधौरेयभेदमधिकृत्य प्रववृते श्रुतिः**—'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्' इति । **तदिदमुक्तम्**—कर्मावबोधात्—**प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरिति** । अत एव न ब्रह्मचारिण ऋणानि सन्ति; येन तदपाकरणार्थं कर्मानुतिष्ठेत् । एतदनुरोधाच्च 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवाञ्जायते' इति, गृहस्थः संपद्यमान इति व्याख्येयम्; अन्यथा 'यदि वेतरथा ब्रह्मचर्यादेव' इति श्रुतिर्विरुध्येत । गृहस्थस्यापि च ऋणापाकरणं सत्त्वशुद्ध्यर्थमेव । जरामर्यवादो भस्मान्ततावादोऽन्त्येष्टयश्च कर्मजडानविदुषः प्रति, न त्वात्मतत्त्वपण्डितान् । तस्मात्तस्यानन्तर्यमथशब्दार्थः, यद्विना ब्रह्मजिज्ञासा न भवति यस्मिंस्तु सति भवन्ती भवत्येव । नचेत्थं कर्मावबोधः । तस्मान्न

वेदान्तकल्पतरुः ।

मुत्पद्यते पुंसां क्षयात्पापस्य कर्मण' इत्यादिस्मृतेरियं श्रुतिर्मूलम् । श्रुतिस्त्वेतादृशी तुल्यत्वे नैतामनुवादयति । **न संयोगपृथक्त्वेन साक्षादङ्गभाव** इत्यनेन साक्षादङ्गभावो निषिध्यते, न संयोगपृथक्त्वम्; सर्वापेक्षाधिकरणे (ब्र. अ. ३ पा. ४ सू. २६) संयोगभेदस्याश्रयिष्यमाणत्वात् । **तस्मादयमर्थः**—संयोगपृथक्त्वमस्तीत्येतावता न साक्षादङ्गभावसिद्धिरारादङ्गभावेऽपि तदुपपत्ते**रिति** । नित्यानां दुरितक्षयफलत्वे नित्यकाम्यवैषम्यायोगमाशङ्क्य—**नित्यैर्हितेने**त्युक्तम् । **चित्तसत्त्वं** चित्तगतः सत्त्वगुणः । **प्रत्यक्षोपपत्तीति** । संसारस्यासारत्वं दृष्टविषये प्रत्यक्षग्राह्यमदृष्टे तूपपत्त्या । प्रत्यक्षोपपत्त्योश्च प्रवृत्तिद्वारं चित्तगतसत्त्वं, तस्य पापकपाटनिवृत्त्यपावरणे उद्घाटने सतीत्यर्थः । धर्मब्रह्मावबोध-

कल्पतरुपरिमलः ।

न्तरमित्यर्थः । **अत्र** संस्कारपक्षावलम्बनैर्विविदिषावाक्यस्य विद्यार्थविनियोगानुपपत्त्यानुवादकत्वं शङ्कितमिति तद्दृष्ट्वा **ज्ञानोत्पत्तिप्रतिबन्धकेत्युक्तम्** । शङ्कासमाधानयोर्विविदिषार्थपक्षेऽपि तुल्यत्वात् स्वमते ज्ञानग्रहणं विविदिषोपलक्षणम् । तस्यामेव यज्ञादिविनियोगस्य प्राग्व्यवस्थापितत्वात्, सर्वापेक्षाधिकरणे (ब्र. अ. ३ पा. ४ सू. २६) चोपपादयिष्यमाणत्वात्, भाष्यकृद्भिरपि विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि विविदिषासंयोगात्तु बाह्यान्तराणि यज्ञादीनि इति यज्ञादीनां विविदिषार्थत्वस्य वक्ष्यमाणत्वाच्च, तेषां ज्ञाने विनियोगे ज्ञानोत्पत्त्यपेक्षितसद्गुरुलाभश्रवणादिप्रवृत्तिग्रहणधारणपाटवादीनामपि ज्ञानार्थं यज्ञादिसम्पाद्यत्वापत्त्या तदर्थमपूर्वस्यापि द्वारान्तरस्य कल्प्यतापत्तेश्च । ज्ञानमुत्पद्यत इतिस्मृतेर्विविदिषन्तिवाक्यमूलकत्वोक्तिस्तु पापक्षयाद् विविदिषोदये सति क्रमाज्ज्ञानमप्युत्पद्यते इत्येवंपरा स्मृतिरित्याशयेन । **श्रुतिस्त्वेतादृशीति** । एषेव दृश्यत इत्येतादृशी । आपाततो विविदिषावाक्यवत् ततस्तु तमिति श्रुतिर्दृश्यते । **वस्तु-**

१ 'तमेतमित्या'दिवाक्यैः कर्मणां विविदिषाद्वारा ज्ञानार्थत्वस्य 'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः' इत्यादिवचनैः संस्कारद्वारा ज्ञानार्थत्वस्य चावगमेऽपि जन्मान्तरानुष्ठितैः कर्मभिरेवोक्तद्वारविधया ज्ञानसिद्ध्युपपत्ताविह जन्मनि कर्मविचारं विनापि ब्रह्मविचारे प्रवृत्तिसंभवान्न धर्मविचारानन्तर्यमथशब्दार्थः । वेदान्ताध्ययनं तु साधारणं न जन्मान्तरसंपादितं ब्रह्मविचारहेतुरिति इहजन्मन्यपि तदावश्यकत्वेन न दोषः । **ननु**—कर्मावगमोऽपि इह जन्मनि संपादित एव ब्रह्मविचारहेतुः; एतज्जन्मप्रयुक्तत्वादृणसंबन्धस्य, **तथाचश्रुतिः**—'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवाञ्जायत' इति अपाकृतर्णस्यैव मोक्षाधिकाराच्च । **तदुक्तम्**—'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥' इति । नच—'ब्रह्मचर्यादेव प्रव्रजेदि'ति श्रुतिविरोधादुक्तस्मृतिरपस्मृतिरिति—युक्तम्; 'ब्रह्मचर्यं समाप्य गृही भवेत्' इत्यादिश्रुतिस्मृतिविरोधेन ब्रह्मचर्यादेव संन्यासविधानस्य गृहानधिकार्यन्धपङ्ग्वादिविषयत्वस्यैव युक्तत्वादिति कर्मावबोधानन्तर्यमेवाथशब्दार्थः इति—**चेन्न;** 'जायमानो ब्राह्मण' इतिवाक्यं हि 'हृदयस्याग्रेऽवद्यति' इत्यवदानविध्यर्थवाद इत्येव युक्तम्; ऋणशब्देन पुत्रयज्ञब्रह्मचर्याणां तद्विधीनां वा विवक्षणे जायमाने विधिप्रतिपत्तिसामर्थ्यविकले तत्संबन्धासंभवात्, गृहस्थो जायमान इति व्याख्याने 'गृहात्प्रव्रजेत्' इति श्रुतिविरोधात् । एतेन—'ऋणानि त्रीण्यपाकृत्ये'ति स्मृतिरप्यपस्मृतिरिति—**व्याख्याता;** 'ब्रह्मचर्यादेव प्रव्रजेत्' इति श्रुतिविरोधात् । 'ब्रह्मचर्यं समाप्य गृही भवेदिति'त्वविरक्तविषयं न विरक्तविषयं 'ब्रह्मचर्यादेवे'ति वचनं बाधितुं क्षमते । 'ब्रह्मचर्याद्वा गृहाद्वा वनाद्वे'ति अविशेषेण श्रवणान्नान्धपङ्ग्वादिविषयमपि तद्वचनमिति सर्वमनवद्यम्—**इति विवरणमतानुयायिनः ॥**

क्रमस्य विवक्षितत्वान्न तथेह, क्रमो विवक्षितः शेषशेषित्वेऽधिकृताधिकारे वा प्रमाणाभावात्,

भामती ।

कर्मावबोधानन्तर्यमथशब्दार्थ इति सर्वमवदातम् । **स्यादेतत्**—। मा भूदग्निहोत्रयवागूपाकवदार्थः क्रमः, श्रौतस्तु भविष्यति; 'गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत्' इति जाबालश्रुतिर्गार्हस्थ्येन हि यज्ञाद्यनुष्ठानं सूचयति । **स्मरन्तिच**—'अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः । इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥' **निन्दन्ति च**—'अनधीत्य द्विजो वेदाननुत्पाद्य तथात्मजान् । अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः' इत्यत आह—**यथाच हृदयाद्यवदानानामानन्तर्यनियमः** । कुतः, 'हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षसः' इत्यथाग्रशब्दाभ्यां क्रमस्य विवक्षितत्वात् । न तथेह क्रमो विवक्षितः; श्रुत्या तथैवानियमप्रदर्शनात्, 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा' इति । एतावता हि वैराग्यमुपलक्षयति । अतएव 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति श्रुतिः । **निन्दावचनं** चाविशुद्धसत्त्वपुरुषाभिप्रायम् । अविशुद्धसत्त्वो हि मोक्षमिच्छन्नालस्यात्तदुपायेऽप्रवर्तमानो गृहस्थधर्ममपि नित्यनैमित्तिकमनाचरन्प्रतिक्षणमुपचीयमानपाप्माधोगतिं गच्छतीत्यर्थः । **स्यादेतत्**—मा भूच्छ्रौत आर्थो वा क्रमः, पाठस्थानमुख्यप्रवृत्तिप्रमाणकस्तु कस्मान्न भवतीत्यत आह—**शेषशेषित्वे प्रमाणाभावात्** । शेषाणां समिदादीनां,

वेदान्तकल्पतरुः ।

योर्हेतुहेतुमद्भावाभावेऽपि क्त्वाश्रुत्या पौर्वापर्यमाशङ्कते—**स्यादेतदिति** । **अग्निहोत्रयवागूपाकवदिति** । **पञ्चमे स्थितम्-'अर्थाच्च'** (जै. अ. ५ पा. १ सू. २) अग्निहोत्रं जुहोति यवागूं पचतीत्यत्र किं होमपाकयोर्यथापाठं क्रमः, उत पाक एव प्रथम इति संशये, नियामकश्रुत्यभावाद्धोमनिर्वृत्तेश्च द्रव्यान्तरेण संभवाद्यवागूपाकस्य चारादुपकारकत्वाद्धोमप्राथम्ये **प्राप्ते—राद्धान्तः**; पदार्थः प्रयोजनापेक्षोऽनुष्ठानविधिरेव प्रयोजनोपयोगिनं क्रमविशेषं नियच्छतीति पक्त्वैव होतव्यम् । नच द्रव्यान्तरानयनं; श्रुतद्रव्यवैयर्थ्यप्रसङ्गात् । नच दृष्टार्थत्वे सत्यारादुपकारकत्वं पाकस्येति । **पाठस्थानेति** ।

कल्पतरुपरिमलः ।

तस्तूभयोरप्यान्तरालिकफलभेदोऽस्ति, पापक्षयरूपद्वारावगमस्ततस्तु तमिति श्रुत्यपेक्षः, पापक्षयाज्ज्ञानोत्पत्तौ विविदिषान्तर्भावो विविदिषन्तिवाक्यापेक्ष इति । अतः कथमपि नानुवादत्वशङ्केति भावः । **अथवा एतादृशी** एतत्समाना कल्प्यविधिकत्वाविशेषात् तत्र यदि विधिः श्रूयेत, तदा विधिश्रवणरहितं विविदिषावाक्यं तदनुवादकं कल्प्येतापि, न त्वेतदस्तीति भावः । सर्वापेक्षाधिकरणे इत्युपलक्षणम् । सर्वथापि त एवोभयलिङ्गादित्यधिकरणे (ब्र. अ. ३ पा. ४ सू. ३४) चेति द्रष्टव्यम् । **हेतुहेतुमद्भावाभावेऽपीति** । **ननु**—अनुष्ठानद्वारा हेतुहेतुमद्भावाभावेऽपि प्रामाण्यप्रतिपादनादिद्वारा सोऽस्ति; पूर्वतन्त्रे **प्रथमाध्यायप्रतिपादितं** वेदप्रामाण्यमिहाप्यपेक्षितं, **द्वितीयाध्यायनिरूपितं** शब्दान्तरादिषट्कं विद्याभेदाभेदचिन्तायां, **तृतीयाध्यायनिरूपितं** श्रुतिलिङ्गादिकं सर्वत्रापि तत्तदधिकरणविषयवाक्यार्थनिर्णये, **पञ्चमाध्यायनिरूपितं** श्रुत्यर्थादिकं वियदादिसृष्टयर्चिरादिपर्वक्रमचिन्तायां, **सप्तमाष्टमनिरूपितम**तिदेशप्रमाणं 'तस्यैतस्य तदेव रूपं यदमुष्य रूप'मित्याद्यर्थनिर्णये चापेक्षितम् । **'कुशाच्छन्दःस्तुत्युपगानवत्तदुक्तं'** (ब्र. अ. ३ पा.३ सू. २६) **'प्रदानवदेव तदुक्तं'** (ब्र. अ. ३ पा. ३ सू. ४३) मित्यादिषु च पूर्वतन्त्रसंमतिप्रदर्शने तत्तदधिकरणार्थज्ञानमपेक्षितम् । आचार्यैः प्रथमसूत्रव्याख्यानावसाने वेदांतमीमांसा तदविरोधितर्कोपकरणेति भाष्यव्याख्यानावसरे तस्या अविरोधिनः श्रुतिलिङ्गादयस्तार्तीयाः पाञ्चमिकाः श्रुत्यादयो वेदप्रामाण्यपरिशोधकाः कर्ममीमांसायां विचारिता इति पूर्वतन्त्रापेक्षा स्फुटीकृता, अतो हेतुहेतुमद्भावाभावोक्तिरयुक्तेति—**चेत्, उच्यते**; पूर्वतन्त्र इवात्रापि शास्त्रे वेदप्रामाण्यादीनि सूत्रितान्येव । **अत एव च नित्यत्व** (ब्र. अ. १ पा. ३ सू. २९) **मिति हि** वेदप्रामाण्यं सूत्रितं,—**'नानाशब्दादिभेदादिति** (ब्र. अ. ३ पा. ३ सू. ५८) शब्दान्तरादिकं, **'शब्दादेव प्रमितः'** (ब्र. अ. १ पा. ३ सू. २४) **आकाशस्तल्लिङ्गात्** (ब्र. अ. १ पा. १ सू. २२) **तथा चैकवाक्यतोपबन्धात्** (ब्र. अ. ३ पा. ४ सू. २४) **प्रकरणा** (ब्र. अ. १ पा. ३ सू. ९) दित्यादिभिः श्रुतिलिङ्गादिकं, **'श्रुत्यादिबलीयस्त्वाच्च न बाध'** (ब्र. अ. ३ पा. ३ सू. ४९) इत्यादौ श्रुतिलिङ्गादिबलाबलं, **'विपर्ययेण तु क्रम'** (ब्र. अ. २ पा. ३ सू. १४) इत्यादिभिरपेक्षितं क्रमप्रमाणजातम्, **अतिदेशाच्च** (ब्र. अ. ३ पा. ३ सू. ४६) त्यतिदेशप्रमाणमित्येतत्सर्वं सूत्रितमेव । भाष्यकारादिभिः स्फुटीकर्तव्यता तु पूर्वतन्त्रसूत्रेष्वपि समाना । तदुक्तमित्येतदत्रैव व्याख्यानेनावगन्तुं शक्यं न कर्मविचारमपेक्षते; अन्यथा 'तद्धैके आहुरसदेवेदमग्र आसी'दिति वाक्यार्थावगत्यर्थमसद्वादिशास्त्रविचारानन्तर्यमप्यथशब्दार्थः स्यात् । आचार्यैस्तु श्रुतिलिङ्गादयः पूर्वतन्त्रे निरूपिता, इत्येतावदुक्तं, नत्विह तदपेक्षाऽस्तीति; तत्र हि तदनन्तरं न्यायशास्त्रस्यापेक्षा कण्ठत उक्ता इति न्यायशास्त्रस्योपयोग इति । अथापि तदानन्तर्यमथशब्दार्थो नेष्यते, तथाऽपेक्षोक्तिरहितकर्मविचारानन्तर्यस्य क्वाथशब्दार्थत्वप्रसक्तिः । **आरादुपकारकत्वादिति** । तथात्वसंभवादित्यर्थः ।

वेदान्तकल्पतरुः ।

क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात् (जै. अ. ५ पा. १ सू. ४) 'समिधो यजति' इत्यादिषु क्रमपठितप्रयाजेषु चिन्ता—किं यथापाठमनुष्ठानक्रमः, उत न । **तत्र** वाक्यानां स्वार्थमात्रावसितत्वान्न क्रमपरतेत्यनियमप्राप्तौ—**सिद्धान्तः**; यथैतानि वाक्यानि स्वार्थविधायीनि, तथानुष्ठानापेक्षितस्मृत्युपयोगीन्यपि । तानि च क्रमवन्ति स्वाध्यायविध्यध्यापितानि क्रमवन्त्येव स्मरणानि जनयन्ति, स्मृतस्य चानुष्ठानमिति स्मरणक्रमेणानुष्ठानं नियम्यते, एवं क्रमपाठोऽपि दृष्टार्थो भविष्यति । तस्मात् पाठक्रमेण नियम इति । **सूत्रार्थस्तु** एकस्मिन् क्रतौ श्रूयमाणानां प्रयाजादीनां पाठक्रमेण प्रयोगक्रमो नियम्येत; तस्य पाठक्रमस्यानुष्ठाने लोके गुणत्वावगमात्, तद्यथा स्नायादनुलिम्पेत भुञ्जीतेति ॥ **'स्थानाच्चोत्पत्तिसंयोगात्'** (जै. अ. ५ पा. १ सू. १३) । ज्योतिष्टोमविकारे साद्यस्कसंज्ञेऽतिदेशप्राप्तेष्वग्नीषोमीयादिपशुषु सहत्वगुणविधानार्थं वचनं श्रूयते 'सह पशूनालभते' इति । तद्विधानाच्च प्राकृतः प्रथममग्नीषोमीयस्ततः सवनीयः ततोऽनुबन्ध्य इत्येवंरूपः क्रमो निवर्तते । सहत्वं चेदं सवनीयस्थाने; तथा सति हीतरयोस्तुल्यवत् स्थानचलनं भवति । सवनीयश्चाश्विनग्रहग्रहणानन्तरकालः प्रकृतावाम्नायते; आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति । **तत्रै**ककालत्वलक्षणसहत्वासंभवादवश्यंभाविनि क्रमे कः प्रथमं प्रयुज्यतामित्यपेक्षायां किमनियमेनैषां प्राथम्यमुत सवनीयस्येति संशयः । तत्र नियामकश्रुत्याद्यभावादनियमे प्राप्ते—**राद्धान्तः; स्थानात्**सवनीयप्राथम्यं नियम्येत, कुतः ? **उत्पत्तिसंयोगात्**; प्रकृतौ सवनीयस्याश्विनग्रहणानन्तर्यमुत्पत्ताववगतं, विकृतौ च तेनैव कालेन स उपस्थापितः, अग्नीषोमीयस्तु सहत्ववचनेन स्वस्थानाच्चालितस्ततः प्रथमं सवनीयस्यैवोपाकरणादिप्रयोगः । इतरयोस्तु तत्साहित्यवचनात् तदानन्तर्यं, मिथस्त्वनियमः । **अथवा** प्रकृतिदृष्टपौर्वापर्यस्यासति बाधके त्यागायोगात् प्रथममग्नीषोमीयमुपाकृत्यानुबन्ध्य उपाकर्तव्य इति ॥ **'मुख्यक्रमेण चाङ्गानां तदर्थत्वात्'** (जै. अ. ५ पा. १ सू. १४) 'सारस्वतौ भवत एतद्वै दैव्यं मिथुनं यत्सरस्वती सरस्वांश्चेति' सरस्वतीदैवतं सरस्वद्दैवतं च युगपत्कर्मद्वयं श्रूयते । तत्र च सरस्वतीदैवतस्य याज्यानुवाक्यायुगलं प्रथममाम्नायते, तदनन्तरं पुंदैवतस्य । **तत्र** मन्त्राणां प्रयोगशेषत्वाद्याज्यानुवाक्यापाठक्रमेण प्रधानक्रमोऽवगतः । अङ्गविशेषे निर्वापादौ संशयः; किमनियतोऽस्य क्रमः, उत प्रधानक्रमेण नियत इति । **तत्र** याज्यानुवाक्यापाठक्रमस्य प्रधानमात्रगोचरत्वादङ्गानामनुष्ठानक्रमे श्रुत्याद्यभावान्मुख्यक्रमस्य च प्रमेयत्वेन प्रमाणत्वानुपपत्तेरनियमे प्राप्ते—**सिद्धान्तः; मुख्यक्रमेणाङ्गानां** क्रमो **नियम्येत, तदर्थत्वात्**, प्रधानार्थत्वादङ्गानाम् । यद्यपि मुख्यक्रमस्य याज्यानुवाक्यापाठक्रमापेक्षया प्रमेयत्वं; तथापि प्रमितस्यास्य धूमादेरिवान्यत्र प्रमाणत्वमविरुद्धम् । प्रधानस्य हि प्रयोगविधिना साङ्गस्यैव प्रयोगश्चोदितः, स चावर्जनीयाद्यवधानादधिकव्यवधिमङ्गानां न सहते । यदि तु प्रधानान्तरसंनिधा-

कल्पतरुपरिमलः ।

अनुष्ठानापेक्षितेति । ननु—अनुष्ठानापेक्षस्मृत्युपयोगिनो मन्त्रा एव, न विधिवाक्यानीति न तत्पाठक्रमेणानुष्ठानकाले क्रमिकपदार्थस्मृतयो भवन्तीति—**चेत्, सत्यम्**; मन्त्रपाठक्रमाभावे विधिपाठक्रमोऽप्यनुष्ठानकालपदार्थस्मृतिक्रमनियामकत्वेनाश्रीयते तस्य दृष्टार्थत्वायेत्याह—**एवं क्रमपाठोऽपीति । तद्यथेति ।** लोके स्नायादनुलिम्पेदित्यादौ पाठक्रमोऽनुष्ठानक्रमार्थ एव । अतएवानुलिम्पेत्स्नायादितिवदन्तमभिज्ञेन मैवं वादीः, स्नायादनुलिम्पेदिति वद, तथैवानुष्ठानक्रमादिति व्युत्पाद्यते, तस्य तादर्थ्याभावे तथा व्युत्पादनं न क्रियेतेति भावः । **तद्विधानाच्चेति ।** सहत्वविधानादौपवसथ्येऽहन्यग्नीषोमीयस्ततः सौत्येऽहनि सवनत्रयव्यापिसवनीयपश्वनुष्ठाने सत्यवभृथानन्तरमनुबन्ध्य इत्येवंरूपः प्राकृतक्रमो निवर्तेत इत्यर्थः । **अधिकव्यवधिमिति ।** साङ्गप्रयोगविधिबलादङ्गानां प्रधानसाहित्यमवगतं, तच्चैकक्षणानुष्ठेयत्वरूपं न संभवतीति संनिकर्षरूपं पर्यवस्यति । स च संनिकर्षः प्रधानाव्यवहितपूर्वापराङ्गवद्व्यवहिताङ्गानामात्यन्तिको न संभवतीति यस्याङ्गस्य यावद्भिः स्वप्रधानाङ्गैः प्रधानान्तराङ्गैर्वा व्यवधानमवर्जनीयं तत्तावद्भिर्व्यवधानं सहते, नान्यैः; ततश्च पश्चादनुष्ठेयस्य प्रधानस्याङ्गं निर्वापादि प्रथमानुष्ठेयप्रधानाङ्गान्निर्वापादितः पूर्वं यद्यनुष्ठीयेत, तदा तदङ्गमनुज्ञाताधिकेनापि पश्चादनुष्ठीयमानप्रथमप्रधानाङ्गेन स्वप्रधानाद्व्यवहितं स्यात्, तन्न सहते अङ्गप्रधानसाहित्यबोधकः प्रयोगविधिरित्यर्थः । मुख्यक्रमानादरे पाश्चात्यप्रधानाङ्गस्य पूर्वप्रधानाङ्गेन प्रयोगविध्यननुज्ञातं व्यवधानं भवेदित्यमुमेवार्थं विवृण्वन्नाह—**यदि त्विति ।** अस्मिन्नर्थेऽस्य वाक्यस्येत्थं योजना । यदि प्रधानान्तरस्य प्रथमप्रधानस्य संनिधौ तत्संनिकृष्टतया तदङ्गानुष्ठानं, द्वितीयप्रधानाङ्गानुष्ठानानन्तरं प्रथमप्रधानाङ्गानुष्ठानमिति यावत् । तथानुष्ठाने हि प्रथमप्रधानाङ्गानि द्वितीयप्रधानाङ्गव्यवधानाभावात्स्वप्रधानसंनिकृष्टानि भवन्ति, तद तथा मुख्यक्रमानादरेणानुष्ठाने अङ्गानि प्रथमानुष्ठीयमानद्वितीयप्रधानाङ्गनिर्वापादीनि तेनैव पश्चादनुष्ठीयमानप्रथमप्रधानाङ्गनिर्वापादिना स्वप्रधानाद्विप्रकृष्येरन्निति । यदितु प्रधानान्तरसंनिधावन्यप्रधानाङ्गानुष्ठानं, तदा तेनैव प्रधानान्तरेणान्यप्रधानाङ्गानि स्वप्रधानाद्विप्रकृष्येरन्नित्यापाततः प्रतीयमानोऽर्थस्तु न ग्राह्यः; मुख्यक्रमानादरे पाश्चात्यस्य पुंदैवतयागस्य किमङ्गं पूर्वेण स्त्रीदैवतयागेन व्यवहितं स्यादित्यापाद्यते, अवदानात्प्राचीनानां हि तदङ्गानां पूर्वप्रधानेन व्यवधानमातिदेशिकपाठक्रमा-

भामती ।

शेषिणां चाग्नेयादीनां एकफलवदुपकारोपनिबद्धानां एकफलावच्छिन्नानां एकप्रयोगवचनोपगृहीतानां एकाधिकारिकर्तृकाणां एकपौर्णमास्यमावस्याकालसंबद्धानां युगपदनुष्ठानाशक्तेः, सामर्थ्यात्क्रमप्राप्तौ, तद्विशेषापेक्षायां पाठादयस्तद्भेद-

वेदान्तकल्पतरुः ।

श्चन्याङ्गानुष्ठानं, तदा तेनैव स्वप्रधानादङ्गानि विप्रकृष्येरन्; अतो मुख्यक्रमादङ्गक्रमनियम इति ॥ **प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात्** (जै. अ. ५ पा. १ सू. ८) वाजपेये-'सप्तदश प्राजापत्यान्पशूनालभत' इति सप्तदश यागा अङ्गत्वेन श्रूयन्ते; तेषां च वैश्वदेवीं कृत्वा सह प्रचरन्तीति प्रयोगसाहित्यश्रवणादेकोपक्रमोपसंहार एक एवावान्तरप्रयोगः । तेनैषामतिदेशप्राप्ताः प्रोक्षणादिधर्मा न एकैकत्र समापनीयाः, किं तर्हि, सर्वेषु पशुष्वेक एव पदार्थः परिसमापनीयस्ततोऽन्यस्ततोऽन्यः; इतरथा ह्येकस्मिन्पशौ सर्वाङ्गानुष्ठाने प्रधानस्याङ्गैर्विप्रकर्षः स्यात् । **तत्र** प्रथममेकपदार्थानुष्ठाने विशेषतो वेदाभ्यनुज्ञाभावादिच्छैव नियामिका । तदेवं स्थिते द्वितीयादिपदार्थप्रयोगे संशयः: किं प्रथमइव द्वितीयादावपीच्छैव कारणमुत प्रथमप्रवृत्त्यैव नियम इति । **तत्र पूर्वपक्षः**—न तावत् श्रुत्यायस्ति नियामकम्: प्रथमाङ्गप्रवृत्तिश्च पौरुषेयी वेदेन नाभ्यनुज्ञायत इति न तद्वशादुत्तरनियमः । तेन प्रथमतराङ्गाश्रितपुरुषेच्छैव चरमतराङ्गनियामिका । प्रयोगसौकर्यं चैवं लभ्यते; इतरथा हि प्रथमं प्रयोगानुसंधानव्यग्रमनस उपरितनं च प्रयोगं तद्वशेन तन्वानस्य मतिक्लेशः स्यात् । तस्मादनियम इति **प्राप्ते—राद्धान्तः**; एकप्रयोगतया **तुल्यकालानां** प्रोक्षणाद्यङ्गानां **प्रवृत्त्या** क्रमनियमः; कुतः? **तदुपक्रमात्** तेन प्रधानेनाङ्गानामुपक्रमात्, तदेकप्रयोगत्वादित्यर्थः । सप्तदश यागाङ्गानि सह प्रयोज्यानि प्रथमाङ्गानुष्ठाने सति द्वितीयादौ षोडशभिर्व्यवधानमभ्यनुजानन्ति न ततोऽधिकम्: प्रावृत्तिकक्रमाश्रयणे च सप्तदशसु प्रथमाङ्गानुष्ठाने द्वितीयो धर्मः प्रथमादिपशुषु क्रियमाणः षोडशभिरेव व्यवधीयते, क्रमान्तराश्रयणेऽधिकैरपि व्यवधानं स्यात्: अतः प्रयोगवचनकोपपरिहाराय प्रवृत्त्या नियम इति । शेषाणां शेषिणां च क्रमापेक्षायां हेतुमाह—**युगपदिति** । युगपदनुष्ठानप्राप्तौ क्रमः स्यात्तदेव कुतस्तत्राह—**एकपौर्णमासीति** । षण्णां मध्ये त्रयः पूर्णमास्या संबद्धास्त्रयोऽमावास्यया । कालैक्येऽपि यदि कर्तृभेदः स्यात्, तदा न क्रमोऽपेक्ष्येत तन्माभूदित्याह—**एकाधिकारीति** । स्वामित्वेनाधिकारित्वं तस्यैवानुष्ठातृत्वेन कर्तृत्वम् । एकाधिकारिकर्तृकत्वे हेतुमाह—**एकप्रयोगवचनेति** । यजेतेत्याख्याते कर्त्रैक्यस्य विवक्षितत्वात्प्रयोगवचने कर्त्रैक्यं सिद्धम् । एकप्रयोगवचनपरिग्रहे हेतुमाह—**एकफलवदिति** । एकश्चासौ फलवतः प्रधानस्य उपकारश्च तस्मिन् समुच्चित्य साधनत्वेन उपनिबद्धाः शेषाः, एकेन फलेनावच्छिन्नाः शेषिणोऽत एकप्रयोगवचनोपगृहीता

कल्पतरुपरिमलः ।

दिप्राप्तं सह्यमेव, अवदानादिमध्ये तु न कस्यापि तेन व्यवधानप्रसक्तिरस्ति; अवदानादिप्रदानान्तस्य पूर्वप्रधानानन्तरमेवानुष्ठानात् । अतः प्रधानान्तरव्यवधानापादनायोगात् पूर्वोक्त एवार्थो ग्राह्यः । **अतो मुख्यक्रमादिति** । यद्यपि वक्ष्यमाणप्रवृत्तिक्रमोऽप्यत्र संभवति, याज्यानुवाक्याप्रवृत्तिक्रमेण निर्वापादयः कार्याः; अन्यथा पुंदैवत्ययागाङ्गयोर्निर्वापानुवचनयोरननुज्ञातव्यवधानप्रसङ्गादिति, तथापि प्रवृत्तिक्रमवद् मुख्यक्रमस्यापि पदार्थक्रमनियमनसामर्थ्यमस्ति, अङ्गानामिव अङ्गप्रधानयोरपि परस्परं वर्जनीयव्यवधानस्य परिहरणीयत्वात्; अतस्तदपि प्रमाणमिह संभवतीत्युदाहृतम् । मन्त्रक्रमं विधाय 'सारस्वतौ भवतः एतद्वै दैव्यं मिथुनं यत् सरस्वती च सरस्वांश्चे'ति विधिवाक्यशेषगतपाठक्रममात्रेण मुख्यक्रमं निश्चित्य चेत्थमुदाहृतम् । मुख्यक्रमस्यासंकीर्णोदाहरणं त्विदं दर्शपूर्णमासयोर्दधिधर्माः पूर्वं पठिताः, तत आग्नेयस्य निर्वापादयः, याज्यानुवाक्ययोस्तु विपरीतः पाठः । तत्र प्रवृत्तिद्वयं परस्परविरुद्धं प्रयाजशेषेण हवींष्यभिघारयतीति विहितप्रयाजशेषाभिघारणक्रमे न नियामकं, किंतु मुख्यक्रमादाग्नेयस्य प्रथममभिघारणमिति । **प्रधानस्याङ्गैर्विप्रकर्षः स्यादिति** । यत्र पशौ सर्वाण्यङ्गानि प्रथममनुष्ठितानि तत्पशुयागात् प्रकृतौ तत्संनिहितान्यप्यङ्गान्यत्यन्तं विकृतौ विप्रकृष्येरन्, अतः पदार्थानुसमय एव कार्यो न काण्डानुसमय इत्यर्थः । **'संनिपाते प्रधानानामेकैकस्य गुणानां सर्वधर्मः स्यात्'** (जै. अ. ५ पा. २ सू. १) इत्यधिकरणार्थोऽयं प्रकृताधिकरणापेक्षितो वर्णितः । प्रकृताधिकरणार्थमाह—**द्वितीयादिपदार्थप्रयोग इति** । प्रवृत्तिक्रमानादरे तत्तत्पशुगतानामुपाकरणप्रोक्षणादिपदार्थानां परस्परप्रत्यासत्तिरेकरूपा न स्याद्, अतस्तद्वैषम्यपरिहाराय पङ्क्तिपरिवेषणन्यायेन प्रवृत्तिक्रम एष्टव्य इत्यर्थः । **त्रयः पूर्णमास्येति** । यदाग्नेयवाक्यस्यार्थभेदेन द्वेधा विभागे सति 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां चाच्युतो भवती'ति वाक्येन अमावास्यायामेक आग्नेयो विधीयते, 'यदाग्नेयोऽष्टाकपालः पौर्णमास्यां चाच्युतो भवती'ति वाक्येन पौर्णमास्यामपरः; ततश्च पौर्णमास्यामाग्नेयाग्नीषोमीयोपांशुयाजास्त्रयः, अमावास्यायामाग्नेयश्चैतदधियागास्त्रय इत्यर्थः । **एकश्चासाविति** । सर्वैरङ्गैः समुच्चितैः स्वस्वासाधारणदृष्टादृष्टोपकारद्वारकैरेकः प्रधानगतफलजननसामर्थ्योद्बोधनरूपाखण्डोपकारो जायत इत्येकादशे स्थिता मीमांसकमर्यादा । **ननु**—अध्ययनवदर्थावबोधार्थो विचारोऽपि वेदपाठक्रमेण स्यादिति कर्मब्रह्मकाण्डयोर्विचारे पाठक्रमो नियामकः स्याद्; मुख्यक्रमो वा

भामती ।

नियमाय प्रभवन्ति । यत्र तु न शेषशेषिभावः, नाप्येकाधिकारावच्छेदः, यथा सौर्यार्यमणप्राजापत्यादीनां; तत्र क्रमभेदापेक्षाभावान्न पाठादिः क्रमविशेषनियमे प्रमाणम्, अवर्जनीयतया तस्य तत्रागतत्वात् । नचेह धर्मब्रह्मजिज्ञासयोः शेषशेषिभावे श्रुत्यादीनामन्यतमं प्रमाणमस्तीति । **ननु** शेषशेषिभावाभावेऽपि क्रमनियमो दृष्टः, यथा गोदोहनस्य पुरुषार्थस्य दर्शपौर्णमासिकैरङ्गैः सह, यथावा 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति दर्शपौर्णमाससोमयोरशेषशेषिणोरित्यत आह—**अधिकृताधिकारे वा प्रमाणाभावात्** । इति योजना । स्वर्गकामस्य हि दर्शपौर्णमासाधि-

वेदान्तकल्पतरुः ।

इति । **सौर्यार्यमणेति** । **एकादशे स्थितम्-'अङ्गवत्क्रतूनामानुपूर्व्यम्'** (जै. अ. ५ पा. ३ सू. ३२) सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' 'आर्यमणं चरुं निर्वपेत्स्वर्गकामः' 'प्राजापत्यं चरुं निर्वपेच्छतकृष्णलमायुष्कामः' इत्यादिषु क्रमपठितक्रतुषु चिन्ता । किं पाठक्रमेण प्रयोज्या, उतानियमेनेति । **तत्र** यथाङ्गानां समिदादीनामेकेन युगपत्करणाशक्तेः क्रमाकाङ्क्षायां पाठात् क्रमनियमः, एवं क्रतूनामपीति **प्राप्ते—राद्धान्तः**; **'न वाऽसंबन्धात्'** (जै. अ. ५ पा. ३ सू. ३३) अङ्गेष्वेकप्रयोगवचनपरिग्रहादस्ति क्रमाकाङ्क्षा, क्रतुषु नानाफलेषु नैकः प्रयोगवचनोऽस्ति, नच सर्वे मिलित्वा प्रयोजयन्ति, तेनैषामेकप्रयोगवचनसंबन्धाभावान्नास्ति क्रमाकाङ्क्षा, किंतु पुरुषस्य । नच तदाकाङ्क्षितं विधिप्रतिपाद्यमिति तदिच्छयैव क्रमः; पाठक्रमस्त्वध्ययनार्थ इति । युगपत्पाठासंभवेनावर्जनीयतया पाठक्रमस्यागतत्वात्तन्नियमस्य चाध्ययनार्थत्वादित्यर्थः । **गोदोहनस्य पुरुषार्थत्वं चतुर्थे चिन्तितम्**-यस्मिन्प्रीतिः पुरुषस्य तस्य लिप्सार्थलक्षणाऽविभक्तत्वात् (जै. अ. ४ पा. १ सू. २) दर्शपूर्णमासयोर्गोदोहनेन पशुकामस्य प्रणयेदिति श्रूयते । तत्र गोदोहने क्रत्वर्थत्वपुरुषार्थत्वसंदेहे पशुकामस्येति समभिव्याहाराद्वाक्येन क्रतूपकारकत्वेन चोभयार्थमिति **प्राप्ते—सिद्धान्तः**; नोपकारकत्वं शेषत्वं, किंतु तादर्थ्यम्; तथाच गोदोहनस्य पशुशेषत्वान्न क्रत्वङ्गत्वम्, अङ्गापेक्षा च क्रतोरुपकाराय; अन्यार्थस्यापि

कल्पतरुपरिमलः ।

नियामकः स्यात्; स्वाध्यायाध्ययनेनार्थज्ञानं भावयेदित्यध्ययनविधिवाक्यविपरिणामे मुख्ययोः कर्मब्रह्मकाण्डाध्ययनयोः पौर्वापर्यस्य क्लृप्तत्वात्, प्रवृत्तिक्रमो वा स्याद्; अध्ययनगृहीतेन स्वाध्यायेनार्थज्ञानं भावयेदिति तद्विधिविपरिणामपक्षे अध्ययनमीमांसारूपयोरङ्गयोर्मध्ये अध्ययने क्रमस्य प्रवृत्तत्वादित्याशङ्क्य एकप्रयोगावच्छिन्नतया एकपुरुषानुष्ठेयत्वेन क्रमाकाङ्क्षायां पाठक्रमादिर्नियामको भवति, नचात्र तदस्ति; कर्मब्रह्मविचारयोर्विलक्षणाधिकारिकत्वात्, एकाधिकारिकत्वेन क्रमाकाङ्क्षाकल्पने च वेदभाष्यवद्विचारस्याप्यादित आरभ्य प्रवृत्तिप्रसङ्गाच्चेति दर्शयितुं यत्र क्रमाकाङ्क्षा नास्ति तत्र पाठक्रमस्यानियामकतायामधिकरणमुदाहरति—**एकादशे स्थितमिति** । एकादश इति प्रामादिकः पाठः । **अङ्गवत्क्रतूनाम्** (जै. अ. ५ पा. ३ सू. ३२) इत्याधिकरणं हि पाञ्चमिकम् । **अथवा** पञ्चमतृतीयपादगतमेकादशमिदमधिकरणमित्यभिप्रायमेकादश इत्येतद्योज्यम् । **अन्ते तूत्तरयोर्दध्यात्** (जै. अ. ५ पा. ३ सू. १३) **इति** सूत्रं तत्पूर्वाधिकरणप्रत्युदाहरणतया तच्छेषभूतं, तस्याधिकरणान्तरत्वे त्वेकादश इत्यस्यातीते इति शेषोऽध्याहार्यः । **किंतु पुरुषस्येति** । वस्तुतः पुरुषस्यापि नास्ति काम्यनैमित्तिकेषु क्रतुषु क्रमाकाङ्क्षा; कामनानां निमित्तानां च क्रमनियमाभावात्, तदधीनत्वाच्च काम्यनैमित्तिकानुष्ठानस्य । **क्रत्वर्थत्वेति** । केवलं पुरुषशेषत्वम्, उत क्रतुशेषत्वमपीति संदेहे इत्यर्थः । **पशुकामस्येति** । **समभिव्याहाराद्वाक्येनेति** । **ननु**—गोदोहनेनेति तृतीया पशुकामस्येति षष्ठी च शेषशेषिभावे श्रुतिरेवास्ति, कथमिह पुरुषशेषत्वे वाक्यं प्रमाणमुपन्यस्तम् । **उच्यते**; गोदोहनेनेति तृतीयया फलभावना करणत्वं नोच्यते; किंतु संनिधिप्राप्तप्रणयनक्रियाकरणत्वं; सिद्धरूपस्य दध्नो यागादिवत्स्वरूपेण फलभावनाकरणत्वासंभवेन यत्किंचिद्धात्वर्थकारकतारूपक्रियानुरागेण साध्यत्वं संपाद्य तस्य फलभावनाकरणत्वस्योपपादनीयत्वात्, अतस्तृतीयार्थकारकविशिष्टं दधि दधिविशिष्टं वा कारकं फलाय विधेयमिति तृतीयया तावद्गोदोहनस्य न फलभावनाशेषत्वप्रतीतिः; नापि षष्ठीश्रुत्या पशुफलस्य शेषित्वप्रतीतिः; तस्याः संबन्धसामान्यवाचित्वेन शेषित्वविशेषपर्यवसानार्थं समभिव्याहृतपदार्थान्तरशेषित्वान्वययोग्यतावधारणसापेक्षत्वात् । अतः प्रथमोपस्थितं गोदोहनपशुफलसमभिव्याहारात्मकं वाक्यमेव स्वर्गकामो यजेतेति वाक्यमिव फलशेषत्वे प्रमाणमिति । क्वचित् कोशे पशुकामस्येत्येतदनन्तरं श्रुत्येत्यपि पदान्तरं दृष्टं, तत्प्रक्षिप्तमिव भाति; वाक्यात् पुरुषार्थमेवेत्युपसंहारे तददर्शनात्, समभिव्याहारापेक्षपर्यवसानलभ्यश्रुतित्वाभिप्रायं वा तद्योज्यम् । **नोपकारकत्वमिति** । तथात्वे प्रधानस्याप्यङ्गानुष्ठापनेन तदुपकारकस्य तच्छेषत्वप्रसङ्गादिति भावः । **तादर्थ्यं** तदुद्देश्यकक्लृप्तिसाध्यत्वम् । **ननु** गोदोहनस्य चमसस्थानापन्नस्य क्रत्वनङ्गत्वे तत्प्रयोगे चमसनिवृत्त्याऽङ्गविकलः क्रतुर्न फलदः स्यादित्याशङ्क्याह—**अङ्गापेक्षेति** । अङ्गं ह्युपकारायापेक्ष्यते, अङ्गसाध्योपकारस्यानङ्गेनापि सिद्धौ किमङ्गवैकल्येन हीयत इत्यर्थः । फलार्थस्य कथं क्रतावुपकारकत्वमित्याशङ्क्य प्रासादप्रकाशार्थस्य दीपस्य रथ्यासंचार इवेत्याह—**अन्यार्थस्यापीति** ।

भामती ।

क्रतस्य पशुकामस्य सतो दर्शपौर्णमासक्रत्वर्थाप्प्रणयनाश्रिते गोदोहनेऽधिकारः । नो खलु गोदोहनद्रव्यमव्याप्रियमाणं साक्षात्पशून् भावयितुमर्हति । नच व्यापारान्तराविष्टं श्रूयते, यतस्तदङ्गक्रममतिपतेत्, अप्प्रणयनाश्रितं तु प्रतीयते; 'चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्य' इति समभिव्याहारात्, योग्यत्वाच्चास्यापां प्रणयनं प्रति । तस्मात्क्रत्वर्थाप्प्रणयनाश्रितत्वाद्गोदोहनस्य, तत्क्रमेण पुरुषार्थमपि गोदोहनं क्रमवदिति सिद्धम् । श्रुतिनिराकरणेनैव इष्टिसोमक्रमवदपि क्रमोऽप्यपास्तो वेदितव्यः । शेषशेषित्वाधिकृताधिकाराभावेऽपि क्रमो विवक्ष्येत, यद्येकफलावच्छेदो भवेत् । यथाग्नेयादीनां, षण्णामेकस्वर्गफलावच्छिन्नानां, यदि वा जिज्ञास्यब्रह्मणोंऽशो धर्मः स्यात्, यथा चतुर्लक्षणीव्युत्पाद्यं ब्रह्म केनचित्केनचिदंशेनैकेन लक्षणेन व्युत्पाद्यते, तत्र चतुर्णां लक्षणानां जिज्ञास्याभेदेन परस्परसंबन्धे सति क्रमो

वेदान्तकल्पतरुः ।

क्रतूपकारकत्वमविरुद्धम्, तेन वाक्यात्पुरुषार्थमेवेति । **यस्मिन्निर्वृत्ते पुंसः प्रीतिः** फलं भवति, तस्य **लिप्सा-फलप्रयुक्ता, न विधितः**; कुतः ? **तस्य** फलसाधनस्य प्रीत्या विभागाभावादिति सूत्रार्थः । अस्य चाप्प्रणयनाश्रितत्वात्तत्क्रम एव क्रम इति गोदोहनस्य प्रणयनाश्रितत्वमुपपादयति—**नो खल्विति** । कल्प्यतां तर्हि व्यापारान्तरावेशस्तत्राह—**अप्प्रणयनाश्रितमिति** । प्रणयनान्तरविशिष्टविधिमाशङ्क्य प्रतीयत इत्युक्तम् । संनिहितलाभे न विशिष्टविधिरित्यर्थः । सामर्थ्यरूपाद् लिङ्गाच्चाप्प्रणयनाश्रितत्वमाह—**योग्यत्वाच्चेति । यथा वा दर्शपूर्णमासाभ्यामिति । चतुर्थे चिन्तितम्—उत्पत्तिकालाङ्गविशये कालः स्याद्वाक्यस्य तत्प्रधानत्वात्** (जै. अ. ४ पा. ३ सू. ३७) दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति श्रूयते । **तत्र** संदेहः; किमिदमङ्गस्य विधायकमुत कालस्येति । **तत्र** क्त्वाश्रुतेरङ्गस्य, तच्चाङ्गत्वं यजेतेति विधिप्रत्यासत्तेः सोमस्यैव । **ननु** द्रव्यद्वारेणान्यत्र विहितसोमयागस्य प्रत्यभिज्ञानात्कथं तद्विधिः । **उच्यते;** तत्कार्यस्येहाप्रत्यभिज्ञानाद्वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेतिवत् । नह्यत्र ब्रह्मवर्चसं बृहस्पतिसवकार्यं प्रतीतम्, अतोऽङ्गं बृहस्पतिसवो वाजपेयस्य । एवंच सोमयागोऽपि दर्शपूर्णमासेष्टिं प्रत्यङ्गत्वेन विधीयत इति **प्राप्ते—उच्यते;** अस्मिन्कालाङ्गविधिसंशये कालो विधेयः स्यात् । कुतः, अस्य वाक्यस्य कालप्रधानत्वात् । यदि कर्मविधिरेव स्यात्, तर्हि रूपेण द्रव्यदेवतेन भाव्यम्; नचेह देवतारूपमस्ति । अथाव्यक्तत्वेनोद्भिदादिष्विव सौमिकी देवतातिदेशेन प्राप्येत, तर्हि सोमोऽपि प्राप्येतेति सोमेनेति व्यर्थं स्यादतः सोमयागप्रत्यभिज्ञार्थमेव तत् । प्रत्यभिज्ञाने च न विधिसंभवः; बृहस्पतिसवस्तु वाजपेयप्रकरणे श्रुतस्तत्र प्रकरणान्तरन्यायात्कर्मान्तरमेव विधीयते । नामधेयमपि यजिपरतन्त्रतया न प्रत्यभिज्ञापकं, किंतु तत्रैव धर्मलक्षणया वर्तते । अतो नाम्नैव प्रसिद्धबृहस्पतिसवधर्माणां प्रापितत्वाद्युक्तं कर्मविधानमिति । **यथाग्नेयादीनामिति । एकादशे चिन्तितम्—प्रयोजनाभिसंबन्धात् पृथक्त्वं ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात्** (जै. अ. ११ पा. १ सू. १) । आग्नेयादिषु संशयः किं तन्त्रमेषां फलमुत भेदेनेति । तत्र परस्परनिरपेक्षैरुत्पत्तिविधिभिर्वि-

कल्पतरुपरिमलः ।

यथावा दर्शपूर्णमासाभ्यामितीति । प्राचीनोऽप्ययं प्रतीको गोदोहनविषयाधिकरणानुबन्धिटीकाग्रन्थव्याख्यानान्तरमेव तदनुबन्ध्यधिकरणानुक्रमणार्थमिह गृहीतः । **ननु द्रव्यद्वारेणेति ।** दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यत्र सोमपदमुत्पत्तिवाक्ये इव द्रव्यपरं तदुत्पत्तिवाक्ये विहितस्य सोमयागस्य प्रत्यभिज्ञानार्थमिति तस्येह न पुनर्विधिः; विहितस्य विधानायोगात्, अतः कालविधिर्युक्त इत्यर्थः । यथा वाजपेयेनेष्ट्वेति वाक्ये प्रसिद्धबृहस्पतिसवनामग्रहणे सत्यपि तत्कार्यब्रह्मवर्चसप्रत्यभिज्ञानाभावान्न तस्य कालविधिः, किंतु बृहस्पतिसवनामककर्मान्तरविधिः; एवमिहापि सोमद्रव्यग्रहणे सत्यपि प्रसिद्धसोमयागफलस्वर्गप्रत्यभिज्ञानाभावान्न तस्य कालविधिः, किंतु सोमद्रव्यककर्मान्तरविधिरित्याह—**उच्यते तत्कार्यस्येत्यादिना । दर्शपूर्णमासंप्रति** इत्यत्र दर्शपूर्णमाससोमयोरिति टीकायामिव द्वन्द्वैकवद्भावः । कर्मान्तरविधिश्चेत् तस्य देवतया भाव्यं, न चेह देवता निर्दिष्टा । यदि यागं प्रति संबन्धितया देवतोपादानराहित्यरूपम् अव्यक्तदेवताकत्वं प्रसिद्धसोमयागसादृश्यमिह वर्तत इति तेनोद्भिदादियागेष्विवेहापि प्रसिद्धसोमयागादतिदेशतो देवताप्राप्तिरिष्यते, तदा तत एव सोमद्रव्यप्राप्तिरपि स्यात् । दर्शपूर्णमासाभ्यामिष्ट्वा यजेतेत्येतावतैव दर्शपूर्णमासाङ्गप्रसिद्धसोमयागप्रकृतिककर्मान्तरविधिः सिद्ध्येदित्यतिरिच्यमानं सोमद्रव्यग्रहणं प्रसिद्धसोमयागप्रत्यभिज्ञापनेनैव सफलं वाच्यमिति तस्मात्र कालविधिरित्येव युक्तम् । विहितस्य पुनः स्वरूपतो विधानायोगादिति सिद्धान्तयति—**उच्यत इति ।** बृहस्पतिसवनामग्रहणं तु नातिरिच्यते, येन तदपि प्रसिद्धबृहस्पतिसवप्रत्यभिज्ञापनार्थं कथंचित्कल्प्येत, तत्तु कर्मान्तरे तद्धर्मातिदेशार्थत्वेन सफलम् । अतस्तस्य प्रकरणान्तरन्यायप्राप्तकर्मान्तरविधित्वात्स्यवद्यजि पारतन्त्र्यं न ज्ञातव्यमिति तद्वैषम्यमाह—**बृहस्पतिसवस्त्विति । उत भेदेनेति ।** अस्मिन्पक्षे षडपि यागाः पृथक्पृथक् पूर्वोत्तराङ्गसहिताः प्रयोगभेदेन कर्तव्याः । फलं तन्त्रमिति सिद्धान्ते

धर्मब्रह्मजिज्ञासयोः फलजिज्ञास्यभेदाच्च । अभ्युदयफलं धर्मज्ञानं, तच्चानुष्ठानापेक्षम् । निःश्रेयसफलं तु ब्रह्मविज्ञानं न चानुष्ठानान्तरापेक्षम् । भव्यश्च धर्मो जिज्ञास्यो न ज्ञानकालेऽस्ति, पुरुषव्यापारतन्त्रत्वात् । इह तु भूतं ब्रह्म जिज्ञास्यं नित्यत्वान्न पुरुषव्यापारतन्त्रम् । चोदनाप्रवृत्ति-

भामती ।

विवक्षितः, तथेहाप्येकजिज्ञास्यतया धर्मब्रह्मजिज्ञासयोः क्रमो विवक्ष्येत, नचैतदुभयमप्यस्तीत्याह—**फलजिज्ञास्यभेदाच्च । फलभेदं विभजते—अभ्युदयफलं धर्मज्ञानमिति ।** जिज्ञासाया वस्तुतो ज्ञानतन्त्रत्वात् ज्ञानफलं जिज्ञासाफलमिति भावः । न केवलं स्वरूपतः फलभेदः, तदुत्पादनप्रकारभेदादपि तद्भेद इत्याह—**तच्चानुष्ठानापेक्षम् । ब्रह्मज्ञानं च नानुष्ठानान्तरापेक्षम् ।** शाब्दज्ञानाभ्यासान्नानुष्ठानान्तरमपेक्षते, नित्यनैमित्तिककर्मानुष्ठानसहभावस्यापास्तत्वादिति भावः । जिज्ञास्यभेदमात्यन्तिकमाह—**भव्यश्च धर्म इति ।** भविता भव्यः, कर्तरि कृत्यः । भविता च भावकव्यापारनिर्वर्त्यतया तत्तन्त्र इति ततः प्राग्ज्ञानकाले नास्तीत्यर्थः । भूतं सत्यम् । सदेकान्ततः न कदाचिदसदित्यर्थः । न केवलं स्वरूपतो जिज्ञास्ययोर्भेदः, ज्ञापकप्रमाणप्रवृत्तिभेदादपि भेद इत्याह—**चोदनाप्रवृ-**

वेदान्तकल्पतरुः ।

हितानां प्रधानानां पृथक्फलाकाङ्क्षत्वात्तत्संनिधौ श्रूयमाणं फलं भेदेनाभिसंबध्यते; ततः प्रतिप्रधानं फलभेद इति **प्राप्ते—राद्धान्तः ।** यद्यप्येषां पृथक्त्वं पृथगुत्पत्तिविहितता; तथाप्यै**ककर्म्यम्**, क्रियत इति व्युत्पत्त्या फलं कर्म, ऐककर्म्यमेकफलत्वमित्यर्थः । **कुतः**, प्रयोजनेन समुच्चितानां संबन्धाद्धेतोः । स एव कुतः, एकशब्दाभिसंयोगात् । दर्शपूर्णमासशब्देन **हि** समुदायवाचिना निर्दिश्य फले विधीयन्ते आग्नेयादयः; यथा ग्रामेणोदपानः खेय इति समुदायशब्दनिर्देशात्समुदितैः पुंभिरुदपानः खन्यते, न प्रतिपुरुषं कूपभेदः एवमिहापि । **ननु** गणायानुलेपनमित्यादौ समुदायशब्दनिर्दिष्टमप्यनुलेपनादि प्रतिपुरुषमावर्तते तद्वत् किं न स्यात् । **नेति वदामः**; युक्तमनुलेपनादेः संस्कारत्वाददृष्टार्थत्वाच्च प्रतिसंस्कार्यमावृत्तिरिह फलमुद्दिश्य विधीयमानानामुपादीयमानानामेवाग्नेयादीनां विवक्षितं साहित्यमिति फलतन्त्रतेति । संग्रहे जिज्ञासयोः फलादिभेदं निर्दिश्य विभजने ज्ञानयोस्तत्कथनमयुक्तमित्याशङ्क्याह—**जिज्ञासाया इति ।** इच्छाया ज्ञानपराधीनतया ज्ञानफलमेव तत्फलमित्यर्थः । फलभेदे वक्तव्ये कारणभेदकथनं भाष्ये अनुपयोगीत्याशङ्क्याह—**न केवलमिति ।** विधेयाविधेयक्रियाज्ञानफलयोरुत्पाद्यता व्यङ्ग्यता च भेद इत्यर्थः । अनुष्ठानान्तरेत्यत्रान्तरशब्दार्थमाह—**शाब्दज्ञानेति ।** क्वचित् 'ब्रह्मविदाप्नोति पर'मित्यादौ ज्ञानफलं साध्यत्वेन प्रतीतमपि न्यायबलाद्वचनान्तरवशाच्चाभिव्यक्तिपरत्वेन व्याख्याय फलभेद उक्तः, जिज्ञास्यभेदस्तु प्रतीतिसमय एव स्फुट इत्याह—**जिज्ञास्यभेदमिति । ननु** भवतेरकर्मकत्वाद्भावार्थत्वे च नपुंसकत्वप्रसङ्गाद्भव्यशब्देन कथं जिज्ञास्यभेदसिद्धिरत आह—**भवितेति । ननु** 'तयोरेव कृत्यक्तखलर्थाः' इति कृत्यानां भावकर्मणोः स्मरणात् 'अचो यदि'ति सूत्रविहितयत्प्रत्ययान्तस्य भव्यशब्दस्य कर्तृवाचित्वमयुक्तमित्याशङ्क्याह—**कर्तरि कृत्य इति ।** 'भव्य-

कल्पतरुपरिमलः ।

त्वमावास्याः पौर्णमास्याश्च त्रयस्त्रयो यागाः स्वस्वकालयोरेकप्रयोगाः कर्तव्या इति फलभेदः । **भेदेनाभिसंबध्यत इति ।** एकशब्दोपात्तानामप्याग्नेयादीनां साहित्यमिह न विवक्षितम्; उत्पत्तिवाक्यविहितानां तेषामिह फलसंबन्धविधानार्थमुद्देश्यत्वाद्, उद्देश्येषु च साहित्यरूपस्य विशेषणस्य विवक्षणायोगादिति भावः । आग्नेयादीनां पृथक्त्वमैककर्म्यं च सूत्रोक्तं परस्परविरुद्धमित्याशङ्क्य तदर्थं कथयन्नेव सिद्धान्तमाह—**यद्यप्येषामिति । फले विधीयन्त इति ।** फलस्य प्राधान्यात्तु फलकाममुद्दिश्याग्नेयादय एव विधेयाः; स्वरूपेण विहितानामपि फलसंबन्धित्वेन पुनर्विधानसंभवात्, अतस्तेषां साहित्यविशेषणाविवक्षाकारणं नास्तीति भावः । **उपादीयमानानां** कामिनमुद्दिश्यानुष्ठेयत्वेन बोध्यमानानाम् । टीकायामात्यन्तिकविशेषणेन विवक्षितं फलभेदाज् जिज्ञास्यभेदस्य स्फुटत्वमुपपादयितुं फलभेदस्यास्फुटत्वमाह—**क्वचिद् ब्रह्मविदिति ।** कृतकत्वे मोक्षफलस्यानित्यत्वप्रसङ्गो **न्यायः ।** ब्रह्मैव सन् ब्रह्माप्येतीत्यादिवचनान्तरम् । **ननु भवते-**

१ 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' । 'तेनेति ब्रह्मवित्पुण्यकृच्च' 'सत्येन लभ्यस्तपसा ह्येष आत्मा'इत्यादिवचनानि न कर्मसमुच्चयविषयः, **प्रथमे** स्पष्टत एव फलभेदावगमात्, **द्वितीये** मार्गसमुच्चयस्यैवावगमात्, **तृतीये** ध्यानसमुच्चयस्यैवावगमाच्चेति फलभेदसिद्धेः । 'नान्यः पन्था विद्यतेऽयनाय' 'नास्त्यकृतः कृतेन' 'न कर्मणा न प्रजया धनेन नान्यैर्देवैस्तपसा कर्मणा वा । हित्वाऽविद्यां धियैवैयात्तद्विष्णोः परमं पदम्' इत्यादिवचनान्युपपद्यन्ते । ज्ञानाङ्गतया सर्वकर्मसंन्यासविधानमप्यतएवोपपन्नम् । अस्तु वा ज्ञानकर्मसमुच्चयसिद्धिः, एवमप्यग्निहोत्रादिव्यतिरिक्तसंन्यासधर्मैरेव मोक्षसिद्ध्या कर्मविचारस्याननुष्ठेयत्वेन न कर्मावबोधनानन्तर्यार्थत्वसिद्धिः । किंच ज्ञानकर्मसमुच्चयमते ज्ञानवतैवानुष्ठितानां कर्मणां मोक्षसाधनत्वेन ब्रह्मावबोधानान्तर्यमेव धर्मविचारे विवक्षितमिति वैपरीत्यमेव किं न स्यादिति न फलैक्यात्कर्मावबोधानन्तर्यनिर्वाह इति विवरणाचार्याः ।

भेदाच्च । या हि चोदना धर्मस्य लक्षणं सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति । ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलं, अवबोधस्य चोदनाऽजन्यत्वान्न पुरुषोऽवबोधे नियुज्यते ।

भामती ।

त्तिभेदाच्च । चोदनेति वैदिकं शब्दमाह; विशेषेण सामान्यस्य लक्षणात् । **प्रवृत्तिभेदं विभजते—या हि, चोदना धर्मस्येति ।** आज्ञादीनां पुरुषाभिप्रायभेदानामसंभवात् अपौरुषेये वेदे चोदनोपदेशः । **अतएवोक्तम्—** 'तस्य ज्ञानमुपदेशः' इति। सा च स्वसाध्ये पुरुषव्यापारे भावनायां, तद्विषये च यागादौ । स हि भावनाविषयः, तदधीननिरूपणत्वात् प्रयत्नस्य भावनायाः । 'षिञ् बन्धने' इत्यस्य धातोर्विषयपदव्युत्पत्तेः । भावनायास्तद्द्वारेण च यागादेरपेक्षितोपायतामवगमयन्ती तत्रेच्छोपहारमुखेन **पुरुषं नियुञ्जानैव** यागादिधर्ममवबोधयति नान्यथा, **ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलं,** नतु प्रवर्तयन्त्यवबोधयति; कुतः ? **अवबोधस्य** प्रवृत्तिरहितस्य **चोदनाज-**

वेन्दान्तकल्पतरुः ।

गेये'त्यादिना हि सूत्रेण भावकर्मवाचितानियममपोद्य कृत्यप्रत्ययान्ता एव भव्यादिशब्दा विकल्पेन कर्तरि निपात्यन्ते । अतो भवतीति व्युत्पत्त्या भव्यशब्दः कर्तृवाची । पक्षे च 'भावकर्मणोः' । अस्य च भवतेरनुपसर्गत्वात्प्राप्तिवाचित्वाभावाच्च कर्माप्राप्तिः । भावे तु भव्यमनेनेति स्याद् नेह सः; पुंलिङ्गनिर्देशात्, उत्पाद्यधर्मापेक्षणाच्च । अतः कर्तरि कृत्य इति । **ननु** भवितुः कथं ज्ञानकाले सत्त्वाभाव इत्याशङ्क्य ज्ञानोत्तरभाविप्रयोजकव्यापारापेक्षणादित्याह—**भविता चेति ।** भवतिर्ह्यसिद्धकर्तृकक्रियावाची न पच्यादिवत्सिद्धकर्तृकक्रियस्ततो भविता स्वतोऽसिद्धः सन्भावकव्यापारापेक्षनिष्पत्तिरर्थात्साध्यो भातीति । **अत एवाहुः**—'करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः । भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यते ॥' इति । **भाष्ये** भूतशब्दस्यातीतवाचित्वभ्रमं निरस्यति—**भूतमिति । नन्वा**ज्ञाभ्यर्थनानुज्ञानां लोके चोदनात्वात्कथं वेदे चोदना ? अत आह—**आज्ञादीनामिति ।** उत्कृष्टपुंसः स्वाभिलषितोपायकार्यत्वाभिधानमाज्ञा, यथा गामानयेति । एतदेव हीन**स्याभ्यर्थना,** यथा माणवकमध्यापयेति । प्रवृत्तस्य प्रयोज्यस्य तद्धितोपायो**क्तिरनुज्ञा,** तथा कुरु यथा हितमिति । नैतासां संभवो वेदे इत्युपदेशश्चोदना । उपदेशो ह्यप्रवृत्तनियोज्यस्य प्रयोजनोपायबोधको लोकेऽवगतो, यथा गोपालवचसि सुपथकथनपरेऽनेन पथा याहीति । नहीहाज्ञा; प्रयोक्तुर्निकर्षात् । नाभ्यर्थना; स्वप्रयोजनाभावात् । नाप्यनुज्ञा; प्रयोज्यस्याप्रवृत्तत्वात्तदिह नियोज्यस्याप्रवृत्तस्य हितोपायकर्तव्यतोक्तिरपौरुषेयेऽपि वेदे भवत्येवेति । **तस्य** धर्मस्य, ज्ञायतेऽनेनेति **ज्ञानं,** प्रमाण**मुपदेशो** विधिरिति जैमिनीयसूत्रावयवार्थः । स्वविषय इति भाष्ये स्वशब्देन चोदनाभिधीयत इति मत्वाह—**स्वसाध्ये इति ।** स्वस्याः प्रतिपाद्ये विषये भावनायामित्यर्थः । धर्मस्येत्युक्त्या भावनोपसर्जनभूतापि शब्दतोऽर्थतः प्राधान्यात् स्वशब्दार्थ इति गृहीत्वाह—**तद्विषये इति । ननु** भावनाधात्वर्थयोर्विधिशब्देन पुरुषप्रवर्तनमशक्यं; प्रमाणस्य वाय्वादिवत्प्रेरकत्वायोगादित्याशङ्क्याह—**भावनाया इति ।** साक्षाद्भावनायास्तदवच्छेदकत्वद्वारेण चार्थाद्धात्वर्थस्येष्टोपायतां बोधयति, विधिर्बोधयित्वा च तत्रेच्छामुपाहरति, इच्छँश्च पुरुषः प्रवर्तते, तदनेन क्रमेण नियुञ्जाना चोदना धर्ममवबोधयतीत्यर्थः । **ब्रह्मचोदना** ब्रह्मवाक्यम् । यथा धर्मचोदना प्रवृत्तिहेतुं बोधं जनयति, नैवं ब्रह्मचोदनेत्याह—**अवबोधस्येति ।** ब्रह्मचोदनया सिद्धवस्तुविषयस्य प्रवृत्त्यहेत्वर्थमात्रावबोधस्य जन्यत्वादिति भाष्यार्थः । **ननु**—मा नाम जनि-

कल्पतरुपरिमलः ।

रिति । अनपुंसकलिङ्गोऽयमकर्मकधातुनिष्पन्नकृत्यप्रत्ययान्तो भव्यशब्दो न भावकर्मार्थो, नापि तस्यार्थान्तरमस्तीति निरर्थकः; निरर्थकशब्देन कथं जिज्ञास्यविशेषलाभ इत्यर्थः । **अस्य च भवतेरिति ।** सुखमनुभवतीत्यादौ सोपसर्गत्वेन भवतिः सकर्मकः, 'प्रमाणभूत आचार्य' इत्यादौ प्रामाण्यं प्राप्त इति प्राप्त्यर्थत्वेन, तदुभयमिह नास्तीत्यर्थः । **उत्पाद्यधर्मापेक्षणादिति ।** उत्पत्तिमद्धर्मसामानाधिकरण्यादित्यर्थः । भावपरत्वे हि भव्यमनेनेति वैयधिकरण्यं भवेत् । **ननु** भावार्थभव्यशब्दार्थस्य भवनस्योत्पत्तिरूपत्वाद्धर्मशब्दसामानाधिकरण्यं घटत **इत्याशङ्क्योत्पाद्येति** विशेषितम् । उत्पत्तिमान् हि यागादिधर्म इह निर्दिष्टः, न धर्ममात्रम्; अतस्तस्य नोत्पत्तिवाचिशब्दसामानाधिकरण्यं घटत इति भावः । **यद्वा** नेह सः इत्यस्य नेह भावार्थ इत्यर्थमाश्रित्य तत्र पुंलिङ्गनिर्देशादिति हेतुयोजनानन्तरं तस्यावृत्त्या नेह प्राप्त्यर्थ इत्यर्थान्तरमाश्रित्य तत्र हेतुत्वेनोत्पाद्यधर्मसापेक्षत्वादित्येतद्योजनीयम् । वेदार्थविचारानन्तरमनुष्ठानेनोत्पादनीयं धर्ममपेक्ष्य हि तद्विशेषणतया भव्य इति निर्दिष्टं, नतु ग्रामपश्वादिवत् तटस्थतया प्रागेव सिद्धं किंचित्प्राप्यमपेक्ष्य, अतोऽत्र न प्राप्त्यर्थो घटत इति भावः । **भावकव्यापारो** भावयितृव्यापारः । तत्र वाक्यपदीयसंमतिमाह—**करोत्यर्थस्येति ।** घटं करोतीत्यस्यायमर्थः । घटं भवन्तं भावयतीति स भावयिता भवितुर्घटस्य प्रयोजकः । भविता घटस्तमपेक्ष्य प्रयोज्य इत्यर्थः । स्वस्या इति प्रामादिकः पाठः । स्वशब्दस्यात्मवाचित्वे नपुंसकलिङ्गत्वादिति । **धर्मस्येत्युक्त्येति ।** धर्मस्य चोदनेति भाष्ये चोदनोपसर्जनमपि भावना तत्प्रतिपाद्यत्वेनार्थतः प्राधान्यात् सापि स्वविषय इति भाष्ये स्वशब्देन गृह्यत इत्यर्थः ।

---

१ जैमिनीयप्रथमाध्यायप्रथमपादपञ्चमसूत्रैकदेशोऽयम्.

यथाक्षार्थसंनिकर्षेणार्थावबोधे, तद्वत् । तस्मात्किमपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत इति । उच्यते—नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोगविरागः, शमदमादिसाधनसंपत्,

भामती ।

न्यत्वात् । ननु 'आत्मा ज्ञातव्यः' इत्येतद्विधिपरैर्वेदान्तैः तदेकवाक्यतयावबोधे प्रवर्तयद्भिरेव पुरुषो ब्रह्मावबोध्यत इति समानत्वं धर्मचोदनाभिर्ब्रह्मचोदनानामित्यत आह—**न पुरुषोऽवबोधे नियुज्यते । अयमभिसंधिः—न तावद्ब्रह्मसाक्षात्कारे** पुरुषो नियोक्तव्यः; तस्य ब्रह्मस्वाभाव्येन नित्यत्वात्, अकार्यत्वात् । **नाप्युपासनायां**; तस्या अपि ज्ञानप्रकर्षे हेतुभावस्यान्वयव्यतिरेकसिद्धतया प्राप्तत्वेनाविधेयत्वात् । **नापि शाब्दबोधे,** तस्याप्यधीतवेदस्य पुरुषस्य विदितपदतदर्थस्य समधिगतशाब्दन्यायतत्त्वस्याप्रत्यूहमुत्पत्तेः । अत्रैव दृष्टान्तमाह—**यथाक्षार्थेति** । दार्ष्टान्तिके योजयति—**तद्वदिति** । अपिचात्मज्ञानविधिपरेषु वेदान्तेषु नात्मतत्त्वविनिश्चयः शाब्दः स्यात् । नहि तदात्मतत्त्वपरास्ते, किंतु तज्ज्ञानविधिपराः, यत्पराश्च ते त एव तेषामर्थाः । नच बोधस्य बोध्यनिष्ठत्वादपेक्षितत्वात्, अन्यपरेभ्योऽपि बोध्यतत्त्वविनिश्चयः; समारोपेणापि तदुपपत्तेः । तस्मान्न बोधविधिपरा वेदान्ता इति सिद्धम् । **प्रकृतमुपसंहरति—तस्मात्किमपि वक्तव्यमिति** । यस्मिन्नसति ब्रह्मजिज्ञासा न भवति सति तु भवन्ती भवत्येवेत्यर्थः । **तदाह—उच्यते-नित्यानित्यवस्तुविवेक इत्यादि । नित्यः** प्रत्यगात्मा, **अनित्या** देहेन्द्रियविषयादयः । तद्विषयश्चेद्विवेको निश्चयः, कृतमस्य ब्रह्मजिज्ञासया; ज्ञातत्वाद्ब्रह्मणः । **अथ** विवेको ज्ञानमात्रं, न निश्चयः; तथा सत्येष विपर्यासादन्यः संशयः स्यात्, तथाच न वैराग्यं भावयेत्; अभावयन्कथं ब्रह्मजिज्ञासाहेतुः, तस्मादेवं व्याख्येयम् । नित्यानित्ययोर्वसतीति **नित्यानित्यवस्तु** तद्धर्मः, नित्यानित्ययोर्धर्मिणोस्तद्धर्माणां च **विवेको** नित्यानित्यवस्तुविवेकः । **एतदुक्तं भवति**—मा भूदिदं तदतं नित्यं, इदं तदनृतमनित्यमिति धर्मिविशेषयोर्विवेकः, धर्मिमात्रयोर्नित्यानित्ययोस्तद्धर्मयोश्च विवेकं निश्चिनोत्येव । नित्यत्वं सत्यत्वं तद्यस्यास्ति तन्नित्यं सत्यं, तथाचास्थागोचरः । अनित्यत्वमसत्यत्वं तद्यस्यास्ति तदनित्यमनृतं, तथाचानास्थागोचरः । तदेतेष्वनुभूयमानेषु युष्मदस्मत्प्रत्ययगोचरेषु

वेदान्तकल्पतरुः ।

धर्मबोधवद्ब्रह्मबोधाद्विषये प्रवृत्तिः, स एव तु विधितः किं न स्यादिति शङ्कते—**नन्विति** । विध्येकवाक्यत्वेन वस्तुबोधनाद्वेदान्तानां न सिद्धबोधमात्रपर्यवसानमित्यर्थः ॥ **भाष्येऽ**वबोधनिर्देश एव विध्यविषयत्वे हेतुगर्भ इति व्याचष्टे—**अयमभिसंधिरिति** । यथा विशिष्टविधौ विशेषणविधिरर्थात्, न विशेषणे तात्पर्यं, वाक्यभेदादेवं विषयविशिष्टप्रतिपत्तिविधिसामर्थ्याद्ब्रह्मनिश्चय इत्याशङ्क्याह—**नच बोधस्येति** । विशिष्टक्रियाविधानाद्युक्ता विशेषणस्य प्रमा; वैशिष्ट्यस्य वास्तवत्वात्, प्रतिपत्तिविधिस्तु न विशेषणसत्तामाक्षिपति; वाचं धेनुमुपासीतेत्यादावारोप्यस्यापि विधेयधीविषयत्वादित्यर्थः । एवं क्रमप्रमाणाभावसिद्धौ—'ब्रह्मधीर्न नियोगेन धर्मबुद्धेरनन्तरा । तत्क्रमे मानहीनत्वात्स्नानभुज्यादिधीरिव ॥' नित्यानित्यवस्तुविवेक इति भाष्यमाक्षिपति—**तद्विषयश्चेदिति** । अनित्याद् ब्रह्मणो विवेकः किं निश्चयः, उत ज्ञानमात्रम् । **आद्यं** दूषयति—**कृतमिति । द्वितीये** विपर्ययः, संशयो वा । **नाद्यः**; ततः शास्त्रश्रवणे प्रवृत्त्ययोगात् । **न द्वितीयः**; प्रपञ्चानित्यत्वानिश्चये तद्वैराग्यायोगादित्याह—**तथाचेति** । समाधत्ते—**तस्मादिति** । निश्चय एव विवेकः । नचशास्त्रानारम्भः; इदं नित्यमिदमनित्यमित्यनिश्चयात् । आत्मानात्मसमुदाये नित्यत्वमनित्यत्वं च स्तो धर्मौ तयोश्च धर्मिभ्यां भवितव्यमित्येतावन्मात्रं निश्चितम् । यद्यपि घटादेरनित्यतावधारिता; तथापि सकलानात्मसु नावधारितेति । नित्यत्वस्य व्याख्या—**ऋतमिति** । उक्तविवेकस्य प्रयोजनमाह—**तथाचेति** । सत्यासत्ययोरुपादेयानुपादेयत्वे हेतुमाह—**तदेतेष्विति** । सुखत्वान्नित्यमुपादेयं दुःखत्वादनित्यं त्याज्यमित्यर्थः । दृष्टेऽनुभवः, उपपत्तिस्त्वदृष्टे ।

कल्पतरुपरिमलः ।

स एव त्विति । ब्रह्मबोध एव विधितः प्रवृत्तिविषयः किं न स्यादित्यर्थः । **यथा विशिष्टविधाविति** । यथा खलु'एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेते'ति रेवत्याधारवारवन्तीयसामसाध्याग्निष्टोमस्तोत्रविशिष्टक्रतुविधौ रेवत्याधारवारवन्तीयसामरूपविशेषणस्य दधिसोमादिविशेषणवदन्यतः प्रसिद्धिरहितस्य तत एव सिद्धिरेवमिहापीत्यर्थः । श्लोकेऽपेक्षितपूरणार्थम् एवमित्यादि । स्नानेत्यादिव्यतिरेके दृष्टान्तः । **यद्यपि घटादेरिति** । वल्मीकादिषु भ्रमविषयस्य घटादेरित्यर्थः । अतो नित्यत्वं सत्यत्वमनित्यत्वमसत्यत्वमिति व्याख्यानेन न विरोधः । **सुखत्वान्नित्यमिति ।** सत्यं हि 'यो वै भूमा तत्सुख'मिति सुखरूपमुक्तम् । अथ यदल्पं तन्मर्त्यं नाल्पे सुखमस्तीति सत्यरूपस्य भूम्नः प्रतिद्वन्द्व्यल्पम् असत्यं दुःखरूपमुक्तम्, अतः साङ्गाध्ययनवतः शुद्धान्तःकरणस्य सैत्यासत्ययोः सुखदुःखत्वनिश्चयो भवतीत्यर्थः । स्वप्नप्रपञ्चवत्सर्वमसत्यं चेत्, सत्यत्वासत्यत्वयोर्धर्मिभ्यां भाव्यमित्युक्तरूपो नित्यानित्यविवेको न सिध्येदित्याशङ्क्य सत्यसिद्ध्यर्थमनुभवोपपत्ती टीकायामुपन्यस्ते, ते विभजते—**दृष्टे इति** । शुक्तिरजतादौ सदधिष्ठानत्वानुभवः, तथात्वेनास्फुटे

भामती ।

विषयविषयिषु यदृतं नित्यं सुखं व्यवस्थास्यते तदास्थागोचरो भविष्यति, यत्त्वनित्यमनृतं भविष्यति तापत्रयपरीतं तत्त्यक्ष्यत इति । सोऽयं नित्यानित्यवस्तुविवेकः प्राग्भवीयादैहिकाद्वा कर्मणो विशुद्धसत्त्वस्य भवत्यनुभवोपपत्तिभ्याम् । न खलु सत्यं नाम न किंचिदस्तीति वाच्यम्; तदभावे तदधिष्ठानस्यानृतस्याप्यनुपपत्तेः, शून्यवादिनामपि शून्यताया एव सत्यत्वात् । अथास्य पुरुषधौरेयस्यानुभवोपपत्तिभ्यामेवं सुनिपुणं निरूपयतः, आ च सत्यलोकात् आ चावीचेः 'जायस्व म्रियस्व' इति विपरिवर्तमानं, क्षणमुहूर्तयामाहोरात्रार्धमासमासर्त्वयनवत्सरयुगचतुर्युगमन्वन्तरप्रलयमहाप्रलयमहासर्गावान्तरसर्गसंसारसागरोर्मिभिरनिशमुह्यमानं, तापत्रयपरीतमात्मानं च जीव-

वेदान्तकल्पतरुः ।

विगीतं, सदधिष्ठानम्, असत्यत्वाद्गन्धर्वपुरीवदित्यादिः । व्याप्त्यसिद्धिमाशङ्क्याह—**न खल्विति** । न चेयतो विवेकस्य स्वरसत उदये शास्त्रविफलता; सगुणनिर्गुणविवेकाखण्डसमन्वयादेरसिद्धेरिति । न नित्यादिविवेकमात्रं वैराग्यहेतुः, किंतु तदभ्यास इत्याह—**अथास्येति** । अस्य पुरुषश्रेष्ठस्य संसारसमूहेऽनित्यत्वादिविषयं प्रसंख्यानं धीसन्ततिरुपावर्तते इत्यन्वयः । **अवीचिः** नरकविशेषः । **जायस्व म्रियस्वेति** । पुनः पुनर्जायते म्रियते चेत्यर्थः । क्रियासमभिहारे लोडिति पौनःपुन्ये सर्वलकारापवादेन लोटः स्वादेशस्य च विधानात् । आरभ्य ब्रह्मलोकमवीचिपर्यन्तं जननमरणाभ्यामावर्तमानं क्षणाद्यवान्तरसर्गपर्यन्तैः कालैः संसारसागरस्योर्मिभूतैरनिशमुह्यमानमितस्ततो नीयमानमात्मानमन्यं च जीवसमूहमवलोक्येति

कल्पतरुपरिमलः ।

स्वप्रादावुपपत्तिः । तामेवोपपत्तिमाह—**विगीतमिति । गन्धर्वपुरीवदिति** । तत्र सौरालोकादिकं सदधिष्ठानमिति भावः । व्याप्त्यसिद्धिशङ्का शून्यवादे वस्तुतः शून्यतैवेति मतेऽपि सैव सत्यास्तीति परिहारार्थः । **'इयतो विवेकस्येति** । स्वप्रवत्सर्वस्य प्रपञ्चस्यासत्यत्वं यदि स्यात्तदानीमप्यधिष्ठानपरिशेषोऽवश्यंभावी, तच्च सत्यं सुखरूपमित्येतावतो निर्धारणस्येत्यर्थः । **सगुणनिर्गुणेति** । परिशिष्यमाणं सत् सगुणं भवेन्निर्गुणं वा, निर्गुणत्वे कथमखण्डे तत्र समन्वय इत्यादिविचारार्थत्वेन शास्त्रारम्भः सफल इत्यर्थः । **ननु**—एवं सति नित्यानित्यविवेकः प्रसिद्धनित्यानित्यविषय एवास्तु, किमर्थं सत्यानृतविषयत्वेन क्लिष्टव्याख्यानं ? शास्त्रानारम्भशङ्कापरिहारस्योक्तस्य तत्रापि तुल्यत्वात्, **नच** ब्रह्मानन्द एक एव नित्यः कर्मफलादिकमन्यत्सर्वमनित्यमिति शास्त्रारम्भात्प्रागेव निश्चये सति **असंभवस्तु सतोऽनुपपत्तेः** (ब्र. अ. २ पा. ३ सू. ९) **इति** ब्रह्मनित्यत्वव्यवस्थापनस्य वैराग्यपादादिषु (ब्र. अ. ३ पा. १) कर्मफलाद्यनित्यत्वव्यवस्थापनस्य च वैफल्यप्रसङ्गः; प्रागेव संसारबन्धानृतत्वनिश्चये सति तत्समर्थनार्थस्य **'तद्गुणसारत्वात्तु तद्व्यपदेशः'** (ब्र. अ. २ पा. ३ सू. २९) **'यथाच तक्षोभयथा** (ब्र. अ. २ पा. ३ सू. ४०) इत्यादिसूत्रजातस्य वैफल्यप्रसङ्ग इति दूषणस्य तत्रापि तुल्यत्वात् । प्राङ्निश्चिते एव बन्धमिथ्यात्वे श्रुतिविरोधादिशङ्कान्तरनिरासाय तद्गुणसारत्वादिसूत्रजातमिति परिहाररीतिस्तु पक्षान्तरेऽपि तुल्या । **किंच** नित्यानित्यवस्तुविवेकस्वरूपासिद्धिशङ्कापरिहारार्थातःशब्दव्याख्यानावसरे कर्मफलनित्यत्वप्रतिपादकवाक्येभ्यः तदनित्यत्वप्रतिपादकवाक्यानां प्राबल्यमेवोपपत्तितया दर्शितं, नतु बन्धसत्यत्वप्रतिपादकवाक्येभ्यस्तन्मिथ्यात्वप्रतिपादकवाक्यानाम्; अतोऽपि हेतोः प्रसिद्धनित्यानित्यविवेक एवात्र विवक्षित इति ज्ञायते, तस्मात्सामान्यतः सत्यानृतसद्भावनिर्धारणं प्रसंख्यानलभ्यबन्धमिथ्यात्वनिर्धारणपर्यन्तं नित्यानित्यवस्तुविवेक इत्युक्तमयुक्तमिति—**चेत्, उच्यते**; भाष्ये नित्यानित्यवस्तुविवेकानन्तरं नित्यफलप्रेप्सामनपेक्ष्य तद्विवेकमात्रेण सकलकर्मफलविराग उक्तः, नित्यवस्तुप्रेप्सया तत्प्राप्त्युपायान्वेषणं पश्चादुक्तम्; अयं क्रमोऽनित्यत्वमसत्यत्वमिति व्याख्याने युज्यते, नत्वस्थायित्वमिति व्याख्याने । अस्थायिनं भोगं भुञ्जानस्तत्परित्यागे स्थायिभोगलाभमालक्ष्य हि ततो विरज्यते, नान्यथा; अनृतासक्तस्तु तदनृतत्वनिश्चये सति तत्परित्यागे तथाभूतसत्यवस्तुलाभप्रतिसंधानाभावेऽपि ततो विरज्यते । नहि रजतार्थी क्वचन रजतभ्रमेण प्रवृत्तस्तन्मिथ्यात्वनिश्चये सति तत्परित्यागेन सत्यरजतस्य स्वलभ्यत्वप्रतिसंधानाभावे ततो न निवर्तते, किंतु ततो निवृत्तः सत्यरजतप्राप्त्युपायं किंचित्पश्यति चेत् तत्र प्रवर्तते । तस्मान्नित्यानित्यवस्तुविवेकादिक्रमेण साधनचतुष्टयं ब्रह्मजिज्ञासाहेतुं वर्णयतो भगवतो भाष्यकारस्य सत्यमिदं सुखरूपमिति विशेषनिर्धारणमनपेक्ष्य कर्मफलानृतत्वनिर्धारणमेव वैराग्यादिक्रमेण साधनान्तराणां प्रवर्तकमित्याशयमालोच्य टीकाकारैराचार्यैश्च सामान्यतः सत्यमस्तीति विशिष्य बन्धमात्रमनृतमिति च विवेकः प्रथमसाधनत्वेन परिगृहीतः । तदनन्तरमक्षय्यादिवाक्यात्कर्मफलनित्यत्वसिद्धेस्तदनृतत्वमसिद्धम् अनृतस्य तत्त्वज्ञाननिवर्त्यत्वनियमादिति शङ्कायां तदनृतत्वसिद्ध्यर्थमेव न्यायतस्तदनित्यत्वमतःशब्देन सूचितमिति न किंचिदवद्यम् । **तदभ्यास इति** । जननमरणपरिवृत्त्यादिरूपसंसारबन्धासत्यत्वदृढनिश्चयपर्यन्त इति शेषः । **क्रियासमभिहारे इति** । "क्रियासमभिहारे लोट् लोटो हिस्वौ'विति पाणिनिसूत्रेण क्रियापौनःपुन्यविवक्षायां सर्वलकारापवादेन लोड्विहितः । तस्य परस्मैपदात्मनेपदयोर्यथाक्रमं हिस्वावादेशौ च विहितौ । **ननु**—क्रियासमभिहारे लुनीहि लुनीहीत्येवायं लुनातीत्याद्युदाह-

मुमुक्षुत्वं च। तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च, न विपर्यये । तस्मादथशब्देन यथोक्तसाधनसंपत्त्यानन्तर्यमुपदिश्यते । अतःशब्दो हेत्वर्थः ।

भामती।

लोकं चावलोक्य अस्मिन्संसारमण्डले अनित्याशुचिदुःखात्मकं प्रसंख्यानमुपावर्तेते; ततोऽस्यैतादृशान्नित्यानित्यवस्तुविवेकलक्षणात्प्रसंख्यानात्—**इहामुत्रार्थभोगविरागो** भवति । अर्थ्यते प्रार्थ्यत **इत्यर्थः** । फलमिति यावत् । तस्मिन्विरागोऽनाभोगात्मिकोपेक्षाबुद्धिः । ततः **शमदमादिसाधनसंपत्** । रागादिकषायमदिरामत्तं हि मनस्तेषु तेषु विषयेषूच्चावचमिन्द्रियाणि प्रवर्तयत्, विविधाश्च प्रवृत्तीः पुण्यापुण्यफला भावयत्, पुरुषमतिघोरे विविधदुःखज्वालाजटिले संसारहुतभुजि जुहोति । प्रसंख्यानाभ्यासलब्धवैराग्यपरिपाकभग्नरागादिकषायमदिरामदं तु मनः पुरुषेणावजीयते वशीक्रियते, सोऽयमस्य वैराग्यहेतुको मनोविजयः **शम इति** वशीकारसंज्ञ इति चाख्यायते । विजितं च मनस्तत्त्वविषयविनियोगयोग्यतां नीयते, सेयमस्य योग्यता **दमः** । यथा दान्तोऽयं वृषभयुवा हलशकटादिवहनयोग्यः कृत इति गम्यते । **आदिग्रहणेन च** विषयतितिक्षातदुपरमतत्त्वश्रद्धाः संगृह्यन्ते । **अतएव श्रुतिः**—'तस्माच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत् सर्वमात्मनि पश्यति' इति । तदेतस्य शमदमादिरूपस्य साधनस्य संपत्प्रकर्षः **शमदमादिसाधनसंपत्** । ततोऽस्य संसारबन्धनान्मुमुक्षा भवतीत्याह—**मुमुक्षुत्वं च** । तस्य च नित्यशुद्धमुक्तसत्यस्वभावब्रह्मज्ञानं मोक्षस्य कारणमित्युपश्रुत्य तज्जिज्ञासा भवति धर्मजिज्ञासायाः प्रागूर्ध्वं च, तस्मात्तेषामेवानन्तर्यं न धर्मजिज्ञासाया इत्याह—**तेषु हीति** । न केवलं जिज्ञासामात्रमपि तु ज्ञानमपीत्याह—**ज्ञातुं च** । उपसंहरति—**तस्मादिति** । क्रमप्राप्तमतःशब्दं व्याचष्टे—**अतःशब्दो हेत्वर्थः** ।

वेदान्तकल्पतरुः ।

योजना । उक्तपरिभावनाया इहामुत्रार्थभोगविरागहेतुतामाह—**ततोऽस्येति** । अनित्यसंसारस्य किंचिदधिष्ठानमस्तीति इयान् विवेको न तु ब्रह्मेति । **तदुक्तम्—ईदृशादिति** आभोगो मनस्कारः । आदर इति यावत् । अतदात्मिका । वैराग्यस्य शमादिहेतुतामाह—**तत इति** । ज्वाला जटा अस्य सन्तीति तथोक्तः । श्रद्धैव तत्त्वविषया वित्तमस्य न गवादीति तथाऽभिहितः । मोक्षेच्छा भवतु, कुतस्तावता ब्रह्मजिज्ञासा ? अत आह—**तस्य चेति** । नित्याऽनित्यविवेकादिहेतुत्वस्याथशब्दादवगतेः किमतःशब्देनेत्याशङ्क्य नानेन जिज्ञासां प्रति साधनकलापस्य हेतुतोच्यते, किंतु तत्स्वरूपाऽसिद्धिपरिहारहेतुरभिधीयते इत्याह—**अत्रैवमित्यादिना** । **शल्कं** शकलम् । **शुचि** नरशिरःकपालं प्राण्यङ्गत्वाच्छङ्खवदित्यस्य 'नारं स्पृष्ट्वाऽस्थि सस्नेहं सवासा जलमाविशे'दित्यागमविरोधः । कृतकत्वानुमानानुगृहीतात्तद्यथेति वाक्याद् न्यायहीनम्

१ 'सोऽन्वेष्टव्यः' 'श्रोतव्यो मन्तव्यः' 'आत्मन्येवात्मानं पश्येत्' 'तद्विजिज्ञासस्वे'ति च भिन्नशाखास्थानामपि विधीनां सर्वशाखाप्रत्ययन्यायेनैकवाक्यत्वाद्गुणोपसंहारेण 'तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इति 'परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात्' इति 'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वे'ति 'वरुणं पितरमुपससारे'ति च नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमदमादिसाधनानां एकैकस्मिन्प्रकरणे एकैकस्यैव समाम्नानेऽपि साधनचतुष्टसंपत्त्यानन्तर्यमथशब्दार्थ इति विवक्षितम् । मुमुक्षुत्वं तु सर्वत्रापि प्रकरणेषु फलवाक्यैरधिकारिविशेषणमिति सिद्धमेव । **एतेन**—विचारकर्तव्यतां प्रतिपद्यमानस्य सूत्रकारस्य बुद्ध्यनारूढत्वाच्छमदमादयो नाधिकारिविशेषणं, किंतु कर्मावबोध एवेति शङ्कापि—**पराहता**; विचारं प्रतिपद्यमानस्य सूत्रकारस्य तत्प्रकरणपठिततदङ्गशमदमादीनामपि बुद्धिस्थत्वादिति सर्वमनवद्यम् । ब्रह्मनित्यमितरदनित्यमिति विवेको नित्यानित्यवस्तुविवेक इति **विवरणाचार्याः** । **मिश्रास्तु**—नित्यानित्ययोर्वसतीति नित्यानित्यवस्तु तस्य विवेकः नित्यानित्यवस्तुविवेकः तदभ्यास इत्यभिप्रयन्ति ॥

२ **अतःशब्दो हेत्वर्थ इति**—आनन्तर्यमात्रावबोधने वैफल्यात् हेतुबोधन एव तात्पर्यात् यत्परःशब्दः स शब्दार्थ इति न्यायेनाथशब्देनैव हेतुलाभादतःशब्दो व्यर्थ **इति चेत्**—अत्र **विवरणाचार्याः**—अथशब्दपरिगृहीतस्य हेतुत्वस्य हेत्वन्तरेणापवादशङ्कायां तन्निरसनेन हेतुत्वव्यवस्थापनार्थमतःशब्दः । **अपवादशङ्का च**—परमाणुषु पाकजलोहितस्य कृतकस्य परिच्छिन्नानां तेषां च नित्यत्वदर्शनात् अक्षय्यादिवाक्यैः पुण्यफलस्यापि नित्यत्वावगमात् कृतकत्वपरिच्छेदे नानित्यतां गमयतः, नापि वा कूटस्थब्रह्मावलम्बेन मुमुक्षुत्वसंभवः—**इति** नित्यानित्यविवेकस्य विरागद्वारा ब्रह्मविचारहेतुत्वं न संभवति—**इति** । **परिहारप्रकारस्तु**—परमाणूनां तद्गुणस्य चानित्यत्वात् वस्तुबलप्रवृत्तानुमानविरोधेऽक्षय्यादिवाक्यस्य नित्यत्वप्रतिपादनासामर्थ्याच्च कृतकत्वपरिच्छेदाभ्यां कर्मफलाद्यनित्यत्वनिश्चयात् नित्यब्रह्मावलम्बेन मुमुक्षुत्वसंभवाच्च साधनचतुष्टयहेतुत्वमुपपद्यत इति—**वदन्ति** ॥ **वाचस्पतिमिश्रास्तु**—क्षयितालक्षणेन दुःखेनाघ्रातत्वात् वैषयिकसुखपरित्यागसंभवेऽपि अक्षय्यादिवाक्यैर्नित्यत्वेनावगतस्वर्गादिपरित्यागो न संभवतीति नित्यानित्यवस्तुविवेकाभ्यासे सत्यपि इहामुत्रार्थफलभोगविरागस्यासंभवात् न साधनचतुष्टयसंपत्त्यानन्तर्यार्थत्वमुपपद्यत इत्यधिकाशङ्कानिराकरणेन हेतुत्वदृढीकरणार्थमतःशब्द इति—**वर्णयन्ति** ॥

यस्माद्वेद एवाग्निहोत्रादीनां श्रेयःसाधनानामनित्यफलतां दर्शयति—'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' (छान्दो० ८।१।६) इत्यादिः। तथा ब्रह्मविज्ञानादपि

भामती।

तमेवातःशब्दस्य हेतुरूपमर्थमाह—**यस्माद्वेद एवेति**। **अत्रैवं परिचोद्यते**—सत्यं यथोक्तसाधनसंपत्त्यनन्तरं ब्रह्मजिज्ञासा भवति, सैव त्वनुपपन्ना; इहामुत्रफलोपभोगविरागस्यानुपपत्तेः। अनुकूलवेदनीयं हि फलम्, इष्टलक्षणत्वात्फलस्य। नचानुरागहेतावस्य वैराग्यं भवितुमर्हति; दुःखानुषङ्गदर्शनात्सुखेऽपि वैराग्यमिति चेत्, हन्त भोः सुखानुषङ्गाद्दुःखेऽप्यनुरागो न कस्माद्भवति। तस्मात्सुख उपादीयमाने दुःखपरिहारे प्रयतितव्यम्। अवर्जनीयतया दुःखमागतमपि परिहृत्य सुखमात्रं भोक्ष्यते। तद्यथा **मत्स्यार्थी सशल्कान्सकण्टकान्मत्स्यानुपादत्ते, स यावदादेयं तावदादाय विनिवर्तते। यथावा धान्यार्थी सपलालानि धान्यान्याहरति, स यावदादेयं तावदुपादाय निवर्तते,** तस्माद्दुःखभयान्नानुकूलवेदनीयमैहिकं वामुष्मिकं वा सुखं परित्यक्तुमुचितम्। **नहि मृगाः सन्तीति शालयो नोप्यन्ते, भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते**। अपिच दृष्टं सुखं चन्दनवनितादिसङ्गजन्म क्षयितालक्षणेन दुःखेनाघ्रातत्वात् अतिभीरुणा त्यज्येतापि, न त्वामुष्मिकं स्वर्गादि; तस्याविनाशित्वात्। **श्रूयते हि**—'अपाम सोमममृता अभूम' इति। **तथाच** 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति। नच कृतकत्वहेतुकं विनाशित्वानुमानमत्र संभवति; नरशिरःकपालशौचानुमानवत् आगमबाधितविषयत्वात्। तस्माद्यथोक्तसाधनसंपत्त्यभावान्न ब्रह्मजिज्ञासेति प्राप्तम्। एवं प्राप्ते आह भगवान्सूत्रकारः—**अत इति**। तस्यार्थं व्याचष्टे भाष्यकारः—**यस्माद्वेद एवेति**। **अयमभिसंधिः**—सत्यं मृगभिक्षुकादयः शक्याः परिहर्तुं पाचककृपीवलादिभिः, दुःखं त्वनेकविधानेककारणसंपातजमशक्यपरिहारं; अन्ततः साधनपारतन्त्र्यक्षयितालक्षणयोर्दुःखयोः समस्तकृतकसुखाविनाभावनियमात्। नहि मधुविषसंपृक्तमन्नं विषं परित्यज्य समधु शक्यं शिल्पिवरेणापि भोक्तुम्। क्षयितानुमानोपोद्बलितं च 'तद्यथेह कर्मचितः' इत्यादि वचनं क्षयिताप्रतिपादकम् 'अपाम सोमम्' इत्यादिकं वचनं मुख्यासंभवे जघन्यवृत्तितामापादयति। **यथाहुः पौराणिकाः**—'आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते' इति। अत्र च ब्रह्मपदेन तत्प्रमाणं वेद उपस्थापितः। स च योग्यत्वात् 'तद्यथेह कर्मचितः' इत्यादिरत इति सर्वनाम्ना परामृश्य, हेतुपञ्चम्या निर्दिश्यते। **स्यादेतत्**—यथा स्वर्गादेः कृतकस्य सुखस्य दुःखानुषङ्गस्तथा ब्रह्मणोऽपीत्यत आह—**तथा ब्रह्मविज्ञानादपीति**। **तेनायमर्थः**—अतः स्वर्गादीनां क्षयिताप्रतिपादकात्, ब्रह्मज्ञानस्य च परमपुरुषार्थताप्रतिपादकात् आगमात्, यथोक्तसाधनसंपत् ततश्च जिज्ञासेति सिद्धम्। ब्रह्मजिज्ञासापदव्याख्यानमाह—**ब्रह्मण इति**। षष्ठीसमासप्रदर्शनेन प्राचां वृत्तिकृतां ब्रह्मणे जिज्ञासा ब्रह्मजिज्ञासेति चतुर्थीसमासः परास्तो वेदितव्यः। 'तादर्थ्यसमासे

वेदान्तकल्पतरुः।

अपामेत्यादिवाक्यमापेक्षिकामृतत्वादिपरं व्याख्येयमित्याह—**क्षयितेति**। यत्त्वभिहितं भास्करेण नित्यानित्यविवेकादेरप्रकृतत्वान्न तदानन्तर्यमथशब्दार्थोऽत एव कर्मणां क्षयिष्णुफलत्वं ब्रह्मज्ञानस्य च मोक्षहेतुत्वमतःशब्देन न परामृष्टुं युक्तमिति तं भाष्यभावव्याख्ययाऽनुकम्पते **अत्र चेति**। तर्हि सकला वेदान्ताः परामृश्येरन् नेत्याह—**योग्यत्वादिति**। अथशब्दोक्तहेतुत्वसमर्थनयोग्यत्वादित्यर्थः। हेतुमद्ब्रह्मजिज्ञासया हेतूनां नित्यानित्यविवेकादीनां सूत्रकारस्य बुद्धिस्थत्वात्तदानन्तर्यार्थत्वमथशब्दस्य युक्तमेव। चतुर्थीसमासाभावे हेतुमाह—**तादर्थ्येति**। पाणिनिः किल चतुर्थी तदर्थार्थबलिहितसुखरक्षितैरिति तादर्थ्यसमासं सस्मार। चतुर्थ्यन्तः शब्दस्तदर्थवचनादिभिः शब्दैः समस्यते। चतुर्थ्यन्तशब्दार्थस्तच्छब्देन परामृश्यते। तस्मै इदं तदर्थम्। यथा कुण्डलाय हिरण्यमित्यत्र कुण्डलं चतुर्थ्यन्तशब्दार्थस्तच्छेषो हिरण्यं, तत्र कुण्डलशब्दश्चतुर्थ्यन्तः, कुण्डलशेषवाचिना हिरण्यशब्देन समस्यते, कुण्डलहिरण्यमिति। तथाऽर्थशब्दादिनापि ब्राह्मणार्थं पयः इत्यादि द्रष्टव्यम्। कात्यायनेन त्वयं समासः प्रकृतिविकृत्योर्नियमतः, चतुर्थी तदर्थमात्रेणेति **चेत्त**र्हि सर्वत्र प्रसङ्गो-

कल्पतरुपरिमलः।

रणेष्विव जायस्व जायस्वेत्येवेमानि जायन्ते, म्रियस्व म्रियस्वेत्येवं म्रियन्त इति, द्विर्भावस्तस्य तस्य धातोरनुप्रयोगश्च प्राप्नोति; तत्सूत्रवार्तिके द्विर्भावानुशासनाद्, **यथाविध्यनुप्रयोगः पूर्वस्मिन्निति** सूत्रेण क्रियासमभिहारे तस्यैव धातोरनुप्रयोगनियमनाच्च। **नैष दोषः**; क्रियासमभिहारवत् जननमरणरूपक्रियाद्वयसमुच्चयस्याप्यत्र विवक्षितत्वात्, समुच्चयेऽन्यतरस्यामिति सूत्रेण समुच्चयेऽपि लोण्मध्यमपुरुषैकवचनविधानात्। तत्र हि न द्विर्भाववार्तिकमस्ति; नापि यथाविध्यनुप्रयोगविधानमस्ति, किंतु **समुच्चये सामान्यवचनस्येति** सूत्रेण तावत् क्रियाविशेषानुगतसामान्यवचनस्यानुप्रयोगो विहितः। ओदनं भुङ्क्ष्व क्षीरं पिब धानाः खादेत्येवायमभ्यवहरतीत्यादि तदुदाहरणम्। इहापि जननमरणानुगतसामान्यरूपविपरिवृत्तिवाचिनोऽनुप्रयोगोऽस्ति। असकृदावर्तीनि भूतानि भवन्तीति क्रियासमभिहारसमुच्चयोभयविवक्षायां च समुच्चयविवक्षाप्रयुक्तमेव कार्यं भवति; विप्रतिषेधे परं कार्यमिति स्मरणात्। **कात्यायनेन त्विति**। '**चतुर्थी**

परं पुरुषार्थं दर्शयति—'ब्रह्मविदाप्नोति परम्' इत्यादिः (तैत्ति०२।१।) तस्माद्यथोक्तसाधनसंपत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या। ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा। ब्रह्म च वक्ष्यमाणलक्षणं 'जन्माद्यस्य यतः' इति। अत एव न ब्रह्मशब्दस्य जात्याद्यर्थान्तरमाशङ्कितव्यम्। ब्रह्मण इति

भामती।

प्रकृतिविकृतिग्रहणं कर्तव्यम्' इति कात्यायनीयवचनेन यूपदार्वादिष्वेव प्रकृतिविकारभूतेषु चतुर्थीसमासनियमात्, अप्रकृतिविकारभूत इत्येवमादौ तन्निषेधात्, 'अश्वघासादयः षष्ठीसमासा भविष्यन्ति' इत्यश्वघासादिषु षष्ठीसमासप्रतिविधानात्, षष्ठीसमासेऽपि च ब्रह्मणो वास्तवप्राधान्योपपत्तेरिति। **स्यादेतत्**—ब्रह्मणो जिज्ञासेत्युक्ते तत्रानेकार्थत्वाद्ब्रह्मशब्दस्य संशयः, कस्य ब्रह्मणो जिज्ञासेति। अस्ति ब्रह्मशब्दो विप्रत्वजातौ, यथा ब्रह्महत्येति। अस्ति च वेदे, यथा ब्रह्मोज्झमिति। अस्ति च परमात्मनि, 'यथा ब्रह्म वेद ब्रह्मैव भवति' इति, तमिमं संशयमपाकरोति—**ब्रह्म च वक्ष्यमाणलक्षणमिति**। यतो ब्रह्मजिज्ञासां प्रतिज्ञाय तज्ज्ञापनाय परमात्मलक्षणं प्रणयति ततोऽवगच्छामः परमात्मजिज्ञासैवेयं न विप्रत्वजात्यादिजिज्ञासेत्यर्थः। षष्ठीसमासपरिग्रहेऽपि नेयं कर्मषष्ठी, किंतु शेषलक्षणा, संबन्धमात्रं च शेष इति ब्रह्मणो जिज्ञासेत्युक्ते ब्रह्मसंबन्धिनी जिज्ञासेत्युक्तं भवति। तथा च ब्रह्मस्वरूपप्रमाणयुक्तिसाधनप्रयोजनजिज्ञासाः सर्वा ब्रह्मजिज्ञासार्था ब्रह्मजिज्ञासयावरुद्धा भवन्ति; साक्षात्पारंपर्येण च ब्रह्मसंबन्धात्, कर्मषष्ठ्यां तु ब्रह्मशब्दार्थः कर्म, स च स्वरूपमेवेति तत्प्रमाणादयो नावरुध्येरन्, तथा चाप्रतिज्ञातार्थचिन्ता प्रमाणादिषु भवेदिति ये मन्यन्ते तान्प्रत्याह—**ब्रह्मण इति**। **कर्मणीति**। अत्र हेतुमाह—**जिज्ञास्येति**। इच्छायाः प्रतिपत्त्यनुबन्धो ज्ञानं; ज्ञानस्य

वेदान्तकल्पतरुः।

ऽविशेषात्, प्रकृतिविकृत्योरिति **चेद**श्वघासादीनामुपसंख्यानम् इति। एवं चार्थात्प्रस्तुते तन्निषेधसिद्धिरित्याह—**प्रकृतीति**। **इत्येवमादौ** ब्रह्मजिज्ञासेत्येवमादावित्यर्थः। **नन्व**श्वार्थो घासोऽश्वघास इत्यादावप्रकृतिविकारेऽपि तादर्थ्यसमासो दृष्ट इत्याशङ्क्य कात्यायनेनैव समासान्तरमुपसंख्यातमित्याह—**अश्वघासादय इति**। **ननु** षष्ठीसमासाभ्युपगमे ब्रह्मणो जिज्ञासाव्यावर्तकत्वेन गुणत्वात्प्रधानपरिग्रह इति भाष्यस्थप्राधान्यभङ्गस्तत्राह—**षष्ठीसमासेऽपीति**। **ब्रह्मोज्झं** वेदत्यागः। प्रतिपत्तौ विशेषणत्वेनानुबध्यत इत्यनुबन्धः। स्वरूपेण निरूपितायां जिज्ञासायां पश्चात्संबन्धिन्यपेक्षा, ब्रह्म च ज्ञानद्वारा जिज्ञासारूपनिरूपकमिति प्रथमोदिताकाङ्क्षावशेन ब्रह्म जिज्ञासायाः कर्मत्वेन संबध्यते, नतु संबन्धिमात्रतयेत्यर्थः।

कल्पतरुपरिमलः।

तदर्थमात्रेणेति चेत्, सर्वप्रसङ्गोऽविशेषादिति, यथाश्रुतसूत्रार्थे अनुपपत्तिप्रदर्शकमेकं वार्तिकं। **सर्वप्रसङ्गः** सर्वस्य चतुर्थ्यन्तस्य तदर्थमात्रेण समासप्रसङ्गः, रन्धनाय स्थाली अवहननायोलूखलमित्यादावपि समासः प्रसज्येतेत्यर्थः। विकृतिः प्रकृत्येति चेद् 'अश्वघासादीनामुपसंख्यान' मिति वार्तिकान्तरं। यदि विकृतिवाची चतुर्थ्यन्तशब्दः प्रकृतिवाचिना समस्यत इति विशेष्यते, तदा सर्वप्रसङ्गः परिहृतो भवति, किंतु अश्वाय घासोऽश्वघास इति समासो न प्राप्नोति; प्रकृतिविकारभावाभावात्। अतस्तत्संग्रहार्थ**मुपसंख्यानं** यत्नान्तरं, कर्तव्यमित्यर्थः। एवमश्वघासादिषु चतुर्थीसमास इति वार्तिककारमतम्। एतदवलम्बनेनैव धर्माय जिज्ञासा धर्मजिज्ञासेति शबरस्वामिभिश्चतुर्थीसमासः समाश्रितः। **कात्यायनेनैवेति**। कात्यायनग्रहणमनादरेण शब्दाभियुक्तमात्रोपलक्षणं भाष्यकाराभिप्रायम्। भाष्यकारैः खलु तत्र वार्तिकमुल्लङ्घ्य यथाश्रुतसूत्रं समर्थयमानैः षष्ठीसमासः समाश्रितः। **अत्रेदं भाष्यकारीयं वार्तिकप्रत्याख्यानम्**—प्रकृतिविकृतिग्रहणाय यत्नस्तावन्न कर्तव्यः; सूत्रे बलिरक्षितग्रहणेन ज्ञापकेन तदर्थसिद्धेः। यदिहि तदर्थसमासस्तदर्थमात्रविषयः स्यात्, तदा कुबेराय बलिः कुबेरार्थो भवति, अश्वाय रक्षितम् अश्वार्थं भवतीति कुबेरबलिः अश्वरक्षितमिति समासयोस्तदर्थसमासविधिनैव सिद्धेः पृथग्बलिरक्षितग्रहणं न कर्तव्यं स्यात्; तत्कृतं ज्ञापयति तदर्थसमासः प्रकृतिविकृतिमात्रविषय इति। तथाऽश्वघासाद्युपसंख्यानयत्नोऽपि न कर्तव्यः; तेषु षष्ठीचतुर्थीसमासयोः स्वरवैषम्याभावेन षष्ठीसमासोपपत्तेः—**इति**॥ एवं सूत्रानुसारिभाष्यकारमतप्राबल्याद् वार्तिककारमतमनादृत्य चतुर्थीसमासासंभव उक्तः। इदमेव भाष्यकारमतमनुसृत्य भट्टपादैर्धर्माय जिज्ञासेति शबरस्वामिवचनं षष्ठीसमासलब्धार्थिकार्थप्रदर्शनपरं, नतु विग्रहप्रदर्शनपरम्; तस्य ज्ञातुमिच्छेति निगमनवाक्येन षष्ठीसमासविभावनादिति व्याख्यातम्। आत्मनेपदपरस्मैपदशब्दयोः प्रकृतिविकारभावाभावेऽपि तादर्थ्यसमासस्तु 'वैयाकरणाख्यायां चतुर्थ्या' इत्यलुग्विधानसामर्थ्यात्। नच तस्मादेव ज्ञापकात् सर्वत्रापि तादर्थ्यसमासः शङ्कनीयः; तथासति बलिरक्षितग्रहणवैयर्थ्यापत्तेरुक्तत्वात्। **समासान्तरमुपसंख्यातमिति**। षष्ठीसूत्रविहितं समासान्तरं भाष्यकारैरङ्गीकृतमित्यर्थः। **ननु** 'ज्ञातं ब्रह्म विषयो' 'ज्ञातं ब्रह्म प्रयोजन'मिति ब्रह्म विषयप्रयोजनोभयरूपमिष्यते, तत्र प्रयोजनत्वप्रतिपत्त्युपयोगी चतुर्थीसमास इहासाधुरिति त्यक्तः, एवमेवात्र विषयत्वप्रतिपत्त्युपयोगी षष्ठीसमासोऽप्यसाधुरेव। **तथाहि**—केन सूत्रेणेह षष्ठी; 'षष्ठी शेषे' इति सूत्रेण वा, 'कर्तृकर्मणोः

कर्मणि षष्ठी, न शेषे; जिज्ञास्यापेक्षत्वाज्जिज्ञासायाः, जिज्ञास्यान्तरानिर्देशाच्च । ननु शेषषष्ठीपरिग्रहेऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते; संबन्धसामान्यस्य विशेषनिष्ठत्वात् । एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य सामान्यद्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यात् ।

भामती ।

च ज्ञेयं ब्रह्म । न खलु ज्ञानं ज्ञेयं विना निरूप्यते, न च जिज्ञासा ज्ञानं विनेति प्रतिपत्त्यनुबन्धत्वात्प्रथमं जिज्ञासा कर्मैवापेक्षते, न तु संबन्धिमात्रम्; तदन्तरेणापि सति कर्मणि तन्निरूपणात् । नहि चन्द्रमसमादित्यं चोपलभ्य कस्यायमिति संबन्ध्यन्वेषणा भवति । भवति तु ज्ञानमित्युक्ते विषयान्वेषणा किंविषयमिति । तस्मात्प्रथममपेक्षितत्वात् कर्मतयैव ब्रह्म संबध्यते, न संबन्धितामात्रेण, तस्य जघन्यत्वात् । तथा च कर्मणि षष्ठीत्यर्थः । **ननु** सत्यं न जिज्ञास्यमन्तरेण जिज्ञासा निरूप्यते, जिज्ञास्यान्तरं त्वस्या भविष्यति, ब्रह्म तु शेषतया संभन्त्स्यत इत्यत आह— **जिज्ञास्यान्तरेति** । निगूढाभिप्रायश्चोदयति—**ननु शेषषष्ठीपरिग्रहेऽपीति** । सामान्यसंबन्धस्य विशेषसंबन्धाविरोधेन कर्मताया अविघातेन जिज्ञासानिरूपणोपपत्तेरित्यर्थः । निगूढाभिप्राय एव दूषयति—**एवमपि प्रत्यक्षं ब्रह्मण इति** । वाच्यस्य कर्मत्वस्य जिज्ञासया प्रथममपेक्षितस्य प्रथमसंबन्धार्हस्य चान्वयपरित्यागेन पश्चात्कथंचिदपे-

वेदान्तकल्पतरुः ।

जिज्ञासाज्ञानयोर्विषयाधीननिरूपणं वैधर्म्यदृष्टान्तेन प्रपञ्चयति—**नहीति** । **ननु**—प्रमाणयुक्त्यादि जिज्ञासायाः कर्म भविष्यति, ब्रह्म तु संबन्धित्वेन निर्दिश्यताम् । **न**; निर्दिष्टकर्मलाभे कल्पनानुपपत्तेरित्याह—**नन्वित्यादिना** । **संभन्त्स्यते** संबद्धं भविष्यति । **ननु** श्रुतकर्मत्यागायोगे स्थिते कथं शेषषष्ठी शङ्क्यत इत्यत आह—**निगूढाभिप्राय इति** । प्रमाणादिबहुप्रतिज्ञानां श्रौतत्वसिद्धिरित्यभिप्रायस्य निगूढता । **ननु** ब्रह्मसंबन्धिनी जिज्ञासेत्युक्ते कर्मानिर्देशादनिरूपितरूपा जिज्ञासा स्याद्, नेत्याह—**सामान्येति** । बहुप्रतिज्ञानां श्रौतत्वलाभात्कथं प्रयासवैयर्थ्येन परिहारस्तत्राह—**निगूढेति** । एकस्यापि प्रधानस्य श्रौतत्वं वरं, नतु गुणानां बहूनामपीति । **वाच्यस्येति** । शब्दोपात्तत्वेन साक्षात्संनिधिः । **प्रथमापेक्षितस्ये**त्याकाङ्क्षा । **प्रथमसंबन्धार्हस्येति** योग्यता । एतैर्युक्तस्य कर्मत्वस्य संबन्धः प्रथमः सन्नपि जघन्यः । एतैः रहितस्य संबन्धिमात्रस्य संबन्धो जघन्यः सन् प्रथम इति कल्पनं व्याहतमित्यर्थः । 'कर्तृकर्मणोः कृती'ति कृद्योगे कर्मणि षष्ठीस्मरणाद्वाच्यं कर्मत्वम् । जिज्ञासापदस्य चाकारप्रत्ययान्तत्वात् कृद्योगः । यस्तु 'कर्मणि चे'ति कर्मणि षष्ठ्या समासप्रतिषेधः, स च 'उभयप्राप्तौ कर्मणी'ति या कर्तृकर्मणोरुभयोरपि सामर्थ्यादुपादानप्राप्तौ कर्मण्येवेति नियमिता षष्ठी तद्विषयः ।

कल्पतरुपरिमलः ।

कृती'ति सूत्रेण वा । **नाद्यः**; कर्मत्वं वाच्यं परिग्राह्यमिति शेषषष्ठ्यास्त्वया त्यक्तत्वात् । **न द्वितीयः**; 'प्रतिपदविधाना च षष्ठी न समस्यत' इति वार्तिकेन वैशेषिकसूत्रविहितषष्ठ्याः समासप्रतिषेधात् । अतएव सर्पिषो ज्ञानमित्यत्र सर्पिषा करणेन प्रवृत्तिरित्यर्थके 'ज्ञोऽविदर्थस्य करणे' इति सूत्रेण वित्तिव्यतिरिक्तप्रवृत्तिरूपार्थान्तरमुक्तम् । जानातिकरणत्वनिमित्ता प्रतिपदविहिता षष्ठीति न समास इतिचेत्याशङ्क्याह—**कर्तृकर्मणोः कृतीति** । कर्मत्वस्य वाच्यत्वसिद्ध्यर्थं द्वितीयपक्ष एवात्र परिगृह्यते । अस्ति ह्यत्र कृद्योगः; जिज्ञासापदस्य 'अ प्रत्ययात्'दिति प्रत्ययान्तधातोरुपरि विहिताकारप्रत्ययान्तत्वाद्, अकारप्रत्ययस्य च 'कृदतिङि'ति सूत्रेण कृत्संज्ञकत्वात् । नच समासासंभवः; 'कृद्योगलक्षणा च षष्ठी समस्यत' इति प्रतिपदविधानत्वेऽपि कृद्योगनिमित्तषष्ठ्याः समासाभ्यनुज्ञानादिति भावः । **ननु** कृद्योगलक्षणषष्ठीष्वपि कर्मणि या षष्ठी तस्याः समासः 'कर्मणि चे'ति सूत्रेण प्रतिषिद्ध इत्याशङ्क्याह—**यस्तु कर्मणीति** । 'कर्मणि चे'ति सूत्रेण कर्मषष्ठीमात्रस्य समासप्रतिषेधो न भवति; तथा सति 'कर्तरि चे'ति सूत्रवैयर्थ्यप्रसङ्गात् । तेन हि सूत्रेण कर्तरि यौ तृजकौ ताभ्यां सह कर्मणि षष्ठ्याः समासो निषिध्यते, अपां स्रष्टा ओदनस्य भोजक इत्यादौ । नच कर्मषष्ठीमात्रस्यात्र समासनिषेधे तत्सफलं भवेद्; अतः 'कर्मणि चे'ति सूत्रे चकार इतिकारार्थः कर्मणीति शब्दमुच्चार्य या षष्ठी नियमिता, सा न समस्यत इति तदर्थः । ततश्च 'उभयप्राप्तौ कर्मणी'ति सूत्रेण कर्मणीति शब्दमुच्चार्य नियमिता षष्ठी तस्य समासप्रतिषेधस्य विषयो, नतु 'कर्तृकर्मणोः कृती'ति सूत्रविहिता कर्मणि षष्ठीत्यर्थः । **नन्विहाप्युभयप्राप्तिसूत्रनियमितैव** कर्मणि षष्ठी । तस्य हि सूत्रस्यैवमर्थः । कर्तृकर्मणोरुभयोः षष्ठीप्राप्तिर्यत्रैकस्मिन्कृति भवति तस्मिन् कृति सति कर्मण्येव षष्ठी न कर्तरीति । तथाचात्र साधनचतुष्टयसंपन्नः कर्ता यदि श्रूयेत, तदा तस्मिन्नपि कर्मणीव 'कर्तृकर्मणोः कृती'ति सूत्रेण षष्ठ्याः प्राप्तौ निमित्तं भवति जिज्ञासेति कृत्प्रत्ययः, अतोऽत्र 'कर्मणि चे'ति समासप्रतिषेधः स्यादेवेत्याशङ्क्याह—**सामर्थ्यादुपादानप्राप्ताविति** । 'कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' इति व्यवहितपूर्वसूत्रात् प्रयोग इत्यनुवर्तते । तच्च कर्तृगतकिंचिदतिशयविवक्षासामर्थ्यात् कर्तृकर्मोभयप्रयोगावश्यंभावपरम् । एवंचाश्चर्यो गवां दोहः इत्यादिरेवोभयप्राप्तिसूत्रविषयः । तत्रह्याश्चर्यशब्दसूचितकर्तृगतातिशयोपपादनोपयोगितया दुर्दोहत्वरूपाजादिवैलक्षण्यसूचनाय गोत्वेन दोहकर्मणां तद्दोहासामर्थ्यसंभावनासूच-

न व्यर्थः, ब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थत्वादिति चेन्न; प्रधानपरिग्रहे तदपेक्षितानामर्थाक्षिप्तत्वात्। ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात्प्रधानम्। तस्मिन्प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति तान्यर्थाक्षिप्तान्येवेति न पृथक्सूत्रयितव्यानि। यथा राजासौ गच्छतीत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति तद्वत्। श्रुत्यनुगमाच्च। 'यतो वा इमानि भूतानि जायन्ते' (तैत्ति० ३।१) इत्याद्याः श्रुतयः 'तद्विजिज्ञासस्व तद्ब्रह्म' इति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयन्ति। तच्च कर्मणिषष्ठीपरिग्रहे सूत्रेणानुगतं भवति। तस्माद्ब्रह्मण इति कर्मणि षष्ठी। ज्ञातुमिच्छा जिज्ञासा। अवगतिपर्यन्तं ज्ञानं सन्वाच्याया इच्छायाः कर्म; फलविषयत्वादिच्छायाः। ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म। ब्रह्मावगतिर्हि

भामती।

क्षितस्य संबन्धिमात्रस्य संबन्धो जघन्यः प्रथमः प्रथमश्च जघन्य इति सुव्याहृतं न्यायतत्त्वम्। प्रत्यक्षपरोक्षाभिधानं च प्राथम्याप्राथम्यस्फुटत्वास्फुटत्वाभिप्रायम्। चोदकः स्वाभिप्रायमुद्घाटयति—**न व्यर्थः, ब्रह्माश्रिताशेषेति**। व्याख्यातमेतदधस्तात्। समाधाता स्वाभिसंधिमुद्घाटयति—**न प्रधानपरिग्रह इति**। वास्तवं प्राधान्यं ब्रह्मणः। शेषं सनिदर्शनमतिरोहितार्थं, श्रुत्यनुगमश्चातिरोहितः। तदेवमभिमतं समासं व्यवस्थाप्य जिज्ञासापदार्थमाह—**ज्ञातुमिति**। **स्यादेतत्**—न ज्ञानमिच्छाविषयः। सुखदुःखावाप्तिपरिहारौ वा तदुपायौ वा तद्द्वारेणेच्छागोचरः। नचैवं ब्रह्मविज्ञानम्; न खल्वेतदनुकूलमिति वा प्रतिकूलनिवृत्तिरिति वानुभूयते। नापि तयोरुपायः; तस्मिन्सत्यपि सुखभेदस्यादर्शनात्, अनुवर्तमानस्य च दुःखस्यानिवृत्तेः, तस्मान्न सूत्रकारवचनमात्रादिषिकर्मता ज्ञानस्येत्यत आह—**अवगतिपर्यन्तमिति**। न केवलं ज्ञानमिष्यते किंत्ववगतिं साक्षात्कारं कुर्वदवगतिपर्यन्तं सन्वाच्याया इच्छायाः कर्म। कस्मात्? फलविषयत्वादिच्छायाः, तदुपायं फलपर्यन्तं गोचरयतीच्छेति शेषः। **ननु** भवत्ववगतिपर्यन्तं ज्ञानं, किमेतावतापीष्टं भवति; नह्यनपेक्षणीयविषयमवगतिपर्यन्तमपि ज्ञानमिष्यत इत्यत आह—**ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म**। भवतु ब्रह्मविषयावगतिः, एवमपि कथमिष्टेत्यत आह—**ब्रह्मावगतिर्हि पुरुषार्थः**। किमभ्युदयः,

वेदान्तकल्पतरुः।

यथाश्चर्यो गवां दोहोऽगोपालकेनेति। एवं ह्यत्राश्चर्यं व्यज्येत यदि दुर्दोहानां गवां दोहे कर्मत्वमकुशलस्य चागोपालस्य कर्तृत्वम्, प्रस्तुते तु ब्रह्मकर्मत्वमेवोपादीयते, न कर्तृगतोऽतिशय इत्युभयप्राप्त्यभावात् 'कर्तृकर्मणोः कृति'त्येव षष्ठी; तेन ब्रह्मजिज्ञासेत्युपपन्नः समास इति। भाष्ये प्रत्यक्षनिर्देशो न युक्तः; शाब्दत्वात्कर्मत्वस्य, तत्राह—**प्रत्यक्षेति**। अविरुद्धमपि परोक्षत्वं व्याख्येयप्रत्यक्षत्वस्य प्रतियोगित्वाद्याख्यातम्। परमते कर्मत्वस्य लाक्षणिकत्वं चरमान्वयप्रसञ्जनार्थम्। **नन्वयुक्त**मपि ज्ञानस्येच्छाविषयत्वं सौत्रजिज्ञासापदात्प्रमीयताम्? **न**; न्यायसूत्रे उपदेशमात्रेणाऽविश्वासादित्याह—**नेति**। साक्षात्कारसाधनं ज्ञानमिच्छाविषय इति प्रतिज्ञाय फलविषयत्वादिच्छाया इति हेतुरयुक्तो व्यधिकरणत्वात्तत्राह—**तदुपायमिति**। फलेच्छाया एवोपायपर्यन्तं प्रसरादविरोध इत्यर्थः। **भवतु ब्रह्मविषयावगतिरिति**। स्वरूपावगतिः स्वविषयव्यवहारहेतुत्वेन तद्विषयोक्ता। ब्रह्मणोऽपि धर्मवदसुखत्वान्न तदवगतिः पुमर्थ इत्याह—**एवमपीति**। श्रुतिस्वानुभवावगतनिर्दुःखानन्दमभिप्रेत्य परिहारो—**ब्रह्मावगतिर्हीति**। **प्रतिभान्** प्रतिभासमानः। **अर्थ्यमान-**

कल्पतरुपरिमलः।

मायाशिक्षितत्वादिना दोहकर्तुश्चोपादानमपेक्षितं कृतं, नेह तथा किंचिदतिशयविवक्षया कर्तुरुपादानं कृतमस्तीति नात्रोभयप्राप्तिसूत्रेण कर्मणिषष्ठीनियमनमित्यर्थः। **ननु**—यत्र कर्तृकर्मोभयप्रयोगो नास्ति, तत्र गम्यमानेऽपि कर्मण्युभयप्राप्तिसूत्रेण कर्तरि षष्ठ्याः प्रतिषेधमभिप्रेत्य तृतीयाप्रयोगः सूत्रकारेणैव कृतो दृश्यते 'अन्तर्धौ येनादर्शनमिच्छती'ति; अन्तर्धिनिमित्तं यत्कर्तृकदर्शनाभावं स्वात्मनः कर्मणोऽन्तरङ्गप्रत्यासत्त्या गम्यमानस्येच्छति तस्यापादानसंज्ञा अनेन सूत्रेण विधीयते, तथाचोपाध्यायादन्तर्धत्त इत्यत्र पञ्चमी भवति। नच कर्मणि गम्यमाने एवोभयप्राप्तिसूत्रप्रवृत्तिः न कर्तरि गम्यमान इति विशेषः शङ्कनीयः; कर्तृकर्मोभयोपादाननियमभङ्गे सत्यस्य विशेषस्याप्रयोजकत्वात्, इह्यापरितोष इति **चेद्, एवं परिहारो द्रष्टव्यः**; अकाकारयोः प्रतिषेधो नेति वक्तव्यं; 'शेषे विभाषे'ति भाष्यकारै'रुभयप्राप्तौ कर्मणी'ति कर्तरि षष्ठीप्रतिषेधस्य अके अकारे च कृति नित्यमप्रवृत्तिः, स्त्रीप्रत्ययरूपे कृति, तद्व्यतिरिक्तमात्रे वा विकल्पेनाप्रवृत्तिश्चोक्ता, उदाहृतं च भेदिका देवदत्तस्य काष्ठानां; चिकीर्षा विष्णुमित्रस्य कटस्येति, शोभना खलु पाणिनेः सूत्रस्य कृतिः, शोभना खलु पाणिनिना सूत्रस्य कृतिरिति च। तस्मादिह जिज्ञासेत्यकारप्रत्यययोगाद् नोभयप्राप्तिसूत्रविषयत्वशङ्कावकाश इति। अयमपि परिहारो जिज्ञासापदस्याकारप्रत्ययान्तत्वं दर्शयद्भिराचार्यैः सूचितः। **व्याख्यातमिति**। चरमत्वात्स्फुटत्वपरतयेति शेषः। परमाप्तस्य सूत्रकारस्योपदेशमात्रेणापि विश्वासः स्यादित्याशङ्क्य न्यायसूत्र इति विशेषितम्। **फलेच्छाया**

पुरुषार्थः; निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात् । तस्माद्ब्रह्म विजिज्ञासितव्यम् । तत्पुन-

भामती ।

न, किंतु निःश्रेयसं, विगलितनिखिलदुःखानुषङ्गपरमानन्दघनब्रह्मावगतिर्ब्रह्मणः स्वभाव इति सैव निश्रेयसं पुरुषार्थ इति । **स्यादेतत्**—न ब्रह्मावगतिः पुरुषार्थः पुरुषव्यापारव्याप्यो हि पुरुषार्थः । नचास्या ब्रह्मस्वभावभूताया उत्पत्तिविकारसंस्कारप्राप्तयः संभवन्ति; तथा सत्यनित्यत्वेन तत्स्वाभाव्यानुपपत्तेः । नचोत्पत्त्याद्यभावे व्यापारव्याप्यता; तस्मान्न ब्रह्मावगतिः पुरुषार्थ इत्यत आह—**निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात्** । ब्रह्मावगतौ ब्रह्मस्वभावे नोत्पत्त्यादयः संभवन्ति, तथाप्यनिर्वचनीयानाद्यविद्यावशाद्ब्रह्मस्वभावोऽपराधीनप्रकाशोऽपि प्रतिभानपि न प्रतिभातीव पराधीनप्रकाश इव देहेन्द्रियादिभ्यो भिन्नोऽप्यभिन्न इव भासत इति संसारबीजाविद्याद्य-नर्थनिबर्हणात्प्रागप्राप्त इव तस्मिन्सति प्राप्त इव भवतीति पुरुषेणार्थ्यमानत्वात्पुरुषार्थ इति युक्तम् । अविद्यादीत्यादि-ग्रहणेन तत्संस्कारोऽवरुध्यते । अविद्यादिनिवृत्तिस्तूपासनाकार्यादन्तःकरणवृत्तिभेदात् साक्षात्कारादिति द्रष्टव्यम् । उपसंहरति—**तस्माद्ब्रह्म जिज्ञासितव्यम्** । उक्तलक्षणेन मुमुक्षुणा । न खलु तज्ज्ञानं विना सवासनविविधदुःख-निदानमविद्योच्छिद्यते । नच तदुच्छेदमन्तरेण विगलितनिखिलदुःखानुषङ्गानन्दघनब्रह्मात्मतासाक्षात्काराविर्भावो जीवस्य । तस्मादानन्दघनब्रह्मात्मतामिच्छता तदुपायो ज्ञानमेषितव्यम् । तच्च न केवलेभ्यो वेदान्तेभ्योऽपि तु ब्रह्म-मीमांसोपकरणेभ्य इति इच्छानिभेन ब्रह्ममीमांसायां प्रवर्त्यते, न तु वेदान्तेषु तदर्थविवक्षायां वा । तत्र फलवदर्थाववबोधपरतां स्वाध्यायाध्ययनविधेः सूत्रयता 'अथातो धर्मजिज्ञासा' इत्यनेनैव प्रवर्तितत्वात्, धर्मग्रहणस्य च वेदार्थोपलक्षणत्वेनाधर्मवद्ब्रह्मणोऽप्युपलक्षणाच्च यद्यपि धर्ममीमांसावत् वेदार्थमीमांसया ब्रह्ममीमांसाप्याक्षेप्तुं शक्यते; तथापि प्राच्या मीमांसया न तद्युत्पाद्यते, नापि ब्रह्ममीमांसाया अध्ययनमात्रानन्तर्यमिति ब्रह्ममीमांसारम्भाय नित्यानित्यविवेकाद्यानन्तर्यप्रदर्शनाय चेदं सूत्रमारम्भणीयमित्यपौनरुक्त्यम् । **स्यादेतत्**—एतेन सूत्रेण

वेदान्तकल्पतरुः ।

त्वात् प्रार्थ्यमानत्वात् । अविद्यानिवृत्तिर्न स्वरूपावगत्या; नित्यनिवृत्त्यापातात्, अपितु वृत्तित इत्याह—**अविद्येति** । **विगलित दुःखेति** वृत्तिव्यक्तस्वरूपाभिप्रायम् । पदार्थान्व्याख्याय सूत्रतात्पर्यमाह—**तस्मादित्यादिना** । सूत्रस्यानुवादत्वव्यावृत्तये तव्यप्रत्ययमध्याहरति—**एषितव्यमिति** । किमिति ज्ञानमेषितव्यं वेदान्तेभ्य एव तत्सिद्धेरिति । **न**; संदेहादिना प्रतिबन्धादित्याह—**तच्चेति** । **नन्विच्छाया** विषयसौन्दर्यलभ्यत्वात्किं तत्कर्तव्यतोपदेशेन ? तत्राह—**इच्छानिभेनेति** । ज्ञातुमिच्छा हि संदिग्धे विषये निर्णयाय भवति, निर्णयश्च विचारसाध्य इति तत्कर्तव्यतार्थाद्गम्यत इत्यर्थः । आर्थिके चास्मिन्नर्थे कर्तव्यपदाध्याहारः । श्रौतस्तु मुमुक्षानन्तरं ब्रह्मज्ञानेच्छा भवितुं युक्ता इत्येष एव । तथा चाधिकारार्थत्वमथशब्दस्य निषेद्धुं ज्ञानेच्छा जिज्ञासाशब्दार्थ इत्युपपादनेन न विरोध इति । **ननु** धर्मग्रहणाद्विधीनामर्थ-विवक्षा तत्र कृता, न वेदान्तानाम्, **नेत्याह—धर्मग्रहणस्येति** । उपलक्षणतया वेदान्तानामर्थविवक्षाप्रतिज्ञावद्विचारप्र-तिज्ञापि तत्रैवास्त्वित्याशङ्क्योपरि प्रतिपादनादर्शनान्नेत्याह—**यद्यपीति** । ब्रह्मविचारप्रतिज्ञायास्तत्र संभवमङ्गीकृत्य परिहार उक्तः, इदानीं संभव एव नास्तीत्याह—**नापीति** । अविरक्तस्य ब्रह्मविचारे प्रवृत्त्ययोगादित्यर्थः । ब्रह्ममीमांसा-रम्भायेति प्राचा तन्त्रेणागततोक्ता । **नित्यादिविवेकानन्तर्यायेति** । तत्रत्यप्रथमसूत्रेणेहत्यप्रथमसूत्रस्य । युष्मदस्म

कल्पतरुपरिमलः ।

एवेति । फलेच्छैव हि स्वसाधनत्वोपाधिना उपायेच्छामादधाति, अत उपायेच्छा फलविषयापि भवतीत्येतद् युज्यत इति भावः । **आर्थिके चास्मिन्निति** । टीकायामेषितव्यमित्युक्त्या सूत्रे जिज्ञासा कर्तव्येति कर्तव्यपदाध्याहारः सूचितः, स तु जिज्ञासापदस्य कृतियोग्यविचारार्थकत्वाभिप्रायो न भवति; ब्रह्मजिज्ञासाया अनधिकार्यत्वादिति भाष्ये जिज्ञासाशब्द-स्यानधिकार्यज्ञानेच्छापरत्वस्याङ्गीकृतत्वात्, किंत्वार्थिकविचारकर्तव्यत्वाभिप्राय इत्यर्थः । **अर्थविवक्षाप्रतिज्ञावदिति** । **ननु**—अर्थविवक्षाप्रतिज्ञा विचारप्रतिज्ञेति नास्ति प्रतिज्ञाद्वयं धर्मजिज्ञासासूत्रे, (जै. सू. अ. १ पा० १ सू. १) येनाद्यप्रतिज्ञायां धर्मग्रहणं वेदार्थमात्रोपलक्षणं, न द्वितीयप्रतिज्ञायामिति विभज्येत, किं त्वेकैव तत्र विचारप्रतिज्ञा वेदस्य; विवक्षितार्थत्वं त्वतःशब्देन तत्र हेतुतयोच्यते, तद्धेतूकरणसामर्थ्याच्च वेदस्याध्ययनविनियोगशेषत्वेन विषनिर्हरणादिमन्त्रवदविवक्षितार्थ-त्वशङ्का निरस्यत इति—**चेत्, सत्यम्**; धर्ममात्रस्य तत्र विचार्यत्वप्रतिज्ञायामपि विशिष्य धर्मपरवेदभागमात्रस्य विवक्षि-तार्थत्वं न हेतुः; तथासति वेदान्तभागस्य अविवक्षितार्थत्वशङ्कायां न्यायतौल्येन पूर्वभागस्यापि तद्वदविवक्षितार्थत्वम-स्त्विति शङ्कायाः स्थिरीकरणापत्तेः, किंतु कृत्स्नवेदाध्ययनानन्तर्यस्याथशब्दार्थत्वादधीतस्य कृत्स्नस्य वेदस्य विवक्षितार्थत्वं हेतुतयोच्यते इत्यत्र तात्पर्यम् । एवंच धर्मग्रहणस्य वेदार्थमात्रोपलक्षणत्वादिति टीकायां धर्मस्य यद्ग्रहणम् अतःशब्दोक्तविवक्षि-तार्थत्वे हेतावर्थशब्देनोपादानं तस्य वेदार्थमात्रोपलक्षणत्वादित्यर्थो दर्शितो भवति । टीकायामपि स एवार्थः प्रकृतोपयोगी ।

[1]ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात् । यदि प्रसिद्धं, न जिज्ञासितव्यम् । अथाप्रसिद्धं, नैव शक्यं जिज्ञासितुमिति । उच्यते—अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं, सर्वज्ञं, सर्वशक्तिसम-

भामती ।

ब्रह्मज्ञानं प्रत्युपायतया मीमांसायाः प्रतिपाद्यत इत्युक्तं—तदयुक्तं; विकल्पासहत्वादिति चोदयति—**तत्पुनर्ब्रह्मेति ।** वेदान्तेभ्योऽपौरुषेयतया स्वतःसिद्धप्रामाण्येभ्यः प्रसिद्धमप्रसिद्धं वा स्यात् । **यदि प्रसिद्धं** वेदान्तवाक्यसमुत्थेन निश्चयज्ञानेन विषयीकृतं, ततो न जिज्ञासितव्यं; निष्पादितक्रिये कर्मणि अविशेषाधायिनः साधनस्य साधनन्यायातिपातात् । **अथाप्रसिद्धं** वेदान्तेभ्यः, तर्हि न तद्वेदान्ताः प्रतिपादयन्तीति सर्वथाऽप्रसिद्धं नैव शक्यं जिज्ञासितुम्; अनुभूते हि प्रिये भवतीच्छा, न तु सर्वथाऽननुभूतपूर्वे । न चेष्यमाणमपि शक्यं ज्ञातुं; प्रमाणाभावात् । शब्दो हि तस्य प्रमाणं वक्तव्यम् । **यथा वक्ष्यति**—'शास्त्रयोनित्वात्' इति । स चेत्तन्नावबोधयति, कुतस्तस्य तत्र प्रामाण्यम् । नच प्रमाणान्तरं ब्रह्मणि प्रक्रमते । तस्मात्प्रसिद्धस्य ज्ञातुं शक्यस्याप्यजिज्ञासनात्, अप्रसिद्धस्येच्छाया अविषयत्वात्, अशक्यज्ञानत्वाच्च न ब्रह्म जिज्ञास्यमित्याक्षेपः । परिहरति—**उच्यते—अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावम् । अयमर्थः**—प्रागपि ब्रह्ममीमांसाया अधीतवेदस्य निगमनिरुक्तव्याकरणादिपरिशीलनविदितपदतदर्थसंबन्धस्य 'सदेव सोम्येदमग्र आसीत्' इत्युपक्रमात्, 'तत्त्वमसि' इत्यन्तात्संदर्भात् नित्यत्वाद्युपेतब्रह्मस्वरूपावगमस्तावदापाततो विचाराद्विनाप्यस्ति । अत्रच ब्रह्मेत्यादिनावगम्येन तद्विषयमवगमं लक्षयति, तदस्तित्वस्य सति विमर्शे

वेदान्तकल्पतरुः ।

दित्यादिना ह्यहंप्रत्यये जीवस्य प्रसिद्धेरसंसारिब्रह्मात्मत्वस्य चाभावाद् विषयमाचिक्षिपे । अत्रतूपेत्य ब्रह्मात्मभावं वेदान्तेभ्यस्तत्सिद्ध्यसिद्धिभ्यामाक्षेप इति विभागमाह—**वेदान्तेभ्य इति ।** संदिग्धप्रसिद्धस्य जिज्ञास्यत्वसंभवादाक्षेपायोगमाशङ्क्याह—**निश्चयज्ञानेनेति ।** अनिश्चायकत्वं तु वेदान्तानामयुक्तं निर्दोषत्वादित्याह—**अपौरुषेयतेति ।** निष्पादिता प्रमितिलक्षणा क्रिया यस्य कर्मणो विषयस्य स इह तथोक्तः । यद्यपि निर्दोषो वेदः; तथापि सामान्यतो दृष्टनिबन्धनवचनव्यक्त्याभासप्रतिबद्धः संदिग्धार्थः स्यादतो विचारात्प्रागापातप्रसिद्धिं दर्शयन्नप्रसिद्धत्वपक्षोक्तं दोषमुद्धरति—**प्रागपि ब्रह्ममीमांसाया इति ।** भाष्ये ब्रह्मास्तित्वप्रतिज्ञा भाति, कथं प्रतीतिपरत्वव्याख्येत्याशङ्क्य प्रत्यग्येन प्रत्ययलक्षणामाह—

कल्पतरुपरिमलः ।

तत्रहि ब्रह्मजिज्ञासासूत्रं ब्रह्मज्ञानेच्छोपदर्शनमुखेन तदर्थायां ब्रह्ममीमांसायां प्रवर्तनार्थं, नतु वेदान्ताध्ययने प्रवर्तनार्थं वेदान्तानां विवक्षितार्थत्वोपपादनार्थं वेत्युक्त्वा वेदान्ताध्ययने प्रवृत्तेरध्ययनविधिना सिद्धत्वादिति हेतुं स्पष्टत्वादप्रदर्श्य वेदान्तानां विवक्षितार्थत्वस्य फलवदर्थावबोधपरतामध्ययनविधेः सूत्रयता धर्मजिज्ञासासूत्रेणैव (जै.अ.१ पा.१सू.१) सिद्धत्वादिति हेतुः प्रागुक्तः । तदुपादानार्थं विवक्षितार्थत्वादिति हेतावर्थग्रहणस्य वेदान्तार्थसाधारण्यमेव वक्तव्यं, नतु धर्मजिज्ञासेत्यत्र धर्मग्रहणस्य । अत इह टीकाकारैर्धर्मशब्दस्य वेदार्थमात्रोपलक्षणत्वं वदद्भिः धर्मजिज्ञासासूत्रं वेदार्थविचारप्रतिज्ञापरं विंशतिलक्षणीसाधारणमङ्गीकृतमिति न मन्तव्यम् । **सामान्यतो दृष्टनिबन्धनवचनव्यक्त्याभासप्रतिबद्धः संदिग्धार्थः स्यादिति ।** यद्यपि तत्त्वमसीत्यादिर्वेदान्तः स्वारस्येन ब्रह्मात्मैक्यं बोधयति; तथाप्यन्यत्र क्वचिद् दृष्टमित्येतावन्मात्रमवलम्ब्य प्रवृत्तान् वचनव्यक्त्याभासान् वाक्ययोजनाभासान् वादिभिरुत्प्रेक्षितान् पश्यतस्तैः प्रतिबद्धः सन् वेदान्तः संदिग्धार्थः स्यात् । **तथाहि**—'अनृक्षरा ऋजवः सन्तु पन्था' इत्यत्र पन्थान इति बहुवचनस्य 'सुपां सुलुगि' त्यादिसूत्रेण स्वादेशो दृष्टः, उत 'यत्सुन्वन्ति सामिधेनीस्तदन्वाहे' त्यत्र यत्तद्भ्यां सप्तम्यास्तेनैव सूत्रेणाल्लुग् दृष्टः, 'गायत्रीं छन्दसां माते'त्यत्र द्वितीया प्रथमार्थ इति विभ-

---

१ **तत्पुनर्ब्रह्मप्रसिद्धं इति**—अनुबन्धचतुष्टयसंभवेन साधितेऽपि विचारे पुनः प्रकारान्तरेणानुबन्धत्रयसंभवासंभवशङ्कापरिहारेण श्रोतव्यादिवाक्यस्य विचारविधित्वोपपादनार्थं वर्णकान्तरप्रारम्भः । तत्र वेदान्तशास्त्रं विषयः, प्रतिपाद्यप्रयोजनसंबन्धसंभवासंभवाभ्यां संशयः । प्रमाणभूतं हि शास्त्रं अनधिगतस्वरूपप्रतिपादनेनैव सार्थकं भवति । तत्र ब्रह्म यदि प्रागेव जिज्ञासायाः प्रपन्नं, तर्हि न वेदान्तशास्त्रं तत्प्रतिपादनपरमिति प्रतिपाद्यासिद्धिः । **एतेन**—प्रयोजनाद्यसिद्धिरपि—**व्याख्याता ।** यदि न प्रपन्नं, तर्हि सर्वथा बुद्ध्यनारूढस्य शास्त्रप्रतिपाद्यत्वं दुरुपपादमेवेत्युभयतःपाशरज्जुः इति पूर्वपक्षे ब्रह्मशब्दश्रवणादिभिः सामान्यतः प्रसिद्धस्य विशेषेण विचारस्योपपन्नत्वात् विषयादिसंभवात् विचारविध्युपपत्तिरिति सिद्धान्तः । **ननु**—वेदान्तानामेव ब्रह्मविषयो, न शास्त्रस्य; ब्रह्मोपपादनोपकारिन्यायानामेव तद्विषयत्वात् । वेदान्तानामर्थावबोधे मीमांसायां उपकारकत्वेन शास्त्रस्यापि तद्विषयत्वमिति तु—**नाशङ्कनीयम्;** मीमांसां विनाप्यर्थावबोधनसंभवेन तस्यास्तदनुपकारकत्वात् । एवंच ब्रह्मरूपविषयासंभवस्य तदवस्थत्वात् विचारविधिरनुपपन्न एवेति—**चेत्, न;** सामान्यतो दृष्टनिबन्धनवाक्याभासादिना विरोधेन प्रसक्तसंशयनिरसनद्वारा निर्णयहेतुना शास्त्रेण निर्णेयस्य वस्तुनोऽपि विषयीकरणस्यावश्यकत्वादिति सर्वमनवद्यम् ॥

न्वितम्, ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते; बृहतेर्धातोरर्थानु-

भामती ।

विचारात्प्रागनिर्णयात् । **नित्येति** क्षयितालक्षणं दुःखमुपक्षिपति । **शुद्धेति** देहाद्युपाधिकमपि दुःखमपाकरोति । **बुद्धे**त्यपराधीनप्रकाशमानन्दात्मानं दर्शयति; आनन्दप्रकाशयोरभेदात् । **स्यादेतत्**—। मुक्तौ सत्यामस्यैते शुद्धत्वादयः प्रथन्ते, ततस्तु प्राक् देहाद्यभेदेन तद्धर्मजन्मजरामरणादिदुःखयोगादित्यत उक्तम्—**मुक्तेति** । सदैव मुक्तः सदैव केवलोऽनाद्यविद्यावशात्तु भ्रान्त्या तथावभासत इत्यर्थः । तदेवमनौपाधिकं ब्रह्मणो रूपं दर्शयित्वाऽविद्योपाधिकं रूपमाह—**सर्वज्ञं सर्वशक्तिसमन्वितम्** । तदनेन जगत्कारणत्वमस्य दर्शितं, शक्तिज्ञानभावाभावानुविधानात्कारणत्वभावाभावयोः । कुतः पुनरेवंभूतब्रह्मस्वरूपावगतिरित्यत आह—**ब्रह्मशब्दस्य हीति** । न केवलं 'सदेव सोम्येदम्' इत्यादीनां वाक्यानां पौर्वापर्यालोचनया इत्थंभूतब्रह्मावगतिः, अपितु ब्रह्मपदमपि निर्वचनसामर्थ्यादिममेवार्थं स्वहस्तयति, निर्वचनमाह—**बृहतेर्धातोरर्थानुगमात्** । वृद्धिकर्मा हि बृहतिरतिशायने वर्तते । तच्चेदमतिशायनमनवच्छिन्नं पदान्तरावगमितं नित्यशुद्धबुद्धत्वाद्यस्याभ्यनुजानातीत्यर्थः । तदेवं तत्पदार्थस्य शुद्धत्वादेः प्रसिद्धिमभिधाय

वेदान्तकल्पतरुः ।

अत्रचेति । मुख्यार्थपरिग्रहे बाधमाह—**तदस्तित्वस्येति** । **विमर्शो** संशये । **देहाद्यभेदेनेति** भेदाभेदमतेन शङ्का । तत्त्वमसिवाक्यनिर्दिष्टतत्पदलक्ष्यप्रसिद्धिमुक्त्वा वाच्यप्रसिद्धिमाह—**अविद्योपाधिकमिति** । अविद्याविषयीकृतमित्यर्थः । **शक्तीति** । शक्तिज्ञानाभ्यां कारणं लक्ष्यते। यो हि जानाति शक्नोति च स करोति, नेतर इत्यनुविधानादित्यर्थः । सदेवेत्यादिवाक्यात्प्रसिद्धिमुक्त्वा पदादपि सोच्यत इति वक्तुं पृच्छति—**कुतः पुनरिति** । वाक्यात्प्रसिद्धस्येव पुनरपि कुतो हेत्वन्तरात्प्रसिद्धिरित्यर्थः । **ननु** बृहतिधातुरतिशायने वर्ततामापेक्षिकं तु तद्, बृहत् कुम्भ इतिवद्, **नेत्याह—अनवच्छिन्नमिति** । प्रकरणादिसङ्कोचकाभावादित्यर्थः । **पदान्तरं** साक्षान्नित्यत्वादिबोधकं नित्यादिपदम् । उक्तविशेषणानामन्यतमेनापि रहितस्य न महत्त्वसिद्धिरतो ब्रह्मपदादुक्तवस्तुसिद्धिरिति । **तत्पदार्थस्य शुद्धत्वादेरिति** समानाधिकरणे षष्ठ्यौ । जीवस्य हि

कल्पतरुपरिमलः ।

क्रियव्यत्ययो दृष्टः, एवं तत्त्वमसीत्यत्र तदित्यस्माच्चतुर्थ्याः स्वादेशो लुग्, विभक्तिव्यत्ययो वेति **तस्मै** जगत्कारणाय ब्रह्मणे **त्वं** त्वदात्मा समर्पणीय इत्यर्थः; 'ब्रह्मणे त्वा महस ॐ इत्यात्मानं युञ्जीते'ति श्रुत्यन्तरात् । **अथवा**—पञ्चम्याः स्वादेशादिभि**स्तस्मात्त्वं** तस्माज्जातस्त्वमित्यर्थः; 'यतो वा इमानि भूतानि जायन्त' इति श्रुत्यन्तरात् । **अथवा**—षष्ठ्याः स्वादेशादिभि**स्तस्य त्वं** तत्स्वामिकस्त्वमित्यर्थः; 'सकारणं करणाधिप' इति श्रुत्यन्तरात् । **अथवा**—सप्तम्याः स्वादेशादिभि**स्तस्मिंस्त्वं** तदाश्रितस्त्वमित्यर्थः; 'प्राणबन्धनं हि सोम्य मन' इति तत्रैव श्रवणात् । **अथवा**—ब्राह्मणस्त्वं मनुष्यस्त्वमित्यादिवत् शरीरशरीरिभावनिबन्धनं **तत्त्वमिति** सामानाधिकरण्यं; 'यस्यात्मा शरीरमि'ति श्रुत्यन्तरात् । **अथवा**—'अघोराऽपापकाशिनी'त्यत्रेवाऽकारप्रश्लेषात् **अतत्त्वमसीति** च्छेदः; 'द्वा सुपर्णे' त्यादिभेदश्रुत्यनुरोधादिति । **एवं** 'मीमांसका हि वाक्यार्थविचारे प्रस्तुते सति । लोकदृष्टीः प्रतिघ्नन्ति वचनव्यक्तिपांसुभिः ॥' इति ब्रह्माधिकरण (जै.अ.३ पा.३ सू.१४) वार्तिकोक्तरीत्या तत्तदुत्प्रेक्षितवचनव्यक्त्याभासापादितसंदेहाक्रान्ता तत्त्वमस्यादिवाक्यजन्या ब्रह्मात्मैक्यधीरापाततः प्रसिद्धिरित्यर्थः । **वचनयुक्त्याभासेति** पाठे द्वा सुपर्णेत्यादयो भेदप्रतिपादनच्छायापत्त्या वचनाभासाः तदुपोद्बलकयुक्तयो युक्त्याभासाः । **सामान्यतो दृष्टवचनव्यक्त्याऽऽपाततः प्रसिद्धेः संदिग्धार्थः स्यादिति** पाठः प्रागुक्त एवार्थे योजनीयः; सामान्यतो दृष्टेन या वचनव्यक्तिस्तयार्थान्तराणामप्यापाततः प्रतीतेः संदिग्धार्थः स्यादिति । ब्रह्मात्मस्वरूपनिर्णायकवाक्येष्वर्थसंदेहेऽपि नित्यानित्यवस्तुविवेकान्तर्गतबन्धमिथ्यात्वसद्रूपतदधिष्ठानावश्यंभावनिश्चयो मोक्षार्थप्रवृत्त्युपयोग्यन्तःकरणशुद्ध्यापादककर्मानुष्ठानमहिम्नेति प्रागेवोक्तम् । ततस्तु प्राग् देहाद्यभेदेनेति टीकाग्रन्थो न चार्वाकमताभिप्रायः; तन्मते मुक्तौ देहात्मनोर्भेद इत्यस्याभावात् । नापि भ्रान्तिकृताऽभेदाभिप्रायः; तस्य सिद्धान्त्यभिमतत्वेनानिराकार्यत्वादित्याशङ्क्य तत्तात्पर्यमाह—**भेदाभेदमतेन शङ्केति** । षष्ठ्योः सामानाधिकरण्ये हेतुमाह—**जीवस्य हीति** । तत्पदार्थस्य धर्मिणो जीवात्पदार्थान्तरत्वे हि धर्म्यपि तत्पदेनापूर्वतया बोधनीयः, नतु स जीवात्पदार्थान्तरमिति तद्गतं शुद्धत्वाद्येव संसारदशायामविद्यातिरोहितत्वेनाप्रसिद्धं तेन ज्ञापनीयं; अतस्तत्पदार्थस्य शुद्धत्वादेश्चेति न वैयधिकरण्यमित्यर्थः । यद्यपि तत्पदार्थस्य यत् शुद्धत्वादीत्येव वैयधिकरण्यं वक्तुं शक्यं; तथापि त्वं पदार्थ एव तत्पदार्थ इत्यभेददृढीकरणाय तदपि परित्यक्तमित्यर्थः । सर्वस्य ब्रह्मास्तित्वप्रसिद्धिरिति साध्यं, सर्वो हि तत्प्रत्येतीति हेतुरिति तयोरविशेषशङ्का । **तत्पदार्थमात्रस्य प्रसिद्धि-**

---

१ निरवद्यमहत्त्वसंपन्नं वस्तु ब्रह्मपदार्थः। ततश्च कालकृतावच्छेदनिमित्तात्पत्वस्य रूपविशेषावच्छेदकृतात्पत्वस्य देशकृतावच्छेदनिमित्तात्पत्वस्य वस्तुपरिच्छेदनिमित्तात्पत्वस्येतरशेषत्वप्रयुक्तस्याविद्याकामकर्मपारतन्त्र्यप्रयुक्तस्य वा निष्कर्षस्य चाभावबोधनेन नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति सिद्ध्यतीति—**पञ्चपादिकाकाराः** ॥

गमात्। सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः। सर्वो ह्यात्मास्तित्वं प्रत्येति, न नाहमस्मीति। यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्, सर्वो लोको नाहमस्मीति प्रतीयात्। आत्मा च ब्रह्म। यदि तर्हि लोके ब्रह्मात्मत्वेन प्रसिद्धमस्ति, ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नम्। न; तद्विशेषं प्रति विप्रतिपत्तेः। देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लोकायतिकाश्च प्रति-

भामती।

त्वंपदार्थस्याप्याह—**सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः**। सर्वस्य पांसुलपादकस्य हालिकस्यापि ब्रह्मास्तित्वप्रसिद्धिः, कुतः? आत्मत्वात्। एतदेव स्फुटयति—**सर्वो हीति**। प्रतीतिमेवाप्रतीतिनिराकरणेन द्रढयति—**न नेति**। न न प्रत्येत्यहमस्मीति, किंतु प्रत्येत्येवेति योजना। **नन्वहमस्मीति** च ज्ञास्यति मा च ज्ञासीदात्मानमित्यत आह—**यदीति। अहमस्मीति न प्रतीयात्**। अहंकारास्पदं हि जीवात्मानं चेन्न प्रतीयात्, अहमिति न प्रतीयादित्यर्थः। **ननु** प्रत्येतु सर्वो जन आत्मानमहंकारास्पदं, ब्रह्मणि तु किमायातमित्यत आह—**आत्मा च ब्रह्म**। तदस्त्वमा सामानाधिकरण्यात्। तस्मात्तत्पदार्थस्य शुद्धबुद्धत्वादेः शब्दतः, त्वंपदार्थस्य च जीवात्मनः प्रत्यक्षतः प्रसिद्धेः, पदार्थज्ञानपूर्वकत्वाच्च वाक्यार्थज्ञानस्य, त्वंपदार्थस्य ब्रह्मभावावगमः 'तत्त्वमसि' इति वाक्यादुपपद्यत इति भावः॥ आक्षेप्ता प्रथमकल्पाश्रयं दोषमाह—**यदि तर्हि लोक इति**। अध्यापकाध्येतृपरंपरा लोकः। तत्र 'तत्त्वमसि' इति वाक्याद्यदि ब्रह्मात्मत्वेन प्रसिद्धमस्ति। आत्मा ब्रह्मत्वेनेति वक्तव्ये ब्रह्मात्मत्वेनेत्यभेदविवक्षया गमयितव्यम्। परिहरति—**न**। कुतः? **तद्विशेषं प्रति विप्रतिपत्तेः**। तदनेन विप्रतिपत्तिः साधकबाधकप्रमाणाभावे सति

वेदान्तकल्पतरुः।

विशुद्धत्वाद्येव तत्पदेन समर्प्यते, न पदार्थान्तरमिति। प्रसिद्धिर्हि ज्ञानं ज्ञातारमाकाङ्क्षति, तेन व्यवहितमपि सर्वस्येत्येतदस्तित्वप्रसिद्धिरित्यनेन संबन्धनीयम्। तथा सति प्रतिज्ञाविशेषणं सत्कैमुतिकन्यायं द्योतयिष्यति, नतु सर्वस्यात्मत्वादिति हेतुविशेषणं, वैयर्थ्यादित्यभिप्रेत्याह—**सर्वस्येति**। पांसुमन्तौ पादौ यस्य स तथा। हलं वहतीति हालिकः। सर्वस्य ब्रह्मास्तित्वप्रसिद्धिः, सर्वो हि तत्प्रत्येतीति साध्यहेत्वोरविशेषमाशङ्क्याह—**प्रतीतिमेवेति**। अहं न नास्मीति प्रत्येतीति योजनायाम् अस्तित्वं न सिध्येत्; असत्त्वनिषेधेऽप्यनिर्वाच्यत्वस्यानिवारणात्, अतोऽहमस्मीति न प्रत्येतीति योजनैव साध्वीति। अहमिति प्रतीतेरहंकारमात्रविषयत्वान्नात्मप्रसिद्धिः सिध्येदिति शङ्कते—**नन्वहमिति**। ऋजुयोजनायां ह्यव्याप्यादव्यापकप्रसञ्जनं स्यात्, नहि प्रसिद्ध्यभावो नास्तित्वप्रतीत्या व्याप्तः; सुषुप्तौ विश्वाभावप्रतीतिप्रसङ्गात्, तन्मा भूदिति व्यवहितेन संबन्धयति—**अहमस्मीति न प्रतीयादिति**। शङ्कितुरनुशयमपाकरोति—**अहंकारास्पदमिति**। अहमिति प्रतिभासस्य चिदचित्संवलितविषयत्वमध्यासभाष्ये समर्थितम्। तथाचाहमिति प्रतीतिरात्मविषयापि, अत आत्मप्रसिद्ध्यभावेऽहमिति प्रतीतिर्न स्यादित्यर्थः। **तदस्त्वमेति**। 'तत्त्वमसि'वाक्ये तत्पदस्य प्रकृतसच्छब्दवाच्यब्रह्मपरामर्शिनस्त्वंपदेन सामानाधिकरण्यादित्यर्थः। **ननु** ब्रह्मात्मैकत्वस्य वाक्यार्थस्याप्रसिद्धत्वेनाप्रतिपाद्यत्वाक्षेपे पदार्थप्रसिद्धिप्रदर्शनमनुपयोगीत्याशङ्क्याह—**तस्मादिति**। पदार्थयोरवधृतयोस्ताभ्यां गृहीतसंबन्धपदद्वयसमभिव्याहारादपूर्वो वाक्यार्थः सुज्ञान इत्यर्थः। एवं तावदापाततो वाक्यात्पदतश्च प्रसिद्धेर्ब्रह्मणः शास्त्रेण शक्यप्रतिपादनत्वसंबन्धं सामर्थ्यासाधारणरूपविषयत्वं समाधातुमाक्षिपतीत्याह—**आक्षेप्तेति**। ब्रह्मण आत्मत्वेन लोकप्रसिद्ध्यभावाद्वाक्यीयप्रसिद्धिरनूद्यत इत्याह—**तत्त्वमसीति। ननु** तृतीयाया इत्थंभावार्थत्वं विहायात्मत्वेन हेतुना ब्रह्म यदि लोके प्रसिद्धमात्मा च ब्रह्मेति त्वयैवोक्तत्वादिति व्याख्यायतां, तदा हि लोकशब्दो रूढार्थः स्यात्, **उच्यते**; तत्पदार्थमात्रस्य प्रसिद्धिस्तदानूदिता स्यात्, तस्याश्चाजिज्ञास्यत्वं प्रति न हेतुत्वम्; ज्ञातेऽपि पदार्थे वाक्यार्थस्य जिज्ञासोपपत्तेरिति। **स्यादेतद्यदि** ब्रह्मात्मत्वेन प्रसिद्धमिति भाष्यमनुपपन्नम्; नहि महावाक्ये ब्रह्मानुवादेनात्मत्वं विधीयते, किंतु लोकसिद्धजीवानुवादेनागममात्रसिद्धब्रह्मत्वम्, अत आह—**अभेदविवक्षयेति**। अन्यत्र हि वाक्यार्थबोधोत्तरकालं पदार्थानामुद्देश्योपादेयभावो न व्यावर्तते, अत्र त्वखण्डवाक्यार्थसाक्षात्कारे स बाध्यत इति द्योतयितुमात्मपदे प्रयोज्ये ब्रह्मपदं ब्रह्मपदे चात्मपदं प्रयुक्तमित्यर्थः। **ननु** विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिः, सा च वस्त्वभावसाधिकेति कथं विषयलाभः, तत्राह—**तदनेनेति**। न विरुद्धप्रतिपत्तिमात्रेणाभावावगमः, किंतु प्रमाणमूलतया; अतः साधकबाधकप्रमाणभावे विप्रतिपत्तिः संशयबीजमित्यर्थः। **ननु** साधारणाकारदृष्टौ संशयो, नत्विह क्षणिकविज्ञानस्थिरभोक्त्रादावस्ति; साधारणो धर्मी इत्याशङ्क्य विप्रतिपत्त्यन्यथानुप-

कल्पतरुपरिमलः।

रिति। तत्पदबोध्यस्य धर्मिण इत्यर्थः, नतु प्राचीनटीकाग्रन्थइव तद्बोध्यस्य शुद्धत्वादेरित्यर्थः; तस्य प्रसिद्ध्यभावेनानुवादायोगात्। **वस्त्वभावसाधिकेति**। रजताभावप्रतिपत्तिर्हि रजतबाधिका दृष्टा, तथेहापि स्यादित्यर्थः। **साधारणाकारदृष्टाविति**। साधारणधर्मिदृष्टावित्यर्थः; विप्रतिपत्तिजन्यसंशये समानधर्मदर्शनस्यानपेक्षितत्वाद्, अग्रे विरुद्धप्रतिपत्त्योः

पन्नाः। इन्द्रियाण्येव चेतनान्यात्मेत्यपरे। मन इत्यन्ये। विज्ञानमात्रं क्षणिकमित्येके। शून्यमित्यपरे। अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे। भोक्तैव केवलं न कर्तेत्येके। अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित्। आत्मा स भोक्तुरित्यपरे। एवं

भामती।

संशयबीजमुक्तम्। ततश्च संशयाजिज्ञासोपपद्यत इति भावः। विवादाधिकरणं धर्मी सर्वतन्त्रसिद्धान्तसिद्धोऽभ्युपेयः। अन्यथा अनाश्रया भिन्नाश्रया वा विप्रतिपत्तयो न स्युः। विरुद्धा हि प्रतिपत्तयो विप्रतिपत्तयः। न चानाश्रयाः प्रतिपत्तयो भवन्ति; अनालम्बनत्वापत्तेः। नच भिन्नाश्रया विरुद्धाः। नह्यनित्या बुद्धिः नित्य आत्मेति प्रतिपत्तिविप्रतिपत्ती। तस्मात्तत्पदार्थस्य शुद्धत्वादेर्वेदान्तेभ्यः प्रतीतिः, त्वंपदार्थस्य च जीवात्मनो लोकतः सिद्धिः सर्वतन्त्रसिद्धान्तः। तदाभासत्वानाभासत्वतत्तद्विशेषेषु परमत्र विप्रतिपत्तयः। तस्मात्सामान्यतः प्रसिद्धे धर्मिणि विशेषतो विप्रतिपत्तौ युक्तस्तद्विशेषेषु संशयः। तत्र त्वंपदार्थे तावद्विप्रतिपत्तीर्दर्शयति—**देहमात्रम्** इत्यादिना, **भोक्तैव केवलं न कर्ता** इत्यन्तेन। अत्र **देहेन्द्रियमनःक्षणिकविज्ञानचैतन्यपक्षे** न तत्पदार्थनित्यत्वादयः त्वंपदार्थेन संबध्यन्ते; योग्यताविरहात्। **शून्यपक्षेऽपि** सर्वोपाख्यारहितमपदार्थः कथं तत्त्वमोर्गोचरः। **कर्तृभोक्तृस्वभावस्यापि परिणामितया** तत्पदार्थनित्यत्वाद्यसंगतिरेव। **अकर्तृत्वेऽपि भोक्तृत्वपक्षे** परिणामितया नित्यत्वाद्यसंगतिः। **अभोक्तृत्वेऽपि** नानात्वेनावच्छिन्नत्वादनित्यत्वादिप्रसक्तावद्वैतहानाच्च तत्पदार्थासंगतिस्तदवस्थैव। त्वंपदार्थविप्रतिपत्त्या च तत्पदार्थेऽपि विप्रतिपत्तिर्दर्शिता। वेदाप्रामाण्यवादिनो हि लौकायतिकादयस्तत्पदार्थप्रत्ययं मिथ्येति मन्यन्ते। वेदप्रामाण्यवादिनोऽप्यौपचारिकं तत्पदार्थमविवक्षितं वा मन्यन्त इति। तदेवं त्वंपदार्थविप्रतिपत्तिद्वारा तत्पदार्थे विप्रतिपत्तिं सूचयित्वा साक्षात्तत्पदार्थे विप्रतिपत्तिमाह—**अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित्।** तदिति जीवात्मनः परामृशति। न केवलं शरीरादिभ्यः, जीवात्मभ्योऽपि व्यतिरिक्तः। स च सर्वस्यैव जगत ईष्टे। ऐश्वर्यसिद्ध्यर्थं स्वाभाविकमस्य रूपद्वयमुक्तम्—**सर्वज्ञः सर्वशक्तिरिति**। तस्यापि जीवात्मभ्योऽपि व्यतिरेकात्, न त्वंपदार्थेन सामानाधिकरण्यमिति स्वमतमाह—**आत्मा स भोक्तुरित्यपरे**। भोक्तुर्जीवात्मनोऽविद्योपाधिकस्य स ईश्वरस्तत्पदार्थ आत्मा, तत ईश्वरादभिन्नो जीवात्मा। परमाकाशादिव घटाकाशादय इत्यर्थः।

वेदान्तकल्पतरुः।

पत्त्या तं साधयति—**विवादाधिकरणमिति**। देह आत्मा इत्यादिविवादाश्रयो धर्मी पराग्व्यावृत्तोऽहमास्पदं सर्वतन्त्रेष्वभ्युपगत इति मन्तव्यम्। तत्र हेतुमाह—**अन्यथेति**। आश्रयशब्दो विषयवाची। भिन्नविषया विप्रतिपत्तयो न स्युरतो विवदमानानामप्येकमालम्बनमविगीतम्। अत्रोपपत्तिमाह—**विरुद्धा हीति**। विप्रतिपत्तिशब्दावयवप्रतिपत्तिशब्दार्थस्य ज्ञानस्य सालम्बनत्वात् यत्किंचिदालम्बनं सिद्धम्; वीत्युपरागप्रतीतविरोधवशाच्च तदेकमिति सिध्यति। एकार्थोपनिपाते हि धियां विरोधः; अत्र वैधर्म्योदाहरणमाह—**नहीति**। साधारणधर्मिस्फुरणेऽपि न शास्त्रार्थस्य बुद्धिसमारोहः, नहि साधारणः शास्त्रार्थस्तत्राह—**तस्मादिति**। यस्माद्विप्रतिपत्तिरेकालम्बना, यतश्चैकस्मिन्नालम्बने पूर्वधीविषयनिषेधेन विरुद्धधीरुदेति; तस्मात्प्रतियोगितया विप्रतिपत्त्येकस्कन्धत्वेन तत्त्वंपदार्थतदेकत्वप्रतीतिर्लोकशास्त्राभ्यां सर्वैरेष्टव्येति। तर्हि क्व विगानमत आह—**तदाभासत्वेति**। लौकायतिकादीनां सा प्रतीतिराभासः। आस्तिकानां तत्पदार्थप्रतीतेस्तत्त्वमर्थैकत्वप्रतीतेश्च गौणतायां तथा त्वंपदार्थधियोऽसङ्गसाक्ष्यालम्बनत्वे च विगानमिति। त्वंपदार्थविप्रतिपत्तिप्रदर्शनस्य वाक्यार्थविप्रतिपत्तौ पर्यवसानमाह—**अत्रेति**। देहादिक्षणिकविज्ञानपर्यन्तानाम्। **चैतन्यं** चेतनत्वमात्मत्वमित्यर्थः। **भोक्तैवात्मेति**—पक्षे भोक्तृत्वं किं विक्रिया, उत चिदात्मत्वम्। **नाद्यः** कर्तृत्वपक्षादविशेषादित्याह—**कर्तृत्वेऽपीति। द्वितीयं** प्रत्याह—**अभोक्तृत्वेऽपीति**। सक्रियत्वरूपभोक्तृत्वाभावेऽपीत्यर्थः। सांख्या हि जननमरणादिनियमान्निर्विशेषा अपि चेतनाः प्रतिदेहं भिन्ना इति मेनिरे। भिन्नानां च कुम्भवद्विनाशजाड्यापत्तिरतो न नित्यतत्पदार्थैकतेति। **अथवा** मैवानुमायि भेदादनित्यता, आत्मभेदाभ्युपगम एव ब्रह्मात्मैकत्वविरोधीत्याह—**अद्वैतेति**। लौकायतिकादिनिरीश्वरमतानुभाषणेनैव तत्पदार्थ ईश्वरेऽपि विप्रतिपत्तिः सूचिता, अतस्तादृशब्रह्मात्मैक्यवाक्यार्थेऽपि विप्रतिपत्तिरर्थाद्युक्तेत्याह—**त्वंपदार्थेति। वेदप्रामाण्यवादिनो** मीमांसकादयः। **शरीरादिभ्य इति** शरीरादिशून्यपर्यन्तेभ्य इति। **जीवात्मभ्य इति**। कर्तृभोक्तृभ्यः। केवलभोक्तृभ्य इति **स्वाभाविकमस्येति** नैयायिकादिमतेनेत्यर्थः।

कल्पतरुपरिमलः।

साधारणालम्बनस्य धर्मिण एवात्र सद्भावोपपादनदर्शनाच्च। एवंच न त्विहेत्याद्यग्रिमवाक्येऽपि साधारणो धर्मीत्येव पाठो युक्तः। अतएव साधारणधर्मिस्फुरणेऽपीत्यग्रिमग्रन्थे सकलकोशेषु धर्मिशब्दस्यैव पाठः। **नहि साधारणः शास्त्रार्थ इति।** संदेहविषयकोटिद्वयसाधारणो धर्मी न शास्त्रप्रतिपाद्यः, संप्रतिपन्नत्वादित्यर्थः। **तत्पदार्थप्रतीतेरिति।** आस्तिकमे-

बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्तः। तत्राविचार्य यत्किंचित्प्रतिपद्यमानो निःश्रेयसात्प्रतिहन्येतानर्थं चेयात्। तस्माद्ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते॥ इति जिज्ञासाधिकरणम्॥ १॥

ब्रह्म जिज्ञासितव्यमित्युक्तम्। किंलक्षणं पुनस्तद्ब्रह्मेत्यत आह भगवान्सूत्रकारः—

(२ अधिकरणम्) **जन्माद्यस्य यतः॥ २॥**

भामती।

विप्रतिपत्तीरुपसंहरन् विप्रतिपत्तिबीजमाह—**एवं बहव इति**। युक्तियुक्त्याभासवाक्यवाक्याभाससमाश्रयाः सन्त इति योजना। **ननु** सन्तु विप्रतिपत्तयः, तन्निमित्तश्च संशयः, तथापि किमर्थं ब्रह्ममीमांसारभ्यत इत्यत आह—**तत्राविचार्येति**। तत्त्वज्ञानाच्च निःश्रेयसाधिगमो नातत्त्वज्ञानाद्भवितुमर्हति। अपिच अतत्त्वज्ञानान्नास्तिक्ये सत्यनर्थप्राप्तिरित्यर्थः। सूत्रतात्पर्यमुपसंहरति—**तस्मादिति**। वेदान्तमीमांसा तावत्तर्क एव, तदविरोधिनश्च येऽन्येऽपि तर्का अध्वरमीमांसायां न्याये च वेदप्रत्यक्षादिप्रामाण्यपरिशोधनादिषूक्तास्त उपकरणं यस्याः सा तथोक्ता। तस्मात्परमनिःश्रेयससाधनब्रह्मज्ञानप्रयोजना ब्रह्ममीमांसारब्धव्येति **सिद्धम्॥ इति जिज्ञासाधिकरणम्॥ १॥**

जन्माद्यस्य यतः॥ २॥

तदेवमिति तदेवं प्रथमेन सूत्रेण मीमांसारम्भमुपपाद्य ब्रह्ममीमांसामारभते—**जन्माद्यस्य यतः**। एतस्य सूत्रस्य पातनिकामाह भाष्यकारः—**ब्रह्म जिज्ञासितव्यमित्युक्तम्। किंलक्षणं पुनस्तद्ब्रह्म**। अत्र यद्यपि ब्रह्मस्वरूपज्ञानस्य प्रधा-

वेदान्तकल्पतरुः।

युक्तिवाक्येति भाष्यस्थतच्छब्दस्य प्रत्येकं युक्तिवाक्याभ्यां संबन्धं करोति—**युक्तीति**। आत्मा स भोक्तुरिति पक्षे मूलं युक्तिवाक्ये, अन्यत्र तदाभासाविति। अनर्थं चेयादिति भाष्यार्थमाह—**अपिचेति**। भाष्ये तर्कस्य पृथगुक्तेर्वेदान्तमीमांसा किं न तर्कः, नेत्याह—**वेदान्तमीमांसेति**। अर्थापत्तिरनुमानं चात्र तर्कोऽभिमतः, तद्रूपा वेदान्तमीमांसा, तस्या अविरोधिनः श्रुतिलिङ्गादयस्तार्तीयाः पाञ्चमिकाश्च श्रुत्यर्थादयो वेदप्रामाण्यपरिशोधकाः कर्ममीमांसायां विचारिताः। वेदस्य प्रत्यक्षादीनां तदर्थादीनां च लक्षणादीनि न्यायशास्त्रैर्विचारितानि। स्मृत्यादिभिश्च वेदानुमानेऽनुमानचिन्तोपयोगः। तेन विहितजातिव्यक्तिपदार्थविवेके वेदस्वरूपग्रहणे च न्यायशास्त्रस्योपयोगः। सर्वे चैते प्रमाणानुग्राहकत्वेन तर्का उच्यन्त **इति॥**

इति जिज्ञासाधिकरणम्॥ १॥

जन्माद्यस्य यतः॥ २॥

अनन्तराधिकरणेन प्रारिप्सितसमस्तविचारस्य संबन्धमाह—**तदेवमिति**। सकलशास्त्रं प्रतीकेन संगृहीतम्। विषयादिसद्भावात् समर्थिते विचारारम्भे तमुपजीव्योत्तरविचारप्रवृत्तेर्हेतुहेतुमल्लक्षणः संबन्ध इत्यर्थः। प्रथमसूत्रेण द्वितीयसूत्रस्याक्षेपलक्षणां सङ्गतिमाह—**एतस्येति**। मुमुक्षुणा ब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्तव्य इति प्रतिज्ञायां ब्रह्मस्वरूपविचारवत्प्रमाणयुक्तिसाधनफलविचाराणामर्थात् प्रतिभाने कथं प्रथमं ब्रह्मैव विचार्यतेऽत आह—**अत्रेति**। अत्र यतो वेत्यादिवाक्यं

कल्पतरुपरिमलः।

देवादिषु निरीश्वरवादिनां तत्पदार्थप्रतीतेर्गौणतायां सेश्वरवादिनां तत्त्वमर्थैकत्वप्रतीतेः गौणतायामिति विगानमित्यभिप्रेतनेनान्वितम्। सांख्या निरीश्वरा अपि चेतनाः प्रतिदेहं भिन्ना इति मेनिरे इति संबन्धः। तत्र हेतुमाह—**जननेति। स्मृत्यादिभिश्चेति**। स्मरन्ति च (ब्र. अ. २ पा. ३ सू. ७४) अपि च सप्त (ब्र. अ. ३ पा. १ सू. १५) बहिस्तूभयथापि स्मृतेराचाराच्च (ब्र. अ. ३ पा. ४ सू. ४३) आचारदर्शना (ब्र. अ. ३ पा. ४ सू. ३) दित्यादिसूत्रैर्नरकयातनासद्भावारूढपतितबहिष्करणादौ प्रमाणत्वेनोपनिबद्धानां स्मृत्याचाराणां प्रामाण्यं वेदमूलत्वेनेति तैर्वेदानुमाने अनुमानस्वरूपनिर्णयस्योपयोग इत्यर्थः। **तेन विहितेति**। यस्मान्न्यायशास्त्रे लक्षणमुखेन प्रमाणप्रमेयादिविवेचनं कृतं, तेन हेतुना समाननामरूपत्वादित्यादिसूत्र (ब्र. अ. १ पा. ३ सू. ३०) निबद्धे वैदिकानां यागदेवतासमर्पकेन्द्रादिशब्दानां जातिरर्थ इति विवेके जानश्रुतौ शूद्रशब्दस्य न शूद्रत्वजातिरर्थः, किंतु यौगिकत्वेन व्यक्तिरिति विवेके च जातिव्यक्तिपदार्थविवेचनद्वारा आनुमानिकवेदस्वरूपग्रहणेऽनुमाननिर्णयद्वारा च न्यायशास्त्रस्योपयोग इत्यर्थः॥

इति जिज्ञासाधिकरणम्॥ १॥

जन्माद्यस्य यतः॥ २॥

यतो वेति। ननु—'यतो वे'त्यादिवाक्यस्य ब्रह्मलक्षकत्वालक्षकत्वसंशयो न तदुक्तलक्षणस्य जगज्जन्मादेः प्रसि-

१ अत्र एकं सूत्रं—अथातो ब्रह्मजिज्ञासेति।

भामती ।

नस्य प्रतिज्ञया तदङ्गान्यपि प्रमाणादीनि प्रतिज्ञातानि; तथापि स्वरूपस्य प्राधान्यात्तदेवाक्षिप्य प्रथमं समर्थ्यते। तत्र यद्यावदनुभूयते तत्सर्वं परिमितं अविशुद्धमबुद्धं विध्वंसि न तेनोपलब्धेन तद्विरुद्धस्य नित्यशुद्धबुद्धस्वभावस्य ब्रह्मणः स्वरूपं शक्यं लक्षयितुम्। नहि जातु कश्चित्कृतकत्वेन नित्यं लक्षयति। नच तद्धर्मेण नित्यत्वादिना तल्लक्ष्यते; तस्यानुपलब्धचरत्वात्। प्रसिद्धं हि लक्षणं भवति, नात्यन्ताप्रसिद्धम्। एवंच न शब्दोऽप्यत्र प्रक्रमते; अत्यन्ताप्रसिद्धतया ब्रह्मणोऽपदार्थस्यावाक्यार्थत्वात्। तस्माल्लक्षणाभावान्न ब्रह्म जिज्ञासितव्यमित्याक्षेपाभिप्रायः। **तमिममाक्षेपं भगवान्सूत्रकारः परिहरति— 'जन्माद्यस्य यतः'** इति। माभूदनुभूयमानं जगत्तद्धर्मतया तादात्म्येन वा ब्रह्मणो लक्षणं, तदुत्पत्त्या तु भविष्यति,

वेदान्तकल्पतरुः ।

ब्रह्म लक्षयति, उत नेति लक्षणस्य लोकप्रसिद्ध्यप्रसिद्धिभ्यां विशये पूर्वपक्षमाह—**तत्र यद्यावदिति**। पूर्वाधिकरणाक्षेपपरिहारत्वादस्य तत्रत्यब्रह्मलक्षणनिरूपकत्वाच्च तदीयमेव मुमुक्ष्वभिलषितमोक्षलाभः प्रयोजनमिति न पृथग्वक्तव्यम्। **यदाहाचार्यः शबरस्वामी**—आक्षेपे चापवादे च प्राप्त्यां लक्षणकर्मणि। प्रयोजनं न वक्तव्यं यच्च कृत्वा प्रवर्तते ॥' इति। यत्र पूर्वाधिकरणसिद्धान्ताक्षेपेण पूर्वः पक्षः तत्राक्षेपिकी, यत्र तु पूर्वाधिकरणसिद्धान्तेन पूर्वपक्षः तत्रापवादिकी सङ्गतिः। **प्राप्तिः** तदर्थचिन्ता। **कृत्वा प्रवर्तनं** कृत्वाचिन्ता, सा चाभ्युपगमवाद इति। सजातीयविजातीयव्यावृत्तिप्रयोजनो धर्मो लक्षणं नाम। तदिह परिदृश्यमानं जगदेव लक्षणं ब्रह्मणः, उत नित्यशुद्धत्वादिस्वरूपमिति विकल्प्य **नाद्य** इत्युक्ते **द्वितीयमाशङ्क्याह—नचेति। ननु** लोकासिद्धमपि वेदेन ज्ञाप्यतामत आह—**एवंचेति**। न जगद् ब्रह्मलक्षणं, किंतु तत्प्रति कारणत्वं, तच्च जीवाविद्याविषयीकृतस्य धर्म इत्युपलक्षणमुपपादयति—**माभूदिति। तादात्म्येनेति**। ऐक्येन। ततो भेदेन—**तद्धर्मतयेति। तदुत्पत्त्यात्विति**। तदुत्पन्नत्वेन जगत् स्वकारणं **लक्षयति** ज्ञापयति,

कल्पतरुपरिमलः ।

द्ध्यप्रसिद्धिभ्यां, किंतु विरोधाविरोधाभ्याम्, 'आनन्दाद्ध्येवेति' वाक्यस्यैव संशयस्तदुक्तस्वरूपलक्षणस्य प्रसिद्ध्यप्रसिद्धिभ्याम्, अतः कथमेवमुक्तमिति—**चेत्, उच्यते**; स्वरूपलक्षणमपि यतो वेत्यादिवाक्यमूलम्। **तदुक्तं**—जगत्कारणमनूद्य हि तस्यानन्दत्वविधायकमानन्दवाक्यम्—इति। अत इत्थमुक्तौ नानुपपत्तिः। **ननु**—जन्माद्यस्य यत इति सूत्रोपात्तस्य पूर्वपक्षसिद्धान्ताभ्यां प्रथमं समर्थ्यमानस्य तटस्थलक्षणस्य विरोधाविरोधाभ्यां 'यतो वे'-त्यादिवाक्यस्य ब्रह्मलक्षकत्वालक्षकत्वसंशय एवाधिकरणाङ्गत्वेन दर्शयितुं युक्तः, नत्वतथाभूतस्य स्वरूपलक्षणस्य प्रसिद्ध्यप्रसिद्धिभ्याम् यतो वेत्यादिवाक्यस्यानन्दवाक्यद्वारा ब्रह्मलक्षकत्वालक्षकत्वसंशय इति—**चेत्, उच्यते**; सकलेतरव्यावृत्तलक्ष्यबोधनसमर्थमिह लक्षणं निर्धारणीयं, जगज्जन्मादिकं तु न तथा, किंतु शाखाग्रे चन्द्र इतिवत्तटस्थलक्षणम्। यथा दिगन्तरस्थिततारकादिभ्य एव व्यावर्तकं, नतु शाखोर्ध्वदेशगतचन्द्रसमीपवर्तितारकादिभ्यः, एवं जगज्जन्मादिकमसंभावितकारणभावेभ्य एव व्यावर्तकं, नतु संभावितकारणभावेभ्यः प्रधानपुरुषादिभ्यः। अतः प्रकृष्टप्रकाशवत्सकलेतरव्यावृत्तलक्ष्यबोधनसमर्थं स्वरूपलक्षणमेवेह तटस्थलक्षणद्वारा सूत्रकृता निर्दिधारयिषितं, नतु तटस्थलक्षणमेव। **अतएवाचार्यैस्तस्य च निर्णयवाक्यमित्यादिभाष्यस्य तात्पर्यं वक्ष्यते**—'स्वरूपलक्षणपरत्वं सूत्रस्य दर्शयितुं तस्य चेति भाष्य'मिति। तस्मात्प्रसिद्ध्यप्रसिद्धिमूलकसंशयस्याधिकरणाङ्गत्वेन प्रदर्शनं युक्तमेव ॥ **आक्षेपे इति। आक्षेपाधिकरणमा**क्षेप्याधिकरणसिद्धान्तफलेनैव फलवद्, यथा औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः (जै. अ. १ पा. १ सू. ५) इत्यधिकरणे शब्दार्थसंबन्धस्य नित्यत्वेन वेदस्य निरपेक्षबोधकत्वरूपप्रामाण्ये समर्थिते शब्दार्थसंबन्धस्य नित्यत्वमयुक्तं शब्दानामेवानित्यत्वादिति तदाक्षेपसमाधानार्थं प्रवृत्तं शब्दाधिकरणम् (ब्र. अ. १ पा. ३ सू. २८)। **अपवादाधिकरण**मपवादाधिकरणपूर्वपक्षफलेन फलवत्, यथा स्मृत्यधिकरणे (जै. अ. १ पा. ३ सू. १–२) स्मृतीनां वेदमूलत्वेन प्रामाण्ये समर्थिते प्रत्यक्षश्रुतिविरुद्धस्मृतिषु वेदमूलत्वापवदनार्थं प्रवृत्तं विरोधाधिकरणम् (जै. अ. १ पा. ३ सू. ३)। **तदर्थचिन्ता** यदर्था सा तत्फलेन फलवती, यथा दर्शपूर्णमासादिप्रकरणाम्नातान्यङ्गानि प्राकरणिकेष्वेव व्यवतिष्ठन्ते, नतु सौर्यादिष्वप्युपदेशविधया पारिप्लवानि भवन्तीति, सप्तमाद्यचिन्ता सौर्यादिषु प्रयाजादीनामतिदेशेन प्राप्तिरित्यग्रिमचिन्ताफलेन फलवती। लक्षणनिरूपणं लक्ष्यपरिच्छेदेन फलवत्, इत्येतेषु नियतैकरूपफलविशेषावगतेः फलं न वक्तव्यं। **कृत्वाचिन्तायामन्यत्रैव** फलमिति तत्र फलव्यतिरेकनिश्चयात् फलं न वक्तव्यमित्यर्थः। **[कार]णत्वं त्विति**। यद्यपि जन्यजनकभावसंबन्धेन जगद् ब्रह्म लक्षयतीति जगत एव ब्रह्मलक्षणत्वमनुपदमुक्तं, [तथा]पि व्यावृत्तिव्यवहारानुमानयोहेतूभवतो लक्षणस्य पक्षनिष्ठत्वेन भाव्यमिति ये मन्यन्ते ताननुरुध्यैवमुक्तम्। **जन्म आदिर्यथोरिति। ननु**—भाष्यानभिमतमतद्गुणसंविज्ञानमाश्रित्य विशेषविवक्षायां तस्मिन्नेव पक्षे यत्सहैः [illegible] [मु]च्यते तदनुपपन्नम्। **तथाहि—अत्र** कोवा विवक्षाविषयो न भवतीति प्रत्याख्येयो विशेषः, किं वा तद्विषयो भव[illegible] [प्र]त्युपादेयं सामान्यम्। जन्मादित्रयमध्येऽतद्गुणसंविज्ञानबहुव्रीहिलभ्यं स्थितिभङ्गद्वयं विशेषः, तद्गुणसंविज्ञानबहुव्रीहिलभ्यं [ज]न्मादित्रयं सामान्यमिति चेत्, कथमाद्यपक्षे

जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः । जन्मस्थितिभङ्गं समासार्थः । जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च । श्रुतिनिर्देशस्तावत् 'यतो वा इमानि भूतानि जायन्ते' (तैत्ति० ३।१) इत्यस्मिन्वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात् । वस्तुवृत्तमपि जन्मना लब्धसत्ताकस्य धर्मिणः स्थितिप्रलयसंभवात् । अस्येति प्रत्यक्षादिसंनिधापितस्य धर्मिण इदमा निर्देशः । षष्ठी जन्मादिधर्मसंबन्धार्था । यत इति कारणनिर्देशः । अस्य जगतो नामरूपाभ्यां

भामती ।

देशान्तरप्राप्तिरिव सवितुर्व्रज्याया इति तात्पर्यार्थः । **सूत्रावयवान्विभजते—जन्मोत्पत्तिरादिरस्येति** । लाघवाय सूत्रकृता जन्मादीति नपुंसकप्रयोगः कृतः, तदुपपादनाय समाहारमाह—**जन्मस्थितिभङ्गमिति** । **जन्मनश्च** इत्यादिः **कारणनिर्देशः** इत्यन्तः संदर्भो निगदव्याख्यातः । **स्यादेतत्**—प्रधानकालग्रहलोकपालक्रियायदृच्छास्वभावाभावेषूपप्लवमानेषु सत्सु सर्वज्ञं सर्वशक्तिस्वभावं ब्रह्म जगजन्मादिकारणमिति कुतः संभावनेत्यत आह—**अस्य जगत इति** । अत्र **नामरूपाभ्यां व्याकृतस्य** इति चेतनभावकर्तृकत्वसंभावनया प्रधानाद्यचेतनकर्तृकत्वं निरुपाख्यकर्तृकत्वं च व्यासेधति । यत्खलु नाम्ना रूपेण च व्याक्रियते तच्चेतनकर्तृकं दृष्टं, यथा घटादि । विवादाध्यासितं च जगन्नामरूपव्याकृतं तस्माच्चेतनकर्तृकं संभाव्यते । चेतनो हि बुद्धावालिख्य नामरूपे घट इति नाम्ना रूपेण च कम्बुग्रीवादिना बाह्यं

वेदान्तकल्पतरुः ।

कारणत्वं तु ब्रह्म लक्षणमित्यर्थः । **व्रज्याया गतेः** । जन्म आदिर्ययोः स्थितिभङ्गयोस्तौ जन्मादी इत्यन्यपदार्थौ यदि विशेषरूपेण विवक्ष्यते, तर्हि **जन्मादी अस्येति** निर्देशे गौरवं स्यात्तन्मा भूदिति सामान्यविवक्षया नपुंसकप्रयोगः सूत्रे कृतः । तत्र नपुंसकैकवचनप्रयोगार्हं समाहारमाहेत्याह—**लाघवायेति** । श्रुतीरविशदाः काश्चिद्भाष्याणि विषमाणि च वाचस्पत्युक्तभावानि पदशो विभजामहे ॥ **तद्गुणसंविज्ञान इति** । तच्छब्देन बहुव्रीह्यर्थोऽन्यपदार्थ उच्यते । तस्य गुणत्वेन संविज्ञानं यस्मिन्समासे स तथोक्तः । सर्वस्य विशेषणत्वे समासाऽसंभवात् समासार्थैकदेशो विशेषणमिति लभ्यते । अनादौ संसारे कथं जन्मादिस्तत्राह—**जन्मन इति** । श्रुत्या वा कथमयुक्तं निर्दिष्टमत आह—**वस्त्विति** । नानादेः संसारस्यादिर्जन्मोच्यते, किं तर्हि प्रतिवस्तु । घटस्य हि जन्मैवादिरिति । इदमः संनिहितवचनत्वात्प्रत्यक्षमात्रपरामर्शित्वमाशङ्क्य प्रतीतिमात्रं संनिधिरित्याह—**अस्येतीति** । सर्वस्य जगतो न जन्म; आकाशादेरनादित्वात्, तत्राह—**षष्ठीति** । वियदधिकरण (ब्र. अ. २ पा. ३ सू. १)न्यायात्तस्याप्यस्ति जन्मादिसंबन्ध इत्यर्थः । जगतो जन्मादेर्वा ब्रह्मासंबन्धान्न लक्षणत्वमित्याशङ्क्याह—**यत इति** । व्याख्यातमेतदधस्तात् । एवं सूत्रपदानि व्याख्याय प्रथमसूत्राद् ब्रह्मपदानुषङ्गेण तच्छब्दाध्याहारेण च वाक्यार्थमाह—**अस्य जगत इत्यादिना भाष्येण** । तद्गतैर्विशेषणैर्लक्षणेऽतिव्याप्तिः परिहियत इत्याह—**स्यादेतदित्यादिना** । स्वभाव एव नियन्तेति स्वभावपक्षः, यदृच्छापक्षस्तु न किंचिन्नियामकमस्तीति ।

कल्पतरुपरिमलः ।

गौरवं, द्वितीयपक्षे तत्परिहारश्च । जन्मादिपदविग्रहवाक्यगतयत्पदविवरणार्थं जन्मस्थितिभङ्गानामितीतरेतरयोगद्वन्द्वाश्रयणे हि जन्म आदिर्येषामिति विग्रहलाभाज् **जन्मादयोऽस्य यत** इति सूत्ररचनापत्त्या जन्मस्थितिभङ्गरूपसामान्यविवक्षायामेवातिगौरवं स्यात्, समाहारद्वन्द्वाश्रयणे तु स्थितिभङ्गद्वयरूपविशेषविवक्षायामपि न गौरवम्; जन्म आदिर्यस्य स्थितिभङ्गस्येति विग्रहाश्रयणेन जन्माद्यस्य यत इत्येव सूत्ररचनोपपत्तेः । नहि त्रयविवक्षायामेव समाहारद्वन्द्वाश्रयणं, न द्वयविवक्षायामित्यस्ति नियमः । **एतेन**—स्त्रीलिङ्गपुंलिङ्गे लिङ्गविशेषौ नपुंसकलिङ्गं तदुभयानुगतं सामान्यं, नतु तृतीयं लिङ्गान्तरमिति शाब्दिकमर्यादाश्रयणेन विशेषसामान्यशब्दार्थग्रहणशङ्कापि—**निरस्ता**; स्थितिभङ्गद्वयग्रहणेऽपि लिङ्गसामान्यविवक्षायां जन्मादिषु त्रिष्वपि लिङ्गविशेषविवक्षायाश्च कर्तुं शक्यत्वेन गौरवलाघवस्थित्यभावात् । नहि लिङ्गविशेषलिङ्गसामान्यविवक्षे द्वित्रिग्रहणयोर्नियते—**उच्यते**; लिङ्गविशेषविवक्षायां गौरवं लिङ्गसामान्यविवक्षायां लाघवमित्येवात्र विवक्षितं । मूलश्रुत्यनुसारेण जन्मादित्रयकारणत्वं लक्षणमिति तल्लाभार्थं तद्गुणसंविज्ञानबहुव्रीहिरेवात्राभिमतः । तदाश्रयणे च लिङ्गविशेषविवक्षायां **जन्मादयोऽस्य यत इति** सूत्ररचनापत्त्या गौरवं स्पष्टमेव । तत्र यद्याशङ्क्येत तर्हि अतद्गुणसंविज्ञानबहुव्रीह्याश्रयणेन लिङ्गविशेषविवक्षाऽस्त्विति, तत्रापि '**जन्मादी अस्य यत**' इति सूत्ररचनापत्त्या गौरवमस्तीति विभावयितुं जन्म आदिर्ययोरित्यादिग्रन्थप्रवृत्तिरिति न कश्चिद्दोषः । **ननु** लिङ्गसामान्यविवक्षायामपि 'जन्मादीन्यस्य यत' इति सूत्ररचनापत्त्या गौरवं स्यादित्याशङ्कानिराकरणार्थमुत्तरटीकाग्रन्थमवतारयति—**तत्र नपुंसकैकवचनेति** । इतरेतरयोगद्वन्द्वसमाश्रयणे लिङ्गसामान्यविवक्षाभ्यनुज्ञानाभावाज् जन्मादीनि इति सूत्ररचनापत्त्या गौरवं स्यात्, इह तु सर्वो द्वन्द्वो विभाषैकवद्भवतीति परिभाषासिद्धः समाहारद्वन्द्वः समाश्रीयते । तत्र 'स नपुंसकमि'ति सूत्रेण लिङ्गसामान्यविवक्षाभ्यनुज्ञातेति नपुंसकैकवचनेन सूत्रलाघवं लभ्यत इत्यर्थः । **स्वभाव एव नियन्तेति** । "कालः स्वभावो नियतिर्यदृच्छा

व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति तद्ब्रह्मेति वाक्यशेषः ।

भामती ।

घटं निष्पादयति । अतएव घटस्य निर्वर्त्यस्याप्यन्तःसंकल्पात्मना सिद्धस्य कर्मकारकभावो घटं करोतीति । **यथाहुः**— 'बुद्धिसिद्धं तु न तदसत्' इति । तथाचाचेतनो बुद्धावनालिखितं करोतीति न शक्यं संभावयितुमिति भावः । **स्यादेतत्**—चेतना ग्रहा लोकपाला वा नामरूपे बुद्धावालिख्य जगज्जनयिष्यन्ति, कृतमुक्तस्वभावेन ब्रह्मणेत्यत आह—**अनेककर्तृभोक्तृसंयुक्तस्येति** । केचित्कर्तारो भवन्ति, यथा सूदर्त्विगादयः, न भोक्तारः । केचित्तु भोक्तारः, यथा श्राद्धवैश्वानरीयेष्ट्यादिषु पितापुत्रादयः, न कर्तारः । तस्मादुभयग्रहणम् । देशकालनिमित्तक्रियाफलानि इतीतरेतरद्वन्द्वः । देशादीनि च प्रतिनियतानि चेति विग्रहः । तदाश्रयो जगत्तस्य । **केचित्खलु** प्रतिनियतदेशोत्पादाः, यथा कृष्णमृगादयः । **केचित्प्रतिनियतकालोत्पादाः**, यथा कोकिलारवादयः । **केचित्प्रतिनियतनिमित्ताः**, यथा नवाम्बुदध्वानादिनिमित्ता बलाकागर्भादयः । **केचित्प्रतिनियतक्रियाः**, यथा ब्राह्मणानां याजनादयो नेतरेषाम् । एवं प्रतिनियतफलाः । **यथा केचित्सुखिनः, केचिद्दुः**खिनः, एवं य एव सुखिनस्त एव कदाचिद्दुःखिनः । **सर्वमेतदाकस्मि**कापरनाम्नि यादृच्छिकत्वे च स्वाभाविकत्वे चासर्वशक्तिकर्तृकत्वे च न घटते; परिमितज्ञानशक्तिभिर्ग्रहलोकपालादिभिर्ज्ञातुं कर्तुं चाशक्यत्वात् । तदिदमुक्तम्—**मनसाप्यचिन्त्यरचनारूपस्येति** । एकस्या अपि हि शरीररचनाया **रूपं मनसा** न शक्यं चिन्तयितुं कदाचित्, प्रागेव जगद्रचनायाः, किमङ्ग पुनः कर्तुमित्यर्थः । सूत्रवाक्यं पूरयति—**तद्ब्रह्मेति वाक्यशेषः । स्यादेतत्**—कस्मात् पुनर्जन्मस्थितिभङ्गमात्रमिहादिग्रहणेन गृह्यते, ननु वृद्धिपरिणा-

वेदान्तकल्पतरुः ।

व्यासेधति प्रतिषेधति । उत्पत्तेः प्रागसतः कथं बुद्धावालेखनमत आह—**अत एवेति** । यदसदिति प्रसिद्धं तद्, बुद्ध्यारूढरूपेण सदेव; अन्यथा तुरङ्गशृङ्गवत्कर्मत्वनिर्देशायोगादिति सत्कार्यवादिनश्चाहुः । **वैश्वानरीयेष्ट्यादिष्विति । चतुर्थे स्थितम्—फलसंयोगस्त्वचोदितेन स्यादशेषभूतत्वात्** (जै. अ. ४ पा. ३ सू. ३८) "वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते" इत्युपक्रम्य "यस्मिन् जात एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवती"ति श्रूयते । तत्र किं पूतत्वादि पितुः फलं, उत पुत्रस्येति संदेहे, फलस्य कर्तृगामित्वनियमादितरथा प्रेरणानुपपत्तेः पितुरिति प्राप्ते—राद्धान्तः; यस्मिन् जाते एतामिष्टिं निर्वपति स पूत इति जातगामित्वेन फलाम्नानात् फलभोक्तृत्वेनाचोदिते पितरि फलसंयोगो न स्याद्वचनस्य तं प्रत्यशेषभूतत्वात् । **यस्त्व**फलभागिनो न प्रेरणेति । **तन्न**; पूतत्वादिगुणवत्पुत्रवत्तयैव पितुः प्रीत्युत्पत्तेः प्रेरणावकल्पनात् । अतः पुत्रगामि फलमिति । **अत्रानेककर्तृभोक्तृजीवानां** सृज्यत्वेन निर्देशाज्जगत्कर्तृत्वायोग्यतोक्ता । **मनसापीति** जगतस्तान्प्रति कार्यत्वायोग्यतेति विशेषणद्वयेन जीवकर्तृकत्वनिषेधः । **व्याकृतस्य**

कल्पतरुपरिमलः ।

भूतानि योनिः पुरुष इति चिन्त्य"मिति श्वेताश्वतरोपनिषन्मन्त्रेण कालकारणत्वादिवादाः प्रत्याख्याताः । "कथमसतः सज्जायेते"ति श्रुत्या त्वसत्कारणत्ववादः । तैरिह पूर्वपक्षः कृतः । मन्त्रे पुरुषशब्दस्य विवरणं टीकायां—ग्रहलोकपालशब्देन कृतम् । इदं हिरण्यगर्भादीनामप्युपलक्षणम् । क्रियाशब्देन नियतिशब्दस्य प्रधानशब्देन योनिशब्दस्येति विवेकः । अतिव्याप्तिशब्देन कालादीनामेव कारणत्वोपपत्तौ ब्रह्म कारणं नाभ्युपगन्तव्यमित्यसम्भवो विवक्षितः । तत्र पुरुषपूर्वपक्षः श्रुत्यन्तरावलम्बनः । **प्रश्नोपनिषदि हि** "षोडशकलं पुरुषं" प्रस्तुत्य 'तं त्वा पृच्छामि क्वासौ पुरुष इति' भारद्वाजप्रश्ने "तस्मै स होवाच इहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्ति, स ईक्षांचक्रे कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति, स प्राणमसृजत् प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीमिन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोकाः लोकेषु नाम चेति" जीवस्यैव प्राणादिनामान्तषोडशकलास्रष्टृत्वं श्रूयते । अयं च जीवपूर्वपक्ष इहैवाधिकरणे निराकार्यो न प्रधानादिपूर्वपक्षवदधिकरणान्तरे निराकृतः । "कस्मिन्नहमुत्क्रान्त" इत्यादिप्रश्नोपनिषद्वाक्यमपि परब्रह्मविषयमेव; "तान् होवाचैतावदेवाहमेतत्परं ब्रह्म वेद नातः परमस्तीति" तदुपसंहारे पिप्पलादवचनात्, सकलोपनिषत्प्रसिद्धस्य जीवाधिकस्य परब्रह्मणश्चापलपितुमशक्यत्वात्, प्राणोत्क्रान्तिप्रतिष्ठाभ्यां परब्रह्मणः स्वोत्क्रान्तिप्रतिष्ठावत्त्वम्, ईक्षणं तु स्वस्य तथाभूतजीवाभेदाभिप्रायेणेति तन्निराकरणं द्रष्टव्यम् । **यदसदिति प्रसिद्धमिति ।** यद्यपि स्रष्टव्यसजातीयगतानुभूताकारानुसन्धानेनापि सृष्टिः सम्भवति; तथापि यत्रानुभूतादप्यतिशयितेन वैलक्षण्येन स्रष्टव्यमिति स्रष्टव्याकारानुसन्धानं, तत्र तस्याकारस्य तदानीमसत्त्वप्रसिद्धिरस्तीति तात्पर्यम् । **इतरथा प्रेरणानुपपत्तेरिति ।** तथाच प्रबलन्यायविरुद्धतया यथाश्रुतार्थप्रतिपादनाक्षमेण "यस्मिन् जात" इत्याद्यर्थवादेन कथंचिल्लक्षणोन्नीतेन पितृगाम्येव फलं प्रतिपाद्यत इति कल्पनीयमिति भावः । **पितुः प्रीत्युत्पत्तेरिति ।** पुत्रगतमपि पूतत्वादिकं पशुहिरण्या-

अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भाव इति जन्मस्थितिनाशानामिह ग्रहणम् । यास्कपरिपठितानां तु 'जायतेऽस्ति' इत्यादीनां ग्रहणे तेषां जगतः स्थितिकाले संभाव्यमानत्वान्मूल-

भामती ।

मापक्षया अपीत्यत आह—**अन्येषामपि भावविकाराणां**—वृद्ध्यादीनां **त्रिष्वेवान्तर्भाव इति । वृद्धिस्ताव**-द्वयवोपचयः । तेनाल्पावयवादवयविनो द्वितन्तुकादेरन्य एव महान्पटो जायत इति जन्मैव वृद्धिः । परिणामोऽपि त्रिविधो धर्म-लक्षणा-वस्थालक्षणः उत्पत्तिरेव । धर्मिणो हि हाटकादेर्धर्मलक्षणः परिणामः कटकमुकुटादिस्तस्योत्पत्तिः । एवं कटकादेरपि प्रत्युत्पन्नत्वादिलक्षणः परिणाम उत्पत्तिः । एवमवस्थापरिणामो नवपुराणत्वाद्युत्पत्तिः । **अपक्षयस्त्ववयवह्रासो** नाश एव । तस्माज्जन्मादिषु यथास्वमन्तर्भावाद्वृद्ध्यादयः पृथङ्नोक्ता इत्यर्थः । अथैते वृद्ध्यादयो न जन्मादिष्वन्तर्भवन्ति, तथाप्युत्पत्तिस्थितिभङ्गमेवोपादातव्यम्; तथा सति हि तत्प्रतिपादके 'यतो वा इमानि भूतानि' इति वेदवाक्ये बुद्धिस्थीकृते जगन्मूलकारणं ब्रह्म लक्षितं भवति, अन्यथा तु जायतेऽस्ति वर्धत इत्यादीनां ग्रहणे तत्प्रतिपादकं नैरुक्तवाक्यं बुद्धौ भवेत्, तच्च न मूलकारणप्रतिपादनपरम्, महासर्गादूर्ध्वं स्थितिकालेऽपि तद्वाक्योदितानां जन्मादीनां भावविकाराणामुपपत्तेः, इति शङ्कानिराकरणार्थं वेदोक्तोत्पत्तिस्थितिभङ्गग्रहणमित्याह—**यास्कपरिपठितानां त्विति । नन्वेवमप्युत्पत्तिमात्रं सूच्यतां, तन्नान्तरीयकतया तु स्थितिभङ्गं गम्यत इत्यत**

वेदान्तकल्पतरुः ।

इत्यनेनानभिव्यक्तबीजावस्थजगतोभिव्यक्त्यभिधानादणवः प्रागसद् द्व्यणुकाद्यारभन्त इति मतव्युदासः । शेषं विशदं टीकायाम् । तदेव लिलक्षयिषितजगद्योनिब्रह्मसजातीयया परप्रमपरिकल्पितप्रधानादेरुक्तविधजगत्प्रकृतित्वं ब्रह्म व्यवच्छिनत्ति । विजातीयात्पुनः कार्यात्कारणत्वमेव । तथा च सजातीयविजातीयव्यवच्छेदकत्वेन जगत्प्रकृतित्वस्य सिद्धं लक्षणत्वम् । **धर्मलक्षणेति** । धर्म इति लक्षणमिति अवस्थेति त्रीणि लक्षणानि यस्य परिणामस्य स तथोक्तः । स चोत्पत्तावन्तर्भवतीति । धर्मपरिणामं विवृणोति—**धर्मिणोहीति** । कनकादेर्धर्मिणो धर्मरूपपरिमाणो नाम मुकुटकटकादिरिति सांख्यप्रक्रिया । तत्र निरूप्यमाणे परिणामशब्दालम्बने तस्य कटकादेर्हेमादित उत्पत्तिरित्यर्थः । लक्षणपरिणाममुदाहरति—**एवमिति । प्रत्युत्पन्नत्वं** वर्तमानत्वं कटकादिकार्यस्य वर्तमानत्वातीतत्वभविष्यत्वरूपो लक्षणपरिणामः सोऽप्युत्पत्तिरित्यर्थः । अवस्थापरिणाममुदाहरति—**एवमवस्थेति** । अतीतादेरेवातीतत्वातीततरत्वातीततमत्वादिरूपो नवपुराणत्वाद्यापत्तिरवस्थापरिणामो नाम, स चोत्पत्तिरेवेत्यर्थः । अपक्षयस्य विनाशान्तर्भावमाह—**अपक्षयस्त्विति । तच्च न मूलकारणेति** । पुरुषाणां श्रुतिमन्तरेणातीन्द्रियार्थे दर्शनसामर्थ्याभावादित्यर्थः । **नच** वृद्ध्यादिविकारकथनादेव मूलकारणे द्रष्टृत्वमनुमेयं अन्यथाप्युपपत्तेरित्याह—**महासर्गादिति** । परमकारणादुत्पत्त्यादयो न गृहीता इति शङ्कापनुत्तये **योत्पत्तिर्ब्रह्मणो** 'यतो वेति' वाक्ये जायन्त इत्युत्पत्तिरभिहिता **या च तत्रैव** स्थितिर्जीवन्तीत्युक्ता, **यश्च तत्रैव प्रलयो**ऽभिसंविशन्तीत्युक्तस्त उत्पत्त्यादयः सूत्रे गृह्यन्त इति भाष्यार्थः । तत्रोत्पत्तिमात्रादेव लक्षणस्यालक्ष्यव्यावृत्तिसिद्धौ स्थितिलयोपादानमाशङ्कानिवृत्त्यर्थमित्याह—**उत्पत्तिमात्रमिति** । उत्पादकत्वं निमित्तेऽपि दृष्टमित्युपादानत्वसिद्ध्यर्थं लयाश्रयत्वमुक्तमित्यर्थः । **नन्वेवमपि**—लयाधारत्वादेवोपादानत्वं लभ्यते, नहि दण्डादिषु कुम्भादयो लीयन्तेऽत इतरवैयर्थ्यम्—**इतिचेत्, मैवम्**; उपादानत्वमेव न कुलधर्मतयोक्तं, किंतु प्रकृतिविकाराभेदन्यायेनाद्वैतसिद्धये । एवं च भवतु ब्रह्म जगत उपादानमधिष्ठाता तु उत्पत्तिस्थित्योरन्यः स्यात् कुम्भकार इव कुम्भस्योत्पत्तौ राजेव च राजस्थेम्नीति मा शङ्कीत्युत्पत्तिस्थितिग्रहणमिति । लक्षणाख्यकेवलव्यतिरेक्यनुमानादेव प्रतिज्ञातब्रह्मप्रमितेः शास्त्रयोनित्व(ब्र. अ. १ पा. १ सू. ३) समन्वयाधिकरण (ब्र. अ. १ पा. १ सू. ४) योर्वैयर्थ्य-

कल्पतरुपरिमलः ।

• द्यभिवृद्धिवत्पितुः प्रीत्युत्पादनद्वारा गौणपुरुषार्थो भवतीत्यर्थः । कारणत्वमेवेति पाठे ब्रह्म व्यवच्छिनत्तीत्यनुषङ्गः । कारणत्वादेवेति पाठे ब्रह्मव्यवच्छिन्नमित्यध्याहारः । **सांख्यप्रक्रियेति** । धर्मलक्षणावस्थापरिणाममभेदान् पातञ्जला व्यवहरन्ति । पातञ्जले हि योगशास्त्रे परिणामत्रयसंयमादतीतानागतज्ञान (योगसूत्र. पा. २ सू. १६)मिति परिणामत्रयविषयं धारणाध्यानसमाधिरूपं संयमं फलाय विधातुं चित्तस्य परिणामत्रयलक्षणानन्तरं सूत्रितम् "एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः" (योगसूत्र. पा.२ सू. १३) इति । त इह सेश्वरसांख्यानतिभिन्नत्वात् सांख्यशब्देनोक्ताः । **सोप्युत्पत्तिरिति** । वर्तमानत्वादिरपि तत्तत्कालोपाधिविशेषोत्पत्तिरित्यर्थः । **पुरुषाणामिति** । पुरुषवाक्यं हि मूलप्रमाणसापेक्षम् । तदिह न तावच्छ्रुतिः; श्रुतेर्जन्मादित्रितयविषयत्वात् । नापि तदीयं प्रत्यक्षं; मूलकारणाधीनमहाभूतजन्मादिषु प्रत्यक्षाप्रवृत्तेरित्यर्थः । अतीन्द्रियार्थद्रष्टृत्वमपि पुरुषगौरवादनुमेयमित्याशङ्क्याह—**नचेति । अन्यथाप्युपपत्तेरिति** । यास्कादयः स्वकाले हेमादीनां विकारषट्कं दृष्ट्वा पठितवन्त इत्यप्युपपत्तेर्नातीन्द्रियार्थे प्रत्यक्षं कल्पनीयमि-

कारणादुत्पत्तिस्थितिनाशा जगतो न गृहीताः स्युरित्याशङ्क्येत, तन्मा शङ्कीति योत्पत्तिर्ब्रह्मणस्तत्रैव स्थितिः प्रलयश्च त एव गृह्यन्ते। न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वान्यतः प्रधानादचेतनादणुभ्योऽभावात्संसारिणो वा उत्पत्त्यादि संभावयितुं शक्यम्। नच स्वभावतः; विशिष्टदेशकालनिमित्तानामिहोपादानात्। एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्त ईश्वरकारणिनः। नन्विहापि तदेवोपन्यस्तं जन्मादिसूत्रे, न; वेदान्तवाक्यकुसुमग्रथनार्थत्वात्सूत्राणाम्। वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते।

भामती।

आह—**योत्पत्तिर्ब्रह्मणः** कारणादिति। त्रिभिरस्योपादानत्वं सूच्यते। उत्पत्तिमात्रं तु निमित्तकारणसाधारणमिति नोपादानं सूचयेत्। तदिदमुक्तम्—**तत्रैवेति**। पूर्वोक्तानां कार्यकारणविशेषणानां प्रयोजनमाह—**न यथोक्तेति।** तदनेन प्रबन्धेन प्रतिज्ञाविषयस्य ब्रह्मस्वरूपस्य लक्षणद्वारेण संभावनोक्ता। तत्र प्रमाणं वक्तव्यम्। **यथाहुर्नैयायिकाः**—'संभावितः प्रतिज्ञायां पक्षः साध्येत हेतुना। न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः॥ यथा च वन्ध्या जननी' इत्यादिरिति। इत्थं नाम जन्मादिसंभावनाहेतुः, यदन्ये वैशेषिकादय इत एवानुमानादीश्वरविनिश्चयमिच्छन्तीति संभावनाहेतुतां द्रढयितुमाह—**एतदेवेति**। चोदयति—**नन्विहापीति**। एतावतैवाधिकरणार्थे समाप्ते वक्ष्यमाणाधिकरणार्थमनुवदन्सुहृद्भावेन परिहरति—**न। वेदान्तेति**। वेदान्तवाक्यकुसुमग्रथनार्थतामेव दर्शयति—

वेदान्तकल्पतरुः।

त्याशङ्क्याह—**तदनेनेति।** ब्रह्मज्ञानाय वेदान्तविचार आरभ्य इति प्रतिज्ञायां विशेषणत्वेन ब्रह्मविषय इति प्रतिज्ञाविषयस्येत्युक्तम्। लक्षणं हि सिद्धस्य वस्तुनो भेदमवगमयति, ईदृशं तदिति तत्स्वरूपं वा, न सत्ताम्। कार्येण च कारणं किंचिदस्तीति मितम्। तत्त्वेकमनेकं वेति संदिग्धम्। तस्य यदेकत्वं सेत्स्यति, तदा भवति तत्सर्वज्ञं सर्वशक्ति च, नेतरथा। अयमेव संशयः कल्पनालाघवसंज्ञकतर्केणोत्कटैककोटिकतां नीतः संभावना समभवन्न निर्णयः। विचित्रप्रासादादीनां बहुकर्तृकत्वस्य प्रायेण दृष्टत्वात्तदिदमुक्तं—**संभावनोक्तेति।** एवंच वक्ष्यमाणाधिकरणद्वयेन प्रमाणं वाच्यमित्यर्थः। एतदेवेति भाष्येण युक्तीनामासां संभावनाहेतुत्वं दृढीक्रियत इत्याह—**इत्थं नामेति।** नैयायिकैरपि प्रमाणादमूषां भेदो नाज्ञायि युक्तीनाम्। ततः स्तोकैवासां प्रमाणादूनतैवं च संभावयन्तितरामित्यर्थः। **सुहृद्भावेनेति।** उत्तराधिकरणारंभात्प्राक् क्षणमपि शिष्याणामनुपपत्तिशङ्का मा भूदिति कृपयेत्यर्थः। अत्र "नावेदविन्मनुते तं बृहन्तं" "नैषा तर्केण मतिरापनेये"त्यादिशास्त्रात्प्रागुक्तयुक्त्या च वेदैकगम्यं ब्रह्मेति समाधत्त इत्याह—**परिहरतीति।** वाक्या-

कल्पतरुपरिमलः।

त्यर्थः। **एतेन**—यास्कवचनस्य स्मृतित्वान्मूलश्रुत्यनुमानमपि—**निरस्तम्**; दृष्टमूलाभावे एव तदनुमानादिति भावः। **वेदान्तेति।** वेदान्तविचारः कर्तव्य इत्यार्थिकप्रतिज्ञायामित्यर्थः। **ननु** चोदनासूत्रवज्जन्मादिसूत्रं लक्षणप्रमाणोभयपरमस्तु; जन्यजनकभावेन लक्षणीभवतो जगतः सकर्तृकत्वानुमाने हेतुभावस्याप्युपपत्तेः, अत उत्तराधिकरणवैयर्थ्यमेवेत्याशङ्क्य कार्येण कारणमनुमीयतां नाम, तदेकत्वादिसिद्धौ तु श्रुतिरेव शरणीकरणीयेत्युत्तराधिकरणं सार्थकमित्याह—**कार्येण चेति। ननु**—कार्यत्वलिङ्गेन जगतः कारणानुमानानन्तरं प्रवृत्तस्तदेकत्वानेकत्वसंशयो लाघवतर्कवशादुत्कटकोटिकसंशयरूपा संभावना संपद्यत इत्येतदयुक्तम्; नहि तर्कः किंचित्कोटिसहचरितानेकधर्मोपलम्भवत्किंचित्कोटिभूयोदृष्टसहचारैकधर्मोपलम्भवच्च कोट्युत्कटत्वनियामकत्वेन क्लृप्तः, किंतु प्रमाणानुग्राहकत्वेन; तथा च कार्यत्वलिङ्गकानुमानाद्भवन्ती सकर्तृकत्वानुमितिरेव लाघवतर्कोपनीतकर्त्रैकत्वमपि विषयीकुर्वाणा सत्ये कर्तृकत्वानुमितिः संपद्यत इत्येव युक्तम्, गोपुरप्राकारादिषु बहुकर्तृकत्वेन निश्चितेषु लाघवावतारासंभवेऽपि तथात्वेनानिश्चितेषु वियदादिषु तदवतारे बाधकाभावादिति—**चेत्, मैवम्;** लाघवतर्केणानुमितेर्विषयगौरवापादनस्य विरुद्धत्वात्। एककर्तृकत्वं हि अनेककर्तृकत्वाभावविशिष्टसकर्तृकत्वं, न त्वेकत्वसंख्याविशिष्टकर्तृकत्वमात्रमपि; बहुष्वपि प्रत्येकमेकत्ववैशिष्ट्यसत्त्वेन तद्विषयत्वस्य बहुकर्तृकत्वाविरोधित्वात्। एवमतिगुरुविषयापादकः कथं लाघवतर्कव्यपदेशं लभेत। नह्येवंभूतं लाघवं प्रमाणानुग्राहकं संप्रतिपन्नमस्ति, यदग्रे वस्तुलाघवसिद्ध्यर्थं स्वानुग्राह्यप्रमाणस्य विषयगौरवमापादयेत्। तथा सति हीष्टपुरोवर्तिज्ञानं प्रवृत्तिकारणं गृह्णतः प्रमाणस्यानुग्राहको लाघवतर्को विसंवादिप्रवृत्तिस्थले व्यधिकरणप्रकारकज्ञानाकल्पनया वस्तुलाघवसिद्ध्यर्थं भेदाग्रहं कारणतावच्छेदकत्वेनोपनयेद्, नतु ज्ञानवित्तिवेद्यतयोपस्थितमिष्टं पुरोवर्तिवैशिष्ट्यम्। तस्मात्सकर्तृकत्वानुमानानुग्राहकभावात् प्रच्युतोऽयं लाघवतर्कः स्वयमप्रमाणत्वात् स्वातन्त्र्येण कर्त्रैकत्वनिश्चयमुत्पादयितुमक्षमः कर्त्रैकत्वानेकत्वसंशयस्यैकत्वकोटावुत्कटत्वमात्रं संपादयन्नुपकरोतीति कल्पनं युक्तम्, नतु प्राकारगोपुरादिषु दृष्टिमवलम्ब्य प्रवृत्तां तदनेकत्वकोटिं सर्वथा निवर्तयतीति। एककोटिनिर्धारणाक्षमस्य सर्वथा कोट्यन्तरनिवर्तकत्वायोगात्, तस्य संभावनाजननमात्रेणाप्यनुपकारकत्वे लाघवात्, कर्त्रैकत्वसर्वज्ञत्वादिसिद्धिम-

वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिर्नानुमानादिप्रमाणान्तरनिर्वृत्ता । सत्सु तु वेदान्तवाक्येषु जगतः जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानुमानमपि वेदान्तवाक्याविरोधिप्रमाणं भवन्न निवार्यते; श्रुत्यैव च सहायत्वेन तर्कस्याभ्युपेतत्वात् । तथाहि—'श्रोतव्यो मन्तव्यः' (बृह० २।४।५) इति श्रुतिः 'पण्डितो मेधावी गन्धारानेवोपसंपद्येतैवमेवेहाचार्यवान्पुरुषो वेद' (छान्दो० ६।१४।२) इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति । न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्, किंतु श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणं; अनुभवावसानत्वाद्भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य । कर्तव्ये हि विषये

भामती ।

वेदान्तेति । विचारस्याध्यवसानं सवासनाविद्याद्वयोच्छेदः । ततो हि ब्रह्मावगतेर्निर्वृत्तिराविर्भावः । तत्किं ब्रह्मणि शब्दादृते न मानान्तरमनुसरणीयम् ? तथा च कुतो मननं? कुतश्च तदनुभवः साक्षात्कारः ? इत्यत आह—**सत्सु तु वेदान्तवाक्येष्विति** । अनुमानं वेदान्ताविरोधि तदुपजीवि चेत्यपि द्रष्टव्यम् । शब्दाविरोधिन्या तदुपजीविन्या च युक्त्या विवेचनं मननम् । युक्तिश्चार्थापत्तिरनुमानं वा । **स्यादेतत्**—यथा धर्मे न पुरुषबुद्धिसाहाय्यम्, एवं ब्रह्मण्यपि कस्मान्न भवतीत्यत आह—**न धर्मजिज्ञासायामिवेति** । **श्रुत्यादय इति** । श्रुतीतिहासपुराणस्मृतयः प्रमाणम् । अनुभवोऽन्तःकरणवृत्तिभेदो ब्रह्मसाक्षात्कारस्तस्याविद्यानिवृत्तिद्वारेण ब्रह्मस्वरूपाविर्भावः प्रमाणफलम् । तच्च फलमिव फलमिति गमयितव्यम् । यद्यपि धर्मजिज्ञासायामपि सामग्र्यां प्रत्यक्षादीनां व्यापारः; तथापि साक्षान्नास्ति, ब्रह्मजिज्ञासायां तु साक्षादनुभवादीनां संभवोऽनुभवार्था च ब्रह्मजिज्ञासेत्याह—**अनुभवावसानत्वात्** । ब्रह्मानुभवो ब्रह्मसाक्षात्कारः परमपुरुषार्थः; निर्मृष्टनिखिलदुःखपरमानन्दरूपत्वादिति । **ननु** भवतु ब्रह्मानुभवार्था जिज्ञासा, तदनुभव एव त्वशक्यः, ब्रह्मणस्तद्विषयत्वायोग्यत्वादित्यत आह—**भूतवस्तुविषयत्वाच्च ब्रह्मविज्ञा-**

वेदान्तकल्पतरुः ।

र्थविचारणाशब्देन शाब्दबोध उपासनासहित उक्तः, परस्तादवगतिरेवेति मध्येऽध्यवसानशब्दो न युक्त इत्याशङ्क्य नायं ज्ञानवचनः, किंतु संस्कारसहितलयविक्षेपाविद्यासमाप्तिवचन इत्याह—**सवासनेति** । वृत्तिरूपसाक्षात्कारस्याविद्याध्वंसिनो मध्ये विद्यमानत्वेऽपि नसोऽध्यवसानशब्देन गृहीतः; अविद्यानिवृत्त्या स्वरूपाभिव्यक्तिं प्रतिव्यवधानादिति । विमतं, चेतनपूर्वकं, कार्यत्वादित्यादियुक्तिः शब्दाविरोधिनी वस्तुविशेषनिर्धारणे तदुपजीविनीति वक्तव्यम्, ब्रह्मात्मत्वस्य केवलयुक्त्यगोचरत्वस्वाभाव्यादित्याह—**तदुपजीवि चेत्यपीति** । यथाहि किल गन्धारदेशेभ्य आनीय चौरैररण्ये कश्चिद्बद्धचक्षुः निहित आप्तोपदेशतस्तदुपदिष्टस्य साकल्येन न गृहीतत्वात्पण्डितः स्वयमूहापोहक्षमतया च मेधावी गन्धारान्प्राप्नोत्येवं परब्रह्मणा आच्छिद्य विवेकदृष्टिं निरुध्याविद्यादिभिः संसारारण्ये निहितो जन्तुः परमकारुणिकगुरूपदेशतः स्वस्वभावं प्रतिपद्यत इति भाष्यस्थश्रुत्यर्थः । **यदुक्तं** ब्रह्मणो मानान्तराविषयत्वे कुतो मननमिति, तत्राह—**शब्दाविरोधिन्येति** कारणस्य सर्वज्ञत्वादिसिद्धौ युक्तिः शब्दमुपजीवति, न स्वतन्त्रा; कारणमात्रं तु संभावयन्तीतिकर्तव्यता, न मानान्तरमित्यर्थः । भाष्यस्थानुभवशब्दार्थमाह—**अन्तःकरणेति** । **ननु** कथं वृत्तिः प्रमाणमिति भाष्ये उक्तं ? निष्फलत्वादित्याशङ्क्य तत्कृताविद्यानिवृत्तिद्वारा स्वरूपाभिव्यक्तिः, उपचारात्फलमस्तीत्याह—**तस्येति** । धर्मजिज्ञासायां श्रुत्यादय एव प्रमाणमित्ययुक्तं, वेदविषयश्रोत्रप्रत्यक्षाद्यपेक्षणादित्याशङ्क्य ज्ञातव्ये धर्मे न साक्षात्कारतदुपयोगियुक्त्यादीनां संभवो, ब्रह्मजिज्ञासा तु साक्षात्कारपर्यन्तेत्याह—**यद्यपीत्यादिना** । **न** केवलं ब्रह्मजिज्ञासायामनुभवादीनां संभवः, किंतु तत्त्वसाक्षात्कारमन्तरेणापरोक्षसंसारभ्रमनिवृत्त्ययोगात्तेन विना न पर्यवसानं चेत्याह—**अनुभवार्थेति** ।

कल्पतरुपरिमलः ।

भिमन्यमानानां भ्रान्तेर्निरालम्बनत्वापत्तेश्च । **वस्तुतस्तु**—लाघवतर्कोऽपि स्वतो दुर्बलः; अतिविचित्ररचनस्यापि प्रपञ्चस्य बहुविधापरिमितगोपुरप्रासादमण्डपमहातडागादियुक्तस्य महतो नगरस्येव क्रमसंभूतासर्वज्ञासर्वशक्तिकसंप्रतिपन्नानेकसंसारिकर्तृकत्वेनापि सिद्ध्युपपत्तौ सर्वज्ञसर्वशक्तिकैककर्त्रन्तरकल्पन एव गौरवात्, किंतु तथाभूतैककर्तृप्रतिपादकवेदान्तवाक्यनिकुरुम्बसमाश्रयणेनैव लब्धबलस्तस्याप्यनुग्राहको भवति । सोयं **वनसिंहद्वदनकादिन्यायः** । किरातैर्हन्तुं शक्योपि सिंहो महद्वनं शरणं प्रविश्य दुराधर्षस्तेभ्यो न बिभेति, वनं च तत् सिंहाधिष्ठानानुगृहीतं तैर्दुष्प्रवेशं भवति । तदिदं सर्वं तदुपजीवि चेत्यपि द्रष्टव्यमिति टीकाग्रन्थेनैव विभावयिष्यते । **उपासनासहित इति** । उपासनाशब्दो मननस्यापि संग्राहकः । **परस्तादवगतिरेवेति** वृत्तिरूपावगत्यभिप्रायेण शङ्का । **समाप्तिवचन इति** । अवसानशब्दः समाप्तिवाचीत्यध्युपसृष्टोऽपि समाप्तिरूपनिवृत्तिपर इति भावः । एवंञ्चाविद्यानिवृत्तिनिर्वर्तयत्वोक्तेरवगतिशब्दः स्वरूपावगतिपर इत्यर्थादुक्तं भवति । **व्यवधानादिति** । अव्यवहितकारण एव निर्वर्तकत्वप्रसिद्धेर्व्यवहिता वृत्तिस्तथा-

नानुभवापेक्षास्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात्पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य । कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म, यथाश्वेन गच्छति पद्भ्यामन्यथा वा, न वा गच्छतीति । तथा 'अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णाति' 'उदिते जुहोत्यनुदिते जुहोति' इति । विधिप्रतिषेधाश्चात्रार्थवन्तः स्युः, विकल्पोत्सर्गापवादाश्च । न तु

भामती ।

नस्य । व्यतिरेकसाक्षात्कारस्य विकल्परूपो विषयविषयिभावः, नत्वेवं धर्मज्ञानमनुभवावसानं; तदनुभवस्य स्वयमपुरुषार्थत्वात्, तदनुष्ठानसाध्यत्वात् पुरुषार्थस्य, अनुष्ठानस्य च विनाप्यनुभवं शाब्दज्ञानमात्रादेव सिद्धेरित्याह—**कर्तव्ये हीत्यादिना ।** न चायं साक्षात्कारविषयतायोग्योऽप्यवर्तमानत्वात्, अवर्तमानश्चानवस्थितत्वादित्याह—**पुरुषाधीनेति ।** पुरुषाधीनत्वमेव लौकिकवैदिककार्याणामाह—**कर्तुमकर्तुमिति ।** लौकिकं कार्यमनवस्थितमुदाहरति—**यथाश्वेनेति ।** लौकिकेनोदाहरणेन सह वैदिकमुदाहरणं समुच्चिनोति—**तथातिरात्र इति ।** कर्तुमकर्तुमित्यस्येदमुदाहरणमुक्तम् । कर्तुमन्यथा वा कर्तुमित्यस्योदाहरणमाह—**उदित इति । स्यादेतत्**–पुरुषस्वातन्त्र्यात् कर्तव्ये विधिप्रतिषेधानामानर्थक्यम्, अतदधीनत्वात् पुरुषप्रवृत्तिनिवृत्त्योरित्यत आह—**विधिप्रतिषेधाश्चात्रार्थवन्तः स्युः ।** गृह्णातीति **विधिः ।** न गृह्णातीति **प्रतिषेधः ।** उदितानुदितहोमयोर्विधी । एवं नारास्थिस्पर्शननिषेधो ब्रह्मघ्नश्च तद्धारणविधिरित्येवंजातीयका विधिप्रतिषेधा **अर्थवन्तः ।** कुत इत्यत आह—**विकल्पोत्सर्गापवादाश्च । चो हेतौ ।** यस्माद्ग्रहणाग्रहणयोरुदितानुदितहोमयोश्च विरोधात्समुच्चयासंभवे तुल्यबलतया च बाध्यबाधकभावाभावे सत्यगत्या विकल्पः । नारास्थिस्पर्शननिषेधतद्धारणयोश्च विरुद्धयोरतुल्यबलतया न विकल्पः । किंतु सामान्यशास्त्रस्य स्पर्शननिषेधस्य धारणविधिविषयेण विशेषशास्त्रेण बाधः । **एतदुक्तं भवति**—विधिप्रतिषेधैरेव स तादृशो विषयोऽनागतोत्पाद्यरूप उपनीतः, येन पुरुषस्य विधिनिषेधाधीनप्रवृत्तिनिवृत्त्योरपि स्वातन्त्र्यं भवतीति, भूते वस्तुनि तु

वेदान्तकल्पतरुः ।

ब्रह्मजिज्ञासायामिति सप्तम्यन्तं पदं षष्ठ्यन्तत्वेन विपरिणमय्यानुभवावसानत्वाद्ब्रह्मजिज्ञासाया इति भाष्यं योज्यम् । अनुभवोऽवसाने समाप्तौ फलत्वेन यस्याः सा तथोक्ता । धर्मजिज्ञासायां त्वनुभवः कारणत्वेनोपक्रमे उपयुक्त इत्यर्थः । इह्यानुभवः स्वरूपाभिव्यक्तिर्न वृत्तिः, तत्र हेतुमाह—**परेति ।** न वृत्तिरनित्यत्वाद्विचारस्य पुष्कलं फलमित्यर्थः । तदनुभव एव त्वित्यत्र वृत्तिरुक्ता, एवकारेण तु तत्कृताविद्यानिवृत्तिद्वारेण स्वरूपाभिव्यक्तिरशक्यतरेति सूचितम् । **भाष्ये—भूतशब्दः,** परमार्थवचनः, **चशब्दः** शङ्कानिवृत्त्यर्थः, **व्यतिरेकः** प्रपञ्चाभावोपलक्षितस्वरूपं, तद्विषयसाक्षात्कारस्य विकल्परूपो ब्रह्मणा सह विषयविषयिभावरूपः संबन्धोऽस्ति, नतु तत्त्वतः । **उक्तं हीदं प्रथमसूत्रे**—वृत्तिविषयत्वमपि तयैवोपहितस्य न निरुपाधेरिति, तत्र प्रसर्तव्यमित्यर्थः । अन्यथाकर्तुमित्यत्र कर्तुमित्यस्यानुषङ्गो भाष्ये कार्यः; करणापेक्षत्वादन्यथाकरणस्य । उदितहोमः कर्तुं शक्योऽनुदिते त्वन्यथेति तदाह—**कर्तुमिति ।** भाष्यस्थविध्यादिशब्दानुदाहृतवाक्येषु योजयति—**गृह्णातीत्यादिना ।** ''नारं स्पृष्ट्वाऽस्थि सस्नेहं सवासा जलमाविशेदि''ति नारास्थिस्पर्शनिषेधः । ''शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन् । ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात्'' (याज्ञ० अ. ३ श्लो. २४३) इति ब्रह्मघ्नः शवशिरसो नारास्थ्नो ध्वजत्वेन धारणविधिः ॥ **भाष्ये** प्रतिज्ञैव भाति, न हेतुरत आह—**एतदुक्तमिति ।** स्वातन्त्र्येण कर्तुं समर्थोऽपि हिताहितोपायत्वमजानन्, तद्बोधकविधिनि-

कल्पतरुपरिमलः ।

त्वेन न प्राप्नोति भावः । न चैवं—विचारणाशब्दोक्तश्रवणमननोपासनानां साक्षात्कारैकसाध्यायामविद्यानिवृत्तौ करणत्वाभावात्कथं विचारणाध्यवसानेति शब्दसंगतिरिति—शङ्कनीयम्; नहि तत्र विचारणयाध्यवसानमिति 'कर्तृकरणे कृता बहुलमिति' सूत्रेण तृतीयासमासः समाश्रीयते, येन करणत्वप्रतीतिः स्यात् । टीकायां हि षष्ठीसमासो हि दर्शितः, स तु साक्षात्कारद्वारकपरम्परासंबन्धेऽप्युपपद्यते । **अन्यथा कर्तुमित्यत्रेति ।** अकरणप्रतिकोटिनिर्देशकतयोपात्तस्यान्यथाकरणप्रतिकोटिनिर्देशार्थमप्यपेक्षितत्वादनुषङ्गः कर्तव्य इत्यर्थः । **ननु—'भाष्ये प्रतिज्ञैवाभाति न हेतुरिति'** न युक्तं; टीकायां **विधिप्रतिषेधाश्चार्थवन्त इति** प्रतिज्ञायां **विकल्पोत्सर्गापवादाश्चे**त्युत्त-

---

१ विमतं ब्रह्मवाक्यं, अनुभवनिरपेक्षकफलपर्यन्तज्ञानजनकं, प्रमाणभूतवेदवाक्यत्वादित्यनुमाने अनुभवायोग्यविषयत्वस्योपाधितायां **कर्तुमकर्तुमित्यादिवाक्येन** साध्याव्यापकत्वस्येव साधनाव्यापकत्वस्यापि समर्थनार्थं **विधिप्रतिषेधाश्चेति** वाक्यस्य प्रवृत्तिः । साध्यविषयमेवानुभवायोग्यविषयं नतु सिद्धवस्तुविषयं, ब्रह्मवाक्यं तु सिद्धविषयं नतु साध्यविषयं, अन्यथा ब्रह्मणोऽपि विषये विधिप्रतिषेधविकल्पसमुच्चयादीनां प्रसरणादिति **विवरणानुयायिनः ।**

वस्त्वेवं नैवमस्ति नास्तीति वा विकल्प्यते, विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः। न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्। किं तर्हि? वस्तुतन्त्रमेव तत्। नहि स्थाणावेकस्मिन्स्थाणुर्वा पुरुषोऽन्यो वेति तत्त्वज्ञानं भवति। तत्र पुरुषोऽन्यो वेति मिथ्याज्ञानम्। स्थाणुरेवेति तत्त्वज्ञानं, वस्तुतन्त्रत्वात्। एवं भूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम्। तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव; भूतवस्तुविषयत्वात्। ननु भूतवस्तुत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणानर्थिकैव प्राप्ता, न; इन्द्रियाविषयत्वेन संबन्धाग्रहणात्। स्वभावतो विषयविषयाणीन्द्रियाणि, न ब्रह्मविषयाणि। सति हीन्द्रियविषयत्वे ब्रह्मणः, इदं ब्रह्मणा

भामती।

नेयमस्ति विधेत्याह—**न तु वस्त्वेवं नैवमिति**। तदनेन प्रकारविकल्पो निरस्तः। प्रकारिविकल्पं निषेधति—**अस्ति नास्तीति**। **स्यादेतत्**। भूतेऽपि वस्तुनि विकल्पो दृष्टः, यथा स्थाणुर्वा पुरुषो वेति, तत्कथं न वस्तु विकल्प्यत इत्यत आह—**विकल्पनास्त्विति**। पुरुषबुद्धिः—अन्तःकरणं, तदपेक्षा विकल्पनाः—संशयविपर्यासाः। सवासनमनोमात्रयोनयो वा, यथा स्वप्ने। सवासनेन्द्रियमनोयोनयो वा, यथा स्थाणुर्वा पुरुषो वेति स्थाणौ संशयः, पुरुष एवेति वा विपर्यासः; अन्यशब्देन वस्तुतः स्थाणोरन्यस्य पुरुषस्याभिधानात्, न तु पुरुषतत्त्वं वा स्थाणुतत्त्वं वापेक्षन्ते; समानधर्मधर्मिदर्शनमात्राधीनजन्मत्वात्। तस्मादयथावस्तवो विकल्पना न वस्तु विकल्पयन्ति वान्यथयन्ति वेत्यर्थः। तत्त्वज्ञानं तु न बुद्धितन्त्रं, किंतु वस्तुतन्त्रम्, अतस्ततो वस्तुविनिश्चयो युक्तः, न तु विकल्पनाभ्य इत्याह—**न वस्तुयाथात्म्येति**। एवमुक्तेन प्रकारेण भूतवस्तुविषयाणां ज्ञानानां प्रामाण्यस्य वस्तुतन्त्रतां प्रसाध्य ब्रह्मज्ञानस्य वस्तुतन्त्रतामाह—**तत्रैवं सतीति**। अत्र चोदयति—**ननु भूतेति**। यत् किल भूतार्थं वाक्यं तत्प्रमाणान्तरगोचरार्थतयानुवादकं दृष्टम्। यथा नद्यास्तीरे फलानि सन्तीति। तथा च वेदान्ताः। तस्मात् भूतार्थतया प्रमाणान्तरदृष्टमेवार्थमनुवदेयुः। उक्तं च ब्रह्मणि जगज्जन्मादिहेतुकमनुमानं प्रमाणान्तरम्। एवं च मौलिकं तदेव परीक्षणीयं, न तु वेदान्तवाक्यानि तदधीनसत्यत्वानीति कथं वेदान्तवाक्यग्रथनार्थता सूत्राणामित्यर्थः। परिहरति—**न इन्द्रियाविषयत्वेति**। कस्मात् पुनर्नेन्द्रियविषयत्वं प्रतीच इत्यत आह—**स्वभावत इति**। **अत एव श्रुतिः**—'पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्' इति। **सति हीन्द्रियेति**। प्रत्यगात्मनस्त्वविषयत्वमुपपादितम्। यथा च सामान्यतोदृष्टमप्यनुमानं ब्रह्मणि न प्रवर्तते तथोपरिष्टान्निपुणतरमुपपादयिष्यामः। उपपादितं चैतदस्माभिर्विस्तरेण न्यायकणिकायाम्। न च भूतार्थतामात्रेणानुवादतेत्युपरिष्टादुपपादयिष्यामः। तस्मा-

वेदान्तकल्पतरुः।

षेधापेक्ष इत्यर्थः। अन्तःकरणजकल्पनाद्वैविध्यमाह—**सवासनेति**। जाग्रद्वासनावासितं मन एव स्वप्नकारणं, जाग्रत्संशयविपर्यया: संस्कारसहितान्तर्बहिःकरणजा इत्यर्थः। यथावस्तुत्वं वस्त्वनुसारित्वं यासां नास्ति तास्तथोक्ताः। **न वस्त्विति**। संशया न विकल्पयन्ति, विपर्यया नान्यथयन्तीत्यर्थः। **खानि** इन्द्रियाणि, **व्यतृण**द्धिंसितवान्, **पराङ् पश्यति** लोकः। **प्रत्यगात्मनस्त्वविषयत्वमिति**—अपरोक्षत्वात् प्रत्यगात्मप्रसिद्धिरित्यत्रेति। **उपरिष्टात्** तर्कपादे (अ. २ पा. २) **उपपादितं चेति**। विमतं, धीमत्कृतं, कार्यत्वादित्यनुमानान्नेश्वरसिद्धिः; जीवजत्वेन सिद्धसाधनत्वात्,

कल्पतरुपरिमलः।

रभाष्यस्य हेतुपरत्वेन योजितत्वादिति—**चेत्, उच्यते**; पुरुषस्य स्वातन्त्र्येण स्वत एव प्रवृत्त्युपपत्तेर्विधिप्रतिषेधानर्थक्यमित्याशङ्कापरिहारार्थत्वेन खल्विदं प्रतिज्ञाभाष्यमवतारितम्। **तत्रैतदुक्तं भवती**त्यादिटीकाग्रन्थेन वर्ण्यमानम् इष्टोपायतादिप्रतिपादनमेव विधिप्रतिषेधार्थवत्त्वे हेतुर्न तु विकल्पादिकमित्यभिप्रायेण हेलाकाङ्क्षायामेतदुक्तमित्यादिकमित्यवतारितम्। विकल्पादिप्रतिपादनं तु विरुद्धयोर्विधिप्रतिषेधयोर्विध्योर्वा कथमिष्टोपायताप्रतिपादकत्वमित्याशङ्कायां विकल्पेनोत्सर्गापवादरूपेण वेति हेतूपपादनार्थमित्यभिप्रेत्य टीकायां तदपि हेतुपरत्वेन योजितम्। **प्रत्यगात्मनस्त्वविषयत्वमिति। ननु** 'पराञ्चि खानीति' मन्त्रमुदाहृत्य प्रत्यगात्मन इन्द्रियाविषयत्वोक्तिरयुक्ता; 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत् आवृत्तचक्षुरमृतत्वमिच्छ'न्निति तन्मन्त्रोत्तरार्ध एव तस्य विद्वदिन्द्रियग्राह्यताया उक्तत्वादिति—**चेत्, सत्यम्**; तत्र श्रवणादिवासितेन्द्रियग्राह्यत्वोक्तावपि शब्दमनपेक्ष्य स्वातन्त्र्येणेन्द्रियग्राह्यत्वस्य प्रत्याख्याने विरोधाभावात्। **अपरोक्षत्वादिति। प्रदेशोपलक्षणमेतत्। अस्मत्प्रत्ययविषयत्वादिति** भाष्यव्याख्यानावसरे जीवभावोपाध्युपहितरूपेण विषयत्वोक्त्या स्वरूपेणाविषयत्वमुपपादितमित्यर्थः। **जीवजत्वेन सिद्धसाधनत्वादिति**। अतिविचित्ररचनस्यापि प्रपञ्चस्य बहुविधापरिमितगोपुरप्रासादमण्डपमहाटालिकादियुक्तस्य महतो नगरस्येव क्रमेण युगपद्वा संभूतैरसर्वज्ञासर्वशक्तिकैरपि विश्वामित्रादिवदुपचितपुण्यवशलब्धतत्तदेकदेशसृष्टिसामर्थ्यशालिभिर्बहुभिर्जीवैर्निर्मितत्वमुपपद्यते: **धर्मिकल्पनातो वरं धर्मकल्पनेति**

संबद्धं कार्यमिति गृह्येत । कार्यमात्रमेव तु गृह्यमाणं किं ब्रह्मणा संबद्धं किमन्येन केनचिद्वा संबद्धमिति न शक्यं निश्चेतुम् । तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थं किं तर्हि वेदान्तवाक्यप्रदर्शनार्थम् । किं पुनस्तद्वेदान्तवाक्यं यत्सूत्रेणेह लिलक्षयिषितम् । 'भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति' इत्युपक्रम्याह—'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व । तद्ब्रह्मेति' (तैत्ति० ३।१) तस्य च निर्णयवाक्यम्—'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते ।

भामती ।

त्सर्वमवदातम् । **श्रुतिश्च**—'यतो वा' इति जन्म दर्शयति, 'येन जातानि जीवन्ति' इति जीवनं स्थितिं, 'यत्प्रयन्ति' इति तत्रैव लयम् । '**तस्य च निर्णयवाक्यम्** । अत्र च प्रधानादिसंशये निर्णयवाक्यम्—'**आनन्दाद्ध्येव**' इति ।

वेदान्तकल्पतरुः ।

उपकरणाद्यभिज्ञकर्तृकत्वसाधने कतिपयतदभिज्ञतायां सर्वज्ञासिद्धेः, सर्वतदभिज्ञकर्तृकत्वे सपक्षस्य साध्यहीनत्वात्, कुम्भं निर्मितवतः कुम्भकारस्य चैत्रकृप्ययोयमित्यनवबोधात्, साधरणेऽपि सिद्धसाधनत्वात्, मनःसंयोगहीनस्य चोपलब्धेरभावादमनस्कस्याप्यैश्वर्यादुपलब्धिसंभवे तत एव विनैवोपलब्ध्या जगन्निर्माणसंभवेनोपलब्धिमत्कर्तृकत्वस्यैव विलोपेन वृद्धिं गृह्णतो मूलच्छेदादित्यादि न्यायकणिकायां व्युदपादीति । **उपरिष्टात्** समन्वयसूत्रे । जन्मादिसूत्रेण यतो वेत्यादिवाक्यं लक्ष्यमिति भाष्ये उक्तं, तदर्थं श्रुतिसूत्रयोरर्थप्रत्यभिज्ञां दर्शयति—**श्रुतिरिति** । अत्र स्वरूपलक्षणपरत्वं सूत्रस्य दर्शयितुं तस्य चेति भाष्यं । तद्याचष्टे—**अत्र चेति** । जगद्विशेषणैः पूर्वनिर्णयेऽपि श्रुतित इह निर्णीयते । कारणं ब्रह्माऽनूद्य वाक्ये-

कल्पतरुपरिमलः ।

न्यायात् । अतोऽनुमानस्य तद्विषयत्वोपपत्तेर्न क्लृप्तजीवातिरिक्तसर्वज्ञसर्वशक्तिकैककर्त्रन्तरसिद्धिरित्यर्थः । **ननू**पकरणाद्यभिज्ञकर्तृकत्वं साध्यत इति नार्थान्तरमित्याशङ्क्य यत्किंचिद्यावद्विकल्पेन प्रागुक्तमर्थान्तरं दृष्टान्तस्य साध्यवैकल्यं वा स्याद्, यावदिति यत्किंचिदिति वा विशेषाविवक्षायामप्यर्थान्तरं स्यादित्याह—**उपकरणेत्यादिना** । अनुमानस्यातिरिक्तेश्वराऽसाधकत्वमुक्त्वा तत्साधकत्वे बाधकमप्याह—**मनःसंयोगेति** । धीमत्कर्तृकत्वसाध्यसिद्ध्या सिद्ध्यन्ती धीर्नित्याऽभ्युपगम्यते, अनित्या वा । **नाद्यः**; त्वन्मते कार्यत्वे धीमत्कर्तृकत्वव्याप्तिवज् ज्ञानत्वे जन्यत्वव्याप्तेरप्यप्रतिक्षेप्यतया तद्विरोधेन ज्ञाननित्यत्वासिद्धेः । **न द्वितीयः**; क्लृप्तकारणं मनः संयोगादिकं विना ज्ञानोत्पत्त्यसंभवात्, तद्विनाप्यैश्वर्यवशाज् ज्ञानोत्पत्त्यभ्युपगमे तत एव ज्ञानं विनापि स्रष्टृत्वसंभवेन त्वदभिमतसाध्यासिद्धिप्रसङ्गादित्यर्थः । **ननु—'कार्येण कारणं किंचिदस्तीत्यनुमितमिति'** पूर्वग्रन्थे युक्त्या कर्तृमात्रनिश्चयः, तदेकत्वसार्वज्ञ्यादिषु संभावनेत्युक्तं, तदनन्तरं **कारणस्य सर्वज्ञत्वादिसिद्धौ युक्तिः शब्दमुपजीवति, न स्वतन्त्रा, कारणमात्रं तु संभावयन्तीतिकर्तव्यतेति** ग्रन्थेनानुमानं कर्तृसंभावनामेव जनयति,न निश्चयं; तदेकत्वसार्वज्ञ्यादौ संभावनामपि न जनयति, किंतु तदंशे शब्दोपजीवनमेवेत्युक्तम् । इदानीमीश्वरानुमानस्यार्थान्तरबाधकयोरुद्भावनेन संभावनामपि यथा नोत्पादयेत्तथोपपादितम्, सर्वमिदं पूर्वापरविरुद्धमिति—**चेत्**, **उच्यते**; विमतं धीमत्कर्तृपूर्वकमित्याद्यनुमानं सर्वथा कर्तृसाधकं न भवतीति नेह प्रतिक्षिप्तं, किंतु संप्रतिपन्नजीवातिरिक्तकर्तृसाधकं न भवतीति । एवमिह सर्वथैवाप्रतिक्षिप्तमनुमानं न कर्तृनिश्चायकं, किंतु तत्संभावनामात्रजनकमिति **'कारणमात्रं तु संभावयन्तीति'** ग्रन्थेनोक्तम् । **तस्यायमाशयः**—कार्यत्वलिङ्गकानुमानं कर्तृसामान्यमपि न निर्धारयितुमीष्टे; यथा दानपतनयोः संप्रदानापादानकारकापेक्षत्वेऽपि न कार्यान्तराणां तदपेक्षा, एवं घटादीनां कर्त्रपेक्षत्वेऽपि अङ्कुरादीनां मा भूत्तदपेक्षेत्यप्रयोजकत्वशङ्कया घटतृणादिषु कृताकृतव्यवहारोपोद्बलिततया व्याप्तिशैथिल्यात्, किंतु तन्मात्रं संभावयति; संप्रदानापादानयोरिव च कर्तुः कार्यान्तरेषु दृष्टव्यभिचाराभावाद्, घटपटादिषु भूयः सकर्तृकत्वदर्शनाच्च । कर्त्रैकत्वादौ तु युक्तिः संभावनामात्रमपि न जनयति, क्लृप्तानेकजीवकर्तृकत्वोपपत्तेरिति । अतो नानयोर्ग्रन्थयोः परस्परविरोधः । **कार्येण च कारणं किंचिदस्त्यनुमितमित्यादिग्रन्थस्तु** प्रौढिवादेन प्रवृत्त इति न किंचिदवद्यम् । **ननु** 'प्रधानादिसंशये निर्णयवाक्यमिति' टीकाग्रन्थो न युक्तः; **भाष्ये—अस्य जगतो नामरूपाभ्यां व्याकृतस्ये**त्यादिना जगतः कानिचिद्विशेषणान्युक्त्वा **नच यथोक्तविशेषणस्य जगत इत्या**द्युत्तरग्रन्थेन जगत्कारणस्य प्रधानादिविलक्षणेश्वररूपत्वसमर्थनेन संशयाभावादित्याशङ्क्याह—**जगद्विशेषणैरिति** । निर्णयेऽपीत्यपिशब्देन ब्रह्मनिर्णये श्रुत्येकशरणानामस्माकं युक्त्या वस्तुतो निर्णयो न भवति, अतः प्रधानादिसंशय इति । **ननु** प्रसिद्धस्यैवानुवाद्यतया लोकप्रसिद्धं लौकिकानन्दमनूद्य तस्य जगज्जन्मादिकारणत्वविधायकम् आनन्दाद्ध्येवेति वाक्यमिति प्रतिभाति, तथा सति लौकिकानन्दस्यैव जगज्जन्मादिष्वदृष्टादिवत् कारणान्तरत्वमुक्तं स्याद्, न तेनानन्दरूपता ब्रह्मणः स्वरूपलक्षणं सिद्ध्येदित्याशङ्क्याह—**कारणं ब्रह्मेति** । कल्पनीयोपस्थितिकालौकिकानन्दप्रसिद्ध्यपेक्षया क्लृप्तोपस्थितिकपूर्वप्रस्तुतजन्मादिकारणप्रसिद्धिः शीघ्रतरेति तया जगज्जन्मा-

वेदान्तकल्पतरुः ।

नानन्दत्वविधानात्स्वरूपलक्षणसिद्धिः । आनन्दः सत्यादेरुपलक्षणम् । **ननु**—आनन्दादेर्भेदे न ब्रह्मलक्षणत्वम्, अभेदे वाक्यार्थासिद्धिः, गुणभूतपदार्थविशिष्टः प्रधानपदार्थो हि वाक्यार्थः—**अत्रोच्यते**; यत्र पदार्थः प्रमितः तत्र स एवेतरपदार्थविशिष्टः प्रतिपाद्यः । यस्त्वज्ञातः स नान्यैः शक्यो विशेष्टुमिति स एव वाक्येन प्रमेयः । प्रमिते चैतस्मिन् वाक्यस्य समाप्तेर्न विशिष्टपरत्वम् । यथा प्रकृष्टप्रकाशश्चन्द्र इति प्रकर्षप्रकाशद्वारा चन्द्रलक्षणान्न तद्वैशिष्ट्यं; मानान्तरादेव तत्सिद्धेः, उपायस्तु वैशिष्ट्यम् अखण्डचन्द्रसिद्धौ । तच्चाविरोधाच्चन्द्रेऽनुज्ञायते, सत्यादिवाक्ये त्वनन्तादिपदैर्बाध्यते वैशिष्ट्यम् । **एवंच-अविशिष्टमपर्यायानेकशब्दप्रकाशितम् । एकं वेदान्तनिष्णाता अखण्डं प्रतिपेदिरे ॥ ननु**—चन्द्रलक्षणमिदं; ततश्चन्द्रः, इतरस्माद्भिद्यते, चन्द्रशब्देन व्यवहर्तव्यो वा, प्रकृष्टप्रकाशत्वात्, व्यतिरेकेण तमोवदिति व्यावृत्तिविशिष्टस्य वाच्यत्वविशिष्टस्य च वाक्येन प्रतिपाद्यत्वं—**इति । तन्न**; अप्रमिते चन्द्रे व्यावृत्तेरनवबोधात्, प्रमितेऽपि प्रमाणान्तरात् प्रमितिर्लक्षणवाक्याद्वा । **प्रथमे** सामान्यतः प्रमितिर्विशेषतो वा । **नाद्यिमः**; सामान्यस्यैव व्यावृत्तिसिद्धौ चन्द्रस्य तदसिद्धिप्रसङ्गात्, **न चरमः**; विशेषग्राहिप्रमाणादेव व्यावृत्तिसिद्धौ लक्षणवैफल्यात् । **न द्वितीयः**; लक्षणवाक्याच्चन्द्रप्रमितौ तस्य तत्रैव

कल्पतरुपरिमलः ।

दिकारणं ब्रह्मानूद्य तस्यानन्दरूपत्वविधायकमिदं वाक्यमिति भावः । **सत्यादेरपीति** । आनन्दादयः प्रधानस्ये (ब्र. अ. ३ पा. ३ सू. ११)त्यधिकरणसिद्धं 'सत्यं ज्ञानमनन्तं ब्रह्मेति' प्रदेशान्तराम्नातलक्षणगतसत्यज्ञानाद्युपसंहारमभिप्रेत्योपलक्षणत्वोक्तिः । **नन्विति** । सत्यज्ञानादीनां ब्रह्मस्वरूपाच्च परस्परस्माच्च भेदे सच्चिदानन्दरूपत्वं ब्रह्मलक्षणं न सिध्येत्, अभेदे वाक्यार्थो न सिध्येत्, तस्यानेकपदार्थवैशिष्ट्यरूपत्वनियमादित्यर्थः । अभेदपक्षमालम्ब्योक्तनियमासिद्ध्या परिहरति—**अत्रोच्यत इति । यस्त्वज्ञात इति** । तथा चाज्ञाते ब्रह्मपदार्थे एव वाक्यस्य पर्यवसानात् पुनर्न विशिष्टपरत्वमित्यर्थः । **ननु**—अज्ञातत्वं ब्रह्मणोऽसिद्धं; स्वरूपलक्षणवाक्ये ब्रह्मानूद्य तस्यानन्दत्वविधानमित्यनुपदमेवोक्तत्वात्, नह्यज्ञातमनुवाद्यम्, अत एव न विशिष्टपरत्वमित्येतदप्यसिद्धं, विधेयानुवाद्यविभागे सति तत्संसर्गविषयत्वावश्यम्भावादिति—**चेत्, उच्यते**; 'अधीहि भगवो ब्रह्मेति' प्रश्नसमये ब्रह्मप्रातिपदिकार्थतया 'यतो वे'त्यादिवाक्यश्रवणानन्तरं जगज्जन्मादिकारणतया च भृगुणा ज्ञातमपि ब्रह्म प्रधानपरमाण्वादिव्यावृत्तेन स्वरूपेण न निर्धारितमित्यज्ञातम् । जगत्कारणत्वेन तदनुवादेऽपि नानुवाद्यसंसर्गस्य वाक्यार्थानुप्रवेशः, किंतु वायुक्षेपिष्ठत्वादेरर्थवादानूदितस्य तत्समर्पकार्थवादिकपदसंघातलक्षणीयविधिवाक्यार्थान्वयिस्तुतिद्वारतयेव 'यत इमानि भूतानि जायन्त' इत्यादिपदसंघातलक्षणीयकारणत्वाश्रयवस्तूपस्थितिद्वारतया प्रथमावगतिमात्रम् । नच—अनुवाद्यस्य जगत्कारणत्वस्य वाक्यान्वयसंभवे तत्समर्पकार्थपदसंघातस्य 'पुरोडाशकपालेन तुषानुपवपती-'त्यत्र पुरोडाशकपालशब्दस्येवाधिष्ठानलक्षणा न युक्तेति—वाच्यम्; ब्रह्मप्रातिपदिकार्थमात्रस्य बुभुत्सितत्वेनाबुभुत्सितस्य कारणत्वस्यापि वाक्यार्थानुप्रवेशे कल्पकाभावात् । तदेतदनुपदमेव प्रकृष्टप्रकाशदृष्टान्तविवरणे स्फुटीकरिष्यते । **यथा प्रकृष्टप्रकाश इति** । 'कश्चन्द्र' इति प्रश्नोत्तरे 'प्रकृष्टप्रकाशश्चन्द्र इति' वाक्ये प्रकृष्टप्रकाशशब्दौ प्रकर्षप्रकाशत्वरूपस्वार्थबोधनद्वारा तदाश्रयं बुभुत्सितं वस्तुतश्चन्द्ररूपं व्यक्तिविशेषं लक्षयत इति तत्र प्रकर्षप्रकाशत्ववैशिष्ट्यं न वाक्यार्थज्ञानानुप्रविष्टमित्यर्थः । **ननु** प्रश्नोत्तरे बुभुत्सितं वक्तव्यमित्येव नियमः, न त्वबुभुत्सितं न वक्तव्यमित्यपि; अबुभुत्सितस्यापि बुभुत्सितग्रहणोपायस्य सहवचनोपपत्तेः, काञ्च्याः को मार्ग इति प्रश्ने मार्गग्रहणोपायतया तत्तत्प्रदेशस्थितगिरिनदीकाननादिसद्भावस्यापि सहवचनदर्शनादित्याशङ्क्याह—**मानान्तरादिति** । मानान्तरासिद्धो गिरिनद्यादिमार्गग्रहणोपायो वाक्यार्थेऽनुप्रविशतु नाम, मानान्तरसिद्धस्य तु न तदनुप्रवेशः कल्पनीय इत्यर्थः । **नन्वेवं सति** मानान्तरोपस्थितस्यैव प्रकर्षस्य प्रकाशत्वस्य च बुभुत्सितचन्द्रव्यक्तिग्रहणोपायत्वसंभवात् तदुपादानं व्यर्थमित्याशङ्क्याह—**उपायस्त्विति** । उपात्तमेव प्रकृष्टत्वं प्रकाशत्वं च व्यक्तिविशेषनिर्धारणोपायो भवति, नानुपात्तम् । नहि चन्द्र इत्येवोत्तरेण प्रकृष्टप्रकाशत्वाश्रयव्यक्तिविशेषश्चन्द्र इति निर्द्धारणं निष्पद्यते । **नन्वेवं सति**—प्रकृष्टप्रकाशत्ववैशिष्ट्यमपि वाक्येन बोधनीयमापतति, न हि तदबोधने तदाश्रयव्यक्तिविशेषश्चन्द्र इति निर्धारणा भवतीति—**चेत्, उच्यते**; कुत्र घोष इति प्रश्नोत्तरे घोषवासयोग्यनिबिडाधारप्रतिपादनार्थं प्रवृत्ते गङ्गायां घोष इति वाक्ये गङ्गापदं स्वार्थोपस्थापनद्वारा वस्तुतः स्वार्थसंबन्धिबुभुत्सितनिबिडाधाररूपं तीरं लक्षयतीति न तीरे प्रवाहविशेषसंबन्धित्वमपि वाक्ये बोध्यम् । **नच**—तदपि वाक्येन बोध्यमेव, तीरत्वमात्रेण बोधने तीरव्यक्तिविशेषनिर्धारणासिद्धेरिति—वाच्यम्; गङ्गापदलक्ष्यत्वमतदर्थसंबन्धिनस्तीरान्तरस्य न संभवतीति तल्लक्ष्यत्वानुपपत्त्याऽर्थात् तीरविशेषलाभोपपत्त्या तल्लाभार्थं मुख्यार्थसंबन्धित्वस्य लक्षणीयकोट्यनुप्रवेशकल्पनायोगाद्, **यश्चार्थादर्थो न स चोदनार्थ' इति न्यायात्** । एवमिहापि द्रष्टव्यम् । **अनुज्ञायत इति** । न प्रतिक्षिप्यत इत्यर्थः, ननु वाक्यार्थानुप्रवेशित्वेनानुज्ञायत इति; तदननुप्रवेशस्य समर्थितत्वात् । एवमुक्तां प्रक्रियामाश्रित्य स्वाभिमतं लौकिकवैदिकानां लक्षणवाक्यानामभेदपरवाक्यानां चाखण्डार्थत्वं निर्धारयितुमर्थगतमखण्डत्वं लक्षयति—**एवं चेति । अविशिष्टमिति** । समभिव्याहृतपदान्तरार्थासंसृष्टमित्यर्थः । अतः प्रकृष्टप्रकाशश्चन्द्र इत्यत्र बोध्यस्य चन्द्रस्य पदार्थैकदेशेन चन्द्रत्वेन

वेदान्तकल्पतरुः ।

पर्यवसाने व्यावृत्तिपरत्वानुपपत्तेः । **नच** चन्द्रशब्दवाच्यत्वं साध्यते; अचन्द्रे चन्द्रशब्दवाच्यत्वसाधने व्याघातात् । अथ चन्द्रत्वमप्यभिप्रेत्य चन्द्रशब्दवाच्यत्वं साध्यते, तर्हि चन्द्रत्वमेव साध्यतामवश्यापेक्षितत्वात्कृतमश्रुतवाच्यत्वकल्पनया । तस्मात्प्रकृष्टत्वे सति प्रकाशत्वमज्ञातचन्द्रज्ञापकम्; अर्थाद्व्यावृत्त्यादिसिद्धिः । **एवंचैतदपास्तम्**—एकेन पदेन यावदुक्तं तावतोऽपरेणाभिधाने पर्यायत्वम्, अधिकाभिधाने विशिष्टवाक्यार्थत्वापत्तिः—**इति**; वाच्यार्थनानात्वस्येष्टत्वाल्लक्ष्यस्य चैकत्वात् । नहि चन्द्रद्वयमस्ति, नच लक्षणस्य विशिष्टत्वाल्लक्ष्यं विशिष्टं स्यात् । मा भूत् सामान्यवत्त्वे सत्यस्मद्बाह्येन्द्रियग्राह्यत्वं विशिष्टमित्यनित्यत्वमपि विशिष्टं, तर्हि अनित्यत्वस्येव लक्षणानात्मकत्वाल्लक्ष्यस्य ब्रह्मणः सत्याद्यात्मकत्वं न स्यादिति **चेत्**, **नैतदस्ति; यतः; 'सत्तादीनां हि जातीनां व्यक्तितादात्म्यदर्शनात् । लक्ष्यव्यक्तिरपि ब्रह्म सत्त्वादि न जहाति नः ॥'** इह हि कल्पितभेदव्यक्त्याश्रितैः सामान्यैर्या व्यक्तयो लक्ष्यन्ते, तास्तद्रूपत्वं न जहति; तरङ्गचन्द्रानुगतचन्द्रत्वेन लक्ष्यचन्द्रव्यक्तिरिव चन्द्रात्मत्वम्, एवं ब्रह्मापि मायाकार्यकुम्भादिकल्पितव्यक्त्यनुगतं सत्तया लक्ष्यमाणं सत्त्वं न हास्यति । तथा ज्ञानत्वानन्दत्वाभ्यामप्यन्तःकरणवृत्त्युपधानलब्धभेदचिदानन्दविशेषानुगताभ्यां लक्ष्यमाणचिदानन्दव्यक्त्योरपि योज्यम् ।

कल्पतरुपरिमलः ।

वैशिष्ट्येऽपि नासंभवः । **नच** तत्त्वमस्यादिवाक्यार्थेष्वभेदरूपः संसर्गोऽस्तीत्यसंभवः शङ्कनीयः; संबन्धस्य द्विष्ठत्वनियमेनाभेदस्य संसर्गत्वाभावात् । कोकिलः पिक इत्यादिपर्यायानेकशब्दप्रकाशिते वाक्यर्थत्वाभावादलक्ष्येऽतिव्याप्तिवारणार्थम् **अपर्यायेति** विशेषणम् । अविशिष्टमित्यनेनार्थलब्धस्यैक्यस्य स्पष्टीकरणार्थम् **एकमिति** । पदार्थभेदे तदुभयसंसर्गस्य वाक्यार्थत्वावश्यम्भावेनाविशिष्टत्वासंभवात् । एवमपर्यायानेकशब्दप्रकाशितमविशिष्टमखण्डमित्यखण्डलक्षणोक्त्या समभिव्याहृतपदान्तरार्थसंसर्गागोचरप्रमितिजनकं वाक्यमखण्डार्थमित्यखण्डार्थलक्षणं सूचितं भवतीति द्रष्टव्यम् । दृष्टान्तासिद्धिमाशङ्कते **नन्विति** । व्यावृत्तिर्व्यवहारो वा लक्षणार्थ इति नैयायिकाः । तथा च प्रकृष्टप्रकाश इति हेतुगर्भं विशेषणं, चन्द्र इति च हेत्वाश्रयभूतायाश्चन्द्रव्यक्तेरितरव्यावृत्तचन्द्रशब्दवाच्यत्वान्यतरसाध्यवैशिष्ट्यपरमिति नाखण्डार्थतेत्यर्थः । **स्यादेतत्**—मा भूत् चन्द्रव्यक्तौ तदितरव्यावृत्तेः साध्यता; ज्योतिर्मण्डलमध्ये प्रकृष्टप्रकाशरूपेण तां गृह्णता प्रत्यक्षेण तस्या नक्षत्रादिव्यावृत्तेरपि ग्रहणात्, चन्द्रशब्दवाच्यत्वस्य तु स्यात्, इयं व्यक्तिश्चन्द्रशब्दवाच्येति प्रागनवगतत्वादवगतौ वा लक्षणे वाक्यानपेक्षणादित्याशङ्क्याह—**नचेति** । चन्द्रत्वजातिरहिते तत्साध्यते, तद्वति वा । **नाद्य** इत्याह—**अचन्द्रे इति । व्याघातादिति** । शब्दप्रवृत्तिनिमित्तरहितस्य तद्वाच्यत्वायोगादित्यर्थः । **द्वितीये** अयं चन्द्र इति चन्द्रत्वेन निश्चितायां व्यक्तौ तत्साध्यते, उतानेनैव वाक्येन चन्द्रत्वावगमनपूर्वकं तत्साध्यते । **नाद्यः**, चन्द्रत्वविशिष्टः चन्द्रशब्दवाच्यः, अयं चन्द्रत्वविशिष्ट इत्यवगच्छतस्तत्र चन्द्रशब्दवाच्यत्वनिर्णयार्थमुपदेशानपेक्षणात् । नहि गोसदृशो गवयः अयं च गोसदृश इति जानतस्तत्र गवयशब्दवाच्यत्वनिश्चयार्थमुपदेशापेक्षा दृश्यते । **न द्वितीय इत्याह—अथ चन्द्रत्वमिति । अज्ञातचन्द्रज्ञापकमिति** । यद्यपि प्रकृष्टप्रकाशव्यक्तिरेव चन्द्रः, स च ज्ञात एव, नच चन्द्रत्वेनाज्ञानं विवक्षितं, व्यक्तिसमानवित्तिवेद्यस्य तस्यापि सप्रकारके व्यक्तिज्ञाने प्रकारत्वेन विषयतावश्यंभावात्; तथापि चन्द्रत्ववैशिष्ट्यांशे सत्तानिश्चयरूपज्ञानाभावो विवक्षितः, अनभ्यासदशापन्नजलादिज्ञानवद्, यतो न तदंशे सत्तानिश्चयरूपम् । अत एवोपदेशानन्तरमेव तन्निश्चयः, अन्यथोपदेशवैयर्थ्यं स्याद्; विषयान्तरासंभवात् । **यद्वा**—जातेर्नास्ति व्यक्तिसमानवित्तिवेद्यत्वनियमः; स्वर्णकरकादिषु गृह्यमाणेष्वपि तेजस्त्वजलत्वपृथिवीत्वादिसंशयदर्शनात्, किंतु यद्व्यञ्जकतया यदवगतं तस्यास्तत्समानवित्तिवेद्यत्वनियमः । नच ज्योतिर्मण्डलमध्यवर्तिप्रकर्षविशेषयुक्तप्रकाशत्वं चन्द्रत्वव्यञ्जकमिति प्रागुपदेशाज् ज्ञातम्, अतो युज्यत एवाज्ञातचन्द्रत्वज्ञापकत्वं प्रकृष्टप्रकाशवाक्यस्य । **अर्थादिति** । अप्रकृष्टप्रकाशनक्षत्रादिव्यावृत्तेः प्रत्यक्षतः सिद्धावप्यचन्द्रव्यावृत्तेश्चन्द्रशब्दवाच्यत्वस्य चार्थात्सिद्धिरित्यर्थः । **ननु** वाच्यनानात्वे लक्ष्यस्यापि नानात्वं स्यादित्याशङ्क्याह—**नहि चन्द्रद्वयमस्तीति** । प्रकृष्टप्रकाशशब्दवाच्यनानात्वेऽपि तल्लक्ष्यचन्द्रव्यक्तिनानात्वं नास्तीत्यर्थः । **मा भूदिति** । यद्यपि ध्वंसप्रागभावान्यतरप्रतियोगित्वरूपमनित्यत्वं ध्वंसेन प्रागभावेन वा विशिष्टमेव; तथाप्यस्मदादिबाह्येन्द्रियग्राह्यत्वं सामान्यवत्त्वेनेव समानाधिकरणविशेषणेन विशिष्टं न भवतीत्यत्र तात्पर्यम् । सुवर्णं, तेजः, जलपृथिव्यन्यत्वे सति रूपवत्त्वादित्याद्युदाहरणान्तरमिह द्रष्टव्यम् । अनित्यत्वतज्ज्ञापकदृष्टान्तेनैव दोषान्तरमाशङ्कते—**तर्हीति । सत्याद्यात्मकत्वं न स्यादिति** । सत्ताजात्यादितादात्म्यापन्नं हि घटादिकं सदाद्यात्मकमिष्यत इति भावः । **सत्त्वादि न जहातीति** । सदाद्यात्मकं भवतीत्यर्थः । **ननु** घटादिविषयेषु सत्तादिजातीनां व्यक्तितादात्म्यदर्शनमस्तु, ततः किमायातं ब्रह्मणः सदात्मकत्वादिसिद्धावित्याशङ्क्य श्लोकं व्याचष्टे—**इह कल्पितभेदेति** । प्रतिज्ञातमर्थं क्वचिदुदाहरणे प्रदर्शयन्नेव तन्न्यायं प्रकृते योजयति—**तरङ्गेति** । वस्तुतश्चन्द्रस्यैकत्वेपि तरङ्गोपाधिकल्पितभेदा बहवश्चन्द्राः सन्तीति तावदनुगतं चन्द्रत्वसामान्यम् । तद्वाचिनश्चन्द्रशब्दस्य यद्वा भेदकल्पनाधिष्ठाने बिम्बचन्द्रे प्रयोगस्तदा तद्वाच्यचन्द्रत्वसामान्यलक्ष्या भवति या चन्द्रव्यक्तिः, सा चन्द्रात्मत्वं न जहातीति दृष्टं; तथेहापि मायाकल्पितभेदघटपटाद्यनुगतसत्तासामान्यवाचिनः सच्छब्दस्य सद्भेदकल्पनाधिष्ठाने ब्रह्मणि प्रयोगे सति तद्वाच्येन सत्तासामान्येन लक्ष्यं ब्रह्म सदात्मत्वं न जहातीत्यर्थः । **ननु**

आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति' (तैत्ति० ३।६) । अन्यान्यप्येवंजातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि ॥ २॥
इति द्वितीयं जन्माद्यधिकरणम् ॥

जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तं, तदेव द्रढयन्नाह—

(३ अधिकरणम्) **शास्त्रयोनित्वात् ॥ ३ ॥**

भामती ।

एतदुक्तं भवति—यथा रज्ज्वज्ञानसहितरज्जूपादाना धारा रज्ज्वां सत्यामस्ति रज्ज्वामेव च लीयते, एवमविद्यासहितब्रह्मोपादानं जगत् ब्रह्मण्येवास्ति तत्रैव च लीयत इति सिद्धम् ॥ २ ॥ **इति द्वितीयं जन्माद्यधिकरणम् ॥**

सूत्रान्तरमवतारयितुं पूर्वसूत्रसंगतिमाह—जगत्कारणत्वप्रदर्शनेनेति ॥

शास्त्रयोनित्वात् ॥ ३ ॥

वेदान्तकल्पतरुः ।

यथा च सद्भेद औपाधिकः, एवं सज्ज्ञानानन्दभेदोऽपि, सत्त्वरहितज्ञानानन्दयोः शून्यत्वप्रसङ्गात्, बोधात्मत्वरहितसतश्च भानाभावप्रसङ्गाद्, दृश्यत्वे कल्पितत्वेन ...वायोगात्सद्बोधात्मकसाक्षिणश्च परप्रेमास्पदत्वेनानन्दत्वाभाव्यावगमादिति । तथाच कल्पितभेदसामान्यतदपेक्षव्यक्त्याकारबाधेन सत्यज्ञानानन्दात्मकं ब्रह्म निश्चीयते । **प्रयोगोपि**, सत्यादिवाक्यं, विशिष्टार्थपरत्वरहितं, लक्षणवाक्यत्वात्प्रकृष्टप्रकाशादिवाक्यवदिति । **तथा—उपाधिभेदभिन्नोऽर्थो येनैकः प्रतिपाद्यते । तदपि स्यादखण्डार्थं महत्त्वं कुम्भकं यथा ॥** निरंशस्य हि जीवस्याणुत्वमनन्तत्वं वा स्यात् । तत्र नाणुत्वं; सकलदेहव्यापि ह्लादाद्युपलम्भप्रसङ्गाद्, विभोश्च न नभोवद् द्रव्यत्वावान्तरजात्यनाधारस्येश्वराद्भेदायोगात् । तस्मादनन्तब्रह्मात्मनोऽस्य परिच्छेद औपाधिकः । श्रूयते च जीवस्य परस्मादौपाधिको भेदः—यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥ इति । **नन्वेवं** भूतब्रह्मणः कथं जगद्योनित्वमत आह—**एतदिति ॥ इति द्वितीयं जन्माद्यधिकरणम् ॥**

शास्त्रयोनित्वात् ॥ ३ ॥

अत्र हेतुमात्रं प्रतिभाति, नैतज्जगद्योनित्वे, साध्याविशेषादित्यसङ्गतिमाशङ्क्यार्थिकप्रतिज्ञया सङ्गतिमाहेत्याह—**सूत्रान्तरमिति । अथ वा वेदनित्यत्वाद् ब्रह्मणो विश्वयोनिता । नेति शङ्कामपाकर्तुं शास्त्रयोनित्वमुच्यते ॥**

कल्पतरुपरिमलः ।

सच्चिदानन्दशब्दवाच्यसत्तादिसामान्यलक्ष्यव्यक्तीनां भेदादपर्यायानेकशब्दपर्यवसानास्पदं ब्रह्म न सिध्येदत आह—**यथा चेति । व्यक्त्याकारो** व्यक्तिभेदः । **विशिष्टार्थपरत्वरहितमिति ।** पदान्तरार्थसंसृष्टार्थपरत्वरहितमित्यर्थः । एवं तत्पदार्थविषयावान्तरवाक्यानामखण्डार्थत्वं प्रसाध्य तत्त्वमस्यादिमहावाक्यानामपि तत्साधयति—**तथेति ।** तत्त्वमस्यादिवाक्यम्, अखण्डार्थम्, उपाधिभेदभिन्नार्थैक्यप्रतिपादकत्वाद्, महाकाशो घटाकाश इति वाक्यवदिति श्लोकसंहितेऽनुमानेहेत्वसिद्धिपरिहाराय जीवेश्वरयोः स्वाभाविकभेदाभावं जीवस्य विभुत्वेन साधयिष्यन् परिमाणान्तरनिरासेन तस्य विभुत्वमुपपादयति—**निरंशस्येति ।** आत्मा, द्रव्यत्वावान्तरजातिरहितः, विभुत्वादाकाशवदित्यनुमाने जातौ धर्मिसमानसत्ताकत्वं विशेषणं देयं, तेन तरङ्गचन्द्रानुगतचन्द्रत्वन्यायेन जीवे ईश्वरे च कल्पिताया आत्मत्वजातेरभ्युपगमेऽपि न बाधः । जीवेश्वरभेदस्य स्वाभाविकत्वे तद्गतात्मत्वजातेर्धर्मिसमानसत्ताकत्वावश्यंभावात् तदभावसाधनेन स्वाभाविकभेदनिराससिद्धिः । उक्तानुमानानुग्राह्यां जीवानामीश्वरात् परस्परस्माच्च भेदस्यौपाधिकत्वप्रतिपादिनी श्रुतिमुदाहरति—**यथा ह्ययमिति । इति द्वितीयं जन्माद्यधिकरणम् ॥**

शास्त्रयोनित्वात् ॥ ३ ॥

साध्याविशेषादिति । हेतुः सिद्धश्चेत् साध्यमपि सिद्धमेव। "अस्य महतो भूतस्य" त्यादिश्रुत्या खलु हेतुसिद्धिरेष्टव्या, तया यतो वेत्यादिश्रुत्यन्तरैश्च साध्यस्यापि सिद्धिरविशिष्टा। अथ श्रुतिप्रच्छादनेन साध्यासिद्धिरुच्यते, तर्हि हेतोरप्यसिद्धिः स्यादित्येवं साध्याविशेष इत्यर्थः । **आर्थिकप्रतिज्ञयेति ।** आर्थिकी सर्वज्ञत्वप्रतिज्ञा। **ननु** निर्विशेषब्रह्मविचारं प्रतिज्ञातवतः सूत्रकारस्य सविशेषब्रह्मगतसर्वज्ञत्वदृढीकरणं क्वोपयुज्यते ? **पूर्वसूत्रे** विवक्षितस्य जीवो जगत्कारणमिति शङ्काव्यावर्तनस्य स्थिरीकरणे । **ननु** पूर्वसूत्रे ब्रह्मणः सर्वज्ञत्ववत्सर्वशक्तिकत्वमप्यर्थलब्धं तत्किमिति केनचिद्धेतुना न दृढीकृतं ? तदपि ह्युक्तशङ्कानिवर्तनक्षमम्; **सत्यं**—तदपि निःश्वसितश्रुत्युदाहरणेन दृढीकृतमेव; 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेद' इत्युपक्रम्या'यं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानी'ति नामरूपात्मकस्य सर्वस्यापि प्रपञ्चस्य निःश्वसितवदप्रयत्नसाध्यब्रह्मकार्यत्वोक्तेः । **अथ वेति । ननु**—[1]वेदानित्यत्वप्रसाधनं वियत्पादे (व्या. सू.

---

१ अत्रैकं सूत्रं—जन्माद्यस्य यतः ॥

महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म। न हीदृशस्य शास्त्रस्यर्ग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोऽस्ति। यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात्संभवति, यथा व्याकरणादि पाणिन्या-

भामती।

न केवलं जगद्योनित्वादस्य भगवतः सर्वज्ञता, शास्त्रयोनित्वादपि बोद्धव्या। शास्त्रयोनित्वस्य सर्वज्ञतासाधनत्वं समर्थयते—**महत ऋग्वेदादेः शास्त्रस्येति**। चातुर्वर्ण्यस्य चातुराश्रम्यस्य च यथायथं निषेकादिश्मशानान्तासु ब्राह्ममुहूर्तोपक्रमप्रदोषपरिसमापनीयासु नित्यनैमित्तिककाम्यकर्मपद्धतिषु च ब्रह्मत्वे च शिष्याणां शासनात् शास्त्रमृग्वेदादि, अतएव महाविषयत्वान्महत्। न केवलं महाविषयत्वेनास्य महत्त्वम्, अपित्वनेकाङ्गोपाङ्गोपकरणतयापीत्याह—**अनेकविद्यास्थानोपबृंहितस्य**। पुराणन्यायमीमांसादयो दश विद्यास्थानानि तैस्तया तया द्वारोपकृतस्य। तदनेन समस्तशिष्टजनपरिग्रहेणाप्रामाण्यशङ्काप्यपाकृता। पुराणादिप्रणेतारो हि महर्षयः शिष्टास्तैस्तया तया द्वारा वेदान्व्याचक्षाणैस्तदर्थं चादरेणानुतिष्ठद्भिः परिगृहीतो वेद इति। न चायमनवबोधको नाप्यस्पष्टबोधको येनाप्रमाणं स्यादित्याह—**प्रदीपवत्सर्वार्थावद्योतिनः**। सर्वमर्थजातं सर्वथावबोधयन् नानवबोधको नाप्यस्पष्टबोधक इत्यर्थः। अत एव **सर्वज्ञकल्पस्य** सर्वज्ञसदृशस्य। सर्वज्ञस्य हि ज्ञानं सर्वविषयं, शास्त्रस्याप्यभिधानं सर्वविषयमिति सादृश्यम्। तदेवमन्वयमुक्त्वा व्यतिरेकमाह—**नहीदृशस्येति**। सर्वज्ञस्य गुणः सर्वविषयता तदन्वितं शास्त्रं, अस्यापि सर्वविषयत्वात्। उक्तमर्थं प्रमाणयति—**यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुष-**

वेदान्तकल्पतरुः।

अस्मिन्पक्षे श्रौतप्रतिज्ञयैव सङ्गतिः। अभ्युच्चयार्थत्वेन हेतुपौनरुक्त्यं परिहरति—**न केवलमिति**। हेत्वन्तरसमर्थनाच्चाधिकरणान्तरत्वम्। 'अस्य महत' इत्यादिवाक्यं ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं न साधयत्युत साधयतीति वेदस्य सापेक्षत्वप्रसङ्गाप्रसङ्गाभ्यां संशये पूर्वपक्षमाशङ्क्य निराकरिष्यते। सिद्धान्तोपक्रमभाष्यं व्याचष्टे—**चातुर्वर्ण्येत्यादिना**। पुराणन्यायमीमांसा धर्मशास्त्रं षडङ्गानि **दश विद्यास्थानानि। तया तया द्वारेति**। सृष्टिवाक्यापेक्षितसर्गादिप्रपञ्चनद्वारा पुराणमद्वैतपरं, जातिव्यक्तिलक्षणनिरूपणेन न्यायो वैदिकपदार्थशुद्ध्यर्थः, शेषोपयोगस्तु व्यक्तः। **उक्तमर्थं प्रमाणयतीति। अत्रायं भाष्यविभागः—महत इत्यारभ्य ब्रह्मेत्यन्तेन** निःश्वसितश्रुत्या विभक्तत्वहेतूपकृतया ब्रह्मकार्यं वेद इत्युक्तम्। **नहीदृशस्येत्यारभ्यास्तीत्यन्तेन** व्यतिरेकमुखेन सर्वज्ञत्वप्रतिज्ञा। **यदित्यादिना लोके इत्यन्तेन** व्याप्तिरुक्तेति। विस्तरत्वं शास्त्रविशेषणं व्याप्त्यनुपयोगाद् व्यर्थमित्याशङ्क्य महाविषयत्वाद्वेदस्य ब्रह्मज्ञानेन तुल्यविषयत्वभ्रमनिवृत्तिः प्रयोजनमित्याह—

कल्पतरुपरिमलः।

अ. २ पा. ३) सङ्गतं, न त्वत्रेति—**चेत्, सत्यम्**; पूर्वसूत्रार्थाक्षिप्तसर्वज्ञत्वदृढीकरणार्थतयेह वेदकर्तृत्वं व्यवस्थापनीयमासीत्, तेनार्थाद् ब्रह्मणः सर्वकारणत्वमनुपपन्नं वेदस्य नित्यत्वादिति शङ्कानिराकरणमपि लभ्यत इत्यानुषङ्गिकार्थकथनपरोऽयं श्लोकः। आनुषङ्गिके चार्थे न पृथक् सङ्गत्यपेक्षा। अथ वेत्यस्मिन् पक्ष इति च हेतोरार्थप्रतिज्ञान्वयमनपेक्ष्य श्रौतप्रतिज्ञयैव तदन्वय इत्यभिप्रायं न भवति; येन स्वतन्त्रमिदं पक्षान्तरमित्यानुषङ्गिकत्वं न स्यात्, किं त्वार्थप्रतिज्ञयैवान्वय इति यथाश्रुतभाष्यटीकानुसारेण प्रथमः। आनुषङ्गिकार्थविषयश्रौतप्रतिज्ञयाऽप्यन्वयो भाष्यटीकयोर्विवक्षित इति द्वितीयोऽयं पक्षः। प्रतिज्ञयैवेत्येवकारो भिन्नक्रमः, श्रौतप्रतिज्ञयाऽप्यन्वयोऽस्त्येवेत्यर्थः। **ननु** जगद्योनित्वसिद्धे सार्वज्ञ्ये शास्त्रयोनित्वम् अभ्युच्चयार्थं हेत्वन्तरं चेदधिकरणान्तरत्वं न स्यादित्यत आह—**हेत्वन्तरेति**। सिद्धहेत्वन्तराभिधाने ह्येकाधिकरण्यम्, इह शास्त्रयोनित्वहेतुः प्रसाधनीय इति तदर्थमधिकरणान्तरमित्यर्थः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति **षडङ्गानि। जातिव्यक्तीति**। उपलक्षणमेतदपेक्षितप्रमाणादिनिरूपणस्यापि। **उक्तमर्थं प्रमाणयतीति**। यद्यदित्यादिभाष्यात् प्राचीनेन सन्दर्भेण हेतुनिर्देशपूर्वकं प्रतिज्ञातं सार्वज्ञ्यरूपमर्थं प्रमाणवन्तं करोतीत्यर्थः। यद्यपि हेतुनिर्देशमारभ्य प्रमाणोपन्यासः प्रवृत्तः; तथापि व्याप्त्यैव हेतुः प्रामाण्यमश्नुत इति यद्यदित्यादिव्याप्तिप्रदर्शकग्रन्थ एव प्रमाणोपन्यासार्थत्वेनावतारितः। **अथवा**—''त्रीनुदाहरणान्तान्वा यद्वोदाहरणादिका''निति मीमांसकमर्यादया यद्यदित्यादिरुदाहरणोपनयनिगमनोपन्यास एव प्रमाणोपन्यासः। **भाष्ये**—ततः प्रागन्वयमुखेन हेतोर्व्यतिरेकमुखेन प्रतिज्ञायाश्च निर्देशस्तस्य स्फुटीकरणार्थः, स त्वनुमानावयवरूप इत्यभिप्रायेणोदाहरणप्रभृतिरेवोक्तार्थे प्रमाणप्रदर्शनपरत्वेनावतारितः। प्रामाण्यवच्छब्दात् तत्करोतीत्यर्थे णिचि णाविष्ठवद्भावाद् 'विन्मतोर्लुगिति' मतुपो लुकि च सति प्रामाण्यवन्तं करोतीत्यर्थे प्रमाणयतीति शब्दः। **यद्वा**—उक्तमर्थं वेदकर्तृत्वं हेतुं व्याप्त्याद्युपन्यासेन प्रमाणं करोतीत्यर्थः। अस्मिन् पक्षे प्रमाणशब्दादेव णिच्। विभक्तत्वं भिन्नत्वं कार्यत्वे हेतुरिति वियदधिकरणे 'यावद्विकारं त्विति' (व्यास. अ. २ पा. ३ सू. ७) सूत्रेण प्रदर्शयिष्यते। **तुल्यविषयत्वेति**। विस्तरार्थमित्यत्र विस्तरशब्दः शब्दप्रपञ्चपरः; 'प्रथने वावशब्द' इति शब्दातिरिक्तस्यार्थस्य

देशैकदेशार्थमपि स ततोऽप्यधिकतरविज्ञान इति प्रसिद्धं लोके । किमु वक्तव्यमनेकशाखा-

भामती ।

विशेषात्संभवति स पुरुषविशेषः **ततोऽपि** शास्त्रात् **अधिकतरविज्ञानः** इति योजना । अद्यत्वेऽप्यस्मदादिभिर्यत्समीचीनार्थविषयं शास्त्रं विरच्यते तत्रास्माकं वक्तॄणां वाक्याज्ज्ञानमधिकविषयम् । नहि ते तेऽसाधारणधर्मा अनुभूयमाना अपि शक्या वक्तुम् । न खल्विक्षुक्षीरगुडादीनां मधुररसभेदाः शक्याः सरस्वत्याप्याख्यातुम् । विस्तरार्थमपि वाक्यं न वक्तृज्ञानेन तुल्यविषयमिति कथयितुं विस्तरग्रहणम् । **सोपनयं** निगमनमाह—**किमु वक्तव्यमिति** । वेदस्य यस्मात् महतो भूतात् योनेः संभवः, तस्य महतो भूतस्य ब्रह्मणो निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं च किमु वक्तव्यमिति योजना । **अनेकशाखेति** । अत्र चानेकशाखाभेदभिन्नस्येत्यादिः संभव इत्यन्त उपनयः । तस्येत्यादि

वेदान्तकल्पतरुः ।

विस्तरार्थमिति । यस्मादित्यस्य तस्येत्यनेन व्यवहितेन संबन्धमाह—**वेदस्येति** । **इदमिहानुमानम्**, ब्रह्म वेदविषयादधिकविषयज्ञं तत्कर्तृत्वात्, यो यद्वाक्यप्रमाणकर्ता स तद्विषयादधिकविषयज्ञः, यथा पाणिनिरिति । सर्वावभासकवेद-

कल्पतरुपरिमलः ।

प्रपञ्चे घञो विधानेन शब्दप्रपञ्चएव 'ऋदोरबि'त्यपा विस्तरशब्दनिष्पत्तेः । विस्तररूपोऽर्थो धर्मो यस्य तद्विस्तरार्थम् । वस्तुमात्रवाचिनोऽर्थशब्दस्येह धर्मरूपे वस्तुनि पर्यवसानम् । एवंच ऋग्वेदादिरूपे शास्त्रेऽर्थवादादिबहुले शब्दमात्रस्यैव प्रपञ्चो नार्थस्येति विस्तरार्थविशेषणेन ज्ञापनाद् वेदस्य ब्रह्मज्ञानस्य च तुल्यविषयत्वभ्रान्तिर्निवर्तिता भवति । अतोऽधिकविषयज्ञानवत्त्वसाध्यस्य न बाध इति भावः । **ब्रह्मेति । ननु**—वेदविषयाधिकविषयज्ञानवत्त्वमात्रं साध्यं चेत्, सर्वावभासकवेदकर्तृत्वेन पक्षधर्मताबलात् सर्वज्ञतासिद्धिरित्येतन्न घटते; वेदविषयतदधिकोभयविषयज्ञानवत्त्वं साध्यं चेद्, वैदिकासदर्थोपाख्यानाद्यर्थविषयभ्रान्तिज्ञानवत्त्वमपि ब्रह्मणः सिद्ध्येत्, किंच हेतूक्तं वेदकर्तृत्वं वेदवक्तृत्वमात्रं चेत्, अर्थानभिज्ञाध्यापके व्यभिचारः; पूर्वानुपूर्वीमनपेक्ष्य तद्वक्तृत्वं चेत्, असिद्धिः; सामान्यव्याप्त्युपन्यासे च वाक्यप्रमाणस्येति प्रमाणपदं व्यर्थम्; अप्रमाणवाक्यकर्तुरपि भ्रान्तस्य प्रतारकस्य च तदर्थतदधिकोभयविषयज्ञानसत्त्वात्, तस्मात्सर्वमिदमयुक्तमिति—**चेत्, उच्यते**; ईश्वरस्य वैदिकासदर्थोपाख्यानाद्यर्थविषयज्ञानवत्त्वेऽपि तस्य ज्ञानस्य प्रमित्युपयोग्याहार्यज्ञानत्वाद् न तेन भ्रान्तिमत्त्वप्रसक्तिः । नह्यभावप्रमित्युपयोग्यधिकरणगोचरप्रतियोगितदवच्छेदकारोपवन्तः पुरुषाः धर्मार्थप्रमित्युपयोगिकपोताख्यायिकाहंसकाकोपाख्यानादिरचनामूलारोपवन्तो वाल्मीकिकृष्णद्वैपायनादयो बालारोग्यसाधनौषधपानकर्तव्यताप्रमित्युपयोगिबालप्ररोचनार्थतदभिमतफलान्तरोपन्यासमूलारोपवन्तः पित्रादयश्च भ्रान्ता इति व्यपदिश्यन्ते । किंच यत्सत्तानिश्चयरूपं न भवति, न तेनान्यत्रान्यवैशिष्ट्यावगाहिनापि भ्रान्त इति व्यपदिश्यते । नहि शुक्तौ रजतत्ववैशिष्ट्यज्ञानवानिवास्य पुरोवर्तिनि रजतत्ववैशिष्ट्यावगाहिज्ञानमप्रमाणमिति तदीयभ्रान्तिविषयतया पुरोवर्तिनि रजतत्ववैशिष्ट्यं गृह्णन् भ्रान्तिज्ञोऽपि भ्रान्त उच्यते । वेदकर्तृत्वं च वक्त्रन्तराधीनानुपूर्वीमनपेक्ष्य वेदकर्तृत्वमिति नार्थानभिज्ञाध्यापके व्यभिचारः । नचैवमपि घुणाक्षरन्यायेन वेदसमानानुपूर्वीकस्य वाक्यस्यार्थान्तरविवक्षया प्रयोक्तरि व्यभिचारः; सकलवेदवक्तृत्वस्य विवक्षितत्वात् । तावच्च सर्गादौ सर्वान्वेदानध्यापितेष्वीश्वरवत्सार्वज्ञ्यरहितेषु मन्वादिषु व्यभिचारीति तद्वारणेन पूर्वोक्तविशेषणमप्यर्थवत् । उदाहरणवाक्ये प्रमाणपदं यो यस्य वाक्यस्यार्थविवक्षया प्रयोक्तेति विवक्षारूपविशेषणलाभार्थम् । तच्च विशेषणमर्थानभिज्ञाध्यापकेषु निरभिप्रायवाक्यप्रयोक्तृषून्मादग्रस्तादिषु च व्यभिचारवारणार्थं । सर्गादौ वेदान्प्रवर्तयत ईश्वरस्यापि तत्तदर्थविवक्षास्तीति सामान्यव्याप्तावुपात्तस्य व्याप्यस्य पक्षानुगतिः । **उक्तंहि ब्रह्माधिकरणवार्तिके** (जै. अ. ३. पा १ सू. १३–१५) 'शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते । तदप्यधिष्ठितं सर्वमेकेन परमात्मना ॥ तथर्ग्वेदादयो वेदाः प्रोक्ता येऽपि पृथक्पृथक् । भोग्यत्वेनात्मनां तेऽपि चैतन्यानुगताः सदा ॥ •तेषामन्तर्गतेच्छानां वाक्यार्थप्रतिपादनी । विवक्षा चाविवक्षा च ज्ञायते शब्दशक्तितः ॥' इति । **ननु**—सकलवेदकर्तृत्वहेतूकरणबलात्सकलवेदार्थविषयत्वमीश्वरज्ञानस्य सिद्ध्यतीति तावतैव तस्य सार्वज्ञ्यसिद्धेरधिकविषयत्वं विशेषणान्तरं किमर्थम्, नच—तावता तस्य सार्वज्ञ्यं न सिध्यति, अवेदप्रतिपादिताद्यतनपुरुषपाणिगतवराटकसंख्यादिज्ञानवत्त्वस्य तेनासिद्धेरिति—वाच्यम्; अधिकविषयत्वविशेषणेनापि तदसिद्धेः । टीकायां हीक्षुक्षीरादिमाधुर्यविशेषवद्वेदेनापि यदाहत्य बोधयितुं न शक्यं तादृग्विशेषविषयज्ञानवत्त्वस्याप्यधिकविशेषणेन सिद्धिरिति तत्प्रयोजनमुक्तम् । **युक्तं चैतत्**—यथेक्ष्वादिमाधुर्यं स्वयमनुभूय शब्दं प्रयुञ्जानस्य यादृशं तद्विशेषज्ञानं तादृशं स शब्दो नान्यस्य जनयितुमीष्टे । तथा मानुषादिब्राह्मपर्यन्त आनन्द उत्तरोत्तरमुत्कृष्यते, ब्रह्मानन्दस्तु निरतिशय इति वैदिकशब्दः शतकृत्वः श्रुतोऽपि तमानन्दं साक्षात्कुर्वत ईश्वरस्यानुभवेन सदृशं तन्निरतिशयत्वादिरूपविशेषानुभवमन्यस्य जनयितुं न शक्नोत्येव । एवंविधश्रुत्यबोध्यविशेषविषयत्वेन वेदरचनामूलवेदार्थाधिकवर्णावल्यादिविषयत्वेन चार्थान्तरादिति—**चेत्; उच्यते**; सकल-

भेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोर्ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्याप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवद्यस्मान्महतो भूताद्योनेः संभवः, 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृह० २।४।१०।) इत्यादिश्रुतेः, तस्य महतो भूतस्य निरतिशयं

भामती ।

सर्वशक्तित्वं चेत्यन्तं निगमनम् । **अप्रयत्नेनैवेति** । ईषत्प्रयत्नेन, यथाऽलवणा यवागूरिति । देवर्षयो हि महापरिश्रमेणापि यत्राशक्तास्तदयमीषत्प्रयत्नेन लीलयैव करोतीति निरतिशयमस्य सर्वज्ञत्वं सर्वशक्तित्वं चोक्तं भवति । **अप्रयत्नेनास्य वेदकर्तृत्वे श्रुतिरुक्ता**—'अस्य महतो भूतस्य' इति । येऽपि तावत् वर्णानां नित्यत्वमास्थिषत तैरपि पदवाक्यादीनामनित्यत्वमभ्युपेयम् । आनुपूर्वीभेदवन्तो हि वर्णाः पदम् । पदानि चानुपूर्वीभेदवन्ति वाक्यम् । व्यक्तिधर्मश्चानुपूर्वी न वर्णधर्मः, वर्णानां नित्यानां विभूनां च कालतो देशतो वा पौर्वापर्यायोगात् । व्यक्तिश्चानित्येति कथं तदुपगृहीतानां वर्णानां नित्यानामपि पदता नित्या । पदानित्यतया च वाक्यादीनामप्यनित्यता व्याख्याता । तस्मान्नृत्तानुकरणवत् पदाद्यनुकरणम् । यथाहि यादृशं गात्रचलनादि नर्तकः करोति तादृशमेव शिक्ष्यमाणानुकरोति नर्तकी, नतु तदेव व्यनक्ति । एवं यादृशीमानुपूर्वीं वैदिकानां वर्णपदादीनां करोत्यध्यापयिता तादृशीमेवानुकरोति माणवकः, नतु तामेवोच्चारयति, आचार्यव्यक्तिभ्यो माणवकव्यक्तीनामन्यत्वात् । तस्मान्नित्यानित्यवर्णवादिनां लौकिक-

वेदान्तकल्पतरुः ।

कर्तृत्वेन पक्षधर्मताबलात्सर्वज्ञत्वसिद्धिरिति । **यद्वा**—अयं घटः, एतदन्यासर्ववित्कर्तृकत्वानधिकरणैतदन्यावेदत्वानधिकरणसकर्तृकान्यः, घटत्वाद्, घटान्तरवदिति । ईक्षणादिप्रयत्नापेक्षणादप्रयत्नशब्दः सौकर्यापेक्ष इत्याह—**ईषदिति** । अधुना पूर्वपक्षमाशङ्क्य निराक्रियते । कर्तृमत्त्वेन वेदस्य सापेक्षत्वं वदन् प्रष्टव्यः—सापेक्षता किं पुरुषनिर्वर्त्यत्वमात्रात्, अभिनवानुपूर्वीविरचनाद्वा, मानान्तरोपलब्धार्थविषयवचनरचनाद्वा, कतिपयकालविरचितसर्वसंप्रदायस्य वेदस्यैकपुरुषान्निःसरणाद्वा । **नाद्यः**, तत्रापि संमतत्वादित्याह—**येऽपि तावदिति** । **व्यक्तिरभिव्यक्तिः** । **द्वितीये** क्रमान्यत्वमात्रमभिनवत्वं, विसदृशक्रमत्वं वा । **आद्यो** भवद्भिरप्यङ्गीकृतः । **चरमस्तु** नास्माभिरपि स्वीकृत इत्याह—**तस्मान्नृत्तेति** ।

कल्पतरुपरिमलः ।

वेदार्थाभिज्ञत्वमेवेह साध्यं, पक्षधर्मताबलात्सार्वज्ञ्यसिद्ध्युक्तिरपि तन्मात्राभिप्राया । नच—तन्मात्रं साध्यते चेद् व्याप्तिबलादेव तत्सिद्ध्यतीति पक्षधर्मताबलोक्तिरधिकसार्वज्ञ्यसिद्ध्यर्था स्यादिति—वाच्यम्; सामान्यव्याप्तिबलात् स्वप्रयुक्तवाक्यार्थाभिज्ञत्वमात्रस्यैव सिद्धिरिति विशिष्य सकलवेदार्थाभिज्ञत्वसिद्धेः सकलवेदकर्तृत्वहेतुपक्षधर्मतालभ्यत्वात् । वेदार्थाधिकाद्यतनवृत्तान्ताद्यभिज्ञत्वसिद्धिस्तु स्वतः सर्ववेदार्थगोचरमीश्वरज्ञानमन्यदपि सर्वं गोचरयेदिति न्यायसाम्यात् । अधिकविषयत्वस्य साध्यानुप्रवेशनं तु पाणिनीयादिदृष्टव्याप्तिबलादधिकविषयत्वमपि सेद्धुमर्हति, किमुत पदार्थविषयत्वमिति कैमुतिकन्यायेन सिषाधयिषितसाध्यसिद्धिदार्ढ्यार्थम्, अनुमानप्रवृत्त्यनन्तरभाविन्यायलभ्यार्थानुवादरूपं वा । एवं सूत्रभाष्यसूचितं सर्वज्ञत्वपर्यवसाय्यनुमानं प्रदर्श्य स्वयं साक्षात्तत्साधकमनुमानं दर्शयति—**अयं घट इति** । एतत्पदद्वयं पक्षीकृतघटपरम् । एतदन्यश्चासावसर्ववित्कर्तृकश्च, तस्य भावस्तत्त्वं तदनधिकरणमित्येकं सकर्तृकस्य विशेषणम् । एतदन्यश्चासाववेदश्च, तस्य भावस्तत्त्वं तदनधिकरणमिति द्वितीयं तस्य विशेषणम् । एवंभूतात्सकर्तृकादन्यत्वस्य साध्यस्य दृष्टान्ते प्रसिद्धिः पक्षादन्यत्वविषया । पक्षीकृतो हि घटः सकर्तृकः एतदन्यावेदत्वानधिकरणं च; तत्रावेदत्वसत्त्वेऽप्येतदन्यत्वविशिष्टावेदत्वाभावात् । एतदन्यासर्ववित्कर्तृकत्वानधिकरणं च; तत्रासर्ववित्कुलालकर्तृकत्वसत्त्वेऽप्येतदन्यत्वविशिष्टासर्ववित्कर्तृकत्वाभावात् । पक्षे तु वेदादन्यत्वमादाय साध्यं सिद्ध्यद्वेदस्य सर्ववित्कर्तृकत्वमन्तर्भाव्य पर्यवस्यति । पक्षस्य यस्मात्सकर्तृकादन्यत्वं वाच्यं तस्यैतदन्यावेदत्वानधिकरणात्वं ह्यवेदत्वरूपविशेष्याभावेनोपपादनीयं, नत्वेतदन्यत्वरूपविशेषणाभावेन; पक्षगतान्योन्याभावप्रतियोगिनि पक्षान्यत्वसत्त्वेन तदभावासंभवात् । एवमेतदन्यासर्ववित्कर्तृकत्वानधिकरणत्वमप्यसर्ववित्कर्तृकरूपस्य विशेष्यस्याभावेनोपपादनीयम्; पूर्ववत्तत्र विशेषणाभावासंभवात् । एवंच यद्यपि द्वितीयविशेषणलभ्ये वेदपक्षनिष्ठान्योन्याभावप्रतियोगिनि प्रथमविशेषणलभ्यमसर्ववित्कर्तृकत्वानाधिकरणत्वम् अकर्तृकत्वेनापि सेद्धुमर्हति; तथापि सकर्तृकविशेष्यविरोधेन तथासिद्धेर्निरोधाद् वेदस्य सर्ववित्कर्तृकत्वसिद्धिः । अत्र सकर्तृकाद्वेदादन्यत्वेन सिद्धसाधनवारणाय **द्वितीयं विशेषणम्** । तेन वेदादेव सकर्तृकादन्यत्वसिद्धावपि वेदस्यासर्ववित्कर्तृकत्वेनार्थान्तरं स्यादिति तद्वारणाय **प्रथमविशेषणम्** । अकर्तृकत्वेनार्थान्तरवारणाय **विशेष्यम्** । विशेषणद्वयेऽप्येतदन्यत्वं प्रतियोगिविशेषणं दृष्टान्ते साध्यप्रसिद्ध्यर्थम्; अन्यथा पक्षीकृतघटस्य असर्ववित्कर्तृकत्वाधिकरणत्वादवेदत्वाधिकरणत्वाच्च ततोऽन्यत्वमादाय दृष्टान्ते साध्यप्रसिद्धिर्न स्यात् । नच वेदान्यत्वमादायैव तत्र साध्यप्रसिद्धिः शङ्कनीया; पक्षे साध्यसिद्धेः प्राग्वेदे असर्ववित्कर्तृकत्वानधिकरणसकर्तृकत्वसंप्रतिपत्त्यभावात् । **सापेक्षत्वं वदन्निति** । एवंच सापेक्षत्वेन कृत्स्नवेदाप्रामा-

सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति। इति प्रथमवर्णकम्॥ अथवा–यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं

भामती।

वैदिकपदवाक्यादिपौरुषेयत्वे विवादः, केवलं वेदवाक्येषु पुरुषस्वातन्त्र्यास्वातन्त्र्ये विप्रतिपत्तिः। **यथाहुः**—'यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता'। तत्र सृष्टिप्रलयमनिच्छन्तो जैमनीया वेदाध्ययन प्रत्ययस्मादृशगुरुशिष्यपरंपराम-विच्छिन्नामनादिमाचक्षते। वैयासिकं तु मतमनुवर्तमानाः श्रुतिस्मृतीतिहासादिसिद्धसृष्टिप्रलयानुसारेणानाद्यविद्योप-धानलब्धसर्वशक्तिज्ञानस्यापि परमात्मनो नित्यस्य वेदानां योनेरपि न तेषु स्वातन्त्र्यं; पूर्वपूर्वसर्गानुसारेण तादृशता-दृशानुपूर्वीविरचनात्। **तथाहि**—यागादिब्रह्महत्यादयोऽर्थानर्थहेतवो ब्रह्मविवर्ता अपि न सर्गान्तरे विपरीयन्ते। नहि जातु कचित् सर्गे ब्रह्महत्याऽर्थहेतुरनर्थहेतुश्चाश्वमेधो भवति। अग्निर्वा क्लेदयति। आपो वा दहन्ति, तद्वत्। यथात्र सर्गे नियतानुपूर्व्यं वेदाध्ययनमभ्युदयनिःश्रेयसहेतुरन्यथा तदेव वाग्वज्रतयानर्थहेतुः, एवं सर्गान्तरेष्वपीति तदनु-रोधात् सर्वज्ञोऽपि सर्वशक्तिरपि पूवपूर्वसर्गानुसारेण वेदान् विरचियन्न स्वतन्त्रः। पुरुषास्वातन्त्र्यमात्रं चापौरुषेयत्वं रोचयन्ते जैमिनीया अपि। तच्चास्माकमपि समानमन्यत्राभिनिवेशात्। नचैकस्य प्रतिभानेऽनाश्वास इति युक्तम्। नहि बहूनामप्यज्ञानां विज्ञानां वाशयदोषवतां प्रतिभाने युक्त आश्वासः। तत्त्वज्ञानवतश्चापास्तसमस्तदोषस्यैकस्यापि प्रतिभाने युक्त एवाश्वासः। सर्गादिभुवां प्रजापतिदेवर्षीणां धर्मज्ञानवैराग्यैश्वर्यसंपन्नानामुपपद्यते तत्स्वरूपावधारणं, तत्प्रत्ययेन चार्वाचीनानामपि तत्र संप्रत्यय इत्युपपन्नं ब्रह्मणः शास्त्रयोनित्वं, शास्त्रस्य चापौरुषेयत्वं, प्रामाण्यं चेति॥ इति प्रथमवर्णकम्॥ वर्णकान्तरमारभते—**अथवेति**। पूर्वेणाधिकरणेन ब्रह्मस्वरूपलक्षणासंभवशङ्कां व्युदस्य लक्षण-

वेदान्तकल्पतरुः।

तृतीयस्त्वनभ्युपगमनिरस्त इत्याह—**वैयासिकं त्विति**। अनुवर्तमाना आचक्षत इत्यनुषङ्गः। **ननु** विवर्तत्वे वेदान्तानां यादृच्छिकत्वापातान्न क्रमनियमः स्यात्तत्राह—**यथाहीति**। सर्वज्ञस्य सर्वशक्तेर्ब्रह्मणो नोपाध्यायवत्क्रमानुरोधो युक्त इति, तत्राह—**यथात्रेति**। 'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्र-शत्रुः स्वरतोऽपराधात् (पाणि० शिक्षा०)॥' इति श्रूयते। **चतुर्थं** निराकरोति—**नचैकस्येति**। सर्वदासंप्रदायाविच्छे-दमिच्छद्भिरपि संप्रदायप्रवर्तकेष्वाश्वास आस्थेयः, स वरमेकस्मिन्नेव ब्रह्मण्यवगतसार्वज्ञ्ये कृत इति भावः। **ननु** न वयमी-श्वरं पश्यामः, कथं तत्कर्तृके वेदे विश्वासस्तत्राह—**सर्गादिभुवामिति। इति तृतीयं शास्त्रयोनित्वाधिकरणम्॥**

कल्पतरुपरिमलः।

ण्याद्वरं निःश्वसितादिश्रुतिमात्रस्योपचरितार्थत्वम्। तथा सति 'वाचा विरूपनित्यये'त्यादिश्रुतिरप्यनुग्रहीष्यत इति पूर्वपक्षपर्य-वसाने सति सर्वज्ञत्वहेत्वन्तराक्षेपतत्समाधानार्थं प्रवृत्तमेवेदमधिकरणं जगत्तत्कारणत्वाक्षेपतत्समाधानपर्यन्तमपि फलतो भवतीत्यथ वा वेदनित्यत्वादित्युपन्यस्तद्वितीयपद्यपर्यन्तमेव भाष्यटीकयोरपि विवक्षितं सिध्यतीति द्रष्टव्यम्। **स वाग्वज्र इति। स** स्वरवर्णहीनः। **प्रयुक्तो** मन्त्रः वज्रवद्धिंसको **यजमानं हिनस्ति,** तत्र पुराकल्पसिद्धमुदाहरणम्—**यथेन्द्र-शत्रुरिति**। त्वष्टुः पुत्रो विश्वरूपः शक्रेण हतः। स त्वष्टेन्द्रस्य हन्तारं पुत्रं लिप्सुः तदर्थं सोमयागमनुतिष्ठन् भागलि-प्सुमपि इन्द्रं नाजुहाव। इन्द्रः स्वयमेवागत्य प्रसह्य सोमरसं पपौ। त्वष्टा सोमपात्रे अवशिष्टं सोमरसमिन्द्रस्य शातयिता पुत्रो भूयादित्याशंसमानः 'स्वाहेन्द्रशत्रुर्वर्धस्वे'ति मन्त्रेण जुहाव। तदेन्द्रशत्रुरिति शब्दस्तत्पुरुषस्वरं विहाय बहुव्रीहिस्वरेण प्रयुक्तः। तेन स्वरापराधेन तत्रोत्पन्नस्य वृत्रासुरस्य शक्र एव शातयिताभूदिति त्वष्टा हतपुत्र इत्यादितैत्तिरीयश्रुत्यर्थोऽत्र निबद्धः। **अवगतसार्वज्ञ्ये इति। ननु** सार्वज्ञ्यसाधकवेदकर्तृत्वहेतुसिद्धिपरिपन्थिसापेक्षत्वशङ्कानिराकरणप्रस्तावे तदु-पयोगितया सार्वज्ञ्यावगतिः कथं सिद्धवदुपन्यस्यते, अन्योन्याश्रयो हि तदा स्यात्। **नैष दोषः**; सार्वज्ञ्याभ्युपगमहेतु-

---

१ शब्दोपादानभावध्वनिगतविषयद्योतनाशक्त्योऽन्तर्ब्रह्मण्येव स्युरग्नेर्विषयविषयिणी दीपशक्तिः खलूच्चैः। द्रष्टुश्च ज्ञानशक्तिर्नतु करणगता किंतु दीपप्रभावत् संयुक्तद्योतनैवेत्यपरमिह पुनः माध्यते सर्ववित्त्वम्॥ **अयमभिप्रायः**—विमत ब्रह्म; वेदगतसर्वविषय-प्रकाशनशक्त्याधारः, वेदोपादानत्वात्, दीपगतप्रकाशनशक्त्याधारदीपोपादानाग्निवत्, कर्तुश्चेतनस्य करणशक्तेरभावात् ज्ञानश-क्तिरेवानुमीयते। नचोपादानोपादेययोः सर्वशक्त्या भाव्यमिति नियमः; अग्निकार्यप्रभाया दाहशक्तेरननुगतत्वात्। नच वेदेनावि-षयीकृत किंचिद्विद्यत इति सर्वज्ञत्वसिद्धिः। ब्रह्म वेदोपादान न भवति, वेदोक्ताखिलाभिज्ञत्वात्, ऋष्यादिवदिति प्रयोगस्तु न संभवति; वेदोक्तमात्राभिज्ञत्वेन सोपाधिकत्वात्, वेदः स्वविषयज्ञानाधिकविषयविज्ञानवत्प्रणीतः, वाक्यप्रमाणत्वात्, पाणिन्यादिकृतव्याकरणा-दिवदित्यनुमानेन ब्रह्मणो वेदोक्ताधिकज्ञानवत्त्वस्य सिद्धा तत्र साधनाव्यापकत्वात्—**इति विवरणानुयायिनः।**

२ जन्माद्यस्य यतः शास्त्रयोनित्वादिति विशिष्टमेकाधिकरणमित्यभिप्रेत्य अथवेति वर्णकान्तरप्रारम्भः। योगविभागस्तु वेदकार्य-त्वप्रसाधनेन सर्वज्ञत्वदृढीकरणार्थत्वेन व्याख्यनान्तरमपि कर्तुं शक्यत इति सूचनार्थमिति **विवरणानुयायिनः।**

प्रमाणमस्य ब्रह्मणो यथावत्स्वरूपाधिगमे । शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः । शास्त्रमुदाहृतं पूर्वसूत्रे—'यतो वा इमानि भूतानि जायन्ते' इत्यादि । किमर्थं तर्हीदं सूत्रं ? यावता पूर्वसूत्र एवैवंजातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितम् । उच्यते—तत्र पूर्वसूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानाज्जन्मादि केवलमनुमानमुपन्यस्तमित्याशङ्क्येत तामाशङ्कां निवर्तयितुमिदं सूत्रं प्रववृते, शास्त्रयोनित्वादिति ॥ ३ ॥ इति तृतीयं शास्त्रयोनित्वाधिकरणम् ॥

तत्तु समन्वयात् ॥ ४ ॥

कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते, यावता 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै० सू० १।२।१) इति क्रियापरत्वं शास्त्रस्य प्रदर्शितम् । अतो वेदान्तानामानर्थक्यं; अक्रियार्थत्वात् । कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वं, उपासनादिक्रियान्तरविधानार्थत्वं वा। नहि परिनिष्ठितवस्तुप्रतिपादनं संभवति; प्रत्यक्षादिविषयत्वात्परिनिष्ठितवस्तुनः, तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात् । अतएव 'सोऽरोदीत्' इत्येवमादीनामानर्थक्यं माभूदिति 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' (जै० सू० १।२।७) इति स्तावकत्वेनार्थवत्त्वमुक्तम् । मन्त्राणां च 'इषे त्वा' इत्यादीनां क्रियातत्साधनाभिधायित्वेन कर्मसमवायित्वमुक्तम् । न

भामती ।

संभव उक्तः । तस्यैव तु लक्षणस्यानेनानुमानत्वाशङ्कामपाकृत्यागमोपदर्शनेन ब्रह्मणि शास्त्रं प्रमाणमुक्तम् । अक्षरार्थस्त्वतिरोहितः ॥ ३ ॥ इति तृतीयं शास्त्रयोनित्वाधिकरणम् ॥

तत्तु समन्वयात् ॥ ४ ॥

शास्त्रप्रमाणकत्वमुक्तं ब्रह्मणः प्रतिज्ञामात्रेण, तदनेन सूत्रेण प्रतिपादनीयमित्युत्सूत्रं पूर्वपक्षमारचयति भाष्यकारः—**कथं पुनरिति । किमाक्षेपे** । शुद्धबुद्धोदासीनस्वभावतयोपेक्षणीयं ब्रह्म, भूतमभिदधतां वेदान्तानामपुरुषार्थोपदेशिनामप्रयोजनत्वापत्तेः, भूतार्थत्वेन च प्रत्यक्षादिभिः समानविषयतया लौकिकवाक्यवत्तदर्थानुवादकत्वेनाप्रामाण्यप्रसङ्गात् । न खलु लौकिकानि वाक्यानि प्रमाणान्तरविषयमर्थमवबोधयन्ति स्वतःप्रमाणम्, एवं वेदान्ता अपीत्यनपेक्षत्वलक्षणं प्रामाण्यमेषां व्याहन्येत । नच तैरप्रमाणैर्भवितुं युक्तम्, नचाप्रयोजनैः; स्वाध्यायाध्ययनविध्यापादितप्रयोजनवत्त्वनियमात् । तस्मात्तद्विहितकर्मापेक्षितकर्तृदेवतादिप्रतिपादनपरत्वेनैव क्रियार्थत्वम् । यदि त्वसंनिधानात्तत्परत्वं न रोचयन्ते, ततः संनिहितोपासनादिक्रियापरत्वं वेदान्तानाम् । एवंहि प्रत्यक्षाद्यनधिगतगोचरत्वेनानपेक्षतया प्रामाण्यं च प्रयोजनवत्त्वं च सिध्यतीति तात्पर्यार्थः । पारमर्षसूत्रोपन्यासस्तु पूर्वपक्षदार्ढ्याय । **आनर्थक्यं** चाप्रयोजनवत्त्वं, **सापेक्षतया प्रमानुत्पादकत्वं** चानुवादकत्वादिति । **अतः** इत्यादि **वाऽन्तं** ग्रहणकवाक्यम् । अस्य विभागभाष्यं **नहि** इत्यादि **उपपन्ना वा** इत्यन्तम् । **स्यादेतत्**—अक्रियार्थत्वेऽपि ब्रह्मस्वरूपविधिपरा वेदान्ता भविष्यन्ति, तथाच 'विधिना त्वेकवाक्यत्वात्—' इति राद्धान्तसूत्रमनुग्रहीष्यते । न खल्वप्रवृत्तप्रवर्तनमेव

वेदान्तकल्पतरुः ।

तत्तु समन्वयात् ॥ ४ ॥

वेदान्ता ब्रह्मणि प्रमाणं न वेति सिद्धवस्तुबोधात्फलभावाभावाभ्यां सिद्धं रूपादिहीनं वस्तु बोधयतो वाक्यस्य मानान्तरसापेक्षत्वानपेक्षत्वाभ्यां वा संशये पूर्वाधिकरणद्वितीयवर्णकेनाक्षेपिकीं सङ्गतिमुक्त्वा पूर्वपक्षभाष्यं व्याचष्टे **—किमाक्षेप इत्यादिना** । कथमिति थमुप्रत्ययान्तः किंशब्द आक्षेपे । जैमिनिसूत्रोपन्यासो न व्युत्थितसिद्धान्तिविश्रम्भायापितु दृढपूर्वपक्षनिरासार्थं सिद्धान्तावश्यारम्भायेत्याह—**पारमर्षेति** । अभिधेयाभावोऽनुभवविरोधान्न युक्तो वक्तुमित्याह—**आनर्थक्यं चेति** । भाष्ये पौनरुक्त्यमाशङ्क्य संग्रहविवरणत्वमाह—**अत इत्यादीति । वाऽन्तमिति** । उपासनादिक्रियान्तरविधानार्थत्वं वेत्येतदन्तमित्यर्थः । **ननु** किमिति वेदान्तानामर्थवादवद्विधिपदैकवाक्यता ? मन्त्रवत्पार्थगर्थ्यमस्त्वित्याशङ्क्य तर्हि तद्वद्विधिभिर्वाक्यैकवाक्यता स्यादित्याह भाष्यकारो—**मन्त्राणां चेति** । इषे त्वेत्यत्र छिनद्मी-

कल्पतरुपरिमलः ।

महिमविशेषावगतेर्विवक्षितत्वात् । **ननु** तथाभूतमहिमविशेषावगतिर्वा कुतः ? नहि वयमीश्वरं पश्याम इत्याशङ्क्योत्तरत्वेनोत्तरग्रन्थमवतारयति—**नन्विति** ॥ **इति तृतीयं शास्त्रयोनित्वाधिकरणम्** ॥

तत्तु समन्वयात् ॥ ४ ॥

जैमिनीति । जैमिनिना हि 'आम्नायस्य क्रियार्थत्वात्' (जै. अ. १ पा. २ सू. १) इत्यादिसूत्रेण **कृत्स्नस्याप्याम्ना-**

१ अत्रैकं सूत्रं—शास्त्रयोनित्वात् ॥ ३ ॥

क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टोपपन्ना वा। नच परिनिष्ठिते वस्तुस्वरूपे विधिः संभवति; क्रियाविषयत्वाद्विधेः । तस्मात्कर्मापेक्षितकर्तृस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम् । अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते, तथापि स्ववाक्यगतो-

भामती ।

विधिः; उत्पत्तिविधेरज्ञातज्ञापनार्थत्वात्, वेदान्तानां चाज्ञातं ब्रह्म ज्ञापयतां तथाभावादित्यत आह—**नच परिनिष्ठित इति** । अनागतोत्पाद्यभावविषय एव हि सर्वो विधिरुपेयः; अधिकारविनियोगप्रयोगोत्पत्तिरूपाणां परस्पराविनाभावात् सिद्धे च तेषामसंभवात् । तद्वाक्यानां त्वैदंपर्यं भिद्यते । यथा 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इत्यादिभ्योऽधिकारविनियोगप्रयोगाणां प्रतिलम्भात् 'अग्निहोत्रं जुहोति' इत्युत्पत्तिमात्रपरं वाक्यम्, नत्वत्र विनियोगादयो न सन्ति; सन्तोऽप्यन्यतो लब्धत्वात्केवलमविवक्षिताः । तस्मात् भावनाविषयो विधिर्न सिद्धे वस्तुनि भवितुमर्हतीति । उपसंहरति—**तस्मादिति** । अत्रारुचिकारणमुक्त्वा पक्षान्तरमुपसंक्रामति—**अथेति** । एवंच सत्युक्तरूपे ब्रह्मणि शब्दस्यातात्पर्यात् प्रमाणान्तरेण यादृशमस्य रूपं व्यवस्थाप्यते न तच्छब्देन विरुध्यते; तस्योपासनापरत्वात्, समारो-

वेदान्तकल्पतरुः ।

त्यध्याहराच्छाखाच्छेदः क्रिया भाति, क्वचिच्चाग्निर्मूर्धेत्यादौ तत्साधनं देवतादीति । मन्त्राश्च श्रुत्यादिभिः क्रतौ विनियुक्ताः । ते किमुच्चारणमात्रेणादृष्टं कुर्वन्तः क्रतावुपकुर्वन्त्युत दृष्टेनैवार्थप्रकाशनेनेति संदेहः । तत्र न तावद् दृष्टार्थत्वमेव मन्त्राणां शक्यं वक्तुम्; उपायान्तरेणापि मन्त्रार्थस्य स्वाध्यायकालावगतस्य चिन्तादिना प्रयोगसमये स्मृतिसंभवात्तावन्मात्रार्थत्वे मन्त्राणां नित्यवदाम्नानवैयर्थ्यात् । अथ तु मन्त्रैरेवार्थप्रत्यायननियमाददृष्टं कल्प्येत, तदुच्चारणादेव कल्प्यतां; तस्य पुंव्यापारगोचरत्वात्स्वव्यापारे च पुरुषस्य नियोगात्तत्र च फलाकाङ्क्षणादिति प्रापय्य प्रमाणलक्षणे राद्धान्तितम्—'यस्य दृष्टं न लभ्येत तस्यादृष्टप्रकल्पना । लभ्यतेऽर्थस्मृतिर्दृष्टा मन्त्रोच्चारणतस्त्विह ॥ अर्थस्मृतिः प्रयोगार्था प्रयोगाच्च फलोदयः । इति दृष्टार्थसंपत्तौ नादृष्टमिह कल्प्यते ॥' यस्तु मन्त्रैरेव स्मर्तव्यमिति नियमस्तस्य न किंचिद्दृष्टमस्तीत्यदृष्टं कल्प्यते । तस्माद्दृष्टादृष्टार्था मन्त्रा इति । **उत्पत्तिविधेरिति** । अधिकारविधितः प्रवृत्तिलाभादुत्पत्तिविधिरज्ञातकर्मस्वरूपबोधपर इत्यर्थः । **अनागतेति** । **भावो** भावना, तद्विषयः सर्वो विधिः । यतः स उत्पाद्यः, उत्पाद्यत्वे हेतुरनागतत्वम् । **अधिकारः** फलसंबन्धबोधनम् । **विनियोगो**ऽत्र क्रियायाः फलशेषत्वज्ञापनम् । **प्रयोगः** अनुष्ठापनम् । कर्मस्वरूपज्ञान**मुत्पत्तिः** । फलसंबन्धः क्रियाया न शेषत्वमन्तरेण, तच्च नानुष्ठानं विना, अनुष्ठानं च नाज्ञाते इत्यविनाभावः । सिद्धं चेत्पुंव्यापारानपेक्षं फलमारभेत, सदारभेतेति नाधिकारादिसंभव इत्यर्थः । सर्वेषामविनाभावे सर्वत्र चातूरूप्यमस्तीति कथमवान्तरभेदस्तत्राह—**तद्वाक्यानां त्विति** । उदाहरति—**यथेति** । सर्वविधिषूत्पत्त्यादयः प्रतीयन्ते, अग्निहोत्रं जुहुयादित्यत्राप्यग्निहोत्रेणेष्टं भावयेदित्यर्थः, नत्वग्निहोत्रस्य भाव्यत्वम्; अफलत्वात् । नचाग्निहोत्रस्वरूपसत्ता बोध्या; अभूद्भवति भविष्यतीत्यापत्तौ विध्युत्खातापातात् । तस्मादधिकारविधितः प्राप्तविनियोगाद्यनुवादेनोत्पत्तिविधिः स्वरूपपरो भवति, ब्रह्मणि तु भावनाभावादनुवाद्यस्यापि विनियोगादेरभावान्नोत्पत्तिविधिरित्याह—**तस्मादिति** । विधिपरत्वे वेदान्तानां न केवलमनुवादत्वाभावः, अपितु विपरीतार्थत्वं च न स्यात्, पक्षान्तरे तु स्यादित्याह—**एवंचेति** । **यादृशमिति** । जीवाद्भिन्नमित्यर्थः ।

कल्पतरुपरिमलः ।

यस्य प्रयोजनपर्यवसानाय **क्रियार्थत्वावश्यं**भावादक्रियार्थाना**मानर्थक्यं** निष्प्रयोजनत्वं, तस्मादक्रियार्थमर्थवादजातमनित्यमप्रमाणमुच्यत इति पूर्वपक्षं कृत्वा 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' (जै. अ.१पा.२ सू. २)इति सूत्रेण विधिवाक्येनैकवाक्यत्वादर्थवादा विधीनां स्तुतिरूपेणार्थेन सप्रयोजनाः स्युरिति अक्रियार्थानामानर्थक्यं पूर्वपक्ष्युक्तमङ्गीकृत्यैवार्थवादानां विध्येकवाक्यतया प्रामाण्यमुपपादितम् । इदं तु जैमिन्यभिमतम् अक्रियार्थानामानर्थक्यं न्यायविरुद्धमप्रामाणिकमिति सिद्धान्ते दूष्यमेव । अतो दूष्यसूत्रोपन्यासः सिद्धान्तिनस्तस्मिन्नर्थे विश्वासार्हो न भवतीत्यर्थः । **ननू**पायान्तरेणापि प्रयोगसमये स्मृतिर्भवतु, मन्त्रेणापि कदाचित् स्मृतिरुपपद्यत इति तदर्थं मन्त्राम्नानं स्यादित्याशङ्क्याह—**तावन्मात्रार्थत्वे इति** । **भाव इति** । भावयतेर्घञि 'णेरनिटी'ति णिलोपे भावशब्दो भावनावाची स्याद् भवतेर्घञि तु भावशब्दो भवनवाची स्यात् । **फलसंबधबोधनमिति** । फलपुरुषसंबन्धबोधनमित्यर्थः । अन्यगामिनि फले प्रेरणायोगात् प्रवर्तकस्वभावो विधिः फलस्य पुरुषसंबन्धं गमयतीत्येवमधिकारो विध्यधीनः । **विनियोगोऽत्रेति** । क्रियायाः फलशेषत्वस्येवाङ्गानां प्रधानशेषत्वस्यापि बोधनं विनियोग एव, स्थालीपुलाकन्यायेन त्वेकोपादानम् । **फलसंबन्ध इति** । फलस्य कर्तृपुरुषगामित्वं तेनानुष्ठेयायाः क्रियायाः फलकरणत्वरूपं विनियोगमन्तरेण न भवतीत्यर्थः । उत्पत्तिविधिनाधिकारादिप्रतीतिमुदाहरति—**अग्निहोत्रमिति** । उत्पत्तिविधेः अग्निहोत्रस्वरूपज्ञानमात्रपरत्वे किमग्निहोत्रं कर्तव्यमिति तदर्थः, उताग्निहोत्रमभूदित्यादिः । **नाद्यः**, क्लेशात्मके कर्मणि स्वतः प्रेरणानुपपत्तेः । **न द्वितीयः**, विधिविरोधात् । कालत्रयानवमृष्टे विधिप्रवृत्तेरित्यर्थः । **तस्मादधिकारविधित इति** । 'अग्निहोत्रं जुहुयात्स्वर्गकाम' इत्यधिकारविधिरग्निहोत्रनामकेन होमेन स्वर्गं भावयेदित्येवमर्थकः । फलस्यान्यगामित्वे तदर्थं प्रेरणानुपपत्तेस्तस्य कर्तृसंबन्धं

पासनादिकर्मपरत्वम् । तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते उच्यते—**तत्तु समन्वयात्** ॥ तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । तद्ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यते । कथम्, समन्वयात् । सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि । 'सदेव सोम्येदमग्र आसीत्' । 'एकमेवाद्वितीयम्' (छा० ६।२।१)

भामती ।

पेण चोपासनाया उपपत्तेरिति । प्रकृतमुपसंहरति—**तस्मान्नेति** । सूत्रेण सिद्धान्तयति—**एवं प्राप्त उच्यते—तत्तु समन्वयात्** ॥ तदेतत् व्याचष्टे—**तुशब्द इति** । तदित्युत्तरपक्षप्रतिज्ञां विभजते—**तद्ब्रह्मेति** । पूर्वपक्षी कर्कशाशयः पृच्छति—**कथम्** । कुतःप्रकारादित्यर्थः । सिद्धान्ती स्वपक्षे हेतुं प्रकारभेदमाह—**समन्वयात्** । सम्यगन्वयः समन्वयस्तस्मात् । एतदेव विभजते—**सर्वेषु हि वेदान्तेष्विति** । वेदान्तानामैकान्तिकीं ब्रह्मपरतामाचिख्यासुर्बहूनि वाक्यान्युदाहरति—**सदेवेति** । 'यतो वा इमानि भूतानि' इति तु वाक्यं पूर्वमुदाहृतं जगदुत्पत्तिस्थिति-

वेदान्तकल्पतरुः ।

जीवे ब्रह्मदृष्ट्यारोपान्न भेदग्राहिप्रमाणविरोध इत्यर्थः । **तदिति** । सूत्रपदोक्तां सिद्धान्तपक्षप्रतिज्ञामित्यर्थः । **सम्यगन्वय इति** । तात्पर्यं सम्यक्त्वम् । **ननु** शास्त्रयोनित्वद्वितीयवर्णकाक्षेपसमाधानरूपमिदमधिकरणं, तत्र च 'यतो वेति' वाक्यमुदाहृतमिह किमिति तदुपेक्षितमत आह—**यतो वेति** । तद्ब्रह्म सर्वज्ञमित्यादिभाष्ये यत इत्यादिवाक्यप्रमेयकीर्त-

कल्पतरुपरिमलः ।

बोधयन्नेव तेनानुष्ठातुं शक्याया होमक्रियायाः फलशेषत्वरूपं विनियोगमपि बोधयतीत्येवमधिकारविधिसिद्धविनियोगांशे अनुवादरूपोऽयमुत्पत्तिविधिः कर्मस्वरूपज्ञापनमात्रप्रयोजनो भवतीत्यर्थः । **अपित्विति** । प्रत्यक्षविरुद्धार्थत्वरूपविपरीता-

---

१ अन्वये सम्यक्त्वं चेतरवैलक्षण्येनार्थप्रतिपादकत्वम्, इतरत्र हि गामानयेत्यादिशब्दाः क्रियाकारकसंसर्गं प्रतिपादयन्ति । उद्भिदायजेतेत्यत्रोद्भिद्यागयोरेकार्थत्वेऽपि नियोगाकाङ्क्षा विद्यते । नीलमुत्पलमित्यादौ तु गुणगुणिनोर्भेदाभेदौ प्रतिपाद्यौ । एकार्थप्रतिपादकेष्वन्येषु शब्देषु लिङ्गसंख्ये अवर्जनीये । वेदान्तास्तु न तथा संसर्गं साकाङ्क्षार्थं भेदाभेदौ लिङ्गसंख्याविशिष्टं वा प्रतिपादयन्ति, किंतु अभिधावृत्त्या लक्षणया वाऽखण्डैकरसमेव जगत्कारणसामान्यानुवादेन प्रतिपादयन्तीति—**विवरणप्रमेयसंग्रहे । ब्रह्मविद्याभरणकारास्तु**—तत्प्रतीत्युद्देश्यकत्वं सम्यक्त्वं, तथाच तत्प्रतीत्युद्देशेन प्रतिपादकत्वादिति वाक्यार्थ—**इति वर्णयन्ति** । तत्र तात्पर्यं उपक्रमोपसंहारादिलिङ्गैरद्वितीये परमात्मन्येवावगम्यते ॥

२ "सदेव सोम्येदमग्र आसी" दिति प्रतीकोद्धृतायाः सद्विद्याया अद्वितीये ब्रह्मणि तात्पर्यं निर्धारयितुं न शक्यते; "उत तमादेशमप्राक्ष्यः" "सन्मूला सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसी"त्युपक्रमपरामर्शोपसंहाराणां सविशेषब्रह्मपरत्वात् । नहि जगन्नियमनानुकूलव्यापाररूपशासनकर्तृत्वं निर्विशेषे ब्रह्मणि संभवति । नवा प्रजाशब्दोदितानां जीवानां निर्विशेषब्रह्मणश्च मूलमूलिभावः संभवति । नापि वा तत्सत्यं इति प्रपञ्चसत्यत्वावधारणं संबोध्यसंबोधकभावेन श्वेतकेतूद्दालकयोर्भेदप्रतिपादनावगतजीवनानात्वं च निर्विशेषात्मवादे उपपद्यते इति 'तत्त्वमसि' इति वाक्यं 'ब्रह्मणे त्वा महसे आत्मानं युञ्जीत' इति श्रुत्यनुसारेण 'तस्मै त्वं' इति वा, 'यतो वे'ति श्रुत्यनुसारेण 'तस्मात्त्वं' इति वा, 'स कारणं करणाधिपाधिपः' इति श्रुत्यनुसारेण 'तस्य त्वमि'ति वा, 'सन्मूलाः सौम्येति'श्रुत्यनुसारेण 'तस्मिंस्त्वं' इति वा, 'यस्यात्मा शरीरमि'ति श्रुतिसिद्धशरीरशरीरिभावानुसारेण मनुष्योऽहमितिवत्सामानाधिकरण्येन तत् त्वं असीति वा व्याख्येयम् । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा यद्यपि कार्यस्वरूपविशेषाकारमादाय न शक्यते वक्तुं, ज्ञातेऽपि ब्रह्मणि विशेषाकारेण कार्यविज्ञानाभावात्; तथापि तत्तदवस्थाविशेषविशिष्टं कारणस्वरूपमेव कार्यमित्यारम्भाधिकरणे निरूपयिष्यमाणं कार्यकारणानन्यत्वं स्वीकृत्य ब्रह्मणि विदिते उपादानतया कार्यानुप्रविष्टो ब्रह्मा कारो विदितो भवतीति सद्ब्रह्मण उपादानतापरं तद्वाक्यमिति मन्तव्यम् । विवर्तवादमाश्रित्य तु ब्रह्मण उपादानत्वं न युक्तम्; 'यथा सौम्यैकेन मृत्पिण्डेने'ति दृष्टान्ते परिणाम्युपादानग्रहणेन तस्य परिणाम्युपादानत्वस्यैवावगमात् । एवंच सप्रपञ्चमेव ब्रह्म वेदान्तशास्त्रविषय इति कथं सद्विद्याया अद्वितीयपरमात्ममात्रपरत्वमिति—**चेत्, अत्र ब्रह्मविद्याभरणकाराः**—सद्विद्याया अद्वितीयपरमात्मन्येव तात्पर्यं; "उत तमादेश" इत्यत्र आदेशशब्दस्योपदेशपरत्वस्यैव युक्तत्वेनोपदेशमात्रगम्यत्वरूपोपदेशत्वस्य निर्विशेष एवोपपत्तेः । 'आचार्यवान् पुरुषो वेद' इत्युपसंहारोऽप्यत एवोपपद्यते । 'सदेव सोम्येदमग्र आसीत्' इत्यत्रापि निष्प्रपञ्चात्मत्वमेवोपक्षिप्यते । अत्र हि सच्छब्दो न सत्ताश्रयतया इदंपदार्थे पर्यवसितः, किंतु ब्रह्मणि । 'ओंतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति स्मृतेः । सन्मूलाः सौम्येति सच्छब्देन ब्रह्मण एव परामर्शाच्च । नच—अयं सच्छब्दः सविशेषपर इति—शङ्क्यम्; सदेवेदमिति वाक्योपक्रमे एकमेवाद्वितीयमिति विशेषणेन निर्विशेषपरत्वावगमात् । 'आत्मा वा इदमग्र आसी'दिति श्रुत्यन्तरे सत्पदस्थाने आत्मपदमाम्नायमानमप्यत एवोपपद्यते । एवंच सदेवेत्यनेनैवकारार्थप्रधानेन 'नेति नेति' श्रुतिसिद्धार्थकथनपूर्वकं प्रलयनिरूपणं प्रलयकालस्य तदाधेयसूक्ष्मप्रपञ्चस्य च वस्तुसत्तां निराकर्तुं, प्रलयोपक्षेपश्च सृष्ट्युपक्षेपवत्प्रपञ्चः कदाचित्सूक्ष्मावस्थः कदाचित्स्थूलावस्थ इत्यनेक-

भामती ।

नाशकारणमिति चेह स्मारितमिति न पठितम् । येन हि वाक्यमुपक्रम्यते येन चोपसंह्रियते तदेव वाक्यार्थ इति
शाब्दाः । यथोपांशुयाजवाक्येऽनूचोः पुरोडाशयोर्जामितादोषसंकीर्तनपूर्वकोपांशुयाजविधाने तत्प्रतिसमाधानोपसंहारे
चापूर्वोपांशुयाजकर्मविधिपरता एकवाक्यताबलादाश्रिता, एवमत्रापि 'सदेव सोम्येदम्' इति ब्रह्मोपक्रमात् 'तत्त्वमसि'

वेदान्तकल्पतरुः ।

नात्तत्प्रमाणं बुद्धिस्थं भवतीति नोदाहृतमित्यर्थः । वेदान्तानां ब्रह्मात्मैकत्वे उपक्रमोपसंहारैक्यं तात्पर्यलिङ्गं सदृष्टान्तमाह—**येनेति । भेदलक्षणे चिन्तितम्**—"पौर्णमासीवदुपांशुयाजः स्यात्" । "जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ उपांशुयाजमन्तरा यजति, विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वायाग्नीषोमावुपांशु यष्टव्यावजामित्वायेति" श्रूयते । तत्रोपांशुयाजमन्तरा यजतीति किं समुदायानुवादः, उतापूर्वयागविधिरिति विशये यथाग्नेयादियागानां 'य एवं विद्वान्पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजत' इति समुदायानुवादौ । एवमिदमपि विष्ण्वादिवाक्यविहितयागानां समुदायानुवादः । तत्र हि विष्ण्वाद्या देवताः श्रूयन्ते । "सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्य"मिति ध्रौवाज्यद्रव्यसिद्धिः । तव्यप्रत्ययाश्च विधायकाः श्रूयन्ते । नत्वन्तरावाक्येऽस्ति द्रव्यदैवतं रूपम् । यजतीति च वर्तमानापदेशः । तदुक्तम्—'यागान्विष्ण्वादिसंयुक्तान्विहितान्रूपवत्तया । अरूपमन्तरावाक्यमगत्यैवावलम्बते ॥' इति पूर्वपक्षः । एतदधिकरणसिद्धान्तमाह—**अनूचोरिति ।** निरन्तरयोराग्नेयाग्नीषोमीययोः पुरोडाशयोः करणे

कल्पतरुपरिमलः ।

र्थत्वदोषोऽपि परिहृतो भवतीत्यर्थः । **नत्वन्तरावाक्य इति ।** यद्यपि यागविधौ स्थिते ध्रौवाज्यं द्रव्यं लभ्यते; तथापि देवताया अलाभाद् वर्तमानापदेशाच्च यागविध्यसंभवे द्रव्यलाभो दूरापास्त इति भावः । **आलस्यमिति । दशमाध्याये "अजामिकरणार्थत्वाच्चेति"** (जै. अ. १० पा. ८ सू. ९३) **सूत्रभाष्ये जामिता**—सादृश्यमिति **व्याख्यातम् । तत्रैव नयविवेके—जामिता** सादृश्यमेकरूपा हि द्विःक्रियेति तेन कृताकृताननुसंधिदोष इति सादृश्यस्य दोषपर्यवसायित**्वमुपपादितम् ।** इह त्वेकरूपायाः क्रियायाः पुनः पुनरनुष्ठाने तन्द्रा स्यादिति भाष्योक्तस्यैव सादृश्यस्य दोषत्वपर्यवसानमात्रं प्रकारान्तरेणोक्तमिति न भाष्यविरोधः । **न्यायसुधायामप्येवमेवोक्तम्**—'**सादृश्यस्य** नैरन्तर्यानुष्ठाने सत्यालस्यापादकत्वेन दोषत्वा'दिति । किंतु तत्र सौन्दर्यवाची जामिशब्दः, तस्य सादृश्ये लक्षणे-

---

विकारात्मको वाचारम्भणश्रुतिप्रतिपादितन्यायेनानृत इति ज्ञापनार्थः । **यदाहुः**—'मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा । उपायः सोऽवताराय नास्ति भेदः कथंचन' इति ॥ **एतेन**—वाचारम्भणश्रुतिरपि विवर्ताभिप्राया—**इति व्याख्याता । अतएव हि**—"वस्त्वस्ति किं कुत्रचिदादिमध्यपर्यन्तहीनं सततैकरूपम् । यच्चान्यथात्वं द्विज याति भूयो न तत्तथा तस्य कुतो हि तत्त्वम् ॥ मही घटत्वं घटतः कपालं कापालिकाचूर्णरजस्ततोऽणुः । जनैः स्वकर्मस्तिमितात्मबोधैरालक्ष्यते ब्रूहि किमत्र वस्तु ॥ सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत्' । इत्यादिविष्णुपुराणवचनान्युपपद्यन्ते । मृदादिदृष्टान्तास्तु उपादानस्वरूपे ज्ञाते तदात्मनोपादेयं ज्ञातं भवतीत्येवमभिप्रायाः नतु परिमाणाभिप्रायाः । एवंचोपक्रमे तावदुपदेशैकगम्यं निष्प्रपञ्चात्मतत्त्वं प्रतिपादितमिति सिद्धम् । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अन्यथानुपपत्तेः । मध्येऽपि जीवपरमात्मनोरभेद एव परामृश्यते । 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति । सगुणवाक्यानि त्वध्यारोपापवादाभ्यां निष्प्रपञ्चात्मपराणि व्याख्येयानि । **एतेन**—'सन्मूला' इति वचनमपि—**व्याख्यातम्;** तस्य व्यावहारिकभेदेनोपपत्तेः । 'ऐतदात्म्यमिदं सर्व'मिति वाक्येऽपि तत्सत्यमिति प्रपञ्चब्रह्मणोर्बाधायामेव सामानाधिकरण्यमित्युपक्रमोपसंहारादिभिः सद्विद्याया अद्वितीयपरमात्मपरत्वमेवाङ्गीकरणीयमिति 'तत्त्वमसी'ति वाक्यं जीवब्रह्माभेदपरतयैव व्याख्येयम्; तदित्यस्य 'सुपांसुलु'गित्यादिना चतुर्थ्यन्तत्वाद्याश्रयणे प्रमाणाभावात् । शरीरशरीरिभावेन सामानाधिकरण्यव्याख्यानमपि न युक्तम्; शरीरवाचकानां पदानां शरीरिपर्यन्तत्वासिद्धेः । अस्तु वा शरीरवाचकानां शरीरिपर्यन्तत्वं, एवमपि तत्त्वमसीत्यत्र न तदभिप्रायं सामानाधिकरण्यम् । अयं हि नियमः—शरीरवाचकानां शरीरिविशेषणत्वे, नतु विशेष्यत्वेऽपि; शरीरं नष्टमिति वाक्येऽपि शरीरिणो ग्रहणापत्तेरित्युभयवादिसंमतम् । तत्त्वमसीत्यत्र च शरीरवाचकं त्वंपदं न विशेषणम्; आख्यातसामानाधिकरण्यासंभवेनासीति मध्यमपुरुषैकवचनासाधुत्वप्रसङ्गात्; किंतु विशेष्यमिति न शरीरशरीरिभावेन सामानाधिकरण्यसंभवः । एवंच जीवब्रह्माभेदपरत्वमेवोक्तवाक्यस्याङ्गीकरणीयम् । शुद्धचैतन्यपरत्वेऽपि त्वंपदस्य मध्यमपुरुषप्रयोगोपपत्तिस्तु वाच्यार्थान्वयमादायोपपादनीयेति सर्वमनवद्यम् ॥ मोक्षधर्मे श्वेतकेतुसुवर्चलोपाख्यानेनाद्वैतपरतया सद्विद्योपबृंहणमप्यत एवोपपद्यते ॥ **इति शम् ॥**

भामती ।

इति च जीवस्य ब्रह्मात्मनोपसंहारात् तत्परतैव वाक्यस्य । एवं वाक्यान्तराणामपि पौर्वापर्यालोचनया ब्रह्मपरत्वमवगन्तव्यम् । नच तत्परत्वस्य दृष्टस्य सति संभवेऽन्यपरताऽदृष्टा युक्ता कल्पयितुं; अतिप्रसङ्गात् । न केवलं कर्तृपरता

वेदान्तकल्पतरुः ।

आलस्यं स्यादिति दोषं संकीर्त्य तदपनयार्थमुपांशुयाजमाज्यद्रव्यकं विधायानन्तरमजामित्वायेति तद्विधानलब्धं जामितादोषसमाधानमुपसंहरति । अतः सार्थवादोपक्रमोपसंहारैकरूप्यादेकमिदं वाक्यम् । एकवाक्यता चोपांशुयाजविधौ लभ्यते नेतरत्रानेकयागविधाविति । **ननु** तव्यविहितयागानां समुदायानुवादोऽयमिति, तत्राह—**अपूर्वेति । तथाहि**—यष्टव्य इति कर्मप्राधान्यं विष्ण्वादिवाक्ये प्रतीयते, यागस्तूपसर्जनम् । तत्र कर्मत्वमप्रधानीकृत्य यागप्राधान्यं लक्षणीयं, कर्मतया च देवतात्वं ततो गुरुतरा कल्पना । अन्तरावाक्ये तु श्रुतं यागप्राधान्यं विधिश्च पञ्चमलकाररूपः । **यत्तु** रूपाभाव इति **तन्न;** ध्रौवाज्यलाभात् । आग्नेयादीन्यागान्क्रमेणाम्नाय मन्त्रकाण्डे तत्क्रमेणैव याज्यानुवाक्या आम्नाताः, तत्रोपांशुयाजस्थाने वैष्णवप्राजापत्याग्नीषोमीयास्तिस्र ऋचः पठ्यन्ते; ताभिस्तुल्यार्थत्वेन विकल्प्यमानाभिर्विष्ण्वादिदेवतानां समर्पितत्वात् । तस्मादपूर्व उपांशुयाजो विधेयः । विष्ण्वादिवाक्यानि त्वर्थवादाः । इत्थं महीयानुपांशुयाजो यदस्मिन्विष्ण्वादयो यष्टव्या इति । **एवं वाक्यान्तराणामिति । ऐतरेयके**—"आत्मा वा इदमेक एवे"त्युपक्रम्य "स एतमेव पुरुषं ब्रह्म ततमपश्य"दिति "तमेव ब्रह्मात्मान"मभिधाय समाप्तौ "प्रज्ञानं ब्रह्मे"त्युपसंहृतम् । **वाजसनेयकेऽपि**—"अहं ब्रह्मास्मी"त्युपक्रम्य" "अयमात्मा ब्रह्मे"त्युपसंहृतम् । **आथर्वणे**—"कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति" सर्वात्मकं ब्रह्मोपक्रम्य "ब्रह्मैवेदममृतं पुरस्तादिति" तदेव निगमितम् ॥ वेदान्ता यदि सिद्धवस्तुपरास्तर्हि मानान्तरसा-

कल्पतरुपरिमलः ।

त्युक्तमिति विशेषः । **उपांशुयाजमाज्यद्रव्यकं विधायेति ।** अत्रान्तरावाक्यविष्ण्वादिवाक्यसाधारण्येनोपांशुगुणकयागविधानमात्रं विवक्षितं, नत्वन्तरावाक्येनोपांशुयाजविधानम्; अन्तरावाक्यमेव यागविधायकं न विष्ण्वादिवाक्यत्रयमित्यस्यार्थस्य प्रसाधयिष्यमाणैकवाक्यतासिद्ध्यधीनत्वात्ततः प्राक् अन्तरावाक्यं विष्ण्वादिवाक्यत्रयं वा यत्किंचिद्ध्रौवाज्यप्राप्तिमदुपांशुधर्मकयागविधायकमस्तीत्येतावत्येवांशे संप्रतिपत्तेः । **ननु** जामितादोषोपक्रमतत्प्रतीकारोपसंहाराभ्यामेकवाक्यता नावसीयते, येन तत्संरक्षणार्थमन्तरावाक्यं विधायकमिति निर्णीयेत, किंतु विष्ण्वादिवाक्येषु प्रत्येकं जामिताप्रतीकारनिबन्धनाद् वाक्यभेद एवावसीयते; तदनुसारेणोपक्रमे जामितादोषोक्तेरपि विष्ण्वादिवाक्यविधेययागत्रयस्तुत्यर्थत्वावगमात् । न खलु 'अस्मिन् जले स्नानेन प्रतिश्यायो भवति' 'नयनयोरञ्जनं कुर्यात्प्रतिश्यायपरिहाराय' 'पिप्पलीचूर्णयुक्तं नारिकेलोदकं सेवेत प्रतिश्यायपरिहाराय' 'मरीचचूर्णयुक्तं क्षीरं पिबेत्प्रतिश्यायपरिहारायेति' प्रत्येकं प्रतिश्यायप्रतीकारार्थतयाञ्जनादिविधाने प्रतिश्यायदोषोपक्रमतत्प्रतीकारोपसंहारमात्रेणैकवाक्यता भवतीत्याशङ्क्याह—**तथाहीति ।** विष्ण्वादिवाक्येषु यागविधाने कर्मप्रधानतव्यप्रत्ययबलाद्विष्ण्वादिदेवतासंस्कारार्थयागविधानं झटिति प्रतीतं स्यात्, अतः संस्कृतदेवताविनियोगादर्शनेन ततः परावृत्य यागानामर्थकर्मभावेन प्राधान्यं लक्षणीयमिति तेषु विलम्बिताः प्रधानभूतयागविधयः । अन्तरावाक्ये तु यागस्य अन्योपसर्जनत्वं न श्रुतमिति प्रधानभूतस्य तस्य पञ्चमलकारकल्पनेन विधिः शीघ्रतरः, जामितादोषपरिहारोपयुक्तान्तरालकालयुक्तश्च; पुरोडाशद्वयनैरन्तर्यात् जामितादोषोपन्यासेन ह्युपक्रमएवैतदवगतमुपन्यस्तदोषसमाधानार्थमन्तराले किंचिद्विधित्सितमिति । तद्यद्यन्तरावाक्यं विहाय विष्ण्वादिवाक्येषु विधिराश्रीयेत, तदोपक्रमानुगुण्यं न स्यात् । नहि नैरन्तर्यप्रयुक्तदोषस्यान्तराले कर्मान्तरविधानेनेव विष्ण्वादियजनविधानेन समाधानं प्रतीयते । प्रतिश्यायादिवाक्येषु तु नैवं कर्मप्राधान्यप्रतीतिः । नचोपक्रान्तदोषसमाधानसामर्थ्यावगतिविषययुक्तविध्यन्तरश्रवणमस्तीति तत्र वाक्यभेदेऽपि नात्र तद्भेदः समाश्रयणीयः । तस्मान्मन्त्रवर्णप्राप्तविष्ण्वादियागेन प्रशंसार्थेऽर्थवादत्रये प्रत्येकमाम्नातमप्यजामिकरणं तदन्वयद्वारा विधायकेऽन्तरावाक्य एवान्वेति । अतएव तैत्तिरीयशाखायामुपांशुयाजमन्तरा यजतीत्यन्तरावाक्य एवाजामिकरणमाम्नातम्, इह त्वर्थवादत्रये अजामिकरणाभ्यासस्तद्दृढीकरणाय भविष्यतीति न तदनुरोधेन वाक्यभेदशङ्कावकाशः । **कर्मतया च देवतात्वमिति ।** लक्षणीयमित्यनुषङ्गः । **तस्मादिति ।** अपूर्वत्वाद् यागे एव विध्यपेक्षा, न विष्ण्वादिदेवतास्वपि मन्त्रवर्णतः प्राप्तिसंभवादिति भावः ॥ सामवेदे सार्वात्म्यविषयावुपक्रमोपसंहारौ दर्शितौ । ऋग्वेदादिष्वपि तौ दर्शयति—**ऐतरेयके इति ।** ऐतरेये इति तु न पाठः; इतराया अपत्यमैतरेयस्तेन प्रोक्तां शाखामधीयतइत्यैतरेयिणः । 'तेन प्रोक्त' मित्यर्थे "पुराणप्रोक्तेषु ब्राह्मणकल्पेष्वि"ति सूत्रेण णिनिप्रत्यये सति तदधीत इत्यर्थे विहितस्य प्रत्ययस्य 'प्रोक्ताल्लुगि'ति सूत्रेण प्रोक्तप्रत्ययान्तस्य लुग्विधायकेन लोपे सति निष्पत्तेः ॥ ततश्चैतरेयिणामाम्नाय इत्यर्थे "गोत्रचरणाद्वुञि"ति वुञ्प्रत्यये सति ऐतरेयके इति भाष्यम् । **स एतमेवेति ।** अनेन वाक्येन प्रत्यगात्मैव ब्रह्मेत्युपक्रान्तं । तदुपसंहारे च प्रज्ञानशब्दो जीवपरः; सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानीति प्राक् प्रज्ञानशब्देन जीवस्य निर्दिष्टत्वात् । **वेदान्ता यदीति ।** वेदान्तानां सापेक्षत्वप्रसञ्जकस्य भूतार्थत्वहेतोः पौरुषेयत्वेन सोपाधिकत्वम्—

'आत्मा वा इदमेक एवाग्र आसीत्' (ऐत० २।१।१।१) तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' 'अयमात्मा ब्रह्म सर्वानुभूः' । (बृह० २।५।१९) 'ब्रह्मैवेदममृतं पुरस्तात्' (मुण्ड० २।२।११) इत्यादीनि। नच तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थान्तरकल्पना युक्ता; श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। नच तेषां कर्तृस्वरूपप्रतिपादनपरतावसीयते; 'तत्केन कं पश्येत्' (बृह० २।४।१३) इत्यादि क्रियाकारकफलनिराकरणश्रुतेः। नच परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः; 'तत्त्वमसि' (छान्दो० ६।८।७)

भामती।

तेषामदृष्टा, अनुपपन्ना चेत्याह—**नच तेषामिति**। सापेक्षत्वेनाप्रामाण्यं पूर्वपक्षबीजं दूषयति—**नच परिनिष्ठितवस्तुस्वरूपत्वेऽपीति। अयमभिसंधिः**—पुंवाक्यनिदर्शनेन हि भूतार्थतया वेदान्तानां सापेक्षत्वमाशङ्क्यते। तत्रैवं भवान् पृष्टो व्याचष्टाम्, किं पुंवाक्यानां सापेक्षता भूतार्थत्वेनाहो पौरुषेयत्वेन। यदि भूतार्थत्वेन ततः प्रत्यक्षादीनामपि परस्परापेक्षत्वेनाप्रामाण्यप्रसङ्गः। तान्यपि हि भूतार्थान्येव। अथ पुरुषबुद्धिप्रभवतया पुंवाक्यं सापेक्षं, एवं तर्हि तदपूर्वकाणां वेदान्तानां भूतार्थानामपि नाप्रामाण्यं; प्रत्यक्षादीनामिव नियतेन्द्रियलिङ्गादिजन्मनाम्। यद्युच्येत सिद्धे किलापौरुषेयत्वे वेदान्तानामनपेक्षतया प्रामाण्यं सिध्येत्, तदेव तु भूतार्थत्वेन न सिध्यति; भूतार्थस्य शब्दानपेक्षेण पुरुषेण मानान्तरतः शक्यज्ञानत्वाद्बुद्धिपूर्वं विरचनोपपत्तेः, वाक्यत्वादिलिङ्गकस्य वेदपौरुषेयत्वानुमानस्याप्रत्यूहमुत्पत्तेः। तस्मात् पौरुषेयत्वेन सापेक्षत्वं दुर्वारं, नतु भूतार्थत्वेन। कार्यार्थत्वे तु कार्यस्यापूर्वस्य मानान्तरा-

वेदान्तकल्पतरुः।

पेक्षाः स्युः, पुंवाक्यवदिति पूर्ववाद्यभिमतस्य प्रसङ्गे हेतोः पौरुषेयत्वेन सोपाधिकत्वं भाष्यगतापिशब्देन द्योत्यत इत्याह—**अयमभिसंधिरिति**। तस्यैवानैकान्तिकत्वमाह—**प्रत्यक्षादीनामपीति**। वाक्यस्य सतः सिद्धवस्तुपरत्वे पौरुषेयत्वापत्तिरिति साधनव्याप्तिमुपाधेः शङ्कते—**यद्युच्येतेति**। वाक्यत्वादि लिङ्गं यस्य स तथा। कार्यपरतायां हि वेदान्तानां न वाक्यत्वादिना सापेक्षत्वमनुमेयं, पौरुषेयत्वस्योपाधित्वात्, एवं नच साधनव्याप्तिरित्याह—**कार्यार्थत्व इति। तत्त्वेन**

कल्पतरुपरिमलः।

अयमभिसंधिरित्यारभ्य प्रवृत्तेन टीकाग्रन्थेनोच्यमानं, **परिनिष्ठितवस्तुविषयत्वेऽपीति** भाष्यगतापिशब्देन भूतार्थत्वस्य सापेक्षत्वव्यभिचारं दर्शयतोक्तसाध्यप्रयोजकान्तरसद्भावसूचनेन द्योत्यत इत्येतदभिसंधिशब्देनाहेत्यर्थः। **ननु—अयमभिसंधिरित्यादि**टीकाग्रन्थस्योक्तरीत्योपाध्युद्भावनपरत्वेनावतारणमयुक्तम्; तस्य ग्रन्थस्य सापेक्षत्वापादने भूतार्थत्वं प्रयोजकं प्रसङ्गहेतुः पौरुषेयत्वं वेति विकल्प्य, प्रथमपक्षं व्यभिचारेण निर**स्याथेत्यादिग्रन्थेन** द्वितीयपक्षमुद्भाव्य, तं पक्षं वेदान्तानां पौरुषेयत्वं नास्तीति प्रसङ्गहेत्वसंमत्या दूषयित्वा, भूतार्थत्वे मानान्तरेण शक्यग्रहत्वात्पौरुषेयत्वमपि स्यादिति प्रसङ्गहेतोरप्यापादनशङ्कां यद्युच्येतेत्यादिग्रन्थेनोद्भाव्य, **तर्हि कार्यार्थत्वेऽपि** तत एव हेतोस्तत्स्यादित्येतदर्थप्रतिपादकतयैव तस्य ग्रन्थस्य प्रवृत्तेः, तस्य पौरुषेयत्वोपाध्युद्भावनपरत्वे तमुपाधिमसहमानस्य पूर्वपक्षिणः सापेक्षत्वे पौरुषेयत्वं प्रयोजकमित्युक्त्यसंभवेनाथेत्यादिशङ्काग्रन्थस्यानन्वयप्रसङ्गाच्च, यद्युच्येतेत्यादिशङ्काग्रन्थोपसंहारे—**तस्मात् पौरुषेयत्वेन सापेक्षत्वं दुर्वारम्' नतु भूतार्थत्वेनेति** भूतार्थत्वं हेतुं परित्यज्य पौरुषेयत्वस्य हेतुतयैवोपादानस्य स्पष्टीकरणाच्चेति—**चेत्, उच्यते;** टीकायां **भूतार्थतया खलु सापेक्षत्वमाशङ्क्यते** इत्यनुवादानन्तरं भूतार्थतया वेदान्तानां सापेक्षत्वम्, उत पौरुषेयतयेति विकल्पो न प्रसरति। भूतार्थत्वहेतौ व्यभिचारेण दूषिते तत्रैव वाक्यत्वविशेषणाशङ्कां विहाय वाक्यत्वविशेषितभूतार्थत्वहेतुना प्रसाधनीयस्य पौरुषेयत्वस्य हेत्वन्तरस्य शङ्का च न सामाञ्जस्यमश्नुते। तस्मात् पौरुषेयत्वमुपाधिमुद्भावयिष्यतो गूढाभिसंधेः सिद्धान्तिनोऽयं विकल्पः। दृष्टान्तीकृतेषु पुंवाक्येषु सापेक्षत्वे त्वदीयसाधनं भूतार्थत्वं प्रयोजकं, मदुद्भावनीयोपाधिरूपं पौरुषेयत्वं वेति। अतएव पक्षे हेतुविकल्पोऽयं न भवति, किंतु दृष्टान्ते साध्यप्रयोजकधर्मविकल्प इति दर्शयितुमेव टीकायां **'पुंवाक्यनिदर्शनेन हीति' 'पुंवाक्यानामिति' च** विशेषितम्। ततः प्रथमपक्षे व्यभिचारेण दूषिते तत्र वाक्यत्वविशेषणे कृतेऽपि सिद्धान्ती पौरुषेयत्वमुपाधिं ब्रूयादिति तं पक्षं परित्यज्य तदभिमतमुपाधि साधनव्यापकत्वेनानुपाधिं व्यवस्थापयिष्याम इति मन्यमानस्य पूर्वपक्षिणः पक्षान्तरपरिग्रहाशङ्का—**अथ पुरुषबुद्धिप्रभवतयेति**। पौरुषेयत्वस्य सापेक्षत्वप्रयोजकत्वमङ्गीकृत्य तस्य वेदान्तेष्वभावेन साधनाव्यापकतयोपाधित्वोद्घाटनम्—**एवं तर्हीति**। वेदान्तानां भूतार्थवाक्यत्वहेतुना पौरुषेयत्वापादनेन साधनव्यापकतयाऽनुपाधित्वशङ्का—**यद्युच्येतेति। तस्मात्पौरुषेयत्वेनेति** तदुपसंहारवाक्येनाप्यनुपाधित्वशङ्काया एव तत्फलेन सहोपसंहारः। वेदान्तानां पौरुषेयत्वमापाद्योपाधेः साधनव्यापकत्वान्निरुपाधिकेन भूतार्थत्वेन सापेक्षत्वमापाद्यते, नतु तदनापाद्य सोपाधिकेन भूतार्थत्वेति॥ ततः प्रतिबन्दिग्रहणेन वेदान्तानां भूतार्थत्वेऽप्यपौरुषेयत्वोपपत्त्योपाधेः साधनाव्याप-

इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात्। यत्तु—हेयोपादेयरहितत्वादुपदेशानर्थ-

भामती ।

गोचरतयात्यन्ताननुभूतपूर्वस्य तत्त्वेन समारोपेण वा पुरुषबुद्धावनारोहात् तदर्थानां वेदान्तानामशक्यरचनतया पौरुषेयत्वाभावादनपेक्षं प्रमाणत्व सिध्यतीति प्रामाण्याय वेदान्तानां कार्यपरत्वमातिष्ठामहे । अत्र ब्रूमः—किं पुनरिदं कार्यमभिमतमायुष्मतः, यदशक्यं पुरुषेण ज्ञातुम् । अपूर्वमिति चेत्, हन्त कुतस्त्यमस्य लिङाद्यर्थत्वं; तेनालौकिकेन संगतिसंवेदनविरहात्, लोकानुसारतः क्रियाया एव लौकिक्याः कार्याया लिङादेरवगमात् । 'स्वर्गकामो यजेत' इति साध्यस्वर्गविशिष्टो नियोज्योऽवगम्यते, स च तदेव कार्यमवगच्छति यत्स्वर्गानुकूलम् । नच क्रिया क्षणभङ्गुरामुष्मिकाय स्वर्गाय कल्पत इति परिशेष्याद्वेदत एवापूर्वे कार्ये लिङादीनां संबन्धग्रह इति चेत्, हन्त चैत्यवन्दनादिवाक्येष्वपि स्वर्गकामादिपदसंबन्धादपूर्वकार्यत्वप्रसङ्गः । तथाच तेषामप्यशक्यरचनत्वेनापौरुषेयत्वापातः । स्पष्टदृष्टेन पौरुषेयत्वेन वा तेषामपूर्वार्थत्वप्रतिषेधे वाक्यत्वादिना लिङ्गेन वेदानामपि पौरुषेयत्वमनुमितमित्यपूर्वार्थता न स्यात् । अन्यतस्तु वाक्यत्वादीनामनुमानाभासत्वोपपादने कृतमपूर्वार्थत्वेनात्र तदुपपादकेन । उपपादितं चापौरुषेयत्वमस्माभिर्न्यायकणिकायां, इह तु विस्तरभयान्नोक्तम् । तेन पौरुषेयत्वेऽसिद्धे भूतार्थानामपि वेदान्तानां न सापेक्षतया प्रामाण्यविघातः । नचानधिगतगन्तृता नास्ति, येन प्रामाण्यं न स्यात्; जीवस्य ब्रह्मताया अन्यतोऽनधिगमात् । तदिदमुक्तम्—'नच परिनिष्ठितवस्तुस्वरूपत्वेऽपि' इति । द्वितीयं पूर्वपक्षबीजं स्मारयित्वा दूषयति—यत्तु हेयोपादेयरहितत्वा-

वेदान्तकल्पतरुः ।

याथात्म्येन । कार्ये मानान्तरायोग्यत्वस्यासिद्धत्वात्तत्परत्वेऽपि वेदान्तानां पौरुषेयत्वं संभवतीति समा साधनव्याप्तिः, ततश्च दुरपवादं वाक्यत्वादिलिङ्गकं पौरुषेयत्वमित्याशयेनाह—**अत्र ब्रूम इत्यादिना । किं पुनरिति ।** कृतियोग्यस्य कार्यत्वे भावार्थस्यापि तत्त्वेन मानान्तरयोग्यत्वमित्यर्थः । तर्ह्यलौकिकं कार्यमिति शङ्कते—**अपूर्वमिति ।** तर्हि मानान्तरानवगते संगतिग्रहायोगाल्लिङादीनामबोधकत्वापात इत्याह—**हन्तेति । ननु** यजेतेति श्रुतेः कार्यता भात्यतोऽपूर्वसिद्धिरिति, तत्राह—**लोकानुसारत इति ।** स्वर्गकामपदसमभिव्याहारसंज्ञकतर्कानुगृहीतवेदादेव क्रियाविलक्षणापूर्वे लिङादीनां संबन्धग्रह इति शङ्कते—**स्वर्गकाम इति ।** अयं तर्कोऽतिप्रसङ्गीत्याह—**चैत्येति ।** कर्तृस्मरणात्स्पष्टदृष्टपौरुषेयत्वेन बुद्धादेव चैषामकार्यार्थत्वे वेदानामपि पौरुषेयत्वस्य वाक्यत्वादिनानुमितत्वादकार्यार्थत्वं समानमित्यर्थः । स्मर्यमाणकर्तृकत्वेन वाक्यत्वादि सोपाधिकमित्याशङ्क्य सिद्धार्थवेदान्तेष्वपि तत्सममतः कार्यार्थत्वमनपेक्षतायामप्रयोजकमित्याह—**अन्यतस्त्विति ।** वर्तमानसंप्रयोगजप्रत्यक्षस्य कार्यरूपधर्मगोचरत्वानुपपत्तेर्योगिसामर्थ्यस्यापीन्द्रियविषयेष्वेवाति-

कल्पतरुपरिमलः ।

कत्वव्यवस्थापनेन भूतार्थत्वहेतुकसापेक्षत्वप्रसङ्गानुमानस्य सोपाधिकत्वप्रदर्शनपरो**ऽत्रब्रूम** इत्यादिग्रन्थः । **अतएव—तदुपसंहारवाक्यं तेनासिद्धे पौरुषेयत्वे भूतार्थानामपि वेदान्तानां न सापेक्षतया प्रामाण्यविघात इति ।** तस्मादुपाध्युद्भावनपरतया व्याख्यानं युक्तमेव । प्रमाणान्तरसिद्धार्थानुवादकतया स्वप्रामाण्यसिद्धौ तत्प्रामाण्यमुखनिरीक्षकत्वं सापेक्षत्वं पूर्वानुपूर्व्यनपेक्षपुंविशेषबुद्ध्यधीनानुपूर्वीमत्त्वं पौरुषेयत्वमिति साध्योपाध्योर्भेदः । **तस्यैवेति ।** यस्य हेतोरुपाधिरुद्भावनीयः तस्यैव व्यभिचारं तावदाहेत्यर्थः । यद्यपि दृष्टान्तीकृतेषु पुंवाक्येषु भूतार्थत्वं सापेक्षत्वप्रयोजकं न भवतीत्येतदुपपादकः प्रत्यक्षादिषु सत्यपि भूतार्थत्वे सापेक्षत्वाभावः उपाध्युद्भावनोपयोगिप्रयोजकान्तरशङ्कावसरदानार्थमिहोच्यते; तथापि स एव हेतोः पक्षे साध्यासाधकत्वसिद्ध्युपयोगी व्यभिचारोऽपीत्यभेददृष्ट्यानैकान्तिकतामाहेत्युक्तं—**कार्ये मानान्तरायोग्यत्वस्यासिद्धत्वादिति । ननु** वेदान्तानां कार्यपरत्वेऽपि पौरुषेयत्वानुमानं प्रसरति; कार्यस्यापि मानान्तरयोग्यत्वाविशेषादिति पौरुषेयत्वानुमानमुक्त्वा तत्फलमुपाधेः साधनव्यापकत्वमप्यभिधाय ततश्चेत्यादिग्रन्थेन पुनरपि पौरुषेयत्वानुमानप्रसर एवोपसंह्रियते; उपाधिविधूनने निरुपाधिकेन वाक्यत्वेन सापेक्षत्वानुमानमेव खल्पसंहर्तव्यम् । **सत्यम्;** वाक्यत्वादिलिङ्गकं पौरुषेयत्वशब्देन पुरुषबुद्धिप्रभवत्वपरेण सापेक्षत्वमेवोक्तम् । **अथवा—पौरुषेयत्वं संभवतीति** पूर्ववाक्येन पौरुषेयत्वानुमानस्य बाधाभावमात्रमुक्तं, **ततश्चेत्यादिग्रन्थेन** तत्फलतया पौरुषेयत्वानुमानप्रवृत्तिरुक्ता, प्रागेव साधनव्याप्त्युक्तिस्तु वक्ष्यमाणानुमानफलत्वाभिप्रायेणेति नेतव्यम् । **अकार्यार्थत्वं समानमिति ।** निष्प्रत्यूहेन वाक्यत्वादिहेतुना पौरुषेयत्वेऽनुमिते सति मानान्तरागोचराऽपूर्वत्वकल्पनैव न प्रवर्तते चैत्यवन्दनादिवाक्येषु । अतस्तत्कल्पनापत्त्या पौरुषेयत्वाप्रत्याख्यानप्रत्याशा दुराशेति भावः । **स्मर्यमाणकर्तृकत्वेनेति ।** चैत्यवन्दनादिवाक्येष्वपि पश्याम्यहं भिक्षवो दिव्येन चक्षुषा सुकृतं दुष्कृतं चेति तदागमकर्तृबुद्धवचसैव कर्तृप्रतीतिरस्तीति भावः । **सिद्धार्थवेदान्तेष्वपीति ।** यथा वेदान्तानां कार्यार्थत्वपक्षे तेषां पौरुषेयत्वानुमानं कर्तृस्मरणोपाधिना निरस्यते, तथा तेषां सिद्धार्थत्वपक्षेऽपि तन्निरसितुं शक्यमित्यप्रयोजकं कार्यार्थत्वकल्पनमित्यर्थः । **कार्यरूपेति ।**

क्य इति, नैष दोषः; हेयोपादेयशून्यब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात्पुरुषार्थसिद्धेः । देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः, नतु तथा ब्रह्मण उपासनाविधिशेषत्वं संभवति; एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः । नह्येकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः संभवोऽस्ति । येनोपासनाविधिशेषत्वं ब्रह्मणः

भामती ।

दिति । विध्यर्थावगमात् खलु पारंपर्येण पुरुषार्थप्रतिलम्भः । इह तु 'तत्त्वमसि' इत्यवगतिपर्यन्ताद्वाक्यार्थज्ञानात् बाह्यानुष्ठानायासानपेक्षात्साक्षादेव पुरुषार्थप्रतिलम्भो नायं सर्पो रज्जुरियमिति ज्ञानादिवेति । सोऽयमस्य विध्यर्थज्ञानात्प्रकर्षः । **एतदुक्तं भवति**—द्विविधं हीप्सितं पुरुषस्य । किंचिदप्राप्तं ग्रामादि, किंचित्पुनः प्राप्तमपि भ्रमवशादप्राप्तमित्यवगतं, यथा स्वग्रीवावनद्धं ग्रैवेयकम् । एवं जिहासितमपि द्विविधं, किंचिदहीनं जिहासति, यथा वलयितचरणं फणिनं, किंचित्पुनर्हीनमेव जिहासति, यथा चरणाभरणे नूपुरे फणिनमारोपितम् । **तत्राप्राप्तप्राप्तौ चात्यक्तत्यागे च** बाह्योपायानुष्ठानसाध्यत्वात् तदुपायतत्त्वज्ञानादस्ति पराचीनानुष्ठानापेक्षा । न जातु ज्ञानमात्रं वस्त्वपनयति । नहि सहस्रमपि रज्जुप्रत्यया वस्तुसन्तं फणिनमन्यथयितुमीशते, समारोपिते तु प्रेप्सितजिहासिते तत्त्वसाक्षात्कारमात्रेण बाह्यानुष्ठानानपेक्षेण शक्येते प्राप्तुमिव हातुमिव । समारोपमात्रजीविते हि ते, समारोपितं च तत्त्वसाक्षात्कारः समूलघातमुपहन्तीति । तथेहाप्यविद्यासमारोपितजीवभावे ब्रह्मण्यानन्दे वस्तुतः शोकदुःखादिरहिते समारोपितन्निबन्धनस्तद्भावः 'तत्त्वमसि' इतिवाक्यार्थतत्त्वज्ञानादवगतिपर्यन्तान्निवर्तते । तन्निवृत्तौ प्राप्तमप्यानन्दरूपमप्राप्तमिव प्राप्तं भवति, त्यक्तमपि शोकदुःखाद्यत्यक्तमिव त्यक्तं भवति, तदिदमुक्तम्—**ब्रह्मात्मावगमादेव** जीवस्य **सर्वक्लेशस्य** सवासनस्य विपर्यासस्य । स हि क्लिश्नाति जन्तूनतः क्लेशः, तस्य प्रकर्षेण हानात् पुरुषार्थस्य दुःखनिवृत्ति–सुखाप्तिलक्षणस्य सिद्धेरिति । **यत्तु**–'आत्मेत्येवोपासीत' 'आत्मानमेव लोकमुपासीत' इत्युपासनावाक्यगतदेवतादिप्रतिपादनेनोपासनापरत्वं वेदान्तानामुक्तं, तद्दूषयति—**देवतादिप्रतिपादनस्य तु** आत्मेत्येतावन्मात्रस्य **स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः** । यदि न विरोधः, सन्तु तर्हि वेदान्ता देवताप्रतिपादनद्वारेणोपासनाविधिपरा एवेत्यत आह—**नतु तथा ब्रह्मण इति** । उपास्योपासकोपासनादिभेदसिद्ध्यधीनोपासना न निरस्तसमस्तभेदप्रपञ्चे वेदान्तवेद्ये ब्रह्मणि संभवतीति नोपासनाविधिशेषत्वं वेदान्तानां तद्विरोधित्वादित्यर्थः । **स्यादेतत्**—यदि विधिविरहेऽपि वेदान्तानां प्रामाण्यं, हन्त तर्हि 'सोऽरोदीत्' इत्यादीनामप्यस्तु स्वतन्त्राणामेवोपेक्षणीयार्थानां प्रामाण्यम् । नहि हानोपादानबुद्धी एव प्रमाणस्य फले, उपेक्षाबुद्धेरपि तत्फलत्वेन प्रामाणिकैरभ्युपेतत्वादिति कृतं 'बर्हिषि रजतं

वेदान्तकल्पतरुः ।

शयकारित्वान्न धर्मस्य प्रत्यक्षता, लिङ्गाद्यभावाच्च नानुमेयत्वादि, नचाज्ञाते पुंसां वचनरचना संभविनीति वैदिकी रचना न पौरुषेयीति न्यायकणिकायां व्युत्पादितम् । **नन्वपौरुषेयतयानपेक्षत्वेऽप्यग्निर्हिमस्य** भेषजमितिवन्मानान्तरगृहीतग्राहित्वमित्याशङ्क्य **तत्त्वमसीति ब्रह्मात्मभावस्येति** भाष्यशेषेण परिहृतमित्याह—**नचानधिगतेति** । सर्वस्मिन्नुपपादितेऽर्थे भाष्यं संवादयति—**तदिदमिति** । सिद्धार्थत्वे सत्यपुरुषार्थनिष्ठत्वं स्यादिति द्वितीयपूर्वपक्षबीजम् । **सर्वक्लेशप्रहाणादिति भाष्यस्य**प्रशब्दार्थमाह—**सोऽयमस्येति** । बाह्यानुष्ठानानपेक्षमज्ञाननिवृत्त्यानन्दाविर्भावफलमन्वयव्यतिरेकिनिदर्शनयुगलद्वयप्रदर्शनपुरःसरं ब्रह्मज्ञानस्य दर्शयति—**एतदुक्तमित्यादिना** । **ग्रैवेयकं** ग्रीवालङ्कारः । **समूलघातमिति** । कषादित्वादनुप्रयोगः । सह मूलेनोपहन्तीत्यर्थः । **समारोपितनिबन्धन इति** । समारोपिताविद्या निबन्धनं यस्य जीवभावस्य स तथोक्तः । **आत्मानमेव लोकं** चैतन्यम् । **देवता** सगुणं ब्रह्म । आदिशब्दात् प्राणविशुद्ध्यादि गृह्यते । उपासनावाक्यैकदेशमुपास्यसमर्थकं विविनक्ति—**आत्मेतीति** । यदवादि पूर्वपक्षिणा न क्वचिदपि वेदवाक्यानां विधिमन्तरेणार्थवत्तेति, **तत्र** किं यदि वेदान्ता विधिमन्तरेण प्रमाणं, तर्ह्यर्थवादाः किं न स्युरिति प्रतिबन्दी मता, अथवा वेदवाक्यस्य सिद्धपरस्यान्यत्रादर्शनाद्व्याप्त्यभावेन न वेदान्तानां सिद्धवस्तुपरत्वमिति । **आद्य**मर्थवादाधिकरणपूर्वपक्षं संगृह्णन्नाशङ्कते—**स्यादेतदित्यादिना** । रुदतो यदश्रु अशीर्यत तद्रजतमभवत्तस्माद्रजतमदक्षिण्यमिति निन्दा । **बर्हिषि** बर्हिःसाध्ये यागे, रजतं न देयमिति निषेधशेष इति सिद्धान्तं दर्शयन्नर्थवादानां नोपेक्षाफलत्वमिति तावदाह—

कल्पतरुपरिमलः ।

कार्यं रूपयति, अनुष्ठेयं ज्ञापयति कार्यरूपः,' यागाद्यनुष्ठानप्रयोजकः •तद्गतस्वर्गादिश्रेयःसाधनत्वाकारस्तेन रूपेण यागादिर्धर्मः । अतो यागादेः स्वरूपतः प्रत्यक्षत्वेऽपि धर्मत्वाकारेणातीन्द्रियता । **यथाहुः**—"श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रमीयते । ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः ॥' इति । **व्याप्त्यभावेनेति** । वेदान्तानां सिद्धव-

प्रतिपद्येत । यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं दृष्टं; तथाप्यात्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम् । नचानुमानगम्यं शास्त्रप्रामाण्यं, येनान्यत्र दृष्टं निदर्शनमपेक्षेत । तस्मात्सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वम् । अत्रापरे प्रत्यवतिष्ठन्ते—यद्यपि शास्त्रप्रमाणकं ब्रह्म; तथापि प्रतिपत्तिविधिविषयतयैव

भामती ।

न देयम्' इत्यादिनिषेधविधिपरत्वेनैतेषामित्यत आह—**यद्यपीति** । स्वाध्यायविध्यधीनग्रहणतया हि सर्वो वेदराशिः पुरुषार्थतन्त्र इत्यवगतम् । तत्रैकेनापि वर्णेन नापुरुषार्थेन भवितुं युक्तं, किं पुनरियता 'सोऽरोदीत्' इत्यादिना पदप्रबन्धेन । नच वेदान्तेभ्य इव तदर्थावगममात्रादेव कश्चित्पुरुषार्थ उपलभ्यते । तेनैष पदसंदर्भः साकाङ्क्ष एवास्ते पुरुषार्थमुदीक्षमाणः । 'बर्हिषि रजतं न देयम्' इत्ययमपि निषेधविधिः स्वनिषेध्यस्य निन्दामपेक्षते । नह्यन्यथा ततश्चेतनः शक्यो निवर्तयितुम् । तद्यदि दूरतोऽपि न निन्दामवाप्स्यत्ततो निषेधविधिरेव रजतनिषेधे च निन्दायां च दर्विहोमवत् सामर्थ्यद्वयमकल्पयिष्यत् । तदेवमुत्तमयोः 'सोऽरोदीत्' इति च 'बर्हिषि रजतं न देयम्' इति च पदसंदर्भयोर्लक्ष्यमाणनिन्दाद्वारेण नष्टाश्वदग्धरथवत् परस्परं समन्वयः, नत्वेवं वेदान्तेषु पुरुषार्थापेक्षा, तदर्थावगमादेवानपेक्षात्परमपुरुषार्थलाभादित्युक्तम् । **ननु** विध्यसंस्पर्शिनो वेदस्यान्यस्य न प्रामाण्यं दृष्टमिति कथं वेदान्तानां तदस्पृशां तद्वद्विष्यतीत्यत आह—**नचानुमानगम्यमिति** । अबाधितानधिगतासंदिग्धबोधजनकत्वं हि प्रमाणत्वं प्रमाणानां, तच्च स्वत इत्युपपादितम् । यद्यपि चैषामीदृग्बोधजनकत्वं कार्यार्थापत्तिसमधिगम्यं; तथापि तद्बोधोपजनने मानान्तरं नापेक्षन्ते । नापीमामेवार्थापत्तिं, परस्पराश्रयप्रसङ्गादिति स्वत इत्युक्तम् । ईदृग्बोधजनकत्वं च कार्ये इव विधीनां वेदान्तानां ब्रह्मण्यस्तीति दृष्टान्तानपेक्षं तेषां ब्रह्मणि प्रामाण्यं सिद्धं भवति; अन्यथा नेन्द्रियान्तराणां रूपप्रकाशनं दृष्टमिति चक्षुरपि न रूपं प्रकाशयेदिति । प्रकृतमुपसंहरति—**तस्मादिति** । आचार्यदेशीयानां मतमुत्थापयति—**अत्रापरे प्रत्यवतिष्ठन्त इति** । तथाहि—**'अज्ञातसंगतित्वेन शास्त्रत्वेनार्थवत्तया । मननादिप्रतीत्या च कार्यार्था-**

वेदान्तकल्पतरुः ।

स्वाध्यायेति । प्रयोजनपर्यवसायिबोधजनकत्वतदभावाभ्यां विशेषं दर्शयन्प्रतिबन्दी परिहरति—**नच वेदान्तेभ्य इति** । **ननु** निषेध एव स्वनिषेधस्यानर्थहेतुत्वान्यथानुपपत्त्या निन्दां कल्पयिष्यति, नेत्याह—**तद्यदीति** । अर्थवादादेव निन्दालाभे निषेधकस्य निषेधे निन्दायां च तात्पर्यं न कल्प्यमित्यर्थः । **ननु** 'सोऽरोदीदिति' वाक्ये निन्दा न भाति, किंतु भूतानुवाद इत्याशङ्क्य मुख्यार्थे प्रयोजनाभावान्निन्दा लक्ष्यत इत्याह—**लक्ष्यमाणेति** । **द्वितीयमुद्भाव्य** निषेधति—**ननु विध्यसंस्पर्शिन इत्यादिना** । तच्च स्वत इत्युपपादितं न्यायकणिकायामित्यर्थः । **ननु** प्रमायाः कार्येण प्रमाणानां तज्जनकत्वमनुमेयं, कथं नानुमानगम्यमिति भाष्यमित्याशङ्क्याह—**यद्यपीति** । कार्यार्थापत्त्यपरपर्यायानुमानेन मानान्तरेण वा प्रमा नोत्पद्यते, किंतूदितायां तस्यामनुमानं प्रवर्तत इत्यर्थः । प्रमाणान्तरं तावदपेक्ष्यमाणं न दृश्यते । एतदर्थापत्त्यपेक्षणे दूषणमाह—**नापीति** । अपेक्षन्त इत्यनुषङ्गः । उत्पन्नायां प्रमायां प्रमाणानां प्रमाजनकत्वस्यानुमानं, ततश्च प्रमोत्पत्तिरिति परस्पराश्रयप्रसङ्गः । शास्त्रप्रामाण्यमनुमानगम्यत्वेन न भवतीति च भाष्यार्थो न पुनरनुमानेन ज्ञेयमिति । कार्यविरहिवेदान्तेभ्यः प्रमा यद्युत्पद्यते, तदा स्वतः परतो वेति चिन्ता, नतूत्पद्यत इत्यत आह—**ईदृगिति** । सिद्धे ब्रह्मणि वेदान्तेभ्यः प्रमोत्पत्तिरनुभवसिद्धेत्यर्थः । यद्यनुभवसिद्धाप्यन्यत्र सिद्धार्थार्थवादादावदर्शनादपह्नूयेत, तदातिप्रसङ्ग इत्याह—**अन्यथेति** । एवं तावत्सिद्धेर्थेऽपि प्रमाणान्तरपरतन्त्राणां पौरुषेयवाक्यानामङ्गीकृत्य प्रामाण्यं वेदान्तेषु क्रियाविषयतामन्तरेण नैरपेक्ष्यपुरुषार्थपर्यवसाने न लभ्येते इति मतं ब्रह्मात्मैक्यस्य प्रमाणान्तरागम्यत्वेन तदवगममात्रायत्तप्रयोजनलाभेन च पराणुदत् । इदानीं कार्यान्वित एवार्थे पदसङ्गतिग्रहेण सिद्धं वस्तु न शब्दप्रमेयमिति वेदान्तानुपासननियोगपरान् ये मन्यन्ते, तन्मतेन पूर्वपक्षमाह—**अज्ञातेति** । **अथवा** आरोपितब्रह्मभावस्य जीवस्योपास्तिपरा वेदान्ता न ब्रह्मात्मत्वे प्रमाणमिति पूर्वः पक्षः । **'अयं तु—सन्तु वेदान्ता मानं ब्रह्मात्मवस्तुनि । किंतु ज्ञानविधिद्वारेत्येष भेदः प्रतीयताम्॥'** अतएव भाष्यं यद्यपि शास्त्रप्रमाणकं ब्रह्मेति । अतः कार्यविषयाद्वाक्याद् ब्रह्मनिश्चय इति प्रतिज्ञासामर्थ्यादेव न सिद्धार्थादिति लभ्यते । तत्र हेतुः सिद्धे **वस्तुन्यज्ञातसङ्गतित्वेति** । यत्र वृद्धप्रयुक्तशब्दविषयत्वं तत्र सङ्गतिः

कल्पतरुपरिमलः ।

स्तुपरत्वमनुमातुं न शक्यम्; वेदवाक्यत्वस्य तेन व्याप्त्यभावादित्यर्थः । **निन्दा न भातीति** । **ननु**—'अश्रुजं हि यो बर्हिषि ददाति, 'पुरास्य संवत्सराद्गृहे रुदन्तीति' वाक्यशेषेण यागे रजतदानस्य बलवदनिष्टानुबन्धित्वरूपा निन्दा भातीति—**चेद्, न**; संवत्सरात्प्राग् रोदनस्य क्वचित्क्वचिददर्शनेन वाक्यशेषस्य पारलौकिकानिष्टानुबन्धित्वलक्षकतायाः समाश्रयणीयत्वात् ॥ सिद्धार्थव्युत्पत्त्यनुपमर्दोपमर्दाभ्यां वर्णकयोः पूर्वपक्षभेदमुक्त्वा ब्रह्मणः शास्त्रप्रमाणकत्वप्रतिक्षेपाप्र-

भामती ।

ब्रह्मनिश्चयः ॥' न खलु वेदान्ताः सिद्धब्रह्मरूपपरा भवितुमर्हन्ति; तत्राविदितसंगतित्वात् । यत्र हि शब्दा लोकेन न प्रयुज्यन्ते, तत्र न तेषां संगतिग्रहः । नचाहेयमनुपादेयं रूपमात्रं कश्चिद्विवक्षति प्रेक्षावान्; तस्याबुभुत्सितत्वात्, अबुभुत्सितावबोधने च प्रेक्षावत्ताविघातात् । तस्मात् प्रतिपित्सितं प्रतिपिपादयिषन्नयं लोकः प्रवृत्तिनिवृत्तिहेतुभूतमेवार्थं प्रतिपादयेत् । कार्यं चावगतं तद्धेतुरिति तदेव बोधयेत् । एवंच वृद्धव्यवहारप्रयोगात् पदानां कार्यपरतामवगच्छति । तत्र किंचित्साक्षात्कार्याभिधायकं, किंचित्तु कार्यार्थस्वार्थाभिधायकं, नतु भूतार्थपरता पदानाम् । **अपिच** नरान्तरस्य व्युत्पन्नस्यार्थप्रत्ययमनुमाय तस्य च शब्दभावाभावानुविधानमवगम्य शब्दस्य तद्विषयबोधकत्वं निश्चेतव्यम् । नच भूतार्थरूपमात्रप्रत्यये परनरवर्तिनि किंचिल्लिङ्गमस्ति, कार्यप्रत्यये तु नरान्तरवर्तिनि प्रवृत्तिनिवृत्ती स्तो हेतू इत्यज्ञातसंगतित्वान्न ब्रह्मरूपपरा वेदान्ताः । **अपिच** वेदान्तानां वेदत्वाच्छास्त्रत्वप्रसिद्धिरस्ति । प्रवृत्तिनिवृत्तिपराणां च संदर्भाणां शास्त्रत्वम् । **यथाहुः**—'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥' **इति** ॥ तस्माच्छास्त्रत्वप्रसिद्ध्या व्याहतमेषां स्वरूपपरत्वम् । **अपिच** न ब्रह्मरूपप्रतिपादनपराणामेषामर्थवत्त्वं पश्यामः । नच रज्जुरियं न भुजङ्ग इति यथाकथंचिल्लक्षणया वाक्यार्थतत्त्वनिश्चये यथा भयकम्पादिनिवृत्तिः, एवं 'तत्त्वमसि' इतिवाक्यार्थावगमान्निवृत्तिर्भवति सांसारिकाणां धर्माणाम्; श्रुतवाक्यार्थस्यापि पुंसस्तेषां तादवस्थ्यात् । **अपिच** यदि श्रुतब्रह्मणो भवति सांसारिकधर्मनिवृत्तिः, कस्मात् पुनः श्रवणस्योपरि मननादयः श्रूयन्ते । तस्मात्तेषां वैयर्थ्यप्रसङ्गादपि न ब्रह्मस्वरूपपरा वेदान्ताः, किंत्वात्मप्रतिपत्तिविषयकार्यपराः । तच्च कार्यं स्वात्मनि नियोज्यं नियुञ्जानं नियोग इति च मानान्तरापूर्वतयाऽपूर्वमिति चाख्यायते । नच विषयानुष्ठानं विना तत्सिद्धिरिति स्वसिद्ध्यर्थं

वेदान्तकल्पतरुः ।

शब्दस्य गृह्यते, सिद्धेतु तद्यावर्तमानं स्वव्याप्यं सङ्गतिग्रहं व्यावर्तयतीत्यभिप्रेत्याह—**यत्र हीति । लोकेनेति । वृद्धैः ।** प्रयोगव्यापकवक्तृविवक्षाश्रोतृप्रतिपत्तीच्छयोरभावात्सिद्धे प्रयोगाभावमाह—**नचेति । रूपमात्रं** वस्तुमात्रम् । सर्वपदानां कार्यार्थत्वे सति पर्यायत्वमाशङ्क्याह—**तत्र किंचिदिति । कार्यार्थः** कार्यशेषः । **अत्र प्रयोगः**—गोपदं न कार्यानन्विते गोत्वे गृहीतसंबन्धं, तत्र वृद्धैरप्रयुक्तत्वात्, तुरगपदवदिति । एवं सर्वत्र सिद्धे वस्तुन्युत्तमवृद्धस्य शब्दप्रयोगाभावमुक्त्वा मध्यमवृद्धप्रवृत्तेर्व्युत्पत्तिलिङ्गभूतायास्तत्राभावाच्च तत्र न व्युत्पत्तिरित्याह—**अपिचेति ।** शास्त्रत्वेनेत्यादिहेतून्व्याचष्टे—**अपिचेत्यादिना । नच रज्जुरिति ।** नकारोऽयं सांसारिकधर्माणां **नच** निवृत्तिरिति उपरि संबन्धनीयः । **यथाकथंचिदिति ।** सिद्धपदार्थसंसर्गस्य नियोगाविनाभावादिहापि मा भैषीरिति नियोगं कल्पयित्वान्यपरादेव वाक्यात्सिद्धरूपार्थनिश्चय इत्यर्थः । **किंत्विति ।** आत्मप्रतिपत्तिर्विषयोऽवच्छेदको यस्य तत्तथा । **ननु** नियोगोऽपूर्वमिति प्राभाकरैर्वाक्यार्थो वर्ण्यते, स किमन्य एव कार्यो नेत्याह—**तच्चेति ।** कार्यपरेभ्यो वेदान्तेभ्यः कथं वस्तुसिद्धिरित्याशङ्क्य विध्याक्षेपलक्षणोपादानप्रमाणादित्याह—**नचेति ।** स्वप्रतीत्युपाधित्वेन विषयस्य स्वनिर्वर्तकत्वेन करणस्य कार्यं स्वाव-

कल्पतरुपरिमलः ।

तिक्षेपाभ्यां तद्भेदं यद्यपीत्यादिभाष्यसिद्धं दर्शयति—**अथवेति । लोकेन न प्रयुज्यन्ते** इत्ययुक्तम् । पामरजने निरर्थकसिद्धार्थपदसंघातप्रयोगस्य संभावितत्वादित्याशङ्क्य लोकेनेति पदं व्याचष्टे—**वृद्धैरिति । प्रेक्षावता** उत्तमवृद्धजनेनेत्यर्थः । **पर्यायत्वमाशङ्क्येति ।** न च कार्यान्विततदर्थविशेषपरत्वेनापर्यायत्वमुपपादयितुं शक्यम्; कार्यवाचिनि लिडादिपदे कार्यान्वितार्थान्तराभावेन कार्यान्विते पदानां शक्तिरित्युक्त्यसंभवादिति शङ्काभिप्रायः । कार्ये शक्तिरिति नियमः । तस्य नियमस्य कार्यवाचिपदानां तन्मात्रशक्त्या तदितरपदानां तदन्वितस्वस्वार्थशक्त्या च निर्वाह इति परिहाराभिप्रायः । **नियोगाविनाभावादिति ।** मध्यमवृद्धप्रवृत्तिलिङ्गापेक्षप्राथमिककार्यव्युत्पत्तिग्रहोपजीविनां पाश्चात्यव्यवहाराणाम् उपजीव्यानुसारेण कार्याविनाभावादित्यर्थः । **एतेन**—व्याकरणकोशाप्तवाक्यप्रसिद्धपदसमभिव्याहारैः सिद्धार्थेऽपि व्युत्पत्तिग्रहः संभवतीत्यपि शङ्का—**निरस्ता;** तेष्वपि प्राथमिकव्युत्पत्तिग्रहानुसारेण कार्यवाचिपदाध्याहारावश्यंभावात् । **ननु 'नच रज्जुरिय**मित्यादिर्निवृत्तिर्भवतीत्यन्तः सिद्धान्तिशङ्कानुवादग्रन्थः । तन्मध्ये कथं तदनभिमतनियोगाविनाभावोक्तिः । **नैष दोषः;** पूर्वपक्षिणापि संमतो हि दृष्टान्तीकर्तव्यः । **नच** तत्केवलसिद्धार्थपरमर्थवदिति पूर्वपक्षिणः संमतिरस्ति । तत्रापि कार्यवाचिपदाद्यध्याहाराभ्युपगमादिति पूर्वपक्ष्याशयानुसारेण **यथाकथंचिल्लक्षणयेति** टीकातद्व्याख्यानयोरवतारणाद्, रज्जुवाक्यस्य परमते कार्यपरत्वेऽपि रज्जुरियं न भुजङ्ग इति सिद्धार्थांश एव भयादिनिवृत्त्युपयोगि, नतु कुलधर्मतया परकल्पितः कार्यांश इति सिद्धार्थपरतत्त्वमस्यादिवाक्यदृष्टान्तत्वसङ्गतिः । **टीकायां**—स्वविषयस्य करणस्येत्यत्र स्वविषयस्येति पदं व्याचष्टे—**स्वप्रतीत्युपाधित्वेन विषयस्येति ।** लिडापूर्वं कार्यत्वेनाभिधेयं, कार्यत्वं च कृतिसाध्यत्वं, नचापूर्वस्य साक्षात्कृतिसाध्यत्वं संभवति, अतो यद्द्वारा तस्य कृतिसा-

शास्त्रेण ब्रह्म समर्प्यते । यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिशेषतया शास्त्रेण सम-

भामती ।

तदेव कार्यं स्वविषयस्य करणस्यात्मज्ञानस्यानुष्ठानमाक्षिपति । यथाच कार्यं स्वविषयाधीननिरूपणमिति ज्ञानेन विषयेण निरूप्यते, एवं ज्ञानमपि स्वविषयमात्मानमन्तरेणाशक्यनिरूपणमिति तन्निरूपणाय तादृशमात्मानमाक्षिपति, तदेव कार्यम् । **यथाहुः**—'यत्तु तत्सिद्ध्यर्थमुपादीयते आक्षिप्यते तदपि विधेयमिति तन्त्रे व्यवहारः' इति । विधेयता च नियोगविषयस्य ज्ञानस्य भावार्थतयानुष्ठेयता, तद्विषयस्य त्वात्मनः स्वरूपसत्ताविनिश्चितिः । आरोपिततद्भावस्य त्वन्यस्य निरूपकत्वे तेन तन्निरूपितं न स्यात् । तस्मात्तादृगात्मप्रतिपत्तिविधिपरेभ्यो वेदान्तेभ्यस्तादृगात्मविनिश्चयः । तदेतत्सर्वमाह—**यद्यपीति** । विधिपरेभ्योऽपि वस्तुतत्त्वविनिश्चय इत्यत्र निदर्शनमुक्तं—**यथा यूपेति** । 'यूपे पशुं बध्नाति' इति बन्धनाय विनियुक्ते यूपे तस्यालौकिकत्वात्कोऽसौ यूप इत्यपेक्षिते 'खादिरो यूपो भवति यूपं तक्षति यूपमष्टाश्रीकरोति' इत्यादिभिर्वाक्यैस्तक्षणादिविधिपरैरपि संस्काराविष्टं विशिष्टसंस्थानं दारु यूप

वेदान्तकल्पतरुः ।

च्छेदकज्ञाननिरूपणाय ज्ञायमानमात्मानमपेक्षते चेत्तर्हि न श्रौतत्वमात्मन इत्याशङ्क्य विध्याक्षिप्तस्य श्रौतत्वे गुरुसंमतिमाह—**यथाहुरिति । तत्सिद्ध्यर्थं** विधेयसिद्ध्यर्थम् । **उपादीयते** इत्यस्य व्याख्यानम्—**आक्षिप्यते इति** । ज्ञानस्य प्रमात्वात्प्रत्यक्षवन्न विधेयता, आत्मनश्च नित्यत्वात्तदयोग इत्याशङ्क्याह—**विधेयता चेति** । ज्ञानमिहोपासनं तच्च क्रियेत्यनुष्ठेयम् । आत्मनस्तु स्वरूपगतसत्ताविनिश्चितिरज्ञातज्ञप्तिर्विधेयतेति न विरोध इत्यर्थः । **ननु** वाग्धेनूपास्त्यादावियारोप्यस्य विधेयधीविषयत्वं किं न स्यादत आह—**आरोपितेति** । ब्रह्मास्मीति ज्ञाने यादृगर्थो भाति तद्भाव आरोपितो यस्य स तथा । तस्यान्यस्य ज्ञाननिरूपकत्वे तेन प्रतिभासमानार्थेन तज्ज्ञानं निरूपितं न स्यात् । नच सत्यां गतौ युक्त आरोप इति । इयंच **प्रतिपत्तिविधिविषयतयेति** भाष्यस्य व्याख्या । प्रतिपत्तिविधेर्नियोगस्य विषयभूतप्रतिपत्ति प्रत्यवच्छेद-

कल्पतरुपरिमलः ।

ध्यत्वं घटनीयं स धात्वर्थो यागदानहोमादिरनुबन्धोऽवच्छेदको विषय इति प्राभाकरैर्व्यवह्रियते । करणस्येति पदं व्याचष्टे—**स्वनिर्वर्तकत्वेन करणस्येति** । तदाहुः—'कृतितत्साध्यमध्यस्थो यागादिर्विषयो मतः । कार्ये यंघटिताकारे करणत्वेन संमतः ॥' इति । **न श्रौतत्वमात्मन इति । ननु** आत्मानमुपासीतेति श्रुतकर्मकारकविशिष्टा खलूपास्तिक्रिया विधिविषयत्वेनान्वेति, कथं तर्हि श्रुतस्यात्मनः कर्मकारकस्याश्रौतत्वशङ्का ? कथं च तस्य विध्याक्षिप्ततया श्रौतत्वनिर्वहणेन तत्समाधानम् ? नहि गामानयेत्यत्र श्रुतस्य गोः कर्मकारकस्य पिधेहीति प्रयोगे द्वारस्येवाक्षेप्यतास्ति । **उच्यते**; आत्ममात्रस्य विधिविषयक्रियाकर्मतयान्वयः श्रौतः, नतु भाष्योदाहृतसर्ववेदान्तसमाहृतविज्ञानानन्दादिस्वभावस्यात्मनः । तथाभूतात्मस्वरूपाभिप्राये शङ्कासमाधाने । **अतएव टीकायां**—तादृशमात्मानमाक्षिपतीति तादृगात्मप्रतिपत्तिविधिपरेभ्यो वेदान्तेभ्य इति चोक्तम् । **ननु** तादृक्स्वभावोऽपि विज्ञानमानन्दं ब्रह्मेत्यादिपदबोध्यः, **मैवम्**; कार्यान्विते पदानां व्युत्पत्तेः । कार्यान्वितार्थ एव पदसंघातोऽर्थवान् अन्यस्त्वनर्थक एव । एवंच ग्राहकग्रहणदशायां विज्ञानानन्दादिस्वभावस्योपास्तिनियोगेन सह प्रारब्धमन्विताभिधानं निर्वहति, आत्ममात्ररूपकर्मकारकावच्छिन्नोपास्तिक्रियाविषयविधौ पर्यवसिते पश्चात्पदान्तरैस्तद्विशेषणतया श्रवणस्यानुवादमात्ररूपत्वेन केवलं तत्तत्पदार्थस्मृतिमात्रहेतुत्वप्रसक्तेः । तस्मादुपास्तिनियोग एव प्रथमारब्धग्राहकग्रहणनिर्वाहार्थं पूर्वं ज्ञानानन्दादि स्वभावावच्छिन्नत्वमात्मकारकस्यापाद्य पश्चात्तद्विशिष्टोपास्तिक्रियाविषयो भवतीत्येवं विध्याक्षेपरूपोपादानप्रमाणप्रसादलभ्यैव ज्ञानानन्दादिरूपब्रह्मैक्यस्य प्रत्यगात्मनि तात्पर्येणानिश्चेयतारूपा विधेयता । एवमेव '**तथा द्रव्येषु गुणश्रुतिरुत्पत्तिसंयोगात्**' (जै. सू. अ. २ पा. २ सू. २५)'इति पूर्वतन्त्राधिकरणे "सोमारौद्रं चरुं निर्वपेत् शुक्लानां व्रीहीणा" मित्यत्र पृथक्पदाभ्यां विशेषणतया श्रुतयोर्व्रीहिद्रव्यशुक्लगुणयोरविवक्षामाशङ्क्य ग्राहकविध्याक्षेपबलात् तद्विवक्षा प्राभाकरैः समर्थिता । **श्रौतत्वे इति** । एवंच तद्विधेयमिति **गुरुग्रन्थस्य** प्रथमारब्धग्राहकग्रहणनिर्वाहाय यत्किञ्चिदद्वारेण विध्यन्वयितया शब्दबोध्यमित्यर्थ इति तात्पर्यम् । एवंहि विध्याक्षिप्तस्य श्रौतत्वे संमतिर्दर्शिता भवति । विध्याक्षेपरूपविधिव्यापारात्मकमुपादानं शब्दप्रमाणान्तर्भूतं, नतु पीनो देवदत्तो दिवा न भुङ्क्त इति लौकिकवाक्यार्थज्ञानमूलश्रुतार्थापत्तिवत् शाब्दप्रमोपजीवि तदनन्तरं प्रवर्तमानं प्रमाणान्तरमिति गुरुमतमर्यादा । **नन्वारोपितस्यापि** विषयतया निरूपकत्वमस्त्येवेत्याशङ्क्याह—**नच सत्यां गताविति** । गगनस्य तत्तत्कर्णपुटावच्छेदेन प्रतिपुरुषव्यवस्थितश्रोतृभाववदेकस्यैव व्यापकस्य ब्रह्मचैतन्यस्य तत्तदविद्योपाध्यवच्छेदेन प्रतिशरीरं व्यवस्थितप्रत्यगात्मभाव उपपद्यत इत्येवं गतौ सत्यां वाग्धेनुत्वादिवदारोपो न युक्त इत्यर्थः । **अपूर्वदेवतेति** । सौर्यादावुदीच्याङ्गजन्योपकारसाहित्यायाधिकारविध्याक्षेप्यमौपादानिकं यदुत्पत्त्यपूर्वं तद्विषयमिहापूर्वपदं, नत्वधिकारापूर्वविषयम्; प्रस्तुते

र्यन्ते, तद्वत्। कुत एतत्? प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य। तथाहि शास्त्रतात्पर्यविद आहुः—'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इति। 'चोदनेति क्रियायाः प्रवर्तकं वचनम्'। 'तस्य ज्ञानमुपदेशः—' (जै० सू० १।१।५) 'तद्भूतानां क्रियार्थेन समाम्नायः—' (जै० सू० १।१।२५) 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्—' (जै० सू० १।२।१) इतिच। अतः पुरुषं क्वचिद्विषयविशेषे प्रवर्तयत्कुतश्चिद्विषयविशेषान्निवर्तयच्चार्थवच्छास्त्रम्। तच्छेषतया चान्यदुपयुक्तम्। तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्त्वं स्यात्। सति च विधिपरत्वे यथा

भामती।

इति गम्यते। एवमाहवनीयादयोऽप्यवगन्तव्याः। प्रवृत्तिनिवृत्तिपरस्य शास्त्रत्वं न स्वरूपपरस्य, कार्ये एव च संबन्धो न स्वरूपे, इति हेतुद्वयं भाष्यवाक्येनोपपादितम्—**प्रवृत्तिनिवृत्तिप्रयोजनत्वात्** इत्यादिना **तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्त्वं स्यात्** इत्यन्तेन। नच स्वतन्त्रं कार्यं नियोज्यमधिकारिणमनुष्ठातारमन्तरेणेति नियोज्यभेदमाह—**सति च विधिपरत्व इति**। 'ब्रह्म वेद ब्रह्मैव भवति' इति सिद्धवदर्थवादादवगतस्यापि ब्रह्मभवनस्य नियोज्यविशेषाकाङ्क्षायां ब्रह्मबुभूषोर्नियोज्यविशेषस्य रात्रिसत्रन्यायेन प्रतिलम्भः।

वेदान्तकल्पतरुः।

कत्वेन विषयतयेति भाष्यार्थः। **एवमाहवनीयादयोऽपीति**। 'यदाहवनीये जुहुती'ति विहिते क आहवनीय इति वीक्षायां 'वसन्ते ब्राह्मणोऽग्नीनादधीते' त्यादिविधिभिः संस्कारविशिष्टोऽग्निराहवनीयो गम्यते, तथाऽपूर्वदेवतास्वर्गादिकं विधिपरेणैव शास्त्रेण समर्थ्यते। श्लोकोक्तहेतुद्वयं भाष्येण सङ्गमयति—**प्रवृत्तिनिवृत्तिपरस्येति**। **'तद्भूतानाम्'** (जै. अ. १ पा. १ सू. २५) इति सूत्रोदाहरणेन कार्यान्विते ऽर्थे शब्दसङ्गतिर्न सिद्ध इत्युक्तम्। **'आम्नायस्य'** (जै. अ. १ पा. १ सू. २५) इत्येतद्विहायेतरवाक्यैः प्रवृत्त्यादिपरस्य शास्त्रत्वमुक्तम्। तेन तु सिद्धरूपपरस्य न शास्त्रत्वमुक्तत्। **तस्य** वेदस्य, कर्मावबोधो नियोगज्ञानं दृष्टं प्रयोजनं। चोदनासूत्रे (जै. अ. १ पा. १ सू. २) **चोदनेति** शब्देन **क्रियाया** नियोगस्यानुष्ठापकं वचनमाहुरिति। **तच्चेषु** पदार्थेषु **भूतानां** वर्तमानानां **क्रिया** कार्य, तदर्थत्वेन **समाम्नायः** समुच्चारणमित्यर्थः। **नचेति**। नियोगस्य स्वकीयत्वेन बोद्धारं **नियोज्यम् अधिकारिणं** कर्मणि स्वामिनं, तत्रैव कर्तारम् **अनुष्ठातारम्** इति। **नियोज्यभेदो** नियोज्यविशेषः। अमृतत्वकाम इति अश्रवणान्नियोज्यसिद्धिमाशङ्क्याह—**ब्रह्म वेदेति**। भवतिना सिद्धरूपेणावगतस्य फलस्य साध्यत्वाभिव्यक्त्यर्थमेवंकामशब्दवाच्यनियोज्यविशेषाकाङ्क्षायां विपरिणामेन ब्रह्म बुभूषुर्विद्यादिति वाक्यार्थः स्यादित्यर्थः। **रात्रिसत्रेति**। **चतुर्थे चिन्तितम्-'क्रतौ फलार्थवादमङ्गवत्कार्ष्णाजिनिः'** (जै. अ. ४ पा. ३ सू. १७)। 'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ती'ति श्रूयते। तत्र रात्रिशब्देनायुर्ज्योतिरित्यादिवाक्यविहिताः सोमयागविशेषा उच्यन्ते। किमत्र स्वर्ग एवाधिकारिविशेषणमुत प्रतिष्ठेति संशयः। तत्रैवंकाम इत्यश्रवणाद्विधिशक्तिलभ्यः स्वर्ग एव विशेषणं, संदेहे हि वाक्यशेषस्वीकारः, न निश्चये। निश्चितश्चेह सर्वाभिलषितः स्वर्गो विधिसामर्थ्यान्नियोज्यविशेषणम्। या तु प्रतिष्ठाविषया श्रुतिः सापि लक्षणया स्वर्गपरैव कल्प्यत इति प्राप्तं। **क्रतौ** रात्रिसत्रादौ न प्रतिष्ठादि विवक्षितमित्येतावन्मात्रेणाङ्गवदिति सूत्रे प्रयाजाद्यङ्गफलार्थवादोदाहरणं, नतु तद्वत्पदार्थत्वमस्ति रात्रिसत्राणाम्। एवं प्राप्ते—उच्यते; **'फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात्'** (जै. अ. ४ पा. ३ सू. १८) प्रतिष्ठाफलस्य निर्देशात्तदेवाधिकारिविशेषणम्। **यत्तु** विधिशक्त्या स्वर्ग **इति**। **तन्न**; मुख्यार्थश्रुतिपदानुगुण्येन विधिशक्तौ पर्यवसितायामानुमानिकस्वर्गकल्पनानवकाशात्। तस्माद्वाक्यशेषस्थमेव फलमिति। विश्वजिन्न्यायेनेति वक्तव्ये विश्वजिति

कल्पतरुपरिमलः।

गुरुमते तस्यैव लिङर्थस्य विधितयान्यविधिपरेण शास्त्रेण सिद्ध्यभावात्। **एवंकाम इत्यश्रवणादिति**। वर्तमानापदेशात् सिद्धरूपैव प्रतिष्ठा प्रतीयते, न साध्यरूपेति तस्या अपि फलत्वं कल्प्यं, ततो वरं विश्वजिन्न्यायेन (जै. अ. ४ पा. ३ सू. १५–१६) विधिशक्त्यवगतस्वर्गफलकल्पनमिति भावः। **प्रतिष्ठाफलस्य निर्देशादिति**। अत्यन्ताश्रुतफलकल्पनाद्वरं श्रुताया एव प्रतिष्ठाया विपरिणामेन फलत्वकल्पनम्। तथाच यत्तदोर्व्यत्यासेन योजनया प्रतितिष्ठन्तीत्यत्र सनर्थान्तर्भावेन च ये प्रतितिष्ठासन्ति त एता रात्रीरुपेयुरिति वाक्यविपरिणामः कार्य इति भावः। **नैमित्तिकाधिकारे इति**। "यः सत्रायावगुरते स विश्वजिता यजेतेति" विहितो विश्वजिन्नैमित्तिकाधिकारः। **ननु 'पितृयज्ञः स्वकालत्वादनङ्गं स्या'**(जै. अ. ४ पा. ४ सू. १९) **"दङ्गं वा समभिव्याहारादिति"** याज्ञिकाभिमतद्वितीयपक्षानुसारेण पितृयज्ञो यदि दर्शाङ्गमिष्यते, तदा सोऽपि नियोज्याकाङ्क्षाराहित्यात् स्थिरोदाहरणं न स्यादित्याशङ्कापरिहाराय तदनङ्गत्वव्यवस्थापकाधिकरणानुक्रमणं। दर्शप्रकरणपठितत्वे प्रकरणात्तदङ्गत्वमेव स्यादित्य**नारभ्याधीतत्वोक्तिः**। **ननु** "पूर्वेद्युरमावास्यायां वेदिं करोती"ति कर्मणीव ऐन्द्रं पयोऽमावास्यायामिति कालेऽप्यमावास्या-

स्वर्गादिकामस्याग्निहोत्रादिसाधनं विधीयते, एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति युक्तम् । नन्विह जिज्ञास्यवैलक्षण्यमुक्तम्, कर्मकाण्डे भव्यो धर्मो जिज्ञास्य इह तु भूतं नित्यनिवृत्तं ब्रह्म जिज्ञास्यमिति; तत्र धर्मज्ञानफलादनुष्ठानापेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति । नार्हत्येवं भवितुम्; कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात् । 'आत्मा वा अरे द्रष्टव्यः' (बृह० २।४।५) इति । 'य आत्माऽपहतपाप्मा – सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छान्दो० ८।७।१)। 'आत्मेत्येवोपासीत' (बृ० १।४।७) 'आत्मानमेव लोकमुपासीत' । (बृ० १।४।१५) 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड० ३।२।९)। इत्यादिविधानेषु सत्सु कोऽसावात्मा किं तद्ब्रह्म इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः—नित्यः सर्वज्ञः सर्व-

भामती ।

पिण्डपितृयज्ञन्यायेन तु स्वर्गकामस्य नियोज्यस्य कल्पनायामर्थवादस्यासमवेतार्थतयात्यन्तपरोक्षा वृत्तिः स्यादिति । ब्रह्मभावश्चामृतत्वमिति अमृतत्वकामस्य इत्युक्तम् । अमृतत्वं चामृतत्वादेव, न कृतकत्वेन शक्यमनित्यमनुमातुम्, आगमविरोधादिति भावः । उक्तेन धर्मब्रह्मज्ञानयोर्वैलक्षण्येन विध्यविषयत्वं चोदयति—**नन्विति** । परिहरति—**नार्हत्येवमिति** । अत्र चात्मदर्शनं न विधेयम् । तद्धि दृशेरुपलब्धिवचनत्वात् श्रावणं वा स्यात् प्रत्यक्षं वा । प्रत्यक्षमपि लौकिकमहंप्रत्ययो वा, भावनाप्रकर्षपर्यन्तजं वा । **तत्र श्रावणं न विधेयं**; स्वाध्यायविधिनैवास्या प्रापितत्वात्, कर्मश्रावणवत् । **नापि लौकिकं प्रत्यक्षं** तस्य नैसर्गिकत्वात् । **नचौपनिषदात्मविषयं भावनाधेयवैशद्यं विधेयं**; तस्योपासनाविधानादेव वाजिनवदनुनिष्पादितत्वात् । तस्मादौपनिषदात्मोपासनामृतत्वकामं नियोज्यं प्रति विधीयते । 'द्रष्टव्यः'

वेदान्तकल्पतरुः ।

नैमित्तिकाधिकारे फलकल्पना कृत्वाचिन्तयेति पिण्डपितृयज्ञः स्विरोदाहरणत्वेनोदाहृतः । **असमवेतार्थतयेति** । अश्रूयमाणत्वेन ब्रह्मभवनशब्देनासमवेतः स्वर्गोऽर्थस्तत्परतयेत्यर्थः । यद्यपि ब्रह्मभवनस्य फलत्वेऽप्येवंकाम इति लक्षणास्तीति परोक्षवृत्तिता तुल्या; तथापि श्रुतं ब्रह्मभवनं न हीयते, हीयते तु पूर्वपक्षे । तदिदमुक्तम्—**अत्यन्तेति । पिण्डपितृयज्ञन्यायोऽनुक्रम्यते । चतुर्थे एवं निरणायि–'पितृयज्ञः स्वकालत्वादनङ्गं स्यात्'** । (जै. अ. ४ पा. ४ सू. १९) 'अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ती' त्यत्रानारभ्याधीतवाक्ये श्रुतः पिण्डपितृयज्ञः क्रत्वर्थः पुरुषार्थो वेति संशये कर्मवाच्यमावास्याशब्दसमभिव्याहारात्तदङ्गत्वम् । यद्यपि कालस्यापि साधारणोऽयं शब्दः; तथापि फलकल्पनापरिहाराय कर्मवाच्येव । अतः क्रत्वर्थ इति प्राप्ते—सिद्धान्तः; कालकर्मसाधारणोऽप्यमावास्याशब्दोऽपराह्णशब्दसमानाधिकृत इह कालपर एव । **नच** साधारण्यम्; काले रूढत्वात्कर्मणि च तत्संबन्धेन लाक्षणिकत्वात् । तस्मात्कर्मसमभिव्याहाराभावाद्विश्वजिन्न्यायेन (जै. अ. ४ पा. ३ सू. १५) स्वर्गकामिनियोज्यकल्पनया स्वर्गफलः पिण्डपितृयज्ञ इति । **ननु** ज्ञानविधिर्यदि ब्रह्मभावफलः, कथं तर्हि भाष्येऽमृतत्वकामस्येत्युक्तं ? तत्राह—**ब्रह्मभावश्चेति** । अमृतत्वशब्देन ब्रह्मभावनिर्देशस्य प्रयोजनमाह—**अमृतत्वं चेति** । अत्र भाष्यकारेण ब्रह्मज्ञानं विधेयमिति निर्देशाद् द्रष्टव्य इति विध्युदाहृतेश्च प्रमाणज्ञानविध्यङ्गीकारेण पूर्वपक्ष इति भ्रमः स्यात्, तन्निवर्तयति—**अत्रचेत्यादिना । दृशेरिति** । द्रष्टव्य इति वाक्योपात्तदृशिधातोरुपलब्धिवचनत्वेनोपासनानभिधायकत्वादित्यर्थः । स्वाध्यायविधेरर्थावबोधपर्यन्तत्वात्तेनैव श्रवणजन्यज्ञानस्य प्रापितत्वादित्यर्थः । भावनया **विधेयं** जन्यं वैशद्यं यस्य तत्प्रत्यक्षं तथा । **वाजिनवदिति** । यथामिक्षार्थविहितदध्यानयनाद्वाजिनमप्रयोजकमानुषङ्गिकतया जायते, एवमदृष्टरूपामृतत्वाय विहितादुपासनात्साक्षात्कारो नान्तरीयकतया जायत इति तदुत्पादनं न विधेयमित्यर्थः । **चतुर्थे स्थितम्—'एकनिष्पत्तेः सर्वं समं स्यात्'** (जै. अ. ४ पा. १ सू. २२) । ''तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति'' श्रूयते । तत्र संशयः । किमामिक्षैव दध्यानयनं प्रयुङ्क्तेति वाजिनमपीति । तत्रैकस्माद्दध्यानयनात्पयसः सकाशादामिक्षावाजिनयोर्निष्पत्तेः सर्वमामिक्षादि प्रयोजकं स्यादिति प्राप्ते—सिद्धान्तः; **'संसर्गरसनिष्पत्तेरामिक्षा वा प्रधानं स्यात्'** (जै. अ. ४पा. १ सू. २३) । अत्र हि दधिसंसृष्टं पय एव प्रकृतं देवतासंबन्धि निर्दिश्यते सा वैश्वदेवीति, न पुनस्ततो निष्पन्नं किंचित्, **तत्र** नयतेर्द्विकर्मत्वात्प्रति दध्यानीयते तत्पयआनयनस्य संस्कार्यम् । संस्कार्यमेव प्रयोजकम् । संस्कृतस्य च पयस

कल्पतरुपरिमलः ।

शब्दो दृश्यत इत्याशङ्क्याह—**यद्यपीति । ननु** यदि प्रकृतं सा वैश्वदेवीति तत्पदेन परामर्शनीयं, तर्हि दध्यपि प्रकृतमिति तत्परामर्शनीयं कुतो न स्यात् ? तस्माद्विनिगमनाविरहादुभयं विहायामिक्षां दधिपयोभ्यां निष्पन्नं द्रव्यान्तरमङ्गीकृत्य तत्परामर्शित्वकल्पनं युक्तम्; सर्वनाम्नः प्रकृतपरामर्शित्वासंभवेन प्रकरिष्यमाणपरामर्शित्वस्याथैष ज्योतिरित्यादौ दृष्टत्वादित्याशङ्क्याह—**तत्र नयतेरिति** । द्विकर्मकधात्वर्थान्वयि पयोऽपि कर्मैव तत्र कस्यानयनेन किं संस्कार्यमिति संदेहे दध्या-

गतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्दं ब्रह्म इत्येवमादयः । तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यतीति । कर्तव्यविध्यननुप्रवेशे वस्तुमात्रकथने हानोपादानासंभवात् सप्तद्वीपा वसुमती राजासौ गच्छतीत्यादिवाक्यवद्वेदान्तवाक्यानामानर्थक्यमेव स्यात् । ननु वस्तुमात्रकथनेऽपि रज्जुरियं नायं सर्प इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टं, तथेहाप्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात् । स्यादेतदेवं, यदि रज्जुस्वरूपश्रवण इव सर्पभ्रान्तिः संसारित्वभ्रान्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्तेत, नतु निवर्तते; श्रुतब्रह्मणोऽपि यथापूर्वं सुखदुःखादिसंसारिधर्मदर्शनात्, 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृह० २।४।५) इति च श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्विधिदर्शनात् । तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति । अत्राभिधीयते—न, कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात् । शारीरं वाचिकं मानसं च कर्म श्रुतिस्मृति-

भामती ।

इत्यादयस्तु विधिसरूपा न विधय इति । तदिदमुक्तम्—**तदुपासनाच्चेति** । अर्थवत्तया मननादिप्रतीत्या चेत्यस्य शेषः प्रपञ्चो निगदव्याख्यातः । तदेकदेशिमतं दूषयति—**अत्राभिधीयते—न** एकदेशिमतम् । कुतः ? **कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्** । पुण्यापुण्यकर्मफले सुखदुःखे । तत्र मनुष्यलोकमारभ्याब्रह्मलोकात्सुखस्य तारतम्यमधिकाधिकोत्कर्षः । एवं मनुष्यलोकमारभ्य दुःखतारतम्यमाचावीचिलोकात् । तच्च सर्वं कार्यं च विनाशि च ।

वेदान्तकल्पतरुः ।

आमिक्षात्वात् तस्याश्च स्त्रीत्वात्स्त्रीलिङ्गमविरुद्धम् । **ननु** यदि दधिसंस्कृतं पय एव रूपभेदेऽप्यामिक्षा भूत्वा दध्यानयनं प्रयुञ्जीत, तर्हि वाजिनमपि दधिसंयुक्तं पय एवेति किं न प्रयुञ्जीत । **नेत्युच्यते संसर्गरसनिष्पत्तेः**; दधिसंसृष्टस्य पयसो यो रसः तस्यामिक्षायामुपलम्भात्, रूपभेदेऽपि तस्यामस्ति संसृष्टं पय इत्यनुमीयते; रूपाभेदेऽपि तक्रपयसोरिव रसभेदोपलम्भात् वाजिनेन; तस्य कटुतिक्तरसत्वादिति । हेतुद्वयविवरणेन पूर्वकृतेनोत्तरग्रन्थस्य व्याख्यातत्वमाह—**अर्थवत्तयेति 'वेदान्ता यद्युपास्तिं विदधति, विधिसंशोधिमीमांसयैव प्राच्या तर्हीरितार्था इति विफलमिदं ब्रह्मजिज्ञासनं स्यात् । अप्यत्युच्चातिनीचो जनिमृतिभयभाग्वैधधीसाध्यमोक्षः कर्मोत्थैः स्वर्गपश्वाद्यतिमधुरफलैः कोऽपराधः कृतो नः ॥' वेदान्ता** यद्युपासनाविधिपराः, तर्हि विहितोपासनायाः पक्षमासादिकालमिततया तत्साध्यफलमपि सातिशयमनित्यं च स्यादतो न विधिपरत्वं वेदान्तानामिति तात्पर्यम् **अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्त** इत्यन्तस्य भाष्यस्य दर्शयति—**पुण्यापुण्येत्यादिना** । भाष्ये यद्विषया जिज्ञासेति धर्मस्य प्राचि तन्त्रे विचारितत्वोक्तिरुपास्तेरपि विहिताया धर्मत्वेन पुनरविचार्यत्वाय । अधर्मोपीत्यधर्मोक्तिः पुण्यफलभोगावसान इवोपास्तिफलभोगसमाप्तावधर्मफलं भोक्तव्यमिति दर्शनाय । चोदनालक्षणत्वोक्तिर्यागवद्विहितोपास्तेर्धर्मत्वार्थम् । एवं शरीरवागित्यादिविशेषणानि कर्मफलवदुपास्तिफलस्य शरीरोपभोग्यत्वादि प्रसञ्जयितुम् । संपतत्यनेनास्माल्लोकादमुं लोकमिति संपातः कर्म । **इष्टं** श्रौतम् । **पूर्तं** स्मार्तं वाप्यादि । **दत्तं** दानमिति ।

कल्पतरुपरिमलः ।

नयनेन पयः संस्कार्यमिति पयसः प्रधानकर्मत्वद्योतनाय कर्मण्यपि तस्मिन् सप्तमीप्रयोगः । यच्च प्रधानं तदेव सर्वनाम्ना परामर्शनीयम् । अतः पयःपरामर्शितच्छब्दसामानाधिकरण्यादामिक्षाशब्दो दध्यानयनेन संस्कृतस्य पयस एव वाचको, न तदुत्पन्नस्य द्रव्यान्तरस्येत्यवसीयत इत्याशयः । **रूपभेदेऽपि** द्रवत्वकठिनत्वधर्मभेदेऽपि । **तर्हि वाजिनमपीति** । दधिसंस्कृतं पय एवामिक्षावाजिनात्मतया रूपद्वयं प्राप्तमित्यपि कल्पनोपपत्तेरामिक्षावद् वाजिनमपि पयस्त्वाविशेषाद् दध्यानयनस्य प्रयोजकं भवेदेव । ततश्च वाजिनापचारे पयोन्तरमानीय दध्यानयनेन संस्कृत्य वाजिनं निष्पादनीयमिति शङ्कार्थः । **तस्यामस्तीति** । तादात्म्येनेति शेषः । **रूपाभेदेऽपि** द्रवत्वधर्माभेदेऽपि । एतदुपलक्षणम् विनापि दध्यानयनम् अतिपाकेन पिण्डीभूतस्य पयसो रूपभेदेऽपि भेदाभावादित्यपि द्रष्टव्यम् । एवं रसानुवृत्तेरेवाभेदप्रयोजकत्वादामिक्षायामेव पयःपरामर्शितत्पदसामानाधिकरण्यं दृश्यते न वाजिने इति भावः । यद्विषया जिज्ञासेत्यादिभाष्यगतविशेषणैः प्रतीयमानवेदान्तानामुपास्तिविधिपरत्वे प्राचीनतन्त्रे विचारितत्वेनात्र विचारो विफलः स्यादित्युक्ति**र्वेदान्ता यद्युपासामिति** श्लोकपूर्वार्धेन संगृहीता, सा न क्षोदक्षमा; वैधफलविषयतया स्वर्गदेवतावद् विधिशेषैः ब्रह्मस्वरूपमात्रस्य प्राचीनतन्त्रन्यायैः कथंचित्सिद्धिसंभवेऽपि तन्निर्गुणत्वादेर्विद्याभेदाभेदोपसंहाराभ्यामुपसंहारस्य विशेषस्य चैतत्तन्त्रव्युत्पादयिष्यमाणन्यायैकनिर्णेयस्य ततो निर्णयालाभात्, अतोऽभ्युच्चयमात्रं सा युक्तिः, मूलयुक्तिस्तु श्लोकोत्तरार्धसंगृहीता मोक्षस्य सातिशयत्वानित्यत्वापत्तिरित्येतत् सूचयितुं तत्रैव भाष्यस्य तात्पर्यं दर्शयति टीकाकार इत्यवतारयति—**वेदान्ता यद्युपासनाविधिपरा इति । अधर्मफलं भोक्तव्यमिति** । "तद्य इह कपूयचरणा" इत्यादिश्रुत्या धर्मफलभोगानन्तरं कदाचिद-

भामती ।

आत्यन्तिकं त्वशरीरत्वमनतिशयं स्वभावसिद्धतया नित्यमकार्यमात्मज्ञानस्य फलम् । तद्धि फलमिव फलं; अविद्यापनयमात्रेणाविर्भावात् । **एतदुक्तं भवति**—त्वयाप्युपासनाविधिपरत्वं वेदान्तानामभ्युपगच्छता नित्यशुद्धबुद्धत्वादिरूपब्रह्मात्मता जीवस्य स्वाभाविकी वेदान्तगम्यास्थीयते । सा चोपासनाविषयस्य विधेर्न फलं; नित्यत्वादकार्यत्वात् । नाप्यनाद्यविद्यापिधानापनयः ; तस्य स्वविरोधिविद्योदयादेव भावात् । नापि विद्योदयः; तस्यापि श्रवणमननपूर्वकोपासनाजनितसंस्कारसचिवादेव चेतसो भावात् । उपासनासंस्कारवदुपासनाऽपूर्वमपि चेतःसहकारीति चेत्, दृष्टं च खलु नैयोगिकं फलमैहिकमपि, यथा चित्राकारीर्यादिनियोगानामनियतनियतफलानाम् । न; गान्धर्वशास्त्रोपासनावासनाया इवापूर्वानपेक्षायाः षड्जादिसाक्षात्कारे वेदान्तार्थोपासनावासनाया जीवब्रह्मभावसाक्षात्कारेऽनपेक्षाया एव सामर्थ्यात् । तथाचामृतीभावं प्रत्यहेतुत्वादुपासनापूर्वस्य, नामृतत्वकामस्तत्कार्यमवबोद्धुमर्हति । अन्यदिच्छत्यन्यत्करोतीति

वेदान्तकल्पतरुः ।

आत्यन्तिकमिति । देवदत्तस्यात्यन्तिकमशरीरत्वं देवदत्तशरीरप्रागभावासमानकालीनो देवदत्तशरीरध्वंसः, सर्वोपाधिप्रत्यस्तमयोपलक्षितं स्वरूपमिति यावत् । विधेयोपास्तिवादिनं प्रति तत्फलस्य मोक्षस्यानित्यत्वादिप्रसञ्जनमिष्टप्रसङ्ग इत्याशङ्क्याह—**एतदुक्तमिति** । उपास्तिविधेः फलं ब्रह्मात्मत्वमुताविद्यानिवृत्तिर्विद्योदयो वेति विकल्प्य क्रमेण निराकरोति—**त्वयापीत्यादिना** । उपासनापूर्वमपि चेतःसहकार्यतश्च विध्यवकाश इत्यर्थः । ऐहिकस्य मर्दनसुखवन्न विधिफलत्वमित्याशङ्क्याह—**दृष्टं चेति** । कारीर्यादिनियोगा इह जन्मनि नियतसस्यर्द्ध्यादिफलाः, चित्रादिनियोगफलं पश्वादि भुवि भोग्यमपीह वा जन्मान्तरे वा भवति । **तत्कार्यमिति** । तदपूर्वकर्तव्यत्वेनावबोद्धुं नार्हतीत्यर्थः । अपूर्वं चेन्न साक्षात्कारोपयोगि, तर्ह्युपासनक्रियैव

कल्पतरुपरिमलः ।

धर्मफलभोगस्याप्युक्तत्वादिति भावः । इदमभ्युच्चयमात्रम्; अहंग्रहोपासनाभिस्तत्फलप्राप्तेः प्रागेव सर्वपापक्षयस्याङ्गीकृतत्वात् । **देवदत्तशरीरेति** । देवदत्तशरीरासमानकालीनत्वं प्रलयकालोत्पन्ने तदीयशरीरध्वंसेऽप्यस्तीति तद्वारणाय **प्रागभावविशेषणम्** । शरीरप्रागभावासमानकालीनत्वं चरममुक्तशरीरध्वंसादन्यत्र न संभवतीत्यव्याप्तिवारणाय**आद्यदेवदत्तविशेषणम्** । देवदत्तमुक्तिकाले तदन्यस्यापि कस्यचित्संसारिणः संभवति देवदत्तशरीरप्रागभावासमानकालीनः शरीरध्वंस आत्यन्तिको माभूदिति **द्वितीयदेवदत्तविशेषणम्** । एवमपि देवदत्तस्योपान्त्यशरीरध्वंसो यद्यन्त्यशरीरोत्पत्तिकाले तदुत्पत्त्यनन्तरं वा स्यात्, तदा सोऽप्यात्यन्तिको भवेदिति तद्वारणाय **शरीरतत्प्रागभावासमानकालीनत्वं** विवक्षितम् । **ननु**—न आत्यन्तिकमशरीरत्वम् इत्थं ध्वंसरूपतया निर्वक्तुमयुक्तम्; तस्य साध्यत्वेन वैधोपासनाफलत्वप्रसङ्गात्, किंतु भाष्यटीकोक्तप्रकारेण तत्फलत्वासंभवनिर्वाहाय शरीरावभासकालेऽप्यनुवर्तमानस्तन्मिथ्यात्वशरीरघटको यस्तदत्यन्ताभावस्तद्रूपो वाच्यः, अन्यथा भाष्यटीकाविरोधः स्यादिति—**चेत्, उच्यते**; यद्यात्यन्तिकाशरीरत्वस्य वैधफलत्वनिर्वाहायात्यन्ताभावत्वं परित्यज्य विद्योदयसमनन्तरभाविध्वंसरूपत्वं पूर्वपक्षी शङ्केत, तदापि तस्य न वैधफलत्वप्रत्याशा । शरीरध्वंसमात्रस्यापुरुषार्थत्वेन शरीरस्यान्येषां चोपाधीनां ध्वंसेनोपलक्षितस्य ब्रह्मानन्दस्यैव पुरुषार्थत्वात्तस्य च नित्यत्वादिति दर्शयितुं ध्वंसपक्षोऽप्युपन्यस्तः । तथैव च तात्पर्यं **सर्वोपाधी**त्यग्रिमवाक्येन स्फुटीकृतम् । **ननु**—ब्रह्मानन्दस्य नित्यप्राप्तत्वेऽपि कर्णगतरुचकवद्भ्रान्त्याऽनवाप्तकल्पस्यावाप्त्या ऽमुख्यफलत्वमभ्यधायि टीकायां, तस्य मुख्यफलत्वमप्युपपादयितुं शक्यम् 'यस्मिन्सत्यग्रिमक्षणे यस्य सत्त्वं यद्व्यतिरेके चासत्त्वं तत्तज्जन्यमिति' लक्षणानुसारेण । अस्ति हि विद्योदयात्प्राङ् मम निरतिशयानन्दो नास्ति न प्रकाशत इति व्यवहारालम्बनं रजते रजतत्वाभाववद् भ्रान्तिसिद्धं विद्यानिवर्त्यनिरतिशयानन्दाभावरूपं तदसत्त्वम् । न च प्रतियोगिव्यधिकरणं प्राक् तदसत्त्वं यस्यास्ति तथाभूतमेव जन्यं वैधफलमिति नियमः; अतथाभूतस्यापि दुःखप्रागभावपरिपालनादेः प्रायश्चित्तादिफलत्वसंप्रतिपत्तेः, तस्माद् ब्रह्मानन्दस्य नित्यत्वेऽपि वैधोपासनाफलत्वमुपपद्यत' इति तन्नित्यत्वेन तत्फलत्वाभावोपपादनं नोपपद्यत इति—**चेत्, उच्यते**; प्राक्सिद्धस्य फलत्वं द्वेधा, निवृत्तिप्रसक्तौ परिपाल्यत्वेन वा, असत्त्वभ्रान्तौ तदपनयेन वा । **तत्राद्यमेव** लौकिकेन वैदिकेन वा कर्मणा भवति, **द्वितीयं तु** विद्ययैव । सा च विद्यात्राविहितोपासनया षड्जादिसाक्षात्कारवत्स्वयमेव भवतीति विध्यनपेक्षा टीकायामेवोपपादिता । तस्माद्युक्तमेव भ्रान्त्यानवाप्तकल्पस्य ब्रह्मानन्दस्य नोपासनाविधिफलत्वमिति । **कारीर्यादिनियोगा इति** । "यदि वर्षेत्तावत्येव होतव्यं, 'यदि न वर्षेत् श्वोभूते हविर्निर्वपेत्' इत्यादिलिङ्गात् कारीरी तात्कालिकसस्यार्थवृष्टिहेतुत्वादैहिकफला । आदिशब्देन आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुं ज्योगामयाव्यग्निं वा एतस्य शरीरं गच्छति सोमं रसो यस्य ज्योगामयत्यग्नेरेवास्य शरीरं निष्क्रीणाति सोमाद्रसमुत यदीतासुर्भवति जीवत्येवे"त्यादिश्रुतिविहितानि तच्छरीरगतव्याधिनिवृत्त्याद्यर्थानि कर्माणि गृह्यन्ते । **ज्योगामयावी** दीर्घरोगी । **चित्रादिनियोगफलमिति** । **इदं चतुर्थे योगसिद्ध्यधिक-**

भामती।

हि विप्रतिषिद्धम्। नच तत्कामः क्रियामेव कार्यमवगमिष्यति नापूर्वमिति—सांप्रतम्; तस्या मानान्तरादेव तत्साधनत्वप्रतीतेर्विधेर्वैयर्थ्यात्। नचावघातादिविधितुल्यता; तत्रापि नियमापूर्वस्यान्यतोऽनवगतेः। नच ब्रह्मभूयादन्यदमृतत्वमार्थवादिकं किंचिदस्ति, येन तत्काम उपासनायामधिक्रियेत, विश्वजिन्न्यायेन तु स्वर्गकल्पनायां तस्य सातिशयत्वं क्षयित्वं चेति न नित्यफलत्वमुपासनायाः। तस्माद्ब्रह्मभूयस्याविद्यापिधानापनयमात्रेणाविर्भावात्, अविद्यापनयस्य च वेदान्तार्थविज्ञानादवगतिपर्यन्तादेव संभवात्, उपासनायाः संस्कारहेतुभावस्य संस्कारस्य च साक्षात्कारोपजनने मनःसाचिव्यस्य च मानान्तरसिद्धत्वात्, 'आत्मेत्येवोपासीत' इति न विधिः, अपितु विधिसरूपोऽयम्। यथोपांशुयाजवाक्ये 'विष्णुरुपांशु यष्टव्यः' इत्यादयो विधिसरूपा न विधय इति तात्पर्यार्थः। श्रुतिस्मृतिन्यायसिद्धमित्युक्तं, तत्र श्रुतिं

वेदान्तकल्पतरुः।

तदर्थं विधीयतां, नेत्याह—**नच तत्काम इति**। नन्ववघातवदुपास्तावप्यस्तु नियमापूर्वं, नेत्याह—**नच ब्रह्मभूयादिति**। नेह परमापूर्ववन्नियमापूर्वसाध्यमस्ति; ब्रह्मभावस्य नित्यत्वादित्यर्थः। **विश्वजिन्न्यायेनेति**। 'विश्वजिता यजेते'त्यायश्रुताधिकारं लिङ्गप्रकरणालब्धाधिकारं चोदाहरणम्। निषेधे हि सामर्थ्यात्प्रवृत्तक्रियोऽधिकारी लभ्यते, अङ्गविधिषु तु प्रकरणादिति न चिन्त्योऽधिकारः। एवं सतीह संदेहः किं नियोज्योऽध्याह्रियतां न वेति। तत्र लोके द्वारं द्वारमित्यादौ क्रियया विना कारकाभिधानापर्यवसानाद्युक्तोऽध्याहारः। इह तु विषयेण कार्यस्यान्विताभिधानपर्यवसानादनध्याहारे प्राप्ते, उच्यते; अत्राप्यभिधेयापर्यवसानद्वाराभिधानापर्यवसानमेव। कार्यं हि साध्यत्वेन कृतिनिरूप्यम्। नरव्यापाररूपा च कृतिः, सा च यथा स्वसाध्यधात्वर्थनिरूप्यैवं स्वाश्रयनरनिरूप्या। तदेवं कृतेः कर्तापि कार्ये कृतिद्वारा संबन्धित्वेन निरूपक इति तमन्तर्भाव्यैव नियोगधीः। नचासावबुद्धात्मनः कार्येण संबन्धं

कल्पतरुपरिमलः

रणस्य द्वितीयवर्णके चिन्तितम्—तदेवं "चित्रया यजेत पशुकाम" इत्यादिविहितानां मनुष्यशरीरोपभोगयोग्यफलकानां कर्मणां किं नियमेन देहान्तरे फलम्, उत तस्मिन्देहे देहान्तरे वेत्यनियम इति संशये पूर्वपक्षः—वर्तमानदेहारम्भककर्मणां यत्फलं तद्भोगार्थत्वाद्वर्तमानदेहस्य तत्फलभोगावसाने तन्नाशावश्यंभावात्, अन्त्येष्टौ दक्षिणे हस्ते जुहूं सादयतीत्यादिवाक्यैर्यज्ञपात्राणां प्रतिपत्तिविधानेन तदपेक्षचित्राद्यदृष्टोत्पत्तिसमनन्तरभाविफलस्य वर्तमानदेहभोग्यत्वासंभवाच्च स्वर्गजनकादृष्टवच्चित्राद्यदृष्टस्यापि स्वफलभोगप्रदानार्थं तद्योग्यदेहारम्भकत्वनियमाच्च नियमेन देहान्तरएव चित्रादिफलमिति। **सिद्धान्तस्तु**—ऐहिकमपि चित्रादिफलं भवत्येव; चित्राद्यनुष्ठानानन्तरं पश्वादिफलदर्शने तदर्थं तदतिरिक्तादृष्टकल्पनाहेत्वभावात् अनन्तरमेव फलादर्शने देशकालादिसहकार्यपेक्षया विलम्बः कल्प्यः। तस्मिन् देहे फलादर्शने तत्फलभोगविरोधिप्रबलप्रारब्धकर्मणा प्रतिबन्धः कल्प्यः। प्रतिबन्धेन च तेन देहान्तरारम्भपूर्वकं तत्र फलं दातव्यमिति कल्प्यम्। वर्तमानदेहारम्भककर्मणो देशकालाद्यपेक्षया यदा न फलप्रदत्वं, तदा तस्मिन् देहे तज्जन्मकृतचित्राद्यदृष्टस्यापि फलप्रदत्वमुपपद्यते। पात्रप्रतिपत्तिस्तु सकलकर्मानुष्ठानसमाप्त्यनन्तरभावित्वात् पुरुषार्था। क्रत्वर्थत्वेऽप्यदत्तफलक्रतुमात्रार्था॥ "आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेति" श्रुतेर्दहने विनियोक्ष्यमाणानां यज्ञपात्राणां संस्कारार्था वा; अन्यथा कारीर्यादीनामैहिकफलत्वाभावप्रसङ्गात्। **एतेन**—कर्मणां फलप्रदानार्थं देहारम्भकत्वनियमोऽपि—**निरस्तः**; तस्मादामुष्मिकत्वानियमश्चित्रादिफलस्येति। **नेह परमापूर्ववदिति**। यद्यप्याचार्यमते अवघातादिनियमः प्रत्यासन्नाग्नेयाद्यवान्तरापूर्वप्रयुक्तः; तथापि गुरुमते फलवत्परमापूर्वप्रयुक्त इति तन्मतमनुसृत्य परमापूर्वेत्युक्तम्। नचावघातनियमस्य परमापूर्वप्रयुक्तत्वे तत्साधनत्वाविशेषादाज्यसान्नाय्ययोरवघातप्रसङ्गः; तुषविमोकादिदृष्टप्रयोजनव्यवस्थया व्रीह्यादिषु तद्व्यवस्थोपपत्तेः, अन्यथाग्नेयाद्यपूर्वप्रयुक्तत्वेपि तत्साधनस्रुगादिसाधारण्यप्रसङ्गानिवारणादिति भावः। विश्वजिन्न्यायं गुरुमतेनोपन्यस्यति—**विश्वजितेति। प्रवृत्तक्रियः** प्रवृत्तचिकीर्षः। 'न कलञ्जं भक्षयेदित्या'दिनिषेधवाक्यान्यपि फलतो विधिवाक्यानि। तत्र भक्षयत्यादिधातुसमभिव्याहृतनञ्प्रतिपाद्यं भक्षणादिनिवृत्तिरूपमौदासीन्यं विषयः। तद्यद्यप्यभावार्थत्वात्स्वतः साध्यं न भवति; तथापि निषेध्योन्मुखतया प्रचलितावस्थेऽनुत्पन्नतदनुकूलस्पन्दव्यापारे पुरुषे निषेध्यचिकीर्षापनयद्वारा परिपाल्यत्वेन तत् साध्यं भवतीति तस्य नियोगविषयत्वोपपत्तिः। तत्रचार्थान्निषेध्यचिकीर्षुर्नियोज्य इति गुरुमतम्। **इह तु विषयेणेति**। नियोगगतकृतिसाध्यतारूपकार्यताघटकत्वेन विषय एव तत्प्रतीत्यनुबन्धो, नतु नियोज्यः; तदभावेऽप्यध्ययननियोगस्य प्रयाजादिनियोगानां च प्रतीतेरिति भावः। **उच्यत इति। अयमाशयः**—कार्यत्वेन प्रतीयमानो नियोगः स्वस्य कार्यताघटके विषये प्रवर्तकस्वभावस्तत्र प्रवर्तनीयं पुरुषमपेक्षते; अन्यथा प्रवर्तकत्वव्याघातात्, अन्यतः प्रवृत्तिसिद्धौ तु न तमपेक्षते। तथाच आचार्यकनियोगेन अध्ययने माणवकस्य दर्शपूर्णमासनियोगेन तन्नियोज्यस्य तदङ्गेषु प्रयाजादिषु च प्रवृत्तिसिद्ध्या तन्नियोगानां कर्तृपुरुषविशेषानपेक्षायामपि विश्वजिदादावन्यतः प्रवृत्त्यलाभात्तदपेक्षास्तीति

सिद्धं धर्माख्यं, यद्विषया जिज्ञासा 'अथातो धर्मजिज्ञासा' (जै० सू० १।१।१) इति सूत्रिता; अधर्मोऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वाज्जिज्ञास्यः परिहाराय । तयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे । मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु सुखतारतम्यमनुश्रूयते । ततश्च तद्धेतोर्धर्मस्य तारतम्यं गम्यते । धर्मतारतम्यादधिकारितारतम्यम् । प्रसिद्धं चार्थित्वसामर्थ्यादिकृतमधिकारितारतम्यम् । तथाच यागाद्यनुष्ठायिनामेव विद्यासमाधिविशेषादुत्तरेण पथा गमनं, केवलैरिष्टापूर्तदत्तसाधनैर्धूमादिक्रमेण दक्षिणेन पथा गमनं, तत्रापि सुखतारतम्यं तत्साधनतारतम्यं च शास्त्रात् 'यावत्संपातमुषित्वा' (छान्दो०५।१०।५) इत्यस्माद्गम्यते । तथा मनुष्यादिषु नारकस्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन वर्तमानः । तथोर्ध्वगतेष्वधोगतेषु च देहवत्सु दुःखतारतम्यदर्शनात्तद्धेतोरधर्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनां च तारतम्यं गम्यते । एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःखतारतम्यमनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धम् । तथाच श्रुतिः—'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति यथावर्णितं संसाररूपमनुवदति । 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छान्दो०८।१२।१) इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते । धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यते । अशरीरत्वमेव धर्मकार्यमितिचेन्न, तस्य स्वाभाविकत्वात् । 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति' (काठ० १।२।२१) । 'अप्राणो ह्यमनाः शुभ्रः' (मुण्ड० २।१।२) 'असङ्गो ह्ययं पुरुषः' (बृह० ४।३।१५) इत्यादिश्रुतिभ्यः । अतएवानुष्ठेयकर्मफलविलक्षणं मोक्षाख्यम-

भामती ।

दर्शयति—**तथाच श्रुतिरिति** । न्यायमाह—**अतएवेति** । यत्किल स्वाभाविकं तन्नित्यं, यथा चैतन्यम् । स्वाभा॰

वेदान्तकल्पतरुः ।

स्वतस्तेन संबध्यते । स्वसंबन्धिकार्यबोद्धा च नियोज्य इति सोऽध्याहार्य इति स्थिते चिन्ता—किं सर्वेषामध्याहारः, उत एकस्येति । तत्राविशेषात्सर्वेषामिति प्राप्ते—**उच्यते**; एकेनाकाङ्क्षाशान्तेरेकस्येति । एवं स्थिते विचारः किं यस्य कस्यचिन्नियोज्यस्याध्याहारः, उत स्वर्गकामस्येति । तत्राविशेषादनियम इति प्राप्ते—उच्यते; '**स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात्** (जै. अ. ४ पा. ३ सू. १५)' स्वर्गकाम एवाध्याहार्यः । विशेषो हि गम्यते पुरुषाणां सुखाभिलाषित्वात् । दुःखनिवृत्तेरपि तत्रैवान्तर्भावात् । दुःखनिवृत्तिस्तु न सुखाविनाभूता सुषुप्ते सत्यामपि तस्यां सुखजन्मादर्शनात्, अनवच्छिन्नस्य सुखस्य स्वर्गत्वात्तस्य च सर्वसुखविशेषात्प्रत्यविशिष्टत्वाद्विशेषे च मानाभावात्स्वर्ग एव नियोज्यविशेषणं स्यादिति कृत्वाचिन्तेयम् । यः सत्रायावगुरेत्स विश्वजिता यजेतेति सत्रप्रवृत्तस्यावगुरणोपरमे निमित्ते प्रायश्चित्ततया विहितत्वेन साधिकारत्वादिति । **यत्किलेति** । स्वाभाविकनित्यचैतन्यात्मकस्य ब्रह्मात्मत्वस्य साध्यत्वं व्याहतमित्यर्थः ।

कल्पतरुपरिमलः ।

अतस्तदध्याहारो युक्त इति । स च फलकामोऽध्याहार्यः, पुरुषाणां कामप्रवणतया तत्र प्रयुक्तिलाघवात्, निषेधवाक्येषु तु न कामी नियोज्योऽध्याहार्यः; औदासीन्यस्य परिपाल्यत्वसिद्धये तत्प्रच्युतिप्रसक्त्यर्थं सामर्थ्याद् निषेध्योन्मुखस्य नियोज्यस्यावश्यं प्राप्त्या तत एवाकाङ्क्षाशान्तेः । **किं सर्वेषामिति** । किं सर्वफलकामानामध्याहारः, उतैकफलकामस्येत्यर्थः । **अन्तर्भावादिति** । यस्य यदा यदवच्छेदेन सुखं, तस्य तदा तदवच्छेदेन न दुःखमित्यविनाभावादित्यर्थः । **एतदुपलक्षणं**—सुखस्य भावरूपत्वेन लघूपस्थितिकत्वाच्चेत्यपि द्रष्टव्यम् । **अनवच्छिन्नस्येति** । पुत्रपश्वाद्येकैकविषयविशेषमात्रानवच्छिन्नस्य देशविशेषदेहविशेषभोग्यस्य संकल्पोपनतसर्वविषयप्रयुक्तस्य स्वर्गसुखस्य पुत्रपश्वादिसुखविशेषान्प्रति सामान्यरूपत्वादित्यर्थः। **विशेषे मानाभावादिति** । सर्वसुखविशेषानुगतसामान्यमुल्लङ्घ्य किंचिद्विषयविशेषावच्छिन्नसुखग्रहणे मानाभावादित्यर्थः । इत्थं गुरुणा निबन्धने व्याख्यातम् । प्रायः सर्वपुरुषान्प्रति स्पृहणीयत्वेनाविशिष्टत्वादिति भाष्यकारादिव्याख्या । **नन्वत्र** विश्वजिदधिकरणे भाष्यकारैः 'तस्मात्पितृभ्यः पूर्वेद्युः क्रियत' इति पितृयज्ञवाक्यं 'यः सत्रायावगुरत' इति विश्वजिद्वाक्यं च विषयवाक्यत्वेनोदाहृतम् । तत्र द्वितीयोदाहरणमयुक्तं, विश्वजितो नैमित्तिकाधिकारत्वादित्याशङ्क्याह—**कृत्वाचिन्तेति । अवगुरणोपरमे इति** । उद्यमनिवृत्तावित्यर्थः । 'गुरी उद्यमने' इति धातोः कुटादित्वेन ङित्त्वाद्गुणाभावः । **ननूद्यमनिवृत्तौ** विश्वजिदित्ययुक्तम्, 'यः सत्रायेति' वाक्यात् सत्रं संकल्प्य तदप्रयुञ्जानस्य विश्वजिदिति

शरीरत्वं नित्यमिति सिद्धम्। तत्र किंचित्परिणामिनित्यं यस्मिन्विक्रियमाणेऽपि तदेवेदमिति बुद्धिर्न विहन्यते; यथा पृथिव्यादिजगन्नित्यत्ववादिनाम्, यथाच सांख्यानां गुणाः, इदं तु

भामती।

विकं चेदं, तस्मान्नित्यम्। **परे हि द्वयीं नित्यतामाहुः**—कूटस्थनित्यतां परिणामिनित्यतां च। तत्र नित्यमित्युक्ते मा भूदस्य परिणामिनित्यतेत्यत आह—**तत्र किंचिदिति**। परिणामिनित्यता हि न पारमार्थिकी, तथाहि—तत्सर्वात्मना वा परिणमेदेकदेशेन वा। **सर्वात्मना परिणामे** कथं न तत्त्वव्याहतिः। **एकदेशपरिणामे वा** स एकदेशस्ततो भिन्नो वाऽभिन्नो वा। **भिन्नश्चेत्** कथं तस्य परिणामः; नह्यन्यस्मिन्परिणममानेऽन्यः परिणमतेऽतिप्रसङ्गात्। **अभेदे वा** कथं न सर्वात्मना परिणामः। **भिन्नाभिन्नं तदिति** चेत्, तथाहि; तदेव कारणात्मनाऽभिन्नं भिन्नं च कार्यात्मना। कटकादय इवाभिन्ना हाटकात्मना—। भिन्नाश्च कटकाद्यात्मना। नच—भेदाभेदयोर्विरोधाचैकत्र समवाय इति; युक्तम् विरुद्धमिति नः क्व संप्रत्ययो यत्प्रमाणविपर्ययेण वर्तते, यत्तु यथा प्रमाणेनावगम्यते तस्य तथाभाव एव। कुण्डलमिदं सुवर्णमिति सामानाधिकरण्यप्रत्यये व्यक्तं भेदाभेदौ चकास्तः। तथाह्यात्यन्तिकेऽभेदेऽन्यतरस्य द्विरवभासप्रसङ्गः। भेदे वात्यन्तिके न सामानाधिकरण्यं, गवाश्ववत्। आधाराधेयभावे एकाश्रयत्वे वा न सामानाधिकरण्यं, नहि भवति कुण्डं बदरमिति। नाप्येकासनस्थयोश्चैत्रमैत्रयोश्चैत्रो मैत्र इति। सोऽयमबाधि-

वेदान्तकल्पतरुः।

भाष्ये कूटस्थनित्यमिति विशेषणं न परिणामिव्यवच्छेदाय, सिद्धान्ते तन्नित्यत्वासंमतेः; अतो वैयर्थ्यमित्याशङ्क्याह—**परे हीति**। परभ्रान्तिर्व्यवच्छेद्येत्यर्थः। इदं तु पारमार्थिकमिति भाष्ये कूटस्थनित्यत्वे पारमार्थिकत्वं हेतूक्तं, तत्तदा घटेत, यदि यत्पारमार्थिकं तदविकृतमिति व्याप्तिः स्यात्, तदर्थं परिणामिनित्यस्य भ्रमसिद्धत्वमाह—**परिणामीति**। परिणामो हि पूर्वरूपत्यागेन रूपान्तरापत्तिः। तत्र पूर्वरूपस्य सर्वात्मना त्यागेन रूपान्तरोत्पत्तौ जातस्य प्राक्तनरूपत्वं व्याहतमतोऽनित्यत्वमित्युक्ते शङ्कते—**एकदेशेति**। य एकदेशो नश्यति स धर्मिणः सकाशाद्भिन्न इति पक्षे न धर्मिणः परिणामः, किंत्वेकदेशस्य स चानित्य इति न परिणामिनित्यत्वसिद्धिरित्याह—**भिन्नश्चेदिति**। नश्यतश्चैकदेशस्य धर्म्यभेदे सर्वात्मना वस्त्वपगमान्न नित्यत्वमित्याह—**अभेदे इति**। पक्षद्वयोक्तदोषपरिहारायैकमेव कार्यकारणात्मकं वस्तु तस्य कार्याकारेण परिणामित्वं, तानि च कार्याणि भिन्नानि, कारणाकारेण च नित्यत्वं तच्चाभिन्नमिति शङ्कते—**भिन्नाभिन्नमिति**। यत्प्रामाणविपर्ययेण विरोधेन वर्तते तत्र विरुद्धमिति संप्रत्यय इत्यनुषङ्गः। एकस्य कार्यकारणरूपेण द्व्यात्मकत्वे प्रमाणमाह—**कुण्डलमिति**। **द्विरवभासेति**। हेम हेमेति वा कुण्डलं कुण्डलमिति वेत्यर्थः। अपर्यायानेकशब्दवाच्यत्वेन हेमकुण्डलयोर्भेदः सामानाधिकरण्याच्चाभेद इत्युक्ते हेमत्वस्य कुण्डलव्यक्त्याश्रितत्वाद्वा कुण्डलाकारसंस्थानस्य कनकत्वस्य चैकद्रव्याश्रितत्वेन वा सामानाधिकरण्यं नाभेदादित्याशङ्क्य व्यभिचारयति—**आधारेति**। आधारेति दृष्टान्ते

कल्पतरुपरिमलः।

प्रतीतिरित्याशङ्क्याह—**प्रायश्चित्ततयेति**। **एवं हि श्रूयते**—"यः सर्वाभ्यो वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्यः सर्वेभ्यश्छन्दोभ्य आत्मानमागुरते यः सत्रायागुरते स विश्वजितातिरात्रेण सर्वपृष्ठेन सर्वस्तोमेन सर्ववेदसदक्षिणेन यजेत सर्वाभ्य एव देवताभ्यः सर्वेभ्यः पृष्ठेभ्यः सर्वेभ्यश्छन्दोभ्य आत्मानं निष्क्रीणीत" इति। एवं निष्क्रयद्वारेण संस्तवसत्रप्रवृत्तौ न युज्यते, अतः सत्रं संकल्प्य दैवान्मानुषाद्वा प्रतिबन्धात् ततो निवृत्तस्य प्रायश्चित्ततयेदं विश्वजिद्विधानमित्यर्थः। **व्यभिचारयतीति**। **ननु**—ययोः कयोश्चिदाधाराधेयत्वेनैकाश्रितत्वेन वा सामानाधिकरण्यमिति नात्र शङ्का, येन कुण्डबदरयोश्चैत्रमैत्रयोश्च व्यभिचार उच्यते, किंत्वेकप्रवृत्तिनिमित्तस्यापरप्रवृत्तिनिमित्ताधाराश्रितत्वेन वा प्रवृत्तिः निमित्तद्वयस्याप्येकाश्रितत्वेन वा सामानाधिकरण्यमिति; तथैव ह्याचार्यैरवतारिकाग्रन्थे शङ्काभिप्रायो लिखितः, तथैव च तदभिप्रायो वर्णयितुं युक्तः; भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति प्रसिद्ध्यनुरोधात्। **नच**—हेमकुण्डलयोरवयवावयविनोर्भेदपक्षे हेमत्वस्य कुण्डलाश्रितत्वं हेमत्वकुण्डलत्वयोरेकाश्रितत्वं च नास्तीति—वाच्यम्; हेमत्वस्यावयवावयविवृत्तिजातित्वेन तत्सत्त्वादिति—**चेत्, उच्यते**; हेमावयवातिरिक्तं कुण्डलरूपम् अवयवि द्रव्यान्तरमभ्युपगम्यते चेत् तत्पीतरूपगुरुत्वकठिनत्वरहितमेव वाय्वादिसदृशमभ्युपगन्तव्यम्; अवयवावयविगतस्य पीतरूपद्वयस्य गुरुत्वद्वैगुण्यस्य चानुपलम्भात्, घटकुड्ययोरिव कठिनद्रव्ययोरवयवावयविनोरेकत्र भूतलादौ समावेशासंभवाच्च, अवयवावयविभावानापन्नयोरेवासमावेश इति सविशेषणनियमकल्पनस्य गौरवपराहतस्याप्रामाणिकत्वात्। एवंच कुण्डले पीतरूपाद्यभावेन तदभिव्यङ्ग्यस्य हेमत्वस्य तत्रासंभवेनैकप्रवृत्तिनिमित्तस्येत्यादेः सामानाधिकरण्यप्रयोजकत्वाभ्युपगमे तेन 'सुवर्णं कुण्डलमिति' सामानाधिकरण्यानिर्वाहात्तन्निर्वाहाय हेमकुण्डलानामाधाराधेयभावमात्रमेकाश्रितत्वमात्रं वा तत्प्रयोजकमास्थेयमित्यभिप्रेत्य टीकायां कुण्डबदरयोश्चैत्रमैत्रयोश्च व्यभिचार उक्त इति तात्पर्यम्। भेदो रूपादिवद् भावरूप इति पक्षे स किमभेदविरुद्धस्तदविरुद्धो वा। **आद्ये** भावाभावरूपत्वपक्षे वक्ष्यमाणं दूषणं भविष्यतीत्यभिप्रेत्य

भामती।

तोऽसंदिग्धः सर्वजनीनः सामानाधिकरण्यप्रत्यय एव कार्यकारणयोर्भेदाभेदौ व्यवस्थापयति । तथाच कार्याणां कारणात्मत्वात्, कारणस्य च सद्रूपस्य सर्वत्रानुगमात्, सद्रूपेणाभेदः कार्यस्य जगतः, भेदः कार्यरूपेण गोघटादिनेति । **यथाहुः**—'कार्यरूपेण नानात्वमभेदः कारणात्मना । हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा ॥' इति । **अत्रोच्यते**—कः पुनरयं भेदो नाम, यः सहाभेदेनैकत्र भवेत् । परस्पराभाव इति चेत्, किमयं कार्यकारणयोः कटकहाटकयोरस्ति न वा । न चेत्, एकत्वमेवास्ति, नच भेदः । अस्ति चेद्भेद एव नाभेदः । नच भावाभावयोरविरोधः; सहावस्थानासंभवात् । संभवे वा कटकवर्धमानकयोरपि तत्त्वेनाभेदप्रसङ्गः; भेदस्याभेदाविरोधात् । **अपिच** कटकस्य हाटकादभेदे यथा हाटकात्मना कटकमुकुटकुण्डलादयो न भिद्यन्ते एवं कटकात्मनापि न भिद्येरन्; कटकस्य हाटकादभेदात् । तथाच हाटकमेव वस्तुसन्न कटकादयः; भेदस्याप्रतिभासनात् । अथ हाटकत्वेनैवाभेदो न कटकत्वेन,

वेदान्तकल्पतरुः।

सिद्धौ भेदाभेदौ दार्ष्टान्तिके योजयति—**तथाचेति** । लोके कार्यस्य कुण्डलादेः कारणात्मकत्वात्परमकारणस्य च सतः सर्वत्र हेमवदनुगमात् सन् घट इत्यादिसामानाधिकरण्यवशेन जगतः कार्यस्य सत्ता कारणरूपेणाभेदो व्यावृत्तकार्यरूपेण च भेद इत्यर्थः । **भेद इति** । किं रूपादिवद्भावरूपो धर्मः, उतैक्याभावः । **नाद्यः**; ऐकान्तिकाभेदानिषेधात् । **द्वितीयमाशङ्क्याह—किमयं कार्येति** । **तत्त्वेनेति** । कटकत्ववर्धमानकत्वरूपेण तयोरितरेतराभेदप्रसङ्ग इत्यर्थः । कार्यस्य कारणाभेदे च सर्वकार्याणामेककार्यात्मकत्वप्रसङ्गः, एककार्यस्य सर्वकार्याभिन्नेन कारणेनाभेदादित्याह—**अपिचेति** । एवमेककार्यात्मकत्वादितरकार्याणां तस्य च कारणादभेदाद्भेदासिद्धावैकान्तिकाद्वैतापात इत्याह—**तथाच हाटकत्वमेवेति** । कटकस्य हि द्वे रूपे स्तो हाटकत्वं कटकत्वं च । तत्र हाटकरूपेणास्य कुण्डलादिभिरभेद इष्ट एव, न कटकरूपेण; व्यावृत्तत्वात्तस्येति प्रस्मृतपराभिसंधिः स्वप्रक्रियया शङ्कते—**अथेति** । सिद्धान्ती तु कटकहाटकयोरभेदाद्धटकस्य कुण्डलादिष्व-

कल्पतरुपरिमलः।

द्वितीये दूषणमाह—**ऐकान्तिकेति** । तथाच भेदे सत्येवात्यन्ताभेदोऽपि स्यादित्यर्थः । **द्वितीयमाशङ्क्याहेति** । परस्पराभाव इति चेदिति पूर्वग्रन्थेनाशङ्क्येत्यर्थः । **तत्त्वेनाभेदप्रसङ्ग** इत्यस्य तात्त्विकाभेदप्रसङ्ग इत्यर्थो भाति, स तु नानिष्टः; कारणात्मना कटकवर्धमानयोरभेदाङ्गीकाराद् इत्याशङ्क्य तत्त्वेनेति पदं व्याचष्टे—**कटकत्वेति** । **ननु**—भावाभावयोरुभयोरपि भेदाभेदयोर्हाटकत्वकटकत्वावच्छेदभेदेन वृत्तिरभ्युपगम्यते, अतस्तयोर्न सहावस्थानासंभवः; **नच** भेदावच्छेदककटकत्वावच्छेदेन कटके वर्धमानभेदप्रसङ्गः, नापि कटकाभिन्नमुकुटे कटकत्वेनापि कटकाभेदप्रसङ्गः, नाप्यनुवृत्तिव्यावृत्तिव्यवस्थाभावप्रसङ्गः, नापि हाटकत्वेनावगते कटकत्वादिना जिज्ञासाद्यनुपपत्तिः, भेदाभेदमनङ्गीकुर्वद्भिरपि ह्येकस्मिन्धर्मिणि केनचित्प्रकारेण निश्चिते तदन्यप्रकारेण जिज्ञासासंशयादिकं समर्थ्यते, अभेदवद् भेदस्याप्यभ्युपगमे का जिज्ञासानुपपत्तिः । **यत्तु** हेमनिर्णयेन कटकादीनां निर्णये तदभेदः कारणमित्यादि । **तत्र** वैपरीत्यमपि वक्तुं शक्यम् । हेमनिर्णयेन कटकादीनामनिर्णये तदभेदः कारणं तदभावादभेदादनिर्णयकार्याभाव औत्सर्गिकः प्राप्तः, स कारणस्य भेदस्य सद्भावादपोद्यत इति; अस्ति ह्यनिर्णयस्यापि निर्णयप्रतिबन्धकसद्भावाधीनं परिपाल्यत्वरूपं कार्यत्वम्, तस्मात्सर्वमिदं भेदाभेददूषणजातमयुक्तम् । युक्तत्वे वा स्वमतेप्येतत्प्रसज्येत; स्वमतेऽपि हि भेदाभेदाभ्यामेव सामानाधिकरण्योपपादनम्; अभेदः सत्यो भेदस्त्वाध्यस्त इति परं स्वमते विशेष उक्तः । तत्र भेदप्रतीतावभेदोपि सह प्रतीयत इत्युपगन्तव्यम्; भेदप्रतीतिमात्रेण सामानाधिकरण्योपपादनासंभवात् । तयोर्विरुद्धयोरेकत्र प्रतीतिः कथं ? कथं च मुकुटे कुण्डलाभिन्नहाटकाभिन्ने कुण्डलत्वेनापि कुण्डलाभेदो न स्यात् ? कथंच हाटके प्रतीते कुण्डलादिजिज्ञासा स्यात् ? अपिच अभेदः सत्यः भेदोऽध्यस्त इत्यर्धजरतीयमप्ययुक्तम्; सह प्रतीत्यभ्युपगमे अन्यतरबाधावश्यम्भावकल्पकाभावात्, सत्यानृतयोर्ब्रह्मतदध्यस्तप्रपञ्चयोः सिद्धान्ते तात्त्विकाभेदानङ्गीकाराच्च, तथैवारम्भणाधिकरणे (ब्र. अ. २ पा. १ सू. १४) टीकाकारैरपि वक्ष्यमाणत्वात्, इहानुपदमेव पूर्वग्रन्थे तस्मात्तेऽपि हाटकाद् भिन्ना एवेति तस्मात् ते हेम्नो भिद्यन्त इति च हाटककटकाभेदप्रतिक्षेपाच्च, तस्मात् सर्वमिदमनुपपन्नमिति—**चेत्; अत्र ब्रूमः**—हाटकत्वं कटकत्वं च किमेकस्मिन्वर्तते, न वा; **न चेद्** एकस्मिन्नवच्छेदभेदेन भेदाभेदयोर्विरुद्धयोर्वृत्तिसमर्थनं न लभ्यते । **वर्तते चेत्** किं कटकत्वं हाटकत्वादन्यदुत तदेव; **अन्यच्चेत्** प्रवृत्तिनिमित्तभेदेनैव सामानाधिकरण्योपपादनलाभान्नैकस्मिन्धर्मिणि अभेदवद्भेदोऽप्यङ्गीकार्यः । अतः सामानाधिकरण्योपपादनार्थं भेदाभेदमभ्युपगच्छता प्रवृत्तिनिमित्तभेदेनान्यथोपपत्तिपरिहाराय हाटकत्वमेव कटकत्वं न ततोऽन्यदित्येष्टव्यमित्यभिप्रेत्य सहावस्थानासंभवादि सर्वमिदं दूषणमुक्तम् । इममेवाभिप्रायं सहावस्थानासंभवादिदूषणोक्तौ गर्भितं विस्मृत्याथ हाटकत्वेनैवाभेद इत्यादिशङ्काग्रन्थः प्रवृत्त इत्याचार्यैरवतारितम् **प्रस्मृतपराभिसंधिः स्वप्रक्रियया शङ्कत इति** । एवं चाभेदसत्तया कुण्डलादेर्ज्ञातत्वापादनेऽपि न वैपरीत्यशङ्का-

पारमार्थिकं, कूटस्थनित्यं, व्योमवत्सर्वव्यापि, सर्वविक्रियारहितं, नित्यतृप्तं, निरवयवं, स्वयं-

भामती ।

तेन तु भेद एव कुण्डलादेः। यदि हाटकादभिन्नः कटकः, कथमयं कुण्डलादिषु नानुवर्तते ? नानुवर्तते चेत्कथं हाटकादभिन्नः कटकः ? ये हि यस्मिन्ननुवर्तमाने व्यावर्तन्ते ते ततो भिन्ना एव, यथा सूत्रात्कुसुमभेदाः। नानुवर्तन्ते चानुवर्तमानेऽपि हाटकत्वे कुण्डलादयः, तस्मात्तेऽपि हाटकाद्भिन्ना एवेति । सत्तानुवृत्त्या च सर्ववस्त्वनुगमे इदमिह नेदम्, इदमस्मान्नेदम् , इदमिदानीं नेदम्, इदमेवं नेदमिति विभागो न स्यात् । कस्यचित् क्वचित् कदाचित् कथंचि-द्विवेकहेतोरभावात् । **अपिच** दूरात्कनकमित्यवगते न तस्य कुण्डलादयो विशेषा जिज्ञास्येरन्; कनकादभेदात्तेषां, तस्य च ज्ञातत्वात् । अथ भेदोऽप्यस्ति कनकात् कुण्डलादीनामिति कनकावगमेऽप्यज्ञातास्ते । **नन्वभेदो**ऽप्यस्तीति किं न ज्ञाताः, प्रत्युत ज्ञानमेव तेषां युक्तं, कारणाभावे हि कार्याभाव औत्सर्गिकः, स च कारणसत्तयाऽपोद्यते । अस्ति चाभेदे कारणसत्तेति कनके ज्ञाते ज्ञाता एव कुण्डलादय इति तज्जिज्ञासाज्ञानानि चानर्थकानि स्युः । तेन यस्मिन् गृह्यमाणे यन्न गृह्यते तत्ततो भिद्यते, यथा करभे गृह्यमाणेऽगृह्यमाणो रासभः करभात् । गृह्यमाणे च दूरतो हेम्नि न गृह्यन्ते तस्य भेदाः कुण्डलादयः, तस्मात्ते हेम्नो भिद्यन्ते । कथं तर्हि हेम कुण्डलमिति सामानाधिकरण्यम् ? इति चेत्, नह्याधाराधेयभावे समानाश्रयत्वे वा सामानाधिकरण्यमित्युक्तम् । अथानुवृत्तिव्यावृत्तिव्यवस्था च हेम्नि ज्ञाते कुण्डलादिजिज्ञासा च कथम् ? न खल्वभेद ऐकान्तिकेऽनैकान्तिके चैतदुभयमुपपद्यते इत्युक्तम् । तस्माद्भेदाभे-दयोरन्यतरस्मिन्नवहेयेऽभेदोपादानैव भेदकल्पना, न भेदोपादानाऽभेदकल्पनेति युक्तम् । भिद्यमानतन्त्रत्वाद्भेदस्य, भिद्यमानानां च प्रत्येकमेकत्वात्, एकाभावे चानाश्रयस्य भेदस्यायोगात्, एकस्य च भेदानधीनत्वात्, नायमयमिति च भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वात्, एकत्वग्रहस्य चान्यानपेक्षत्वात्, अभेदोपादानैवानिर्वचनीयभेदकल्पनेति सांप्रतम् । तथाच श्रुतिः—'मृत्तिकेत्येव सत्यम्' इति । तस्मात् कूटस्थनित्यतैव पारमार्थिकी न परिणामिनित्य-तेति सिद्धम् । **व्योमवत्** इति च दृष्टान्तः परसिद्धः; अस्मन्मते तस्यापि कार्यत्वेनानित्यत्वात् । अत्रच **कूटस्थनित्यम्** इति निर्वर्त्यकर्मतामपाकरोति । **सर्वव्यापि** इति प्राप्यकर्मताम् । **सर्वविक्रियारहितम्**

वेदान्तकल्पतरुः ।

नुवृत्तेरभेदे कटकस्यापि तैरभेदः स्यादिति पूर्वोक्तमेव परिहारं स्मारयति—**यदि हाटकादिति** । कटकस्य कुण्डलादि-ष्वननुवृत्त्यनभ्युपगमे तेष्वनुवृत्तहाटकादभेदाभावः स्यादिति प्रतिजानीते—**नानुवर्तते चेदिति** । अनुवृत्ताद्व्यावृत्तस्य भेदे व्याप्तिमाह—**येहीति** । उपनयमाह—**नानुवर्तन्ते इति** । अर्थाद्धेतुसिद्धिर्द्रष्टव्या । निगमयति—**तस्मादिति** । कुण्डलादिषु हेमानुवृत्त्या यदि तदभेदात्कटकादीनामनुगमः, तदा सत्तानुवृत्त्या सर्ववस्तूनामितरेतराभेदापत्तेर्व्यवहा-रपरिप्लव इत्याह—**सत्तेति** । **इति विभागो न स्याद्** इत्यस्य प्रत्येकं संबन्धः । **इह** क्षीरे **इदं** दधि **नेदं** तैलमिति संसर्गतदभावव्यवस्था न स्यात् । **इदं** पटादिकमस्मात्कुड्याद्भिद्यते **इदं** कुड्यमस्मात्**कुड्यान्न** भिद्यते इत्यसंकरो न स्यात् । **इदानीं** वसन्ते काले **इदं** कोकिलरुतमस्ति **इदमम्बुदध्वानं नेति** व्यवस्था न स्यात् । **इदं** कुम्भादि **एवं** कम्बुग्री-वत्वादिप्रकार**मिदं** पटादि **नैवमिति** प्रकारासङ्करो न स्यादित्यर्थः । उक्तास्ववस्थासु हेतुमाह—**कस्यचिदिति** । कुतश्चिदित्यपि द्रष्टव्यम् । इतश्च कार्यस्य कारणेन न वास्तवमैक्यमित्याह—**अपिचेति** । निश्चितकनकादभेदान्न कुण्ड-लादिषु संशय इत्युक्ते संशयसंभवं भेदप्रयुक्तत्या शङ्कते—**अथेति** । सिद्धान्त्यविनिगममाह—**नन्विति** । हेमनिर्णयेन कटकादीनां निर्णये तदभेदः कारणं, तदभावाद्भेदरूपान्निर्णयकार्याभाव औत्सर्गिकः प्राप्तः, स कारणस्याभेदस्य भावाद-पोद्यते, घटसामग्रीत इव तत्प्रागभावस्ततः कनकनिश्चये कटकादिनिश्चयादविनिगम एव न, किंतु वैपरीत्यनिश्चय इत्याह— **प्रत्युतेति** । तेषां कुण्डलादीनां जिज्ञासा तद्विषयज्ञानानि चेत्यर्थः । वस्तुतः कार्यकारणयोरभेदाभावं सप्रमाणकमुपसंह-रति—**तेनेति** । यदि हेमकुण्डलयोर्न भेदाभेदौ, तर्हि सामानाधिकरण्यं न स्यात्, नह्यत्यन्तभेदे तद्भवति; कुण्डलक-टकयोरदर्शनात् । नाप्यत्यन्ताभेदे; हेम हेमेत्यनुपलंभादिति पूर्ववाद्युक्तमनुवदति—**कथं तर्हीति** । यदि हेम्नः सका-शात् कुण्डलादीनां भेदाभेदौ, तर्हि तेषामनुवृत्तहेम्नः सकाशाद् अभेदादितरेतरव्यावृत्तिर्न स्यान्न स्याच्च हेम्नि निर्णीते संशय इति प्रतितर्केण मिथो विरोधाख्येन सामानाधिकरण्यानुपपत्तितर्कं दूषयति—**अथेति** । अत्यन्ताभेदे मा नामोपपादि हेमादेरनुवृत्तिव्यावृत्तिव्यवस्था, माच घटिष्ट हेम्नि ज्ञाते कुण्डलादिजिज्ञासा, भेदाभेदमते ते किं न स्याताम्, इत्याशङ्क्य पूर्वोक्तमविनिगममुत्सर्गापवादं च स्मारयति—**अनैकान्तिके चेति** । एवं निरुद्धेऽनेकान्तवादिनि स्वमतेन सामानाधिक-रण्यमुपपादयति—**तस्मादिति** । विरोधादन्यतरबाधेऽप्यभेदो बाध्य इति सौगतमतमाशङ्क्याह—**अभेदोपादानेति** । भेदः किं धर्मिप्रतियोगिनोर्व्यासज्य वर्तते, उत प्रतियोगिनमपेक्ष्य धर्मिण्येव । **आद्ये** धर्मिप्रतियोगिनोः प्रत्येकवर्त्यैकत्वा-पेक्षेत्युक्त्वा **द्वितीये** धर्म्यैक्यापेक्षेत्याह—**एकाभावे चेति** । ततः स्वसत्तायाममभेदापेक्षत्वाद्भेदस्य स एवाभेदेऽध्यस्त इत्यर्थः । प्रतीतावपि भेदस्यैवाभेदापेक्षेत्याह—**नायमिति** । 'मृत्तिकेति' श्रुतिः, कारणमेव सत्यमित्याह, अतः—**अत्यन्ता-**

भामती ।

इति विकार्यकर्मताम् । **निरवयवम्** इति संस्कार्यकर्मताम् । व्रीहीणां खलु प्रोक्षणेन संस्काराख्योंऽशो यथा जन्यते, नैवं ब्रह्मणि कश्चिदंशः क्रियाधेयोऽस्ति; अनवयवत्वात्, अनंशत्वादित्यर्थः । पुरुषार्थतामाह—**नित्यतृप्त-**

वेदान्तकल्पतरुः ।

भेदपरेति । अनंशत्वमाकारभेदराहित्यम् । नित्यतृप्तत्वादीनि श्रुत्युक्तान्येव भाष्येऽनूदितानीति नासिद्धानि; कार्यविलक्षणानधिगतविषयत्वाभात् स्वमते शास्त्रपृथक्त्वसिद्धिः **अतस्तद्ब्रह्मेति** भाष्ये उक्ता । प्राग्विमोक्षनित्यत्वान्नियोगायोग उक्तः,

कल्पतरुपरिमलः ।

वकाशः; अभेदे सत्यवच्छेदकभेदाभावेन भेद एव न संभवतीति तात्पर्येण प्रत्युतेत्यादिटीकातद्व्याख्यानयोः प्रवृत्तेः, स्वमतेनाभेदव्यवस्थापनं तु व्यावहारिकाभेदविषयं न तात्त्विकाभेदविषयमिति नारम्भणाधिकरण-(ब्र. अ. २ पा. १ सू. १४) विरोधः । नाप्यभेदप्रतिक्षेपकपूर्वग्रन्थविरोधः; अतएवाभेदप्रतिक्षेपको यस्मिन् गृह्यमाणे यन्न गृह्यत इत्यादिटीकाग्रन्थो वस्तुतः कार्यकारणयोरभेदाभावं सप्रमाणकमुपसंहरतीति भेदाभेदवाद्यभिमतवास्तवाभेदप्रतिक्षेपपरतयावतारितः । भेदस्याध्यस्तत्वोक्तिस्तु प्रतिभासमात्रकल्पितत्वाभिप्राया । अतएवारम्भणाधिकरणटीकायां वाचा केवलमारभ्यते विकारजातं, नतु तत्त्वतोऽस्ति, यतो नामधेयमात्रमेतद् यथा पुरुषस्य चैतन्यं, राहोः शिर इति विकल्पनामात्रमित्यारम्भणश्रुतेरर्थ उक्तः । भेदबाधावश्यम्भावोऽप्यारम्भणश्रुतिप्राप्तः, तदनुकूलन्यायमात्रमिह विरोधादन्यतरबाधादिप्रक्रियया दर्शितम् । **ननु** यद्युपादानहेमाद्यतिरिक्तकटकमुकुटादिविकारभेदः कल्पनामात्रसिद्ध इति मतं, कथं तर्हि **वाक्यान्वयाधिकरण-** (ब्र. अ. १ पा. ४ सू. १९) **टीकायां**—"नतु मृद्विकारः शरावादिः शतशोऽपि मृन्मृदिति चिन्त्यमानस्तज्जन्मना मृद्भावसाक्षात्कारेण शक्यो निवर्तयितुं; तत्कस्य हेतोः; तस्यापि मृदो भिन्नस्य तात्त्विकत्वाद्, वस्तुनश्च ज्ञानेनोच्छेत्तुमशक्यत्वादि" त्युक्तम्; **उच्यते**; शरावादिसंस्थानविशेषस्य व्यावहारिकसत्यत्वाभिप्रायं तद्वाक्यम्, इह तूपादानएव पूर्वावस्थोपमर्दैन तदवस्थान्तरं जायते, नतूपादानभिन्नं तदारब्धं तदागन्तुकावस्थाविशेषवदवयवि द्रव्यान्तरमस्तीत्युपादानविकारयोः सत्येवाभेदकल्पनामात्रमित्यारम्भणाधिकरणे वक्ष्यमाणं स्मारितम् । तत्स्मारणं च भेदाभेदाभ्यां सामानाधिकरण्यमुपपादयितुं; तस्य हेमत्वकुण्डलत्वयोरुपादानरूपैकद्रव्याश्रितत्वेनोपपत्तेः, तथैवात्र तदुपपादनस्य विवक्षितत्वात् । अतएवाचार्यैर्वाक्यान्वयाधिकरणे (ब्र. अ. १ पा. ४ सू. १९) वक्ष्यते—**"सामानाधिकरण्यं यद्धेमकुण्डलयोर्न तत् । भेदाभेदावगाहीति प्राग्वाचस्पतिनेरितम्॥"** किंतु सुवर्णकुण्डलाभेदे कथं स्वर्णेन कुण्डलं कृतं सौवर्णं कुण्डलमित्यादिभेदव्यवहार इत्याकाङ्क्षायां पुरुषस्य चैतन्यमितिवत् कल्पनामात्रसिद्धभेदालम्बनः स व्यवहार इति भेदव्यवहारमात्रोपपादनार्थं कृतमिति" इति सर्वमनवद्यम् । अस्मिन्संदर्भे 'कथं तर्हीति' टीकावतारिकाग्रन्थे 'न ह्यत्यन्तभेदे तद्भवति; कुण्डलकटकयोरदर्शनादिति' कुण्डलकटकयोरत्यन्तभेदः सिद्धवत्कृत्योपन्यस्तः; तदुपन्यासो लोकदृष्ट्यनुसारेण वा भेदवादिमतानुसारेण वा कटकत्वकुण्डलत्वाद्यवच्छेदेन भेद एव नाभेदोऽपीत्यभिप्रायेण वा नेतव्यः; भेदाभेदवादिमते हाटकात्मना तयोरभेदात्, **यथा हाटकात्मना कठकमुकुटकुण्डलादयो न भिद्यन्त इति** टीकायामपि तथैव तन्मतस्थितिप्रदर्शनाच्च ।' **सौगतमतमाशङ्क्ये**त्यत्र गौतममतमिति पाठश्चेत्सनिर्विशङ्कः । **न्यायसूत्रकृता गौतमेन प्रत्यक्षपरीक्षायां— "नचैकदेशोपलब्धिरवयविसद्भावात्"** (न्यायसूत्र. अ. २ पा. आ. १ सू. ३०) इति घटाद्येकदेशसंनिकर्षे सति न तदुपलब्धिमात्रं, तद्भिन्नस्यावयविनः सद्भावात् तस्याप्युपलब्धिरस्तीति प्रतिज्ञाय **साध्यत्वादवयविनि संदेहः (न्यायसू. अ. २ आ. १ सू. ३१)** इत्यवयवभिन्नोऽवयवी सिद्धो नास्तीति तत्र संदेहमुपन्यस्य, **'सर्वाग्रहणमवयव्यसिद्धेः' (न्यायसू. अ. २ आ. १ सू. ३२) 'धारणाकर्षणोपपत्तेश्चेति' (न्यायसू. अ. २ आ. १ सू. ३३)** सूत्राभ्यामवयवभिन्नावयव्यभावे परमाणूनामन्त्यावयवानामतीन्द्रियत्वात्तदाश्रितस्य गुणकर्मसामान्यादेः सर्वस्याप्यग्रहणं स्यात् । अतो गुणकर्मादिग्रहणाद् अस्ति तदाश्रयः पटादिरवयवी । तथा एकदेशधारणे कृत्स्नधारणादेकदेशाकर्षणे कृत्स्नाकर्षणाच्च सोऽस्ति; अन्यथाऽवयवानां भिन्नत्वात्कस्यचिदवयवस्य धारणाकर्षणाभ्यामन्यस्य धारणाकर्षणानुपपत्तेरित्यवयवभिन्नावयविप्रसाधनेन अवयवाभेदनिराकरणात् । सौगतमिति पाठस्तु सौगतैरवयविस्थाने अवयवसंघातस्याभिषिक्तत्वात् संघातस्यावयवभेदाभिप्रायो योज्यः । **नन्वनं**शेपि संस्कारः कर्मजन्यातिशयोस्त्वित्याशङ्क्याह—**अनंशत्वमिति । आकारभेदो** धर्मभेदः । 'तद् ब्रह्मेति वाक्ये यस्येयं जिज्ञासा प्रस्तुतेति विशेषणस्य तात्पर्यमाह—**कार्यविलक्षणेति । स्वमते इति ।** पूर्वपक्षिमते तु न शास्त्रपृथक्त्वासिद्धिः; उभयोरपि तन्त्रयोः कार्यविषयत्वाविशेषादिति भावः । शास्त्रपृथक्त्वसिद्धिस्तद्ब्रह्मेति भाष्ये उक्तेति पाठः । अतस्तद्ब्रह्मेत्यतः शब्दः संपातायातः । **टीकायां**—तदेवं स्वमतेन मोक्षाख्यं फलं नित्यं श्रुत्यादिभिरुपपाद्य क्रियानिष्पाद्यस्य तु मोक्षस्यानित्यत्वं प्रसंजयति—**तद्यदीति ।** नचागमबाधः; आगमस्योक्तेन प्रकारेणोपपत्तेः । **अपिच ज्ञानजन्यापूर्वजनितो मोक्षो नैयोगिक इत्यस्यार्थस्य सन्ति भूयस्यः श्रुतयो निवारिका इत्याहेति** केषुचित्कोशेषु

ज्योतिःस्वभावम् । यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते । तदेतदशरीरत्वं मोक्षाख्यम् । 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् । अन्यत्र भूताच्च भव्याच्च' (क० २।१४) इत्यादिश्रुतिभ्यः । अतस्तद्ब्रह्म यस्येयं जिज्ञासा प्रस्तुता, तद्यदि कर्तव्यशेषत्वेनोपदिश्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत, अनित्य एव स्यात् । तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्ष इति प्रसज्येत । नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते, अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः । अपिच 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड० ३।२।९) 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' (मुण्ड० २।२।८) । 'आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चन' (तैत्ति० २।९) 'अभयं वै जनक प्राप्तोऽसि' (बृह० ४।२।४) । 'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्' (वाजसनेयिब्राह्मणोप० १।४।१०) 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ईशा० ७) इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति । तथा 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च' (बृह० १।४।१०) इति ब्रह्मदर्शनसर्वात्मभावयोर्मध्ये कर्तव्यान्तरवारणायोदाहार्यम् । यथा तिष्ठन्गायतीति तिष्ठतिगायत्योर्मध्ये तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते । 'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि' (प्र० ६।८) 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयतु' (छान्दो० ७।१।३) 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमारः' (छान्दो० ७।२६।२) इति चैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति । तथाचाचार्यप्रणीतं

भामती ।

मिति । तृप्त्या दुःखरहितं सुखमुपलक्षयति । क्षुद्दुःखनिवृत्तिसहितं हि सुखं तृप्तिः । सुखं चाप्रतीयमानं न पुरुषार्थ इत्यत आह—**स्वयंज्योतिरिति** । तदेवं स्वमतेन मोक्षाख्यं फलं नित्यं श्रुत्यादिभिरुपपाद्य (क्रियानिष्पाद्यस्य तु मोक्षस्यानित्यत्वं प्रसञ्जयति—**तद्यदीति** । नचागमबाधः; आगमस्योक्तेन प्रकारेणोपपत्तेः । **अपिच**) ज्ञानजन्यापूर्वजनितो मोक्षो नैयोगिक इत्यस्यार्थस्य सन्ति भूयस्यः श्रुतयो निवारिका इत्याह—**अपिच ब्रह्म वेदेति** । अविद्याद्वयप्रतिबन्धापनयमात्रेण च विद्याया मोक्षसाधनत्वं न स्वतोऽपूर्वोत्पादेन चेत्यत्रापि श्रुतीरुदाहरति—**त्वं हि नः पितेति** । न केवलमस्मिन्नर्थे श्रुत्यादयः, अपित्वक्षपादाचार्यसूत्रमपि न्यायमूलमस्तीत्याह—**तथाचाचार्यप्रणीतमिति** । **आचार्यश्चोक्तलक्षणः पुराणे**—'आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि । स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते ॥' इति । **तेन हि प्रणीतं सूत्रम्**—'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इति । पाठापेक्षया कारणमुत्तरं, कार्यं च पूर्वं, कारणापाये कार्यापायः, कफापाय इव कफोद्भवस्य ज्वरस्यापायः । जन्मापाये दुःखापायः, प्रवृत्त्यपाये जन्मापायः, दोषापाये प्रवृत्त्यपायः । मिथ्याज्ञानापाये दोषापायः । मिथ्याज्ञानं चाविद्या, रागाद्युपजनितक्रमेण दृष्टेनैव संसारस्य परमं निदानम् । सा च तत्त्वज्ञानेन ब्रह्मात्मैकत्वविज्ञानेनावगतिपर्यन्तेन विरोधिना निवर्त्यते । ततोऽविद्यानिवृत्त्या ब्रह्मरूपाविर्भावो मोक्षः, नतु विद्याकार्यस्तज्जनितापूर्वकार्यो वेति सूत्रार्थः । तत्त्वज्ञानान्मिथ्याज्ञानापाय इत्येतावन्मात्रेण सूत्रोपन्यासः, नत्वक्षपादसंमतं तत्त्वज्ञानमिह संमतम् ।

वेदान्तकल्पतरुः ।

इदानीं तत्साधनज्ञानस्य केवलदृष्टार्थत्वाच्च स उच्यत इत्याह—**तदेवमित्यादिना** । उपपाद्य इत्यस्य **निवारिका इत्याह** इत्यनेन संबन्धः । एवं फलस्वभावेन नियोगाभावमुक्त्वा फलिज्ञानस्वभावेनाप्युच्यत इत्याह—**अविद्याद्वयेति** । **स्वत**

कल्पतरुपरिमलः ।

पाठः । कोशान्तरेषु तु तदेवं स्वमतेन मोक्षाख्यं फलं नित्यं श्रुत्यादिभिरुपपाद्य ज्ञानजन्यापूर्वजनितो मोक्षो नैयोगिक इत्यस्यार्थस्य सन्ति भूयस्यः श्रुतयो निवारिका इति पाठः । अस्मिन्पाठे उपपाद्येत्यस्य निवारिका इत्यव्यवहितनिवारणक्रियायान्वयः प्रतिभाति, तदन्वयो न युक्तः; नैयोगिकत्वनिवारणार्थाभिः श्रुतिभिः श्रुत्यन्तरोदाहरणपूर्वकं मोक्षफलनित्यत्वस्याप्रतिपादितत्वादित्याशङ्क्य उपपाद्येत्यस्याहेत्यनेन संबन्धमाह—**उपपाद्येत्यस्येति । एवं फलस्वभावेनेति** । तदेवमिति टीकावतारिकाग्रन्थे मोक्षस्य नित्यत्वेन नैयोगिकत्वासंभवस्य प्रागुपपादितस्यानुवादपूर्वकं मोक्षसाधनज्ञानस्य तात्कालिकब्रह्मप्राप्तिसाधनत्वाद् नैयोगिकत्वासंभव उच्यत इति तस्य टीकाग्रन्थस्य तात्पर्यमुक्तम्, इदानीं तु ब्रह्मभावप्राप्तिफलस्य प्राप्तप्राप्तिरूपस्य तात्कालिकफलत्वस्वाभाव्येन नियोगासंभवं तदेवमित्यादिग्रन्थोक्तमनूद्य फलसाधनस्य तत्त्वज्ञानस्याविद्योच्छेदद्वारकत्वस्वाभाव्येन नियोगद्वारकत्वासंभव उच्यत इत्येवमविद्याद्वयेत्यादिटीकावतार्यते । अतो न पूर्वटीकावतारिकाग्रन्थे-

भामती ।

तदनेनाचार्यान्तरसंवादेनायमर्थो दृढीकृतः । **स्यादेतत्**—नैकत्वविज्ञानं स्थितवस्तुविषयं, येन मिथ्याज्ञानं भेदावभासं निवर्तयन्न विधिविषयो भवेत्, अपितु संपदादिरूपम् । तथाच विधेः प्रागप्राप्तं पुरुषेच्छया कर्तव्यं सत् विधिगोचरो भविष्यति । यथा वृत्त्यनन्तत्वेन मनसो विश्वेदेवसाम्याद्विश्वान्देवान्मनसि संपाद्य मन आलम्बनमविद्यमानसमं कृत्वा प्राधान्येन संपाद्यानां विश्वेषामेव देवानामनुचिन्तनं तेन चानन्तलोकप्राप्तिः । एवं चिद्रूपसाम्याज्जीवस्य ब्रह्मरूपतां संपाद्य जीवमालम्बनमविद्यमानसमं कृत्वा प्राधान्येन ब्रह्मानुचिन्तनं तेन चामृतत्वफलप्राप्तिः । अध्यासे त्वालम्बनस्यैव प्राधान्येनारोपिततद्भावस्यानुचिन्तनं, यथा 'मनो ब्रह्मेत्युपासीत' 'आदित्यो ब्रह्मेत्यादेशः' । एवं जीवमब्रह्म 'ब्रह्मेत्युपासीत' इति । क्रियाविशेषयोगाद्वा, यथा 'वायुर्वाव संवर्गः' 'प्राणो वाव संवर्गः' । बाह्या खलु वायुदेवता वह्न्यादीन् संवृङ्क्ते । महाप्रलयसमये हि वायुर्वह्न्यादीन्संवृज्य संहृत्यात्मनि स्थापयति । **यथाह द्रविडाचार्यः**—'संहरणाद्वा संवरणाद्वा सात्मीभावाद्वायुः संवर्गः' इति । अध्यात्मं च प्राणः संवर्ग इति । स हि सर्वाणि वागादीनि संवृङ्क्ते । प्रायणकाले हि स एव सर्वाणीन्द्रियाणि संगृह्योत्क्रामतीति । सेयं संवर्गदृष्टिर्वायौ प्राणे च दशाशागतं जगद्दर्शयति यथा, एवं जीवात्मनि बृंहणक्रियया ब्रह्मदृष्टिरमृतत्वाय फलाय कल्पत इति । तदेतेषु त्रिष्वपि पक्षेष्वात्मदर्शनोपासनादयः प्रधानकर्माण्यपूर्वविषयत्वात्, स्तुतशस्त्रवत् । आत्मा तु द्रव्यं कर्मणि गुण इति संस्कारो वात्मनो

वेदान्तकल्पतरुः ।

इति । विहितक्रियारूपेणेत्यर्थः । **न्यायसूत्रे—दोषो** रागादिः । **प्रवृत्तिः** कर्म । आरोप्यत्वसाम्येऽप्यध्यासात्सम्पदो भेदमाह—**मन इति** । आरोप्यप्रधाना संपदधिष्ठानप्रधानोऽध्यासः । अरोपितस्तद्भावो ब्रह्मादिभावो यस्य तन्मनआदि तथा । **वह्न्यादीनि** इत्यादिशब्दात्सूर्यचन्द्रादयो गृह्यन्ते । **वागादीनिति** । चक्षुःश्रोत्रमनांसि संवृज्य उद्यम्य लयं गमयितुं चालयित्वेत्यर्थः । **संवरणादिति** । उद्यमनादित्यर्थः । यो हि यदुद्यच्छति तत्स्ववशतया संवृणोतीति । **सात्मीभावादिति** । साम्येन कारणात्मत्वोपगमनादित्यर्थः । यद्यपि श्रुतौ स्वापे प्राणः संवर्ग उक्तः; तथापि न्यायसाम्याल्लयस्य चात्र प्रकटत्वात्प्रायणमुदाहृतम् । अग्न्यादेरुपलक्षणत्वात्सर्वाश्रयत्वं वायुप्राणयोरुपास्यमित्याह—**सेयमिति** । **दशाशागतं** दशदिग्गतम् । संवर्गदृष्टान्तं निगमयति—**यथेति** । दार्ष्टान्तिकमाह—**एवमिति** । **बृंहणक्रियया** देहादिपरिणमनक्रियया । **आत्मदर्शनोपासनादय इति** । **दर्शनं** प्रमितिः । एतच्च प्रमाणज्ञानं विधेयमिति मतमवलम्ब्योक्तम् । आदिशब्दो दृष्टान्तभूतमनआद्युपास्त्यर्थः । **स्तुतशस्त्रवदिति** । **भेदलक्षणेऽभिदधे—स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वात्** (जै. अ. २ पा. १ सू. १३) 'आज्यैः स्तुवते' 'प्रउगं शंसतीति' स्तुतशस्त्रे समाम्नाते

कल्पतरुपरिमलः ।

नार्थैक्यशङ्का । न स्वत इत्ययुक्तं; स्वत एव हि विद्याया मोक्षसाधनत्वं, नान्यायत्तमित्याशङ्क्य व्याचष्टे—**विहितक्रियारूपेणेति** । **आरोप्यप्रधानेति** । यद्यपि **बृहदारण्यकोपनिष'द्यथ संपद' इति संपदुपासनानामुपक्रमे**—अल्पेषु कर्मसु महतां कर्मणां तत्फलाय बुद्ध्या संपादनं संपद्, अश्वमेधादीनि महान्ति कर्माणि कार्त्स्न्येनानुष्ठातुमशक्तानां संभवदङ्गमात्रसाहित्येन तान्यनुतिष्ठतां तदङ्गाश्रयोपासनाविशेषैस्तत्फलसंपादनं वा संपदिति द्वेधा भाष्यकारैर्व्याख्यातम् । **वार्तिककारैरपि**—'फलवत्कर्मणां क्वापि किंचित्सामान्यसंश्रयात् । संपत्तिर्महतां संपदल्पीयःकर्मसूच्यते ॥ यदि वा तत्फलस्यैव किंचित्सामान्यवर्त्मना । संपादनं भवेत्संपदग्निहोत्रादिकर्मणि ॥ नातिभारोस्ति नो बुद्धेः शास्त्रं चेत्तत्परं भवेत् । विदुषां श्रेयसेऽतोऽध्वा न क्वचित्प्रतिहन्यते ॥' इति । अनन्तं वै मन इति विहितविश्वेदेवोपासनाया इष्ट्यादिषु सर्वकर्मानुसंधातुर्ब्रह्मणः तदनुसंधानकरणं मनोधिष्ठानमिति 'कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायती'त्याद्युपक्रमवशादवगतम् । अतस्तस्यापि कर्मसंबन्धः; तथापि तमर्थं सिद्धं कृत्वा संपदुपासनानामारोप्यप्राधान्यं प्रतीकोपासनानामधिष्ठानप्राधान्यं चानादिवृद्धव्यवहारसंप्रदायसिद्धमिह लिखितम् । **ननु संवरणम्** उद्यमनमिति व्याख्यानमयुक्तम्, तयोर्भेदादित्याशङ्क्य लक्षणाबीजं संबन्धमाह—**योहीति** । **ननु**—टीकायां संवृङ्क्त इत्यस्य संवृज्य संहृत्यात्मनि स्थापयतीत्यर्थमुक्त्वा तत्र संमतिरप्युदाहृता संवरणाद्वा स्वात्मीभावाद्वा वायुः संवर्ग इति । तत्र संवृङ्क्ते इत्यस्य संहरणार्थत्वं तावदुपपद्यते; 'वृजि वर्जने' इति लुग्विकरणपठितादितो धातोरात्मनेपदिनः सिद्धस्य संवृङ्क्त इत्यस्य वर्जयतीत्यर्थकस्य संवरणे पर्यवसानोपपत्तेः, तथैव संवरणार्थकत्वमप्युपपद्यते; 'वृजि वरणे' इति रुधादिगणपठितात् परस्मैपदिनो धातोः छान्दसेन पदव्यत्ययेन संवृङ्क्त इति रूपसिद्धेः । अस्ति च संवरणं संहृतस्योपादानेन स्वात्मभावापादने । किमर्थं संवरणेनोद्यमनं लक्षणीयं, मुख्यार्थान्वयानुपपत्त्यभावात्—**सत्यम्**; वायुस्वभावाच्चालनमपि संभवतीति द्योतनाय तात्पर्यतस्तथा व्याख्यतम् । **अग्न्यादेरुपलक्षणत्वादिति** । **ननु**—'वायुरग्निसूर्यचन्द्रापः संहृत्य स्वात्मभावमापादयति' 'प्राणो वाक्चक्षुःश्रोत्रमनांसीत्युक्त्वा 'ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तस्तत्कृतमिति' तेऽग्न्यादयो वागादयश्च वायुप्राणाभ्यां सह दशेति वाक्य-

न्यायोपबृंहितं सूत्रम्—'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' (न्या० सू० १।१।२) इति । मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति । नचेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपम्, यथा 'अनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति' (बृह० ३।१।९) इति । नचाध्यासरूपम्, यथा 'मनो ब्रह्मेत्युपासीत' (छान्दो० ३।१८।१) 'आदित्यो ब्रह्मेत्यादेशः' (छान्दो० ३।१९।१) इति च मनआदित्यादिषु ब्रह्मदृष्ट्यध्यासः । नापि विशिष्टक्रियायोगनिमित्तं, 'वायुर्वाव संवर्गः' 'प्राणो वाव संवर्गः' (छान्दो० ४।३।१,३) इतिवत् । नाप्याज्यावेक्षणादिकर्मवत्कर्माङ्गसंस्काररूपम् । संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने 'तत्त्वमसि' (छान्दो० ६।८।७) 'अहं ब्रह्मास्मि' (बृह० १।४।१०) 'अयमात्मा ब्रह्म' (बृह० २।५।१९) इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत । 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' (मुण्ड० २।२।८) इति चैवमादीन्यविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन् । 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड० ३।२।९) इति चैवमादीनि तद्भावापत्तिवचनानि संपदादिपक्षे न सामञ्जस्येनोपपद्येरन् । तस्मान्न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम् ।

भामती ।

दर्शनं विधीयते । यथा दर्शपूर्णमासप्रकरणे 'पत्न्यवेक्षितमाज्यं भवति' इति समाम्नातं, प्रकरणिना च गृहीतमुपांशुयागाङ्गभूताज्यद्रव्यसंस्कारतयावेक्षणं गुणकर्म विधीयते, एवं कर्तृत्वेन क्रत्वङ्गभूते आत्मनि 'आत्मा वा अरे द्रष्टव्यः' इति दर्शनं गुणकर्म विधीयते । **'यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत'** (जै. अ.२पा.१ सू. ८) इति न्यायादत आह—**नचेदं ब्रह्मात्मैकत्वविज्ञानमिति** । कुतः **संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञान इति** । दर्शपूर्णमासप्रकरणे हि समाम्नातमाज्यावेक्षणं तदङ्गभूताज्यसंस्कार इति युज्यते । नच 'आत्मा वा अरे द्रष्टव्यः' इत्यादि कस्यचित्प्रकरणे समाम्नातम् । नचानारभ्याधीतमपि 'यस्य पर्णमयी जुहूर्भवति' इत्यव्यभिचरितक्रतुसंबन्धजुहूद्वारेण जुहूपदं क्रतुं स्मारयद्वाक्येन

वेदान्तकल्पतरुः ।

आज्यप्रउगशब्दौ स्तोत्रशस्त्रविशेषनामनी । प्रगीतमन्त्रसाध्यं देवतादिगुणसंबन्धाभिधानं स्तोत्रम् । शस्त्रमप्रगीतमन्त्रसाध्यम् । ते किं देवताप्रकाशनाख्यसंस्कारार्थत्वेन गुणकर्मणी, उतापूर्वार्थत्वेन प्रधानकर्मणी इति संदेहे, गुणसंबन्धाभिधानाद्गुणिन्या देवताया अभिधानेन याज्यावत्क्रतूपयोगिदेवतास्मरणस्य दृष्टत्वाद्गुणकर्मत्वे प्राप्ते—सिद्धान्तः; **'अपि वा स्तुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम्।'** (जै. अ. २पा.१सू.२४) स्तुतिरिह विहिता श्रूयते 'स्तौति' 'शंसतीति' । स्तुतिश्च गुणाभिधानेन स्वरूपप्रकाशनम् । यथा विशालवक्षाः क्षत्रिययुवेति । यत्राभिधानविवक्षा न तत्र स्तुतिं प्रतीमो, यथा यो विशालवक्षास्तमानयेति । तस्मात् स्तौतिशंसती श्रौतार्थलाभाय प्रकरणे अपूर्वोत्पत्तिं प्रति स्तोत्रशस्त्रे विदध्यातामिति । एवमिहात्मोपासनं प्रधानकर्म आत्मा भूतो भव्यशेष इति । अवेक्षितमिति निष्ठया आज्ये कर्मण्यवेक्षणं गुणीकृतम् । भाव्युपयोगमाज्यस्याह—**दर्शपूर्णमासेति** । पूषानुमन्त्रणमन्त्रवदुत्कर्षं वारयति—**प्रकरणिना चेति** । ग्रहणे हेतुमाह—**उपांश्विति** । 'सर्वस्मै वेति' वाक्यात्सर्वार्थमप्याज्यमुत्पत्तावविहितद्रव्यकोपांशुयागाङ्गम्; आग्नेयादीनामुत्पत्तिशिष्टपुरोडाशाद्यवरोधात् । सत्यप्यत्राज्यभागाद्यङ्गेष्वाज्यनिवेशे न प्रधानहविष्ट्वमिति । द्रव्यसंस्कारकस्य गुणकर्मत्वे जैमिनीयसूत्रमुदाहरति—**यैस्त्विति** । (जै. अ. २ पा. १ सू. ८) यैरवघातादि**भिर्द्रव्यं चिकीर्ष्यते**, संस्कर्तुमिष्यते **गुणस्तत्र प्रतीयेत**, द्रव्ये गुणभूतं कर्मप्रतीयेतेत्यर्थः । आत्मोपास्त्यादेः संस्कारकर्मत्वं प्रकरणाद्वाक्याद्वा भवद्भवेत्, **नाद्य** इत्याह दृष्टान्तवैषम्यपूर्वकं—**दर्शपूर्णमासेति** । **न द्वितीय** इत्याह—**न चानारभ्येति** ।

कल्पतरुपरिमलः ।

शेषे परिगणिताः, कथमग्न्यादिग्रहणं सर्वोपलक्षणं स्याद्, व्यवस्थिताग्न्यादिविषयदशसंख्योक्तिविरोधादिति—**चेत्, उच्यते**; 'दश सन्तस्तत्कृत' मिति दशसंख्यावत्त्वं कृतायसादृश्येन ताद्रूप्यं चोक्तमुपजीव्यदशसंख्यावत्त्वेन 'दशाक्षरा विराडन्नं विराडि'त्यर्थवादान्तरोक्तप्रक्रियया सर्वाशागतसकलान्नरूपत्वं कृतत्वेन, 'कृतायो यथा दशसंख्यान्तर्भाववत्त्वेन तामत्तीव, एवं वायुप्राणरूपैषा दशात्मिका देवता दशसंख्यासंस्तुतं सर्वमन्नमत्तीवेति' । सर्वान्नात्तृत्वं चोक्तं वाक्यशेषे—'तस्मात्सर्वासु दिक्षु अन्नमेव सैषा विराडन्नादीति' । एवंचेहाग्न्यादेरुपलक्षणत्वोक्तिर्वाक्यशेषतः सर्वाशागतभोग्यभोक्तृरूपसकलजगदाश्रयत्वप्राप्तेरुपलक्षणार्था । अतएव ज्योतिरधिकरणे (अ. १ पा. १ सू. २४.) सकलान्नात्रादिलरूपमिदं सार्वात्म्यं वाक्यशेषार्थमेवाचार्या वर्णयिष्यन्तीति । 'पूष्णोऽहं देवयज्ययेति' पूषानुमन्त्रणमन्त्रस्य पूषदेवताकेष्टिषूत्कर्षः । **सर्वस्मै वेति** । "सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यमिति" वाक्याद्ध्रौवाज्यमविहितद्रव्यकसर्वयागाङ्गं सदुपांशुयाजस्याप्यङ्गं भवतीत्यर्थः । **सत्यप्यत्राज्यभागाद्यङ्गेष्वाज्यनिवेशे न प्रधानहविष्ट्वमिति । ननु**—उपांशुयाजाज्यस्यैव प्रधानह-

अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या । किं तर्हि? प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद्वस्तुतन्त्रा । एवंभूतस्य ब्रह्मणस्तज्ज्ञानस्य च न कयाचिद्युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुम् । नच विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः; 'अन्यदेव तद्विदितादथो अविदितादधि' (केन० १।३) इति विदिक्रियाकर्मत्वप्रतिषेधात्, 'येनेदं सर्वं विजानाति तं केन विजानीयात्' (बृह०२।४।१३) इति च । तथोपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति—'यद्वाचानभ्युदितं येन वागभ्युद्यते' इत्यविषयत्वं ब्रह्मण उपन्यस्य 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' (केन० १।४) इति । अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरितिचेत्, न; अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य । नहि शास्त्रमिदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति । किं तर्हि ? प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति । तथाच शास्त्रम्— 'यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम्' (केन०

भामती ।

यथा पर्णतायाः क्रतुशेषभावमापादयति, एवमात्माऽव्यभिचरितक्रतुसंबन्धः, येन तद्दर्शनं क्रत्वङ्गं सदात्मानं क्रत्वर्थं संस्कुर्यात् । तेन यद्ययं विधिस्तथापि 'सुवर्णं भार्यम्' इति वत् विनियोगभङ्गेन प्रधानकर्मैवापूर्वविषयत्वान्न गुणकर्मेति स्थवीयस्त्वैतदूषणमनभिधाय सर्वपक्षसाधारणं दूषणमुक्तम्, तदतिरोहितार्थतया न व्याख्यातम् । किंच ज्ञानक्रियाविषयत्वविधानमस्य बहुश्रुतिविरुद्धमित्याह—**नच विदिक्रियेति** । शङ्कते—**अविषयत्व इति** । ततश्च शान्तिकर्मणि वेतालोदय इति भावः । निराकरोति—**न** । कुतः **अविद्याकल्पितभेदनिवृत्तिविषयत्वादिति** । सर्वमेव

वेदान्तकल्पतरुः ।

यद्ययमिति विधिलाभावो हि पूर्वपक्षोपन्यासे वर्णित इति । **सुवर्णं भार्यमितिवदिति । शेषलक्षणेऽभिहितम्— 'अद्रव्यत्वात्तु शेषः स्यात्'**(जै. अ.३पा.४सू.२७) 'तस्मात्सुवर्णं हिरण्यं भार्यं दुर्वर्णोऽस्य भ्रातृव्यो भवती'त्यनारभ्याधीते संशयः—किं शोभनवर्णहिरण्यधारणं क्रत्वङ्गमुत पुरुषधर्मः इति । तत्र फलकल्पनाभयात्क्रतुनिवेशः; दुर्वर्ण इत्यादि त्वेवंकामशब्दविरहान्न फलपरम् । नच सत्रवद्विपरिणामः; क्रत्वङ्गत्वेन गतिसंभवात् ॥ तथाच वैदिककर्मत्वसाम्यादग्निहोत्रादिप्रकरणनिवेश इति प्राप्ते—**अद्रव्यत्वाद्** द्रव्यदेवतासंबन्धराहित्यान्न स्वतन्त्रं कर्म, किंतु क्रतुशेष इति सूत्रार्थः ।

कल्पतरुपरिमलः ।

विष्टेऽप्याज्यभागादीनामप्याज्यं हविरिति तद्द्वारेणाज्यसंस्काराणामाज्यभागाद्यर्थत्वमप्यस्त्येव; **'द्रव्यसंस्कारः प्रकरणाविशेषात् सर्वकर्मणाम्'** (जै. अ.३पा.८सू.३०)इति जैमिनिना तथा सूत्रितत्वात्, द्रव्यसंस्काराः न केवलं प्रधानार्थाः किंत्वङ्गप्रधानार्था इति निर्णयार्थं प्रवृत्तस्य **'प्रकरणविशेषादसंयुक्तं प्रधानस्य'**(जै. सू.अ. ३ पा.७ सू.१) इत्यधिकरणस्य **'लिङ्गदर्शनाच्च'** (जै. अ. ३ पा. ७ सू. ४) तिगुणसूत्रेणाज्यसंस्काराणामाज्यभागप्रभृत्यङ्गार्थत्वमप्यस्तीत्यत्र 'ध्रुवामेवाग्रेऽभिघारयति, ततो हि प्रथममाज्यभागौ यक्ष्यन् भवती'ति ध्रौवाज्याभिघारणप्राथम्ये तद्धविष्काज्यभाग प्राथम्यहेतूकरणस्य लिङ्गतयोपन्यासाच्च, तस्मादवेक्षणस्याज्यसंस्कारस्य प्रधानमात्रार्थत्वोक्तिरयुक्तेति—**चेत्, उच्यते**; नात्र तस्य प्रधानमात्रार्थत्वमुक्तं, किंतु टीकायामुपांशुयाजग्रहणमन्येषामप्याज्यहविष्कयागानामुपलक्षणमभिप्रेत्य । उपांशुयाजः किमित्याज्यहविष्कयागसामान्योपलक्षकतया निर्दिष्टः ? प्राथमिकत्वादाज्यभागावेव तथा निर्देशार्हावित्याशङ्कायां, प्राधान्यादुपांशुयाजस्तथा निर्दिष्ट इत्ययमर्थः **सत्यप्यत्रेत्यादि**ग्रन्थेन दर्शितः, अतो न दोषः । **फलकल्पनाभयादिति** । उपलक्षणमेतत् । पुरुषार्थत्वे हिरण्यरूपसाधनविशिष्टस्य धारणस्य विधायकं वाच्यमिति कृत्यप्रत्ययोक्तकर्मप्राधान्यभङ्गभयादित्यपि द्रष्टव्यम् । **क्रतुनिवेश इति** । धारणसंस्कृतस्य हिरण्यस्य विनियोगाकाङ्क्षया कल्प्य इति भावः । **सत्रवद्विपरिणाम** इति स्थाने सक्तुवद्विपरिणाम इति क्वचित्पाठः । हिरण्यसाधनकेन धारणेनेष्टं भावयेदिति सक्तुन्यायाद्विपरिणामे सत्यनारभ्याधीतस्य तस्य क्रतुनिवेशकल्पकाभावात् फलविशेषाकाङ्क्षायामार्थवादिकफलविपरिणामोऽपि कल्प्य इति भावः । क्रत्वङ्गत्वेन गतौ सत्यां कृत्यप्रत्ययावगतकर्मप्राधान्यभङ्गः फलविपरिणामः फलाय हिरण्यविशिष्टधारणविधिरिति त्रयमपि नाश्रयणीयमिति परिहारार्थः । **नन्वनारभ्याधीतस्य** कुतः क्रतुनिवेशसिद्धिः ? संस्कृतविनियोगनियमाच्चेत्, कुतः क्रतुसंबन्धावगतेः प्राक् संस्कारविधित्वनिर्णयः ? तन्निर्णयेऽपि लौकिककर्मसु वा निवेशः कुतो न स्यात् ? तत्राह—**वैदिककर्मत्वसाम्यादिति** । 'तप्ते पयसि दध्यानयती'त्यत्र पयसः क्रतुसंबन्धात्प्रागेव दध्यानयनसंस्कार्यत्वेऽवगते पश्चात् सा वैश्वदेवीति वाक्येन संस्कृतविनियोगाकाङ्क्षापूरणं दृष्टम्, एवमिहापि धारणसंस्कार्यत्वेनावगते हिरण्ये तद्विनियोगाकाङ्क्षप्रसूतार्थापत्त्या वैदिककर्मत्वसादृश्योपस्थितेष्वग्निहोत्रादिषु विनियोगकल्पनया तत्पूरणमिति भावः । **द्रव्यदेवतेति । ननु—** द्रव्यदेवतासंबन्धराहित्येन धारणस्य यागत्वाद्यभाव एव सिद्ध्येत्, ननु धारणरूपतयैव स्वतन्त्रकर्मत्वस्याभावोऽपि—

२।३) 'नदृष्टेर्द्रष्टारं पश्येः' 'न विज्ञातेर्विज्ञातारं विजानीयाः' (बृह० ३।४।२) इति चैवमादि । अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः । यस्य तूत्पाद्यो मोक्षस्तस्य मानसं, वाचिकं, कायिकं वा कार्यमपेक्षत इति युक्तम् । तथा विका-

भामती ।

हि वाक्यं नेदंतथा वस्तुभेदं बोधयितुमर्हति । नहीक्षुक्षीरगुडादीनां मधुररसभेदः शक्य आख्यातुम् । एवमन्यत्रापि सर्वत्र द्रष्टव्यम् । तेन प्रमाणान्तरसिद्धे लौकिक एवार्थे यदा गतिरीदृशी शब्दस्य, तदा कैव कथा प्रत्यगात्मन्यलौकिके । अदूरविप्रकर्षेण तु कथंचित्प्रतिपादनमिहापि समानम् । त्वंपदार्थो हि प्रमाता प्रमाणाधीनया प्रमित्या प्रमेयं घटादि व्याप्नोतीत्यविद्याविलसितम् । तदस्या विषयीभूतोदासीनतत्पदार्थप्रत्यगात्मसामानाधिकरण्येन प्रमातृत्वाभावात् तन्निवृत्तौ प्रमाणादयस्तिस्रो विधा निवर्तन्ते । नहि पक्तुरवस्तुत्वे पाक्यपाकपचनानि वस्तुसन्ति भवितुमर्हन्तीति । **तथाहि**—'विगलितपराग्वृत्त्यर्थत्वं पदस्य तदस्तदा त्वमिति हि पदेनैकार्थत्वे त्वमित्यपि यत्पदम् । तदपि च तदा गत्वैकार्थ्यं विशुद्धचिदात्मतां त्यजति सकलान्कर्तृत्वादीन्पदार्थमलान्निजान् ॥' इत्यान्तरश्लोकः । अत्रैवार्थे श्रुतीरुदाहरति— **तथाच शास्त्रम्—यस्यामतमिति** । प्रकृतमुपसंहरति—**अतोऽविद्याकल्पितेति** । परपक्षे मोक्षस्यानित्यता-

वेदान्तकल्पतरुः ।

सिद्धान्तस्तु—'अप्रकरणे तु तद्धर्मस्ततो विशेषात्' (जै.अ.३पा.४सू.२६) । **तद्धर्मः** पुरुषधर्म एवं जातीयकः । यतोऽप्रकरणेऽयमाम्नातः प्रकरणाधीताद्धर्माद्विशिष्यते । नचाहवनीये जुह्वतीति होमानुवादेनाहवनीयविधानवत्क्रत्वनुवादेन धारणं विहितं, येन साक्षाद्वाक्येन क्रतुसंबन्धि भवेत् । नाप्यव्यभिचारिक्रतुसंबन्धाश्रयद्वारा वाक्यात्पर्णमयीवत्क्रतुमुपनिपतेत्; सुवर्णधारणस्य लोकेऽपि विद्यमानत्वेन क्रत्वव्यभिचाराभावात् । तस्माद्विनियोगभङ्गेन हिरण्यसाधनकं धारणं वाक्यशेषगतफलाय विधीयते इति पुरुषधर्म इति । एवमिहाप्यात्मसाधनकदर्शनेनामृतत्वं भावयेदिति विधानात् प्रधानकर्मतैवेति । अपूर्व विषयो जन्यमस्येत्यपूर्वविषयम् । न केवलम् इक्षुक्षीरादिरसविशेष एवानभिधेयः प्रतीयते, अपितु सर्ववाक्यार्थोपि । तथा सति ब्रह्माप्यनभिधेयमेव वेदान्ततात्पर्यगम्यमित्याह—**एवमन्यत्रापीति** । गामानयेति हि वाक्ये गवानयनकर्तव्यतार्थः, सोऽपि साधारण इति न विवक्षितगवानयनं वक्ति वाक्यं, प्रकरणादिवशेन त्वर्थात्तत्सिद्धिरिति । **अदूरविप्रकर्षेणेति** । साक्षादनभिधानादस्ति विप्रकर्षः । स चादूरे वस्तुगतधर्मपरामर्शद्वारा वस्तुविशेषस्य लक्षणया प्रतिपादनादिति प्रत्यगात्मत्वेनाविषयतया प्रतिपादयति । भाष्यं व्याचक्षाणो वेदान्तानामदूरविप्रकर्षेण वस्तुबोधकत्वमुपपादयति—**त्वंपदार्थोहीति** । **व्याप्नोतीति** । यत्तदविद्याविलसितमित्यर्थः । **तत्** तत्र सतीत्यर्थः । अविषयीभूतोदासीनतत्पदार्थस्य प्रत्यगात्मनश्च तत्त्वमसीति सामानाधिकरण्येनास्य संसारिणः प्रमातृत्वाभावात्तन्निवृत्तौ प्रमित्या प्रमेयं व्याप्नोतीत्येवंभावस्य निवृत्तौ त्रयः प्रकारा निवर्तन्त इत्यर्थः । **विगलितेति** । विगलिता पराक्त्वेन वृत्तिर्वर्तनं यस्य स विगलितपराग्वृत्तिस्तादृशः प्रत्यक्त्वमापन्नोऽर्थो यस्य तद्विगलितपराग्वृत्त्यर्थं तस्य भावस्तत्त्वमेतत् । **तदः** तत्पदस्य । **तदा** काले भवति । कदेत्यत आह—**त्वमिति हीति** । **तदा** तत्पदेन । एकार्थस्यैव व्याख्या **विशुद्धेति** । **आन्तरश्लोकः** मध्यश्लोकः । **परपक्षे इति** । साध्यश्चेन्मोक्षोऽभ्युपगम्येतानित्य एव स्यादिति भाष्येणापादितैवानित्यतानूद्यते, नित्येऽपि

कल्पतरुपरिमलः ।

सत्यम्; धारणस्य स्वतन्त्रकर्मत्वं लक्षितयागरूपतया मुख्यधारणरूपतया वेति विकल्पं मनसि निधायाद्यपक्षनिराकरणार्थत्वेनेदमद्रव्यसूत्रं (जै. अ. ३ पा. ४ सू. २७) योजितम् । द्वितीयपक्षनिराकरणं तु **द्रव्यपरत्वाच्चेति** (जै. अ.३ पा. ४ सू. २९ । (**द्रव्यसंयोगाच्चेति सौत्रः पाठः**) तदनन्तरसूत्रेण धारणस्य स्वातन्त्र्ये क्रत्वप्रत्ययावगतद्रव्यप्राधान्यविरोधं दर्शयता कृतमित्यभिप्रायः । **ननु**—अद्रव्यसूत्रस्य द्रव्यदेवतासंबन्धराहित्येन यागत्वनिराकरणार्थतायां **अद्रव्यदेवतात्वात्तु शेषः स्यादिति** शबरस्वामिलिखितसूत्रस्य पाठो लिखितुं युक्तः, नत्वद्रव्यत्वादिति वार्तिककारलिखितः पाठः; तस्मिन् पाठे **ह्यद्रव्यत्वाद्** विधेयद्रव्याभावाद्, धारणमात्रविधानसंभवेन द्रव्यस्यापि तद्विशेषणतया विधानाभावाद्, न हिरण्यसाधनकधारणरूपस्वतन्त्रकर्मविधिरित्येव सूत्रार्थो वर्णयितुं युक्तः—**सत्यम्**; देवतापदयुक्तो भाष्यकारलिखितसूत्रपाठः सांप्रदायिको न भवतीति वार्तिककारैस्त्यक्तत्वात् । यथावार्तिकं सूत्रं पठित्वा तत्रैव भाष्यकारदर्शितोऽप्यर्थो योजितः । अस्मिन्नर्थे द्रव्यशब्दः संप्रदानत्वार्हदेवतारूपद्रव्यवाचीति तदभावेन द्रव्यदेवतासंयोगराहित्यरूपहेतुसिद्धिरित्यभिप्रायः । **सिद्धान्तस्त्विति** । नच—आधानसंस्कृताहवनीयवदध्यानयनसंस्कृतपयोवच्च साक्षाद्वाक्येन क्रतुसंबन्धानवगमेऽपि पर्णतावदव्यभिचरितक्रतुसंबन्धाभावेऽपि हिरण्यस्य श्रुतधारणकर्मत्वान्यथानुपपत्त्याग्निहोत्रादिषु निवेशः कल्प्यः स्यादिति— वाच्यम्; तेषु हिरण्यस्येदृशो विनियोग इति तद्विशेषकल्पनायां विनिगमकाभावेन विनियोगविशेषं विना तेषु निवेशस्यानिर्वाहात् । नच—येषु क्रतुषु हिरण्यविनियोगः संप्रतिपन्नः तेषु तद्द्वारा धारणस्य निवेशः कल्प्यतामिति—वाच्यम्;

र्यत्वे च तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम् । नहि दध्यादिविकार्यं उत्पाद्यं वा घटादि नित्यं दृष्टं लोके । नचाप्यत्वेनापि कार्यापेक्षा; स्वात्मस्वरूपत्वे सत्यनाप्यत्वात् । स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वं; सर्वगतत्वेन नित्याप्तस्वरूपत्वात्सर्वेण ब्रह्मणः, आकाशस्येव । नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत । संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयनेन वा । न तावद्गुणाधानेन संभवति; अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य । नापि दोषापनयनेन; नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य । स्वात्मधर्म एव संस्तिरोभूतो मोक्षः क्रिययात्मनि संस्क्रियमाणेऽभिव्यज्यते, यथादर्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वं धर्म इति चेन्न, क्रियाश्रयत्वानुपपत्तेरात्मनः । यदाश्रया क्रिया, तमविकुर्वती नैवात्मानं लभते । यद्यात्मा

भामती ।

मापादयति—**यस्य त्विति** । कार्यमपूर्वं यागादिव्यापारजन्यं तमपेक्षते मोक्षः स्वोत्पत्ताविति । **तयोः पक्षयोरिति** । निर्वर्त्यविकार्ययोः । क्षणिकं ज्ञानमात्मेति बौद्धाः । तथाच विशुद्धविज्ञानोत्पादो मोक्ष इति निर्वर्त्यो मोक्षः, अन्येषां तु संसाररूपावस्थामपहाय या कैवल्यावस्थावाप्तिरात्मनः स मोक्ष इति विकार्यो मोक्षः । यथा पयसः पूर्वावस्थापहानेनावस्थान्तरप्राप्तिर्विकारो दधीति । तदेतयोः पक्षयोरनित्यता मोक्षस्य; कार्यत्वात्, दधिघटादिवत् । 'अथ यदतः परो दिवो ज्योतिर्दीप्यते' इति श्रुतेर्ब्रह्मणो विकृताविकृतदेशभेदावगमादविकृतदेशब्रह्मप्राप्तिरुपासनादिविधिकार्या भविष्यति, तथाचं प्राप्यकर्मता ब्रह्मण इत्यत आह—**नचाप्यत्वेनापीति** । अन्यदन्येन विकृतदेशपरिहाण्याऽविकृतदेशं प्राप्यते । तद्यथोपवेलं जलधिरतिबहलचपलकल्लोलमालापरस्परास्फालनसमुल्लसत्फेनपुञ्जस्तबकतया विकृतः, मध्ये तु प्रशान्तसकलकल्लोलोपसर्गः स्वस्थः स्थिरतयाऽविकृतस्तस्य मध्यमविकृतं पौतिकः पोतेन प्राप्नोति । जीवस्तु ब्रह्मैवेति किं केन प्राप्यतां, भेदाश्रयत्वात्प्राप्तेरित्यर्थः । **अथ** जीवो ब्रह्मणो भिन्नस्तथापि न तेन ब्रह्माप्यते, ब्रह्मणो विभुत्वेन नित्यप्राप्तत्वादित्याह—**स्वरूपव्यतिरिक्तत्वेऽपीति** । संस्कार्यकर्मतामपाकरोति—**नापि संस्कार्य इति** । द्वयी हि संस्कार्यता, गुणाधानेन वा, यथा बीजपूरकुसुमस्य लाक्षारसावसेकः, तेन हि तत्कुसुमं संस्कृतं लाक्षासवर्णं फलं प्रसूते । दोषापनयेन वा, यथा मलिनमादर्शतलं निघृष्टमिष्टकाचूर्णेनोद्भासितभास्वरत्वं संस्कृतं भवति । तत्र न तावद्ब्रह्मणि गुणाधानं संभवति । गुणो हि ब्रह्मणः स्वभावो वा भिन्नो वा । स्वभावश्चेत् कथमाधेयः ? तस्य नित्यत्वात् । भिन्नत्वे तु कार्यत्वेन मोक्षस्यानित्यत्वप्रसङ्गः । नच भेदे धर्मधर्मिभावः, गवाश्ववत् । भेदाभेदश्च व्युदस्तः; विरोधात् । तदनेनाभिसंधिनोक्तम्—**अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य** । द्वितीयं पक्षमपक्षिपति—**नापि दोषापनयनेनेति** । अशुद्धिः सती दर्पणे निवर्तते, नतु ब्रह्मणि असती निवर्तनीया; नित्यनिवृत्तत्वादित्यर्थः । शङ्कते—**स्वात्मधर्म एवेति** । ब्रह्मस्वभाव एव मोक्षोऽनाद्यविद्यामलावृत उपासनादिक्रिययात्मनि संस्क्रियमाणेऽभिव्यजते, नतु क्रियते । **एतदुक्तं भवति**—नित्यशुद्धत्वमात्मनोऽसिद्धं, संसारावस्थायामविद्यामलिनत्वादिति; शङ्कां निराकरोति—**न** । कुतः **क्रियाश्रयत्वानुपपत्तेः** । नाविद्या ब्रह्माश्रया, किंतु जीवे, सा त्वनिर्वचनीयेत्युक्तं, तेन नित्यशुद्धमेव ब्रह्म । अभ्युपेत्य त्वशुद्धिं क्रियासंस्कार्यत्वं दूष्यते । क्रिया हि ब्रह्मसमवेता वा ब्रह्म संस्कुर्यात्, यथा निघर्षणमिष्टकाचूर्णसंयोगविभागप्रचयो निरन्तर आदर्शतलसमवेतः । अन्यसमवेतो वा । न तावद्ब्रह्मधर्मः क्रिया; तस्याः स्वाश्रय-

वेदान्तकल्पतरुः ।

मोक्षेऽविद्यानिवृत्तिसंस्कारः कर्मसाध्य इति पक्षप्रतिक्षेपेणानित्यत्वं स्थापयितुमित्यर्थः । **उपवेलं** वेलायाः समीपे । **विकृतः** । तत्र हेतुः—**अतिबहुलेति** । समुल्लसन्तः फेनपुञ्जस्तबका यस्य तस्य भावस्तत्ता । पोतेन दीव्यति व्यवहरतीति **पौतिकः** । अशुद्धिर्ब्रह्मणि सत्युतासती । **प्रथमस्तु** भिन्नाभिन्नविकल्पनाभ्यां निरसनीयः । **चरमं निरस्यति—नत्विति** । **अनाद्यविद्यामलेति** । शङ्कितुर्वास्तव्यविद्याभिमतेति । **ननु** नित्यशुद्धत्वादात्मनि न हेयत्वसंभव इत्युक्ते कथं शङ्कात आह—**एतदुक्तमिति** । ब्रह्मणि नाविद्या, किंतु जीवे; सा चानिर्वाच्येत्युक्तमध्यासभाष्ये । तथाविधा च ज्ञाननिरस्येत्युपास्तिर्विफलेत्यर्थः । निघर्षणव्याख्यानम्—**इष्टकेति** । एतच्च धात्वर्थः संयोगविभागावेवेति मतमाश्रित्य ।

कल्पतरुपरिमलः ।

'हिरण्यं हस्ते भवति,' 'हिरण्येन षोडशिनः स्तोत्रमुपाकरोति' 'हिरण्यस्रज ऋत्विजो भवन्ती'त्यादिहिरण्यविनियोगवत्सु क्रतुषु तद्धारणस्यापि प्राप्तेः, दक्षिणारूपहिरण्यवत्स्वपि दीयमानस्य प्रतिगृह्यमाणस्य च तस्य धारणप्राप्तेः, हिरण्यार्थतया धारणविधाने सुवर्णश्रुतिवैफल्यापत्तेश्च । तस्माच्छोभनवर्णहिरण्यसाधनकधारणविधिः पुरुषार्थ इत्येव युक्तम् । एवं सतीयमेव श्रुतिः 'दाक्षायणी ब्रह्मसूत्री कमण्डलुधरो द्विजः' इत्यादिपुरुषार्थहिरण्यधारणस्मृतेर्मूलं भविष्यतीति तस्या मूलान्तरकल्पनागौरवमपि परिहृतं भवतीति । **इत्युक्तमध्यासभाष्य इति** । अन्तःकरणाद्यवच्छिन्नप्रत्यगात्मा

क्रियया विक्रियेतानित्यत्वमात्मनः प्रसज्येत। अविकार्योऽयमुच्यते' इति चैवमादीनि वाक्यानि बाध्येरन्। तच्चानिष्टम्। तस्मान्न स्वाश्रया क्रियात्मनः संभवति। अन्याश्रयायास्तु क्रियाया अविषयत्वान्न तयात्मा संस्क्रियते। ननु देहाश्रयया स्नानाचमनयज्ञोपवीतादिकया क्रियया देही संस्क्रियमाणो दृष्टः। न; देहादिसंहतस्यैवाविद्यागृहीतस्यात्मनः संस्क्रियमाणत्वात्। प्रत्यक्षं हि स्नानाचमनादेर्देहसमवायित्वम्। तया देहाश्रयया तत्संहत एव कश्चिदविद्ययात्मत्वेन परिगृहीतः संस्क्रियत इति युक्तम्। यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलं, अहमरोग इति यत्र बुद्धिरुत्पद्यते, एवं स्नानाचमनयज्ञोपवीतादिना अहं शुद्धः संस्कृत इति यत्र बुद्धिरुत्पद्यते स संस्क्रियते। स च देहेन संहत एव। तेनैव ह्यहंकर्त्राहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते। तत्फलं च स एवा-

भामती।

विकारहेतुत्वेन ब्रह्मणो नित्यत्वव्याघातात्। अन्याश्रया तु कथमन्यस्योपकरोति; अतिप्रसङ्गात्। नहि दर्पणे निघृष्यमाणे मणिर्विशुद्धो दृष्टः। **तच्चानिष्टमिति**। तदा बाधनं परामृशति। अत्र व्यभिचारं चोदयति—**ननु देहाश्रययेति**। परिहरति—**न। देहसंहतस्येति**। अनाद्यनिर्वाच्याविद्योपधानमेव ब्रह्मणो जीव इति च क्षेत्रज्ञ इति चाचक्षते। स च स्थूल सूक्ष्मशरीरेन्द्रियादिसंहतस्तत्संघातमध्यपतितस्तदभेदेनाहमितिप्रत्ययविषयीभूतः, अतः शरीरादिसंस्कारः शरीरादिधर्मोऽप्यात्मनो भवति; तदभेदाध्यवसायात्। यथाङ्गरागधर्मः सुगन्धिता कामिनीनां व्यपदिश्यते। तेनात्रापि यदाश्रिता क्रिया सांव्यवहारिकप्रमाणविषयीकृता तस्यैव संस्कारो नान्यस्येति न व्यभिचारः।

वेदान्तकल्पतरुः।

अन्याश्रयात्विति। यद्यपि स्पन्दरूपा भावना चैत्राश्रिता दर्पणस्योपकरोति; तथापि संयोगविभागाख्यधात्वर्थद्वारा तौ च नात्मनीत्यर्थः। संयोगविभागातिरिक्तधात्वर्थपक्षेऽपि समानं; धात्वर्थस्य संयोगविभागद्वारातिशयजनकत्वात्। नचात्मनि क्रियाजन्यातिशयसंभव इति। **तदा** तच्छब्देन, बाध्येरन्नित्युक्तं **बाधनं** परामृशति, तद् अव्यवहितम्। **अनित्यत्वमात्मनः प्रसज्येतेत्युक्तं** त्वनित्यत्वं व्यवहितमिति। **ननु** देहादावहंविभ्रमवत इव संस्कार्यत्वमिति कथम्? स्वत एव किं न स्यादत आह—**अनाद्यनिर्वाच्येति। ननु** नाविद्यामात्रोपहिते सुषुप्तवद्व्यवहारसिद्धिरत आह—**स्थूलेति**। स्थूलसूक्ष्माणि च तानि यथाक्रमं शरीरेन्द्रियाणि। आदिशब्दात्प्राणादयः। संहतत्वमपि न तटस्थत्वेन तत्संयोगित्वं, किंतु तत्र प्रविष्टत्वमित्याह—**तत्संघातेति**। प्रवेशोऽपि न भेदेन प्रतिभासमानत्वेन, किंतु ऐक्याध्यासेनेत्याह—**तदभेदेनेति। अङ्गराग**श्चन्दनादिः। फलितमाह—**तेनेति**। देहादावैक्येनाध्यस्ते आत्मनि क्रियारोप्यते, तज्जन्यसंस्कारश्च, अतो नान्याश्रितक्रियाफलभाक्त्वमन्यस्येति न व्यभिचार इत्यर्थः। आरोपितसंस्काराच्च फलभाक्त्वमिति शङ्कामहंप्रत्ययस्य रूप्याद्यध्यासवैलक्षण्येन परिहरति—**सांव्यवहारिकेति**। स्नु प्रस्रवणे इति धातुमभिप्रेत्याह—

कल्पतरुपरिमलः।

इदमनिदंरूपश्चेतनः कर्ता भोक्ता कार्यकारणाविद्याद्वयाधार इत्यध्यासभाष्यटीकायामुक्तमित्यर्थः। **ननु** घर्षणस्यादर्शगतेष्टकाचूर्णसंयोगविभागप्रचयतया व्याख्यानमयुक्तं, फलं हि तत्प्रचयः पुरुषव्यापाररूपाया घर्षणक्रियायाः, यथा तण्डुलविक्लित्तिः पचिक्रियाया इत्याशङ्क्याह—**एतच्चेति**। सर्वत्र फलमेव धात्वर्थः, नतु तदनुकूलव्यापारः; त्यजिगमिधात्वोः पर्यायतापत्तेः। एक एव हि पूर्वदेशविभागोत्तरदेशसंयोगरूपफलद्वयस्याप्यनुकूलो व्यापारः पुरुषस्पन्दः। यद्युच्येत फलविशेषावच्छिन्नो व्यापारो धात्वर्थः, ततः पूर्वदेशं त्यजति उत्तरदेशं गच्छतीत्यर्थभेदस्तयोरिति, तर्ह्यावश्यकत्वाल्लाघवाच्च तत्तत्फलमेव धात्वर्थोऽस्तु। नचैवं—सति पचेर्विक्लित्त्यर्थतायां विक्लित्त्युदयात्प्राक् पचतीति वर्तमानप्रयोगो न स्यात्, न स्याच्च तण्डुलान् पचतीति तण्डुलानां कर्मतया निर्देशः, धात्वर्थरूपविक्लित्तिक्रियाजन्यस्य तण्डुलेषु फलान्तरस्याभावात् परसमवेतत्वाभावाच्चेति—वाच्यम्; धात्वर्थरूपफलानुकूलव्यापारस्याख्यातार्थत्वाङ्गीकारेण पचतीति लडर्थस्य वर्तमानत्वस्यैकप्रत्ययोपात्ते तस्मिन्नन्वयोपपत्तेः। तज्जन्यविक्लित्तिरूपफलभागित्वेन तण्डुलानां कर्मतया निर्देशोपपत्तेश्चेति मण्डनाचार्याणां मतमनुसृत्य संयोगविभागरूपस्य फलस्य घर्षतिधात्वर्थत्वमुक्तमिति भावः। **ननु** फलस्य धात्वर्थत्वे विक्लित्त्युदयात् प्राक् पाको वर्तत इति प्रयोगो न स्यात्; तत्र पचिधातोरुपरि तदर्थविक्लित्त्यनुकूलव्यापारवाचकस्याख्यातस्याभावात्, तत्तत्फलानुकूलव्यापारसामान्यरूपेणाख्यातार्थत्वे च पचति यजतीत्यादावधःसंतापनद्रव्यत्यागादिव्यापारविशेषप्रतीतिर्न स्यात्; तत्र तत्राधःसंतापनादिव्यापारविशेषस्यापि तदर्थतायामाख्यातस्य नानार्थत्वं स्यात्; तस्मात् तत्तद्व्यापारविशेष एव धात्वर्थः, त्यजिगम्योरपर्यायता तु फलस्योपलक्षणतयाप्युपपद्यत इति मन्यमानानामन्येषां मते कथमिहोपपत्तिरित्याशङ्क्याह—**संयोगविभागातिरिक्तेति**। दर्पणेष्टकाचूर्णसंयोगविभागफलकः पुरुषव्यापारो

श्नाति; 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' (मुण्ड० ३।१।१) इति मन्त्रवर्णात्। 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (काठ० १।३।४) इति च। तथाच 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' (श्वेता० ६।११) इति, 'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्' (ईशा० ८) इति चैतौ मन्त्रावनाधेयातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयतः। ब्रह्मभावश्च मोक्षः। तस्मान्न संस्कार्योऽपि मोक्षः। अतोऽन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचिद्दर्शयितुम्। तस्माज्ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते। ननु ज्ञानं नाम मानसी क्रिया। न; वैलक्षण्यात्। क्रिया हि नाम सा, यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते पुरुषचित्तव्यापाराधीना च। यथा यस्यै देवतायै हविर्गृहीतं

भामती।

तत्त्वतस्तु न क्रिया न संस्कार इति। सनिदर्शनं तु शेषमध्यासभाष्य एव कृतव्याख्यानमिति नेह व्याख्यातम्। **तयोरन्यः पिप्पलमिति**। अन्यो जीवात्मा। पिप्पलं कर्मफलम्। **अनश्नन्नन्य इति**। परमात्मा। संहतस्यैव भोक्तृत्वमाह मन्त्रवर्णः—**आत्मेन्द्रिय इति**। अनुपहितशुद्धस्वभावब्रह्मप्रदर्शनपरौ मन्त्रौ पठति—**एको देव इति**। शुक्रं दीप्तिमत्। अव्रणं दुःखरहितम्। **अस्नाविरं** अविगलितम्, अविनाशीति यावत्। उपसंहरति—**तस्मादिति**। **ननु**-मा भून्निर्वर्त्यादिकर्मताचतुष्टयी, पञ्चमी तु काचित् विधा भविष्यति, यया मोक्षस्य कर्मता घटिष्यत इत्यत आह—**अतोऽन्यदिति**। एभ्यः प्रकारेभ्यो न प्रकारान्तरमन्यदस्ति, यतो मोक्षस्य क्रियानुप्रवेशो भविष्यति। **एतदुक्तं भवति**—चतसृणां विधानां मध्येऽन्यतमतया क्रियाफलत्वं व्याप्तं, सा च मोक्षाद्व्यावर्तमाना व्यापकानुपलब्ध्या मोक्षस्य क्रियाफलत्वं व्यावर्तयतीति। तत्किं मोक्षे क्रियैव नास्ति, तथाच तदर्थानि शास्त्राणि तदर्थाश्च प्रवृत्तयोऽनर्थकानीत्यत उपसंहारव्याजेनाह—**तस्माज्ज्ञानमेकमिति**। अथ ज्ञानं क्रिया मानसी कस्मान्न विधिगोचरः? कस्माच्च तस्याः फलं निर्वर्त्यादिष्वन्यतमं न मोक्षः? इति चोदयति—**ननु ज्ञानमिति**। परिहरति—**न**। कुतः? **वैलक्षण्यात्**। **अयमर्थः**—**सत्यं**, ज्ञानं मानसी क्रिया, नत्वियं ब्रह्मणि फलं जनयितुमर्हति; तस्य स्वयंप्रकाशतया विदिक्रियाकर्मभावानुपपत्तेरित्युक्तम्। तदेतस्मिन्वैलक्षण्ये स्थित एव वैलक्षण्यान्तरमाह—**क्रिया हि नाम सेति**। यत्र विषये **वस्तुस्वरूपनिरपेक्षैव चोद्यते**। यथा देवतासंप्रदानकहविर्ग्रहणे देवतावस्तुस्वरूपानपेक्षा देवताध्यानक्रिया। यथावा योषिति अग्निवस्त्वनपेक्षाग्निबुद्धिर्या सा क्रिया हि नामेति योजना। नहि 'यस्यै देवतायै हविर्गृहीतं

वेदान्तकल्पतरुः।

अविगलितमिति। क्रियानुप्रवेशद्वारान्तरं मोक्षे भवत्विति शङ्कायां भाष्ये तदभावप्रतिज्ञैव भाति, न हेतुरित्याशङ्क्याह—**एतदुक्तमिति**। **नच विदिक्रियाविषयत्वेनेति** भाष्ये ज्ञानाविषयत्वस्योक्तत्वात्पुनः शङ्कोत्तरे व्यर्थे इत्याशङ्क्य परिहारान्तराभिप्रायतामाह—**अयमर्थ इत्यादिना**। यदवादि पूर्वपक्षे ज्ञानस्य भावार्थत्वाद् विधेयत्वमिति तत्र क्रियात्वमभ्युपेत्य विधेयत्वं निराक्रियत इत्याह—**सत्यमिति**। वस्तुतो विदिक्रियायाः कर्मभावानुपपत्तेरित्यर्थः। औपाधिकं तु कर्मत्वमनिष्टं नियोगवादिनाम्। यदा तु ज्ञानं क्रियैव न भवतीत्येवंपरतया भाष्यं व्याख्यायते, तदा पचतीतिवज्जानातीति पूर्वापरीभावप्रसिद्धिर्दुश्चिकित्सा स्यादिति। **वैलक्षण्यान्तरमिति**। ज्ञेयवैलक्षण्यं प्रागुक्तमिदानीं ज्ञानस्याविधेयत्वं वैलक्षण्यमुच्यत इति। यत्र विषये या वस्त्वनपेक्षा चोद्यते तत्र सा क्रियेति तच्छब्दाध्याहारेण योजयितुं यत्रशब्दार्थमाह—**यत्र विषये इति**। ध्यानस्य वस्त्वनपेक्षामुक्त्वा पुरुषेच्छाधीनत्वमुपपादयति—**नहि यस्यै इति**। **वषटरिष्यन्** होता। विध्यर्था-

कल्पतरुपरिमलः।

घर्षेतिधात्वर्थ इति पक्षेऽपीत्यर्थः। वस्तुतो विदिक्रियाकर्मभावेत्यादिव्याख्याने बीजमाह—**औपाधिकं त्विति**। वृत्त्युपरागोपाधिकं कर्मत्वमित्यर्थः। इदं तु परानानुगुण्यान्नेति भावः। **तच्छब्दाध्याहारेण योजयितुमिति**। यत्रेत्यस्य प्रतिनिर्देशार्थं तत्रेति शब्दाध्याहारेण योजयितुमित्यर्थः। एवंच टीकायां तत्रशब्दाश्रवणेऽपि तदध्याहारोऽभिप्रेत इति सूचितं भवति। यच्छब्दाध्याहारेण योजयितुमिति पाठे सेति शब्दस्य प्राङ्निर्देशार्थं येति शब्दस्याध्याहारेण योजयितुमित्यर्थः। अनेनोभयमप्यध्याहार्यमिति सिद्धम्। अतएवाचार्यैस्तत्रेति येति चोभयमप्यध्याहृत्य वाक्यं पूरितम्। **ननु** तां ध्यायेदिति विधितः प्राग् देवताध्यानमप्राप्तमित्यसिद्धं, तं विधिमनपेक्ष्यापि तत्तदर्थवादावगमितदेवतारूपाणां स्वेच्छया कदाचिदनुचिन्तनसंभवादित्यत आह—**विध्यर्थेति**। वषट् कुर्यादिति विध्यर्थवषट्कारानुष्ठानात्प्राक्काले नियमेन ध्यानं तद्विधिं विना न प्राप्तमित्यर्थः। **ननु**—अधीतवेदस्य विचारपूर्वकार्थज्ञानमपि विधिं विना न प्राप्नोतीति—**चेद्, न**; तस्याध्ययनविधिना फलवदर्थावबोधपरतां नीतैर्विशेषतः संदिह्यमानार्थैर्वेदान्तैराक्षिप्ततया मुमुक्षूणां प्राप्तिसत्त्वादिति

स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्' इति, 'संध्यां मनसा ध्यायेत्' (ऐ० ब्रा० ३।८।१) इति चैवमादिषु । ध्यानं चिन्तनं यद्यपि मानसं; तथापि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं, पुरुषतन्त्रत्वात्, ज्ञानं तु प्रमाणजन्यम् । प्रमाणं च यथाभूतवस्तुविषयम् । अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यम् । केवलं वस्तुतन्त्रमेव तत् । न चोदनातन्त्रम् । नापि पुरुषतन्त्रम् । तस्मान्मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम् । यथाच 'पुरुषो वाव गौतमाग्निः' 'योषा वाव गौतमाग्निः' (छान्दो० ५।७,८।१) इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति । केवलचोदनाजन्यत्वात्क्रियैव सा पुरुषतन्त्रा च । या तु प्रसिद्धेऽग्नावग्निबुद्धिर्न सा चोदनातन्त्रा । नापि पुरुषतन्त्रा । किं तर्हि ? प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेवैतन्न क्रिया । एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम् । तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम् । तद्विषये लिङादयः श्रूयमाणा अप्यनियोज्यविषयत्वात्कुण्ठीभवन्त्युपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत्; अहेयानुपादेयवस्तुविषयत्वात् । किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादीनि

भामती ।

स्यात्तां ध्यायेद्वषट्करिष्यन्' इत्यस्माद्विधेः प्रागदेवताध्यानं प्राप्तं, प्राप्तं त्वधीतवेदान्तस्य विदितपदतदर्थसंबन्धस्याधिगतशब्दन्यायतत्त्वस्य 'सदेव सौम्येदम्' इत्यादेः 'तत्त्वमसि' इत्यन्तात्संदर्भात् ब्रह्मात्मभावज्ञानं शब्दप्रमाणसामर्थ्यादि । इन्द्रियार्थसन्निकर्षसामर्थ्यादिव प्रणिहितमनसः स्फीतालोकमध्यवर्तिकुम्भानुभवः । नह्यसौ स्वसामग्रीबललब्धजन्मा सन् मनुजेच्छयान्यथाकर्तुमकर्तुं वा शक्यः, देवताध्यानवत्, येनार्थवानत्र विधिः स्यात् । नचोपासना वानुभवपर्यन्तता वास्य विधेर्गोचरः; तयोरन्वयव्यतिरेकावधृतसामर्थ्ययोः साक्षात्कारे वानाद्यविद्यापनये वा विधिमन्तरेण प्राप्तत्वेन पुरुषेच्छयान्यथाकर्तुमकर्तुं वा अशक्यत्वात् । तस्माद्ब्रह्मज्ञानं मानसी क्रियापि न विधिगोचरः, पुरुषचित्तव्यापाराधीनायास्तु क्रियाया वस्तुस्वरूपनिरपेक्षिता क्वचिदविरोधिनी, यथा देवताध्यानक्रियायाः, नह्यत्र वस्तुस्वरूपेण कश्चिद्विरोधः । क्वचिद्वस्तुस्वरूपविरोधिनी, यथा योषित्पुरुषयोरग्निबुद्धिरित्येतावता भेदेन निदर्शनमिथुनद्वयोपन्यासः । क्रियैवेत्येवकारेण वस्तुतन्त्रत्वमपाकरोति । ननु 'आत्मेत्येवोपासीत' इत्यादयो विधयः श्रूयन्ते । नच प्रमत्तगीताः, तुल्यं हि सांप्रदायिकं, तस्माद्विधेयेनात्र भवितव्यमित्यत आह—**तद्विषया लिङादय इति** । सत्यं श्रूयन्ते लिङादयः, नत्वमी विधिविषयाः, तद्विषयत्वेऽप्रामाण्यप्रसङ्गात् । हेयोपादेयविषयो हि विधिः । स एवच हेय उपादेयो वा, यं पुरुषः कर्तुमकर्तुमन्यथा वा कर्तुं शक्नोति । तत्रैव च समर्थः कर्ताधिकृतो नियोज्यो भवति । नचैवंभूतान्यात्मश्रवणमननोपासनदर्शनानीति विषयतदनुष्ठात्रोर्विधिव्यापकयोरभावाद्विधेरभाव इति प्रयुक्ता अपि लिङादयः प्रवर्तनायामसमर्था उपल इव क्षुरतैक्ष्ण्यं कुण्ठमप्रमाणीभवन्तीति । **अनियोज्यविषयत्वादिति** । समर्थो हि कर्ताधिकारी नियोज्यः । असामर्थ्ये तु न कर्तृता ततो नाधिकृतोऽतो न नियोज्य इत्यर्थः । यदि विधेरभावान्न विधिवचनानि, किमर्थानि तर्हि वचनान्येतानि विधिच्छायानीति पृच्छति—**किमर्थानीति** । नचानर्थकानि युक्तानि; स्वाध्यायविध्यधीनग्रहणत्वानु-

वेदान्तकल्पतरुः ।

नुष्ठानात्प्राक् प्रमाणवशाद्ध्यानं न सिध्यति, ततः पुरुषेच्छावशवर्तीति । शब्दज्ञानाभ्यासो वा तस्यैव साक्षात्कारपर्यन्तता पुरुषेच्छाधीनेत्याशङ्क्याह—**नचेति** । उपासनायाः साक्षात्कारेऽनुभवपर्यन्ततताशब्दोक्तसाक्षात्कारस्याविद्यापनये प्राप्तत्वादित्यर्थः । क्रियायाः क्वचिद्वस्तुस्वरूपविरोधित्वं प्रमाणज्ञानाद्वैलक्षण्यमाह—**क्वचिद्वस्तुस्वरूपविरोधिनीति । वस्तुतन्त्रत्वमपाकरोतीति** । अनेन ज्ञानमेव तन्न क्रियेति भाष्ये क्रियाशब्देन क्रियागतमवस्तुतन्त्रत्वं लक्षयित्वा प्रतिषिध्यत इति व्याख्यातम् । अतएव हि भाष्यकारो ब्रह्मज्ञानं न चोदनातन्त्रमिति दार्ष्टान्तिके चोदनातन्त्रत्वं प्रतिषेधति, न ब्रवीति न क्रियेति । अतः क्रियात्वमभ्युपेत्य ज्ञाने विधेयत्वं न मृष्यत इति गम्यते । **सांप्रदायिकं** गुरुमुखाध्ययनादि । **विधिः** कार्यं विषयो येषां ते विधिविषयाः । यः समर्थः शक्तः स कर्ता यः कर्ता स कर्म-

१ **कुण्ठीभवन्तीति**—'द्रष्टव्यः' 'आत्मेत्येवोपासीते'त्यादिविधयः कुण्ठीभवन्ति, नतु 'श्रोतव्यो मन्तव्य' इत्यादयः; प्रमाणजन्यज्ञानस्य दर्शनादिरूपस्येव तात्पर्यावधारणरूपस्य पुरुषप्रकृतिसाध्यस्य श्रवणादेर्वस्तुतन्त्रत्वाभावेन विधिविषयत्वोपपत्तेः । साक्षात्कारसाधनत्वेन श्रवणस्य लोकत एव प्राप्तत्वेऽपि पक्षेऽप्राप्तप्रत्यक्षादिप्रमाणनिवर्तनेन नियमविधित्वम्; सविशेषस्वरूप एव प्रत्यक्षादिप्रमाणप्रवृत्तिः नतु निर्विशेषरूपे इति विशेषस्त्वकिंचित्करः; आत्मस्वरूपसाक्षात्कारे साधनद्वयप्रसङ्गमात्रेणैव नियमविधित्वोपपत्तेः । अन्यथा अपूर्वसाधनीभूतव्रीहिषु नखविदलनादेर्लोकतोऽप्राप्त्या 'व्रीहीनवहन्ती'त्यत्रापि नियमविधित्वाभावप्रसङ्गात्—**इति विवरणानुयायिनः** ।

विधिच्छायानि वचनानि? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः। यो हि बहिर्मुखः प्रवर्तते पुरुषः इष्टं मे भूयादनिष्टं मा भूदिति, नच तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसंघातप्रवृत्तिगोचराद्विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि। तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चात्मतत्त्वमुपदिश्यते। 'इदं सर्वं यदयमात्मा' (बृह० २।४।६) 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् केन कं विजानीयात्' विज्ञातारमरे केन विजानीयात्, (बृह० ४।५।१५) 'अयमात्मा ब्रह्म' (बृह० २।५।१९) इत्यादिभिः। यदप्यकर्तव्यप्रधानमात्मज्ञानं हानायोपादानाय वा न भवतीति, तत्तथैवेत्यभ्युपगम्यते। अलंकारो ह्ययमस्माकं यद्ब्रह्मात्मावगतौ सत्यां सर्वकर्तव्यताहानिः कृतकृत्यता चेति। तथाच श्रुतिः-'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्॥' (बृह० ४।४।१२) इति। 'एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत' (भ० गी० १५।२०) इति स्मृतिः। तस्मान्न प्रतिपत्तिविधिविषयतया ब्रह्मणः समर्पणम्। यदपि केचिदाहुः—प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण केवल-

भामती।

पत्तेरिति भावः। उत्तरम्—**स्वाभाविकेति**। अन्यतः प्राप्ता एव हि श्रवणादयो विधिस्वरूपैर्वाक्यैरनूद्यन्ते। नचानुवादोऽप्यप्रयोजनः; प्रवृत्तिविशेषकरत्वात्। **तथाहि**—तत्तदिष्टानिष्टविषयेप्साजिहासापहृतहृदयतया बहिर्मुखो न प्रत्यगात्मनि समाधातुमर्हति। आत्मश्रवणादिविधिसरूपैस्तु वचनैर्मनसो विषयस्रोतः खिलीकृत्य प्रत्यगात्मस्रोत उद्घाट्यत इति प्रवृत्तिविशेषकरतानुवादानामस्तीति सप्रयोजनतया स्वाध्यायविध्यधीनग्रहणत्वमुपपद्यत इति। यच्च चोदितमात्मज्ञानमनुष्ठानानङ्गत्वादपुरुषार्थमिति, तदयुक्तम्; स्वतोऽस्य पुरुषार्थत्वे सिद्धे यदनुष्ठानानङ्गत्वं तद्भूषणं न दूषणमित्याह—**यदपीति**। **अनुसंज्वरेत्** शरीरं परितप्यमानमनुतप्येत। सुगममन्यत्। प्रकृतमुपसंहरति—**तस्मान्न प्रतिपत्तीति**। प्रकृतसिद्ध्यर्थमेकदेशिमतं दूषयितुमनुभाषते—**यदपि केचिदाहुरिति**। दूषयति—

वेदान्तकल्पतरुः।

व्यधिकृतः स्वामी, योऽधिकृतः स नियोगं स्वकीयतया बुध्यमानो नियोज्यः, स च तत्रैव वर्णितरूपे विषये भवति तस्मिन्नसति न भवतीत्यर्थः। उक्तविषयत्वस्य श्रवणादावभावमाह—**नचैवमिति**। श्रवणं हि ब्रह्मात्मनि तत्त्वमसिवाक्यस्य तच्छन्दश्रुत्यादिपर्यालोचनया तात्पर्यावगमः; अस्य च विषयविशेषावच्छिन्नप्रत्ययस्यानवगमे तत्कर्तव्यत्वबोधायोगात्, अवगमे च श्रवणस्यैव जातत्वात्पुनः कर्तुमकर्तुमन्यथा वा कर्तुमशक्यत्वात्। एवं मननस्यापि विषयविशेषनियतयुक्त्यालोचनस्यावगतस्य कर्तुमशक्यत्वादिति। उपासनस्यापि यथाश्रवणमननं प्रत्ययावृत्तेरवगमे द्वित्रिवारावृत्तेरवश्यंभावाद्विधित्सितार्थस्य ज्ञातस्य न पुनः कर्तव्यत्वं, दर्शनस्य त्वशक्यत्वं स्फुटमिति। **अन्यतः प्राप्ता इति**। दर्शनार्थं कर्तव्यत्वेनान्वय-

कल्पतरुपरिमलः।

भावः। टीकाकारैः सर्वापेक्षाधिकरणे (ब्र. अ. ३ पा. ४ सू. २६) चतस्रः प्रतिपत्तयो ब्रह्मणि। **प्रथमा** तावदुपनिषद्वाक्यश्रवणमात्राद् भवति, यां किलाचक्षते श्रवणमिति। **द्वितीया** मीमांसासहितात् तस्मादेवोपनिषद्वाक्याद्, यामाचक्षते मननमिति। **तृतीया** चिन्तासन्ततिमयी, यामाचक्षते निदिध्यासनमिति। **चतुर्थी तु** साक्षात्कारवती वृत्तिरूपेति। श्रवणादिरूपतयोक्तानां चतुर्णामपि ज्ञानानां प्राप्तत्वेन विधातुमशक्यत्वमुपपादितमेव। इदानीं न्यायतस्तत्तात्पर्यावधारणं श्रवणं तदनुग्राहकानुमानादिरूपयुक्त्यनुचिन्तनं मननमिति पक्षे विधान्तरेणापि तयोर्निदिध्यासनस्य च विधानासंभवमाह—**श्रवणं हीति**। **विषयविशेषावच्छिन्नस्येति**। **ननु** सामान्यतस्तात्पर्यावगमो विधेयोऽस्त्वित्याशङ्क्य **विशेषग्रहणं** कृतम्। तथाच सर्वेषां वेदानामर्थपरत्वमापादयतार्थज्ञानफलकाध्ययनविधिनैव च वेदान्तानामपि कर्मकाण्डवत् सामान्यतोऽर्थतात्पर्यावगमसिद्धेर्न तदवगमार्थं श्रवणविधिरभ्युपेयः, किंतु तेषामखण्डे ब्रह्मणि न्यायतस्तत्तात्पर्यमवगच्छेदिति विषयविशेषावच्छिन्नतात्पर्यावगतिविषयः सोऽभ्युपेतव्यः। तथाच प्राक् तदवगमानवगमयोरुक्तदूषणद्वयमापततीति भावः। **ननु**—साङ्गाध्ययनवतो वेदान्तानां सगुणनिर्गुणरूपेषु नानाविधेष्वर्थेषु क्वैषां तात्पर्यमिति संदेहे च सति बुद्ध्यारूढनिर्गुणरूपविषयविशेषावच्छिन्नं तात्पर्यं न्यायतो निश्चिनुयादिति विधातुं शक्यत इति—**चेन्न**; वेदार्थनिश्चयात् फलविशेषप्रतीतौ तदर्थतात्पर्यनिर्णयाय स्वत एव न्यायविचारे प्रवृत्त्युपपत्त्या कर्मकाण्डार्थविचार इव विध्यनपेक्षणात्। **युक्त्यालोचनस्येति**। युक्तिविशेषालोचनविधाने प्राक् तदवगमानवगमाभ्यां प्राप्तिर्विधानाशक्तिश्च। सामान्यतो युक्त्यालोचनं तु न विधेयम्; असंभावनादिनिरासरूपदृष्टार्थत्वेन स्वत एव प्राप्तेरिति भावः। **उपासनस्यापीति**। उपासनं हि प्रत्ययावृत्तिः, सा श्रवणमननकालयोरेकैकप्रत्ययोत्पत्तावपि प्रत्ययद्वयरूपा सिद्धैव; विधेयनिदिध्यास-

वस्तुवादी वेदभागो नास्ति' इति, तन्न; औपनिषदस्य पुरुषस्यानन्यशेषत्वात् । योऽसावुपनिष-

भामती ।

तन्नेति । इदमत्राकूतम्—'कार्यबोधे यथा चेष्टालिङ्गहर्षादयस्तथा । सिद्धबोधेऽर्थवत्तैवं शास्त्रत्वं हितशासनात् ॥' यदिहि पदानां कार्याभिधाने तदर्थस्वार्थाभिधाने वा नियमेन वृद्धव्यवहारे सामर्थ्यमवधृतं भवेत्, न भवेदहेयोपादेयभूतब्रह्मात्मतापरत्वमुपनिषदाम्; तत्राविदितसामर्थ्यत्वात्पदानां, लोके तत्पूर्वकत्वाच्च वैदिकार्थप्रतीतेः । अथतु भूतेऽप्यर्थे पदानां लोके शक्यः संगतिग्रहस्तत उपनिषदां तत्परत्वं पौर्वापर्यपर्यालोचनयावगम्यमानमपह्नुत्य न कार्यपरत्वं शक्यं कल्पयितुं; श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् । तत्र तावदेवमकार्येऽर्थे न संगतिग्रहः यदि तत्परः प्रयोगो न लोके दृश्येत । तत्प्रत्ययो वा व्युत्पन्नस्योन्नेतुं न शक्येत । न तावत्तत्परः प्रयोगो न दृश्यते लोके; कुतूहलभयादिनिवृत्त्यर्थानामकार्यपराणां पदसंदर्भाणां प्रयोगस्य लोके बहुलमुपलब्धेः । तद्यथा'खण्डलादिलोकपालचक्रवालादिवसतिः सिद्धविद्याधरगन्धर्वाप्सरःपरिवारो ब्रह्मलोकावतीर्णमन्दाकिनीपयःप्रवाहपातधौतकलधौतमयशिलातलो नन्दनादिप्रमदवनविहारिमणिमयशकुन्तकमनीयनिनदमनोहरः पर्वतराजः सुमेरुरिति' 'नैष भुजङ्गो रज्जु'रियमित्यादि । नापि भूतार्थबुद्धिर्व्युत्पन्नपुरुषवर्तिनी न शक्या समुन्नेतुं; हर्षादेरुन्नयनहेतोः संभवात् । तथाह्यविदितार्थजनभाषार्थो द्रविडो नगरगमनोद्यतो राजमार्गाभ्यर्णं देवदत्तमन्दिरमध्यासीनः प्रतिपन्नजनकानन्दनिबन्धनपुत्रजन्मा वार्ताहारेण सह नगरस्थदेवदत्ताभ्याशमागतः पटवासोपायनार्पणपुरःसरं 'दिष्ट्या वर्धसे पुत्रस्ते जात' इति वार्ताहारव्याहारश्रवणसमनन्तरमुपजातरोमाञ्चकञ्चुकं विकसितनयनोत्पलमतिस्मेरमुखमहोत्पलमवलोक्य देवदत्तमुत्पन्नप्रमोदमनुमिमीते, प्रमोदस्य च प्रागभूतस्य तद्व्याहारश्रवणसमनन्तरं भवतस्तद्धेतुताम् । नचायमप्रतिपादयन् हर्षहेतुमर्थं हर्षाय कल्पत इत्यनेन हर्षहेतुरर्थ उक्त इति प्रतिपद्यते । हर्षहेत्वन्तरस्य चाप्रतीतेः पुत्रजन्मनश्च तद्धेतोरवगमात्तदेव वार्ताहारेणाभ्यधायीति निश्चिनोति । एवं भयशोकादयोऽप्युदाहार्याः । तथाच प्रयोजनवत्तया भूतार्थाभिधानस्य प्रेक्षावत्प्रयोगोऽप्युपपन्नः । एवंच ब्रह्मस्वरूपज्ञानस्य परमपुरुषार्थहेतुभावादनुपदिशतामपि पुरुषप्रवृत्तिनिवृत्ती वेदान्तानां पुरुषहितानुशासनाच्छास्त्रत्वं सिद्धं भवति । तत्सिद्धमेतत्, विवादाध्यासितानि वचनानि, भूतार्थविषयाणि, भूतार्थविषयप्रमाजनकत्वात् । यद्यद्विषयप्रमाजनकं तत्तद्विषयं, यथा रूपादिविषयं चक्षुरादि, तथा चैतानि, तस्मात्तथेति । तस्मात्सुष्टूक्तम्—**तन्न, औपनिषदस्य पुरुषस्यानन्यशेषत्वादिति ।** उपनिपूर्वात्सदेर्विशरणार्थात्क्विप्युपनिषत्पदं व्युत्पादितं उपनीयाद्वयं ब्रह्म

वेदान्तकल्पतरुः ।

व्यतिरेकावगतान् श्रवणादीननुवदन्ति वचांसि तद्गतप्राशस्त्यलक्षणया तेषु रुचिमुत्पाद्यानात्मचिन्तायामरुचिं कुर्वन्ति, प्रवृत्त्यतिशयं जनयन्तीत्यर्थः । **प्रकृतसिद्ध्यर्थं** सिद्धे वस्तुनि वेदान्तप्रामाण्यसिद्ध्यर्थं । सिद्धे वस्तुनि सङ्गतिविग्रहविरहादि दूषयितुमित्यर्थः । उपनिषदां सिद्धबोधकत्वे आक्षिप्ते पुरुषस्योपनिषद्गम्यत्वसिद्धवत्कारो भाष्येऽनुपपन्न इत्याशङ्क्य तदुपयोगिन्यायः सामर्थ्याद्द्योतित इत्याह—**इदमत्रेति ।** परनरवर्तिशब्दार्थावबोधलिङ्गस्य प्रवृत्तेः सिद्धवस्तुन्यसंभवान्न व्युत्पत्तिरित्युक्तम्—**अज्ञातसङ्गतित्वेनेति । तत्राह—कार्यबोधे इति । यदुक्तमर्थवत्तयेति** तत्सिद्धपुत्रजन्मादिबोधेऽपि हर्षादिप्रयोजनलाभान्न शब्दानां कार्यपरत्वं नियच्छतीत्याह—**अर्थवत्तैवमिति । आखण्डलादीनाम्** इन्द्रादीनाम् । **चक्रवालं** समूहः । **धौतानि** शोधितानि । **कलधौतमयानि** सौवर्णानि शिलातलानि यस्य स तथा । **प्रमदवनानि** प्रमदाभिः सह नृपाणां क्रीडावनानि, तेषु **विहारिणां** संचरणशीलानां । **मणिमयशकुन्तानां** रत्नमयपक्षिणां । **निनदः** शब्दः । **अभ्यर्णं** निकटम् । प्रतिपन्नं जनकस्य पितुरानन्दनिबन्धनं पुत्रजन्म येन स तथोक्तः । सिन्दूररञ्जितपुत्रपदाङ्कितः पटः **पटवासः** स एवो**पायन**मुपहारो लाटानां प्रसिद्धः । **महोत्पलं** पद्मम् । **अर्थवत्तैवमिति** श्लोकभागं व्याचष्टे—**तथाचेति ।** अनेन सिद्धस्याप्यप्रतिपित्सितत्वाप्रतिपिपादयिषितत्वे प्रत्युक्ते । **शास्त्रत्वं हितशासनाद्** इत्येतद्व्याचष्टे—**एवंचेति ।** प्रवृत्तिनिवृत्त्याश्रयणं हि शास्त्रे पुरुषार्थाय, तं तु वेदान्ता अन्तरेणाप्यायासं ज्ञानादेवानयन्तीति भवन्तितरां शास्त्राणीत्यर्थः । **तत्सिद्धमिति ।** तच्छब्देन तस्मादर्थेन सिद्धशब्दव्युत्पत्त्यादि परामृशता वक्ष्यमाणहेतोरसिद्धिरुद्धृता । ज्योतिष्टोमादिवाक्ये बाधं परिहरति—**विवादेति । भूतार्थविषयाणीति ।**

कल्पतरुपरिमलः

नावगमकाले विधेयावृत्त्यवगमस्य ब्रह्मात्मैक्यविषयत्वस्यापि सद्भावात्, तमादाय प्रत्ययत्रयरूपापि सा सिद्धा, आवृत्तिमात्रं हि ध्यानशब्दार्थो, नतु शतसहस्रादिसंख्याविशेषनियतावृत्तिः । तथाच द्वित्रप्रत्ययोत्पत्तावपि आवृत्तिशास्त्रार्थो लब्धएव भवति । यथा सकृन्मुसलपातनेऽपि 'सर्वौषधस्य पूरयित्वाऽवहन्ती'त्यत्रावघातशास्त्रार्थः । यदि ध्यानस्य साक्षात्काररूपदृष्टफलकत्वमिष्यते, तदा परं दार्शपूर्णमासिकावघातस्येव यावद्दृष्टफलोदयमावृत्तिर्लभ्यते । तथा दृष्टफलकत्वे तु न विध्यपेक्षा । उपायान्तरप्राप्त्यभावाद् नियमस्यापि नावकाशः । नच—अविच्छिन्नप्रत्ययावृत्तिर्ध्यानशब्दार्थः, सा न सिद्धेति—

वेदान्तकल्पतरुः ।

न कार्यविषयाणीत्यर्थः; इतरथा भूतार्थप्रतीतिमात्रजनकत्वसाधने सिद्धसाधनात्, प्रमितिजनकत्वस्य साधने हेतोः साध्यसमतापातात् । यत्तच्छब्दावपि प्रस्तुतभूतार्थं परामृशतः । उपोपसर्गः सामीप्यार्थमाह । नीत्ययं निश्चयार्थः । सदेरर्थमाह—

कल्पतरुपरिमलः ।

वाच्यम्; यथाश्रवणमननं प्रत्ययावृत्तिरूपं ध्यानं कर्तव्यमिति विध्यर्थावगमकाले श्रवणे यथाभूतः प्रत्ययः मनने च यथाभूतः तयोरपि क्रमेणानुसंधेयत्वेन नैरन्तर्यस्यापि प्राप्तेरिति भावः । **आखण्डलादीनामित्यादि । ननु**—कुतूहलभयनिवृत्त्यादिप्रयोजनसत्त्वेऽप्याद्यव्युत्पत्तिग्रहानुसारेण कार्याध्याहारः स्यादिति—**चेत्,** किमाद्यव्युत्पत्तिग्रहकाले गामानयेत्यादिवाक्यगतानां 'सर्वेषां पदानां कार्यवाचित्वमध्यवसितमिति तदनुसारेण द्वितीयादिप्रयोगेषु श्रुतैरपि सर्वैः पदैः कार्यसामान्ये बोधिते तद्विशेषजिज्ञासया कार्यविशेषवाचिक्रियापदाध्याहारः ? उताद्यव्यवहारस्य क्रियापदघटितत्वं दृष्टमिति तदनुरोधेन । **नाद्यः,** क्रियापदसमभिव्याहारात् कार्यस्येव गोपदसमभिव्याहारात्कर्मकारकस्य प्रतीत्युपपत्त्या पदान्तराणां कर्मकारकइव कार्येपि शक्तेरकल्पनीयत्वात्, यथा प्रवृत्तिः कार्यावगतिपूर्विका तथा कार्यावगतिरपि प्रवृत्तिविषयशुद्धपदार्थगोचरज्ञानपूर्विकेति नियमस्य प्रत्यक्षाधीनस्वप्रवृत्तिस्थले दृष्टत्वेन प्रयोज्यस्य प्रवृत्त्या कार्यावगतेरिव कार्यावगत्या तदनन्वितशुद्धपदार्थज्ञानस्याप्यनुमितेरनिवार्यतया तस्मिन् उत्तमवृद्धवाक्यं विनाकारणान्तराभावेनाद्यव्युत्पत्तिग्रहसमयएव शुद्धे गवादिपदार्थे शब्दसामर्थ्यग्रहणावश्यंभावाच्च । साक्षात्प्रवृत्तिजनकज्ञानएव शब्दस्य सामर्थ्यं कल्पनीयमिति चेत्, तर्हि ममेदं कार्यमिति ज्ञानएव तस्य सामर्थ्यं कल्प्येत, तस्यैव गामानयेति वाक्यजन्यमदंशरहितज्ञानानन्तरभाविनः साक्षात्प्रवर्तकत्वात् । **नापि द्वितीयः**; दण्डेन गामानयेत्यत्राद्यव्युत्पत्तिग्रहे करणश्रवणेऽप्यग्रे घटं पश्येत्यादौ करणानध्याहारवत् कार्यानध्याहारस्याप्युपपत्तेः, आद्यव्युत्पत्तिग्राहकवाक्यस्यानयनकार्यघटितत्वे द्वितीयादिप्रयोगेष्वपि तदध्याहारापत्तेः । आनयनं विनाग्रे कार्यान्तरघटितवाक्यश्रवणादानयननियमस्त्यज्यत इति चेत्, तर्हि कार्यवाचिपदरहितानां सिद्धार्थवर्णनपराणां काव्यादीनां बहुलमुपलम्भात् कार्यनियमोऽपि त्यक्तव्य इति तुल्यम् । एवमाद्यव्युत्पत्तिग्रहानुरोधेनाग्रे सिद्धार्थप्रयोगेषु कार्यमध्याहर्तव्यमित्यभिमाने भग्ने हर्षलिङ्गोपजीविसिद्धार्थव्युत्पत्तिग्रहोपपादनमपि निरवद्यम् । अन्यथा ह्यविदितार्यजनभाषार्थं इत्यादिटीकाग्रन्थेन प्राक् स्वभाषायां शब्दार्थव्युत्पत्तिमतः प्रबुद्धस्य हर्षलिङ्गोपजीवि 'पुत्रस्तेजातः' इत्यत्र व्युत्पत्तिग्रहणमुपपादितमयुक्तम्; आद्यव्युत्पत्तिग्रहानुसारेण तत्र स्नानदानादिकं कुर्विति कार्यपरत्वस्फुरणादिति शङ्कावकाशः स्यात्, नच—'पुत्रस्ते जातः' इत्यत्राद्यव्युत्पत्तिग्रहोऽप्युक्तरीत्या संभवतीति—शङ्कनीयम्; स्तनन्धयस्यातिबालस्याद्यव्युत्पत्तिग्रहसमये 'जातः शिशुः' 'चैत्रस्य पुत्रजन्म हर्षकारण'मिति च बोधाभावात् । **ननु**—तद्बोधवतः प्रबुद्धस्यापि 'पुत्रस्ते जातः' इति शब्दस्य पुत्रजननरूपार्थपरत्वग्रहणं न संभवति; मुखविकासानुमितहर्षकारणं पुत्रजन्मज्ञानं पुत्रपदाङ्कितपटवासप्रदर्शनलिङ्गजन्यमनुमितिरूपम्, 'पुत्रस्ते जातः' इति वाक्यं तु स्नानदानादिकर्तव्यतार्थकमिति चैत्रस्य हर्षजन्मजातं स्नानदानादिप्रवृत्तिं च पश्यतस्तद्भाषानभिज्ञस्य विपरीतार्थप्रतीतेरेव प्राप्तेरिति—**चेत्, उच्यते;** लाटदेशे पटवासप्रदर्शनपुरःसरं पुत्रजननवार्तां वाचैव स्फुटं वदन्ति वार्ताहारा इति तद्देशप्रसिद्धिं जानन् वार्ताहारवाक्यस्य पुत्रजननमेवार्थ इति प्रत्येतीति न तस्यार्थान्तरप्रतीतिप्रसङ्गः । एवंच प्राग्भवीयसंस्कारोद्बोधेन पटवासप्रदर्शनकृतेन तद्देशप्रक्रियास्मरणमाश्रित्याद्यव्युत्पत्तिग्रहोऽपि पुत्रस्ते जात इत्यत्रोपपादयितुं शक्यः । अवश्यं च मातापित्रादिभिश्चन्द्रः गौरित्यादिशब्देषु चन्द्राद्यभिमुखाङ्गुलीनिर्देशपूर्वकमुच्चार्यमाणेष्वाद्यव्युत्पत्तिग्रहे बालस्य जायमाने सर्वसिद्धे शब्दविशेषोच्चारणसहितार्थविशेषाभिमुखाङ्गुलीनिर्देशस्य तस्मिन्नर्थे तस्य शब्दस्य शक्तिग्रहार्थत्वं जन्मान्तरे प्रबुद्धेन तदाऽवगतं बालेन स्मर्यत इत्येवोपपादनीयम्; तत्र गत्यन्तराभावात्, तथेहापि भविष्यति । एवं जन्मान्तरानुभवसंभवमभिप्रेत्य **लाटानां प्रसिद्ध** इत्युक्तम् । **प्रसिद्धः** प्रकर्षेण सिद्धः । अनादिकालप्रवृत्त इत्यर्थः । **न कार्यविषयाणीत्यर्थ इति । नन्वेवं सति** कार्यविशेषणतया स्वर्गदेवतादिभूतार्थप्रमितिजनके सार्थवादविधिवाक्ये व्यभिचारः स्यात्, **नैष दोषः**; भूतार्थप्रमितिशब्देन स्वातन्त्र्येण भूतार्थप्रतीतेर्विवक्षितत्वात्, प्रतीतौ याथार्थ्यविशेषणस्यानपेक्षितत्वात् । अतएव हेत्वसिद्धिपरिहारार्थं सिद्धव्युत्पत्तिप्रसाधनापेक्षा पूर्ववाक्ये दर्शिता । यथाश्रुतहेतोर्हि न तदपेक्षास्ति; वेदान्तानां ज्ञानविधिशेषतया ब्रह्मप्रमितिजनकत्वस्य परेणाप्यङ्गीकृतत्वात् । **प्रतीतिजनकत्वसाधन इति ।** कारणानां हि तत्तदर्थविषयत्वं फलद्वारकमुपपादनीयं, न साक्षात्तत्तदर्थविषयत्वमस्ति । एवंच फलरूपायां प्रतीतावनन्यशेषत्वरूपभूतार्थविशेषणाविवक्षायां सिद्धसाधनम्, सिद्धसाधनपरिहाराय तद्विवक्षायां हेतुसाध्याभेद इत्यर्थः । **ननु** यदनन्यशेषभूतार्थविषयप्रतीतिजनकं तत् कार्यविषयं न भवतीति विशेषव्याप्तिरेव संभवति; चक्षुरादीनामनन्यशेषभूतार्थविषयाणामानयनादिकार्यविषयत्वाभावात्, किमर्थं सामान्यव्याप्तिप्रत्यायनार्थं यत्तच्छब्दावुपन्यस्ताविত्याशङ्क्याह—**यत्तच्छब्दावपीति ।** यद्विषयेत्यत्र तद्विषयेत्यत्र च समस्तौ यत्तच्छब्दौ न समभिव्याहृतपरौ, किंतु प्रकृतभूतार्थपरामर्शिनौ । तथाच

त्स्वेवाधिगतः पुरुषोऽसंसारी ब्रह्म, उत्पाद्यादिचतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थोऽनन्यशेषः, नासौ नास्ति नाधिगम्यत इति वा शक्यं वदितुम्, 'स एष नेति नेत्यात्मा' (बृह० ३।९।२६)

भामती ।

सवासनामविद्यां हिनस्तीति ब्रह्मविद्यामाह । तद्धेतुत्वाद्वेदान्ता अप्युपनिषदः । ततो विदित औपनिषदः पुरुषः । एतदेव विभजते—**योऽसावुपनिषत्स्वेवेति** । अहंप्रत्ययविषयाद्भिनत्ति—**असंसारीति** । अतएव क्रियारहितत्वाच्चतुर्विधद्रव्यविलक्षणः । अतश्च चतुर्विधद्रव्यविलक्षणो यदनन्यशेषः । अन्यशेषं हि भूतं द्रव्यं चिकीर्षितं सदुत्पत्त्याद्याप्यं संभवति । यथा 'यूपं तक्षति' इत्यादि । यत्पुनरनन्यशेषं भूतभाव्युपयोगरहितं, यथा 'सुवर्णं भार्यम्' 'सक्तून् जुहोति' इत्यादि, न तस्योत्पत्त्याद्याप्यता । कस्मात्पुनरस्यानन्यशेषतेत्यत आह—यतः **स्वप्रकरणस्थः** । उपनिषदामनारभ्याधीतानां पौर्वापर्यपर्यालोचनया पुरुषप्रतिपादनपरत्वेन पुरुषस्यैव प्राधान्येनेदं प्रकरणम् । नच जुह्वादिवदव्यभिचरितक्रतुसंबन्धः पुरुष इत्युपपादितम् । अतः स्वप्रकरणस्थः सोऽयं तथाविध उपनिषद्भ्यः प्रतीयमानो न नास्तीति शक्यो वक्तुमित्यर्थः । **स्यादेतत्**—मानान्तरागोचरत्वेनागृहीतसंगतितयाऽपदार्थस्य ब्रह्मणो वाक्यार्थत्वानुपपत्तेः कथमुपनिषदर्थतेत्यत आह—**स एष नेति नेत्यात्मेत्यात्मशब्दात्** । यद्यपि गवादिवन्मानान्तरगोचरत्वमात्मनो नास्ति; तथापि प्रकाशात्मन एव सतस्तत्तदुपाधिपरिहाण्या शक्यं वाक्यार्थत्वेन निरूपणं, हाटकस्येव कटककुण्डलादिपरिहाण्या । नहि प्रकाशः स्वसंवेदनो न भासते, नापि तदवच्छेदकः कार्यकरणसंघातः । तेन 'स एष नेति नेत्यात्मा' इति तत्तदवच्छेदपरिहाण्या बृहत्त्वादापनाच्च स्वयंप्रकाशः शक्यो वाक्यात् ब्रह्मेति चात्मेति च निरूपयितुमित्यर्थः । अथोपाधिनिरासवद्-

वेदान्तकल्पतरुः ।

सवासनामिति । वस्तुक्रियाशेषं वेदान्तविषयं दर्शयितुं भाष्ये विशेषणानि प्रयुक्तानि व्याचष्टे—**अहंप्रत्ययेत्यादिना** । भाष्ये **असंसारि** इति त्वंपदलक्ष्यनिर्देशः, **ब्रह्मेति** तस्य ब्रह्मत्वमुक्तम् । क्रियारहितत्वमसंसारित्वं । व्यवहितमप्यनन्यशेषत्वमुत्पाद्याद्यभावे हेतुत्वेन संबन्धयति—**अतश्चेति** । उत्पत्त्यादिभिराप्यं साध्यम् । सक्तवो हि प्राङ् न विनियुक्ताः । नच होमेन भस्मशेषा उपयोक्ष्यन्ते, अतो न संस्कार्या इति विनियोगभङ्गेन होमप्राधान्यमिति । अनन्यशेषत्वे स्वप्रकरणस्थत्वं हेतुत्वेन योजयति—**कस्मादिति** । एवं सिद्धार्थव्युत्पत्तिसमर्थनेनोपनिषदां ब्रह्मात्मैक्ये प्रामाण्यमुक्तम्, इदानीं भवत्वन्यत्र सिद्धे पुत्रजन्मादौ सङ्गतिग्रहः, न ब्रह्मणि; अविषयत्वात्; अतो न तत्रोपनिषत्प्रामाण्यमित्याशङ्क्य तत्परिहारपरत्वेन भाष्यमवतारयति—**स्यादेतदित्यादिना** । स्वयंप्रकाशत्वेन स्फुरत्यात्मनि समारोपितदृश्यनिषेधेन लक्षणया शक्यं शास्त्रेण निरूपणमिति भाष्याभिप्रायमाह—**यद्यपीत्यादिना** । **ननु** प्रमाणान्तरमिते तथाविधस्य निषेधात्कथमात्मन्युपाधिनिषेधद्वारा लक्षणाऽत आह—**नहि प्रकाश इति** । भासमाने भासमानं निषेध्यमित्येतावत्, नतु मानेन भासमाने इति, वैयर्थ्यात्, इह स्वतो भात्यात्मनि तत्साक्षिक उपाधिः शक्यनिषेध इति तदवच्छेदकोऽपि न न भासत इत्यन्वयः । न केवलं निषेधमुखेनैवाविषयनिरूपणमपि त्वात्मादिपदैरपि व्याप्त्याद्यभिधानमुखेन परिच्छेदाभावोपलक्षितस्वप्रभ आत्मा लक्षणीयः, स चात्मपदयुक्तात् "नेति" वाक्यादात्मेति निरूप्यते, ब्रह्मपदयुक्ताच्चायमात्मा ब्रह्मेत्यादेर्ब्रह्मेति निरूप्यत इत्याह—**तेनेति** । इतिरिदमर्थे, य आत्मा इदं न इदं नेति चतुर्थे व्याख्यातः । स एष पञ्चमाध्याये

कल्पतरुपरिमलः ।

तद्विषयमित्यस्य भूतार्थविषयमित्यर्थलाभे सति तेन लक्षणया कार्यविषयत्वाभावरूपमभिमतसाध्यं बोधनीयमिति भावः । **उपोपसर्ग इत्यादि** । तथाचाद्वितीयं ब्रह्माहमर्थनिष्कृष्टसाक्षिरूपत्वेनाहमर्थनिर्दिष्टं निश्चयरूपतया विषयीकृत्य सवासनामविद्यां शृणाति हिनस्तीत्युपनिषदिति निर्वचनं कृतं भवति; सदेरिह विशरणार्थत्वस्य टीकायामुक्तत्वात् । **व्यवहितमपीति** । **ननु** क्रियातच्छेषव्यतिरिक्तकेवलसिद्धवस्तुबोधको वेदभागो नास्तीति पूर्वपक्षिमतस्य निरासे तन्नेति प्रतिज्ञाते हेतुत्वेनोपन्यस्तमनन्यशेषत्वं संग्रहवाक्ये; तदुपपादनार्थं च योऽसावुपनिषत्स्वित्यादिवाक्यं, तत्र प्रयाजादिवत् प्रकरणेन जुह्वादिवद्वाक्येन वा विनियोगाभावेनोपपाद्यमानमनन्यशेषत्वं किमर्थं व्यवहितान्वयमाश्रित्य चतुर्विधद्रव्यविलक्षणत्वे हेतुत्वेन योजितं ? किमर्थं च भाष्ये संग्रहवाक्यमुपन्यस्तं तत्रोपन्यस्तयोरौपनिषदत्वानन्यशेषत्वयोरुपपादकं चतुर्विधद्रव्यविलक्षणत्वं विवरणवाक्येऽस्मिन्नुपन्यस्तम् ? **उच्यते**; यदि प्रकरणादिविनियोजकाभावेन क्रियाशेषतयान्वयो नास्ति, तर्हि कर्मकारकत्वेन तच्छेषतयान्वयोऽस्तु, एवमपि क्रियान्वयनियमस्य न भङ्ग इत्याशङ्कान्तरनिराकरणार्थं चतुर्विधद्रव्यविलक्षणत्वमुपन्यस्तम् । तत्राप्यनन्यशेषत्वं हेतुभवनक्षममिति व्यवहितान्वयः समाश्रितः । 'स एष नेत्यात्मेति' बृहदारण्यकपञ्चमाध्यायाम्नातवाक्ये विधेयानुवाद्यविभागमनुवाद्यस्य "अथात आदेशो नेति नेती'ति तच्चतुर्थाध्यायाम्नातवाक्यतः प्राप्तिं च दर्शयति—**य आत्मेति** । 'स एष' इत्यस्य 'कस्मिन्नु प्राणः प्रतिष्ठित इत्यपाने इती'त्यादिनाप्रस्तुते प्राणादिपञ्चके

इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात्, य एव निराकर्ता तस्यैवात्मत्वात् । नन्वात्माहंप्रत्ययविषयत्वादुपनिषत्स्वेव विज्ञायत इत्यनुपपन्नम् । न; तत्साक्षित्वेन प्रत्युक्तत्वात् । नह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधि-

भामती ।

पहितमप्यात्मरूपं कस्मान्न निरस्यत इत्यत आह—**आत्मनश्च प्रत्याख्यातुमशक्यत्वात्** प्रकाशो हि सर्वस्यात्मा तदधिष्ठानत्वाच्च प्रपञ्चविभ्रमस्य । नचाधिष्ठानाभावे विभ्रमो भवितुमर्हति । नहि जातु रज्ज्वभावे रज्ज्वां भुजङ्ग इति वा धारेति वा विभ्रमो दृष्टपूर्वः । **अपिचात्मनः** प्रकाशस्य भासा प्रपञ्चस्य प्रथा । **तथाच श्रुतिः**—'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति । नचात्मनः प्रकाशस्य प्रत्याख्याने प्रपञ्चप्रथा युक्ता । तस्मादात्मनः प्रत्याख्यानायोगाद्वेदान्तेभ्यः प्रमाणान्तरागोचरसर्वोपाधिरहितब्रह्मस्वरूपावगतिसिद्धिरित्यर्थः । उपनिषत्स्वेवावगत इत्यवधारणममृष्यमाण आक्षिपति—**नन्वात्मेति** । सर्वजनीनाहंप्रत्ययविषयो ह्यात्मा कर्ता भोक्ता च संसारी; तत्रैव च लौकिकपरीक्षकाणामात्मपदप्रयोगात् । य एव लौकिकाः शब्दास्त एव वैदिकास्त एव च तेषामर्था इत्यौपनिषदमप्यात्मपदं तत्रैव प्रवर्तितुमर्हति, नार्थान्तरे तद्विपरीत इत्यर्थः । समाधत्ते—**न** अहंप्रत्ययविषय औपनिषदः पुरुषः । कुतः **तत्साक्षित्वेन** । अहंप्रत्ययविषयो यः कर्ता कार्यकरणसंघातोपहितो जीवात्मा तत्साक्षित्वेन परमात्मनोऽहंप्रत्ययविषयत्वस्य **प्रत्युक्तत्वात्** । **एतदुक्तं भवति**—यद्यपि 'अनेन जीवेनात्मना' इति जीवपरमात्मनोः पारमार्थिकमैक्यं; तथापि तस्योपहितं रूपं जीवः, शुद्धं तु रूपं तस्य साक्षि, तच्च मानान्तरानधिगतमुपनिषद्गोचर इति । एतदेव प्रपञ्चयति—**नह्यहंप्रत्ययविषयेति** । **विधिशेषत्वं वा नेतुं न शक्यः** । कुतः **आत्मत्वादेव** । नह्यात्माऽन्यार्थोऽन्यत्तु सर्वमात्मार्थं । **तथाच श्रुतिः**—'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति' इति । अपिचातः सर्वेषामात्मत्वादेव न हेयो नाप्युपादेयः; सर्वस्य हि प्रपञ्चजातस्य ब्रह्मैव तत्त्वमात्मा । नच स्वभावो हेयो-

वेदान्तकल्पतरुः ।

निरूप्यत इत्यर्थः । न केवलमधिष्ठानत्वेन प्रपञ्चसत्ताप्रदत्वादात्मसत्यता, अपितु तत्स्फुरणप्रदत्वाच्चेत्याह—**अपिचेति** । संस्कार्यत्वनिरासप्रस्तावे 'साक्षी चेता' इति मन्त्रोदाहरणेन प्रत्युक्तत्वादिति भाष्यार्थः । नह्यहंप्रत्ययविषयेत्यादिभाष्यमात्मनोऽनधिगतत्वेनौपनिषदत्वोपपादनार्थं, तदवतारयति—**एतदेवेति** । भाष्ये तत्साक्षीति विधिकाण्डानधिगतत्वमुक्तम् । सर्वभूतस्थत्वेन बौद्धसमयानधिगतिः । विनश्यत्सु सर्वेषु भूतेषु स्थितो न विनश्यतीत्यर्थः । सावयव आत्मेति विवसनसमयानधिगतिः । समत्वेन जीवोत्पत्तिवादिपञ्चरात्रतन्त्रानधिगतिः । कूटस्थनित्यत्वेन काणादादितर्कानधिगतिरेकः सर्वस्यात्मेति वर्णितम् । अन्यतोऽनधिगतिमुक्त्वा बाधाभाव उक्तः । अत इति । अधिगते हि बाधो नानधिगत इत्यर्थः । **अथवा-सर्वस्यात्मत्वेन प्रत्याख्यातुं न शक्यं, औपनिषदस्य पुरुषस्यानन्यशेषत्वादिति भाष्यं** 'तद्योऽसावुपनिषत्स्वित्यादिना विवृतं । पुनरभिहितविशेषणस्यात्मनोऽहंप्रत्ययविरोधमाशङ्क्य तन्मिथ्यात्वेनौपनिषदत्वं विवृतम् । अनन्यशेषत्वविवरणाय विधिशेषत्वं वेति भाष्यं तदनुषङ्गेण व्याचष्टे—**न शक्य इति** । विध्यशेषत्वे आत्मत्वादिति हेतुं व्याचष्टे—**कुत इत्यादिना** । मा भूद्विधेयकर्मशेषत्वेन विधिविषयत्वमात्मनः, स्वत एव विधीयतां निषिध्यतां चेत्याशङ्कामपनेतुं न हेय इति भाष्यम्, तत्रापि हेतुत्वेनात्मत्वादित्येतद्योजयति—**अपिचेति** । अनन्यशेषत्वे स्वतो विधेयत्वाभावे चात्मत्वं हेतुरित्यपि चशब्दार्थः । **अत इति** । भाष्योक्तादेव हेतोरित्यर्थः । तमेवाह—**सर्वेषामिति** । **ननु** घटादिविनाशस्य

कल्पतरुपरिमलः ।

वृत्त्यसंभवाद् 'अगृह्यो नहि गृह्यत' इत्यादिना प्रस्तोष्यमाणे वृत्तिं प्रकटयितुमपेक्षितमध्याहरति—**निरूप्यत इति** । **विनश्यत्स्विति** । "समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् । विनश्यत्स्वविनश्यन्तमिति" स्मृतौ सर्वभूतस्थत्वस्य तथा विवरणादिति भावः । अवधानस्वारस्यादात्मत्वादेवेत्यग्रिमवाक्यगतैवकारस्वारस्याच्च—**अथवेति** पक्षः । **नन्वनन्य**शेषत्वं प्रागुपपादितमेव, इहापि 'विधिशेषत्वं वा नेतु'मिति भाष्येण, किमर्थं पुनरुपपाद्यते ? इत्याशङ्क्य तदपौनरुक्त्याय पूर्वोक्तमनुवदति—**औपनिषदस्येति** । प्रागनन्यशेषत्वमुपनिषत्प्रतिपाद्यत्वं च संग्रहवाक्ये यदुपन्यस्तं तत्रानन्यशेषत्वं प्रकरणादिविनियोजकाभावेनोपपादितम् । औपनिषदत्वं कार्यएव व्युत्पत्तिग्रह इति शङ्कानिरासेनाविषये ब्रह्मणि व्युत्पत्तिग्रहासंभवशङ्कानिरासेन कर्तृत्वाद्यवगाह्यहंप्रत्ययविरोधशङ्कानिरासेन चोपपादितम् । इदानीं तदनन्यशेषत्वं विधिशेषत्वाभावरूपतया विवरीतुमात्मत्वरूपहेत्वन्तरेण चोपपादयितुमिदं भाष्यमित्यर्थः । **अनुषङ्गेणेति** । न शक्य इत्यनुषङ्गेणेत्यर्थः, नस्वतःशब्दस्याप्यनुषङ्गेणेत्यर्थः । अतःशब्दोक्तहेतोः पुनर्निर्देशरूपस्यात्मत्वादेवेत्यग्रिमभाष्यगतहेतोः पूर्वत्राप्यन्वयस्य टीकायां वक्ष्यमाणत्वात् । **अपिच** सर्वेषामात्मत्वादेव न हेयो नाप्युपादेय इति टीकापाठो न व्याख्यानापेक्षः । अपिचातएवेति पाठेऽप्यतःशब्दः सर्वात्मत्वादिति भाष्योक्तहेतुपरामर्शीति व्याचष्टे—**भाष्योक्तादेव हेतोरित्यर्थ**

काण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा। अतः स न केनचित्प्रत्याख्यातुं शक्यो विधिशेषत्वं वा नेतुम्। आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः। सर्वं हि विनश्यद्विकारजातं पुरुषान्तं विनश्यति। पुरुषो विनाशहेत्वभावादविनाशी, विक्रियाहेत्वभावाच्च कूटस्थनित्यः, अतएव नित्यशुद्धबुद्धमुक्तस्वभावः। तस्मात् 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' (काठ० १।३।११) 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृह० ३।९।२६) इति चौपनिषदत्वविशेषणं पुरुषस्योपनिषत्सु प्राधान्येन प्रकाश्यमानत्व उपपद्यते। अतो भूतवस्तुपरो वेदभागो नास्तीति वचनं साहसमात्रम्। यदपि शास्त्रतात्पर्यविदामनुक्रमणम्—'दृष्टो हि

भामती।

ऽशक्यहानत्वात्। नचोपादेयः; उपात्तत्वात्। तस्माद्धेयोपादेयविषयौ विधिनिषेधौ न तद्विपरीतमात्मतत्त्वं विषयीकुरुत इति सर्वस्य प्रपञ्चजातस्यात्मैव तत्त्वमिति। एतदुपपादयति—**सर्वं हि विनश्यद्विकारजातं पुरुषान्तं विनश्यति। अयमर्थः**—पुरुषो हि श्रुतिस्मृतीतिहासपुराणतदविरुद्धन्यायव्यवस्थापितत्वात्परमार्थसन्, प्रपञ्चस्त्वनाद्यविद्योपदर्शितोऽपरमार्थसन्; यश्च परमार्थसन्नसौ प्रकृती रज्जुतत्त्वमिव सर्पविभ्रमस्य विकारस्य। अतएवास्यानिर्वाच्यत्वेनादृढस्वभावस्य विनाशः, पुरुषस्तु परमार्थसन् नासौ कारणसहस्रेणाप्यसन् शक्यः कर्तुम्। नहि सहस्रमपि शिल्पिनो घटं पटयितुमीशत इत्युक्तम्। तस्मादविनाशिपुरुषान्तो विकारविनाशः शुक्तिरज्जुतत्त्वान्त इव रजतभुजङ्गविनाशः। पुरुष एव हि सर्वस्य प्रपञ्चविकारजातस्य तत्त्वम्। नच पुरुषस्यास्ति विनाशो यतोऽनन्तो विनाशः स्यादित्यत आह—**पुरुषो विनाशहेत्वभावादिति**। नहि कारणानि सहस्रमप्यन्यदन्यथयितुमीशत इत्युक्तम्। **अथ** मा भूत्स्वरूपेण पुरुषो हेय उपादेयो वा, तदीयस्तु कश्चिद्धर्मो हास्यते, कश्चिच्चोपादास्यत इत्यत आह—**विक्रियाहेत्वभावाच्च कूटस्थनित्यः**। त्रिविधोऽपि धर्मलक्षणावस्थापरिणामलक्षणो विकारो नास्तीत्युक्तम्। **अपिचा**त्मनः परमार्थसतो धर्मोऽपि परमार्थसन्निति न तस्यात्मवदन्यथात्वं कारणैः शक्यं कर्तुम्, नच धर्मान्यथात्वादन्यो विकारः; **तदिदमुक्तम्**—विक्रियाहेत्वभावादिति। सुगममन्यत्। यत्पुनरेकदेशिना शास्त्रविद्वचनं साक्षित्वेनानुक्रान्तं तदन्यथोपपादयति—**यदपि शास्त्रतात्पर्यविदामनुक्रमणमिति**। 'दृष्टो हि तस्यार्थः प्रयोजनवदर्थावबोधनम्' इति वक्तव्ये धर्मजिज्ञासायाः प्रकृतत्वाद्धर्मस्य च कर्मत्वात् 'कर्मावबोधनम्' इत्युक्तम्, नतु सिद्धरूपब्रह्मावबोधनं व्यापारं वेदस्य वारयति। नहि सोमशर्मणि प्रकृते तद्गुणाभिधानं परिसंचष्टे विष्णुशर्मणो गुणवत्ताम्। विधिशास्त्रं विधीयमानकर्मविषयं, प्रतिषेधशास्त्रं च प्रतिषिध्यमानकर्मविषयमित्युभयमपि कर्मावबोधनपरम्। **अपिच** 'आम्नायस्य क्रियार्थत्वात्' इति शास्त्रकृद्वचनम्। तत्रार्थग्रहणं यद्यभिधेयवाचि, ततो भूतार्थानां द्रव्यगुणकर्मणामानर्थक्यमनभिधेयत्वं प्रसज्येत, नहि ते

वेदान्तकल्पतरुः।

मृदादौ दर्शनात्कथं पुरुषावधिः सर्वस्य लयोऽत आह—**पुरुषो हीति**। कल्पितस्याधिष्ठानत्वायोगादात्मतत्त्वमेव तत्तदवच्छिन्नमनिर्वाच्यविश्वोदयाप्ययहेतुरित्यर्थः। **ननु** पुरुषोऽप्यनिर्वाच्य इति नेत्याह—**पुरुषस्त्विति। अनन्तो**ऽनवधिः। विकारो नास्तीत्युक्तं भेदाभेदविचारे। धर्मान्यथात्वविक्रियाया अभावमुक्त्वा तद्धेत्वभावमप्याह—**अपिचेति। भाष्ये**—यत एव धर्मान्यथात्वाभावोऽतएव नित्यशुद्धादिस्वभावः। पुरुषावधिः सर्वस्य लय इत्यत्र श्रुतिमाह—**तस्मात्पुरुषादिति**। कल्पितस्याकल्पितमधिष्ठानमित्युक्तयुक्तिपरामर्शी तस्माच्छब्दः। निरतिशयस्वतन्त्रतया विधिशेषत्वाभावे श्रुतिमुदाहृत्य मानान्तरागम्यतया वेदान्तैकवेद्यत्वे श्रुतिमुदाहरति—तं त्वेति। **तस्य** वेदस्येत्यर्थः। **ननु** तर्हि धर्मावबोधनमिति वक्तव्यं, तत्राह—**धर्मस्य चेति। ननु** प्रतिषेधानामनुष्ठेयाबोधकत्वात्कथं कर्मावबोधप्रयोजनतात आह—**प्रतिषिध्यमानेति**। शाबरवचनवदाम्नायस्येति (जै. अ. १ पा. २ सू. १) सूत्रे आम्नायशब्दो विधिनिषेधपर इति सिध्यति। विकल्पमुखेन परिहारान्तरं चाह—**अपिचेति। द्रव्यगुणकर्मणां** तच्छब्दानामित्यर्थः। क्रियार्थत्वादि-

कल्पतरुपरिमलः।

इति। भाष्ये अत इत्युक्तादेव हेतोरित्यर्थ इति पाठेऽप्ययमेवार्थो भाष्ये उक्तादेव हेतोरित्यर्थ इति व्यवहितयोजनया ग्राह्यः। **तस्मात्पुरुषादिति** प्रतीकग्रहणे **पुरुषादित्यादि** श्रुतिवाक्यं, **तस्मादिति** भाष्यं, तस्यार्थमाह—**कल्पितस्येति**। दृष्टो हि तस्यार्थ इति शाबरवचने तस्यशब्दार्थमाह **वेदस्येति। प्रतिषिध्यमानेतीति**। **अथातो धर्मजिज्ञासेत्य**त्र अकारप्रश्लेषेणाधर्मविचारोपि प्रतिज्ञात इत्यधर्मरूपं प्रतिषिध्यमानमपि भाष्ये कर्मशब्देन संगृहीतम्। तत्संग्रहार्थमेव धर्मशब्दमपहाय कर्मशब्दग्रहणमिति भावः। आम्नायस्येति सूत्रे (जै. अ. १ पा. २ सू. १) कस्यचित्परिहारस्यानुक्तत्वादपिचेत्ययुक्तमित्याशङ्क्य शाबरवचने कृतः परिहारस्तत्रापि साम्येन प्राक् सिद्ध इत्याह—**शाबरेति। ननु** विशिष्टे पदशक्तिर्नास्ति चेत्, कथमन्वितपदार्थप्रतीतिः, नहि

तस्यार्थः कर्मावबोधनम्' इत्येवमादि, तद्धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम् । अपिच 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसङ्गः । प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण भूतं चेद्वस्तूपदिशति भव्यार्थ-

भामती ।

क्रियार्था इत्यत आह—**अपि चाम्नायस्येति** । यद्युच्येत नहि क्रियार्थत्वं क्रियाभिधेयत्वं, अपितु क्रियाप्रयोजनत्वम्; द्रव्यगुणशब्दानां च क्रियार्थत्वेनैव भूतद्रव्यगुणाभिधानं न स्वनिष्ठतया, **यथाहुः शास्त्रविदः**—'चोदना हि भूतं भवन्तम्' इत्यादि । **एतदुक्तं भवति**—कार्यमर्थमवगमयन्ती चोदना तदर्थं भूतादिकमप्यर्थं गमयतीति, तत्राह—**प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतं चेदिति** । **अयमभिसंधिः**—न तावत्कार्यार्थ एव स्वार्थे पदानां संगतिग्रहो नान्यार्थ इत्युपपादितं भूतेऽप्यर्थे व्युत्पत्तिं दर्शयद्भिः । नापि स्वार्थमात्रपरतैव पदानाम् । तथा सति न वाक्यार्थप्रत्ययः स्यात् । नहि प्रत्येकं स्वप्रधानतया गुणप्रधानभावरहितानामेकवाक्यता दृष्टा । तस्मात्पदानां स्वार्थमभिदधतामेकप्रयो-

वेदान्तकल्पतरुः ।

त्यत्रानर्थक्यमित्यत्र चार्थशब्दोऽभिधेयपरः, प्रयोजनपरो वेति विकल्प्याद्यं निरस्य **द्वितीयं** निरस्यति—**यद्युच्येतेत्यादिना** । **ननु** चोदना हि भूतं भवन्तं भविष्यन्तमित्येवंजातीयकं शक्नोत्यवगमयितुमिति शाबरवचसि विधिवाक्यस्य भूतादिबोधिता भाति, न द्रव्यादिशब्दानां क्रियाप्रयोजनत्वात आह—**कार्यमर्थमिति** । कार्यान्वितभूतबोधित्वे विधिवाक्यस्य कथं तन्न्यायेन ब्रह्मवाक्येष्वक्रियाशेषभूतवस्तुबोधित्वसिद्धिरत आह—**अयमभिसंधिरिति** । कार्यान्वितबोधित्वनियमः शब्दानां किं व्युत्पत्तिबलादुत प्रयोजनार्थम् । तत्र केवलभूतवस्त्ववगमादपि प्रयोजनसिद्धिमुत्तरत्र वक्ष्यति । न तावद्व्युत्पत्तिबलादित्याह—**न तावदिति** । **कार्यार्थे** कार्यशेषे । **ननु** कार्यान्वितपरत्वनियमाभावे पदानामतिलाघवायान्वितपरत्वमपि त्यज्यतामत आह—**नापीति** । तत्किमिदानीं विशिष्टे पदशक्तिर्नेत्याह—**स्वार्थमिति** । **अयमभिसंधिः**—पदैः पदार्था एवाभिधीयन्ते अर्थान्तरान्विततया उपलक्ष्यन्ते; अन्यथा स्वरूपमात्रातिरेकिविशिष्टाभिधाने गौरवं स्यात् । **ननु**—अभिहितार्थस्वरूपाणां विशिष्टैरनविनाभावात्कथं लक्षणा ? नहि गवार्थस्यानयत्यन्वयाविनाभावः; चारयतिनाप्यन्वयात्, नचार्थान्तरमात्रान्वयो लक्ष्यः; तस्य व्यवहारानुपयोगात् इति—**चेन्न**; अनविनाभाविभिरपि मञ्चैः पुरुषलक्षणात् । **ननु**—मा भूदनविनाभावनियमः, तथापि वाच्यस्य लक्ष्येण संबन्धो वाक्यार्थे चानन्वयो वाच्यः, मञ्चा हि संबद्धाः पुंभिर्न च वाक्यार्थेऽन्वीयन्ते, **यथाह शालिकनाथः**—'वाच्यार्थस्य च वाक्यार्थे संसर्गानुपपत्तितः । तत्संबन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते ॥' इति । तदिह गामानयेत्यादौ न श्रौतार्थस्य वाक्यार्थेनानन्वयः; नाप्यन्वितस्य लक्ष्यस्यास्त्यभिधेयेन संबन्धः अन्वितस्यान्वयान्तराभावात्, तत इह न लक्षणा **इति** । **अत्रोच्यते**; मुख्यार्थपरिग्रहेऽनुपपत्तिस्तावल्लक्षणाया निदानं, तत्र यथा पदेन पदार्थलक्षणायां वाच्यार्थस्य वाक्यार्थे संबन्धानुपपत्तिः, एवं वाक्यार्थप्रत्ययोद्देशेन प्रयुक्तस्य पदवृन्दस्य येऽभिधेया अनन्वितपदार्थास्तेषां वाक्यार्थाभावानुपपत्तिरेवान्वितलक्षणाया निदानम् । नचान्वितरूपस्याभिधेयस्वरूपेण संबन्धानुपपत्तिः; विशिष्टस्वरूपयोस्तादात्म्यस्य कस्यापि स्वीकारात् । **नन्वेमपि**—अभिहितार्थैरर्थान्तरान्वितलक्षणायां कथं नियमः ? अर्थान्तराणामानन्त्यात्, **तदुच्यते—'आकाङ्क्षासत्तियोग्यत्वसहितार्थान्तरा-**

कल्पतरुपरिमलः ।

वृत्त्यविषये शाब्दबोधो भवतीत्यत आह—**अयमभिसंधिरिति** । **अनविनाभाविभिरपीति** । मञ्चाः क्रोशन्तीत्यत्र हि मञ्चशब्देन मञ्चेषु शयानाः शिशवो लक्ष्यन्ते । **अत्रोच्यत इति** । **ननु**—लक्षकशब्दवाच्यस्य वाक्यार्थेनाऽनन्वयनियमशङ्कायाः किमुत्तरमिहोक्तम् । नच—अन्वितं लक्ष्यमेव वाक्यार्थेनान्वितं भवति, नत्वविशिष्टं वाच्यस्वरूपमित्युक्तनियमाविरोधो विशिष्टस्वरूपयोस्तादात्म्यस्य कस्यापि स्वीकारादिति वाच्यलक्ष्यसंबन्धप्रतिपादनेन द्योतित इति—वाच्यम्, विशिष्टस्य विशेष्यघटितमूर्तेर्वाक्यार्थान्वये तद्घटकस्य विशेष्यस्यापि तदन्वयानिवारणात् । नच—विशिष्टस्वरूपयोः संबन्धोक्त्या स्वरूपभिन्नं तदघटितं विशिष्टमङ्गीकृतमिति—शङ्कनीयम्; तादात्म्यसंबन्धस्य विशिष्टे विशेष्यानुप्रवेशाविरोधित्वेन 'संबन्धः स्वीकृत' इत्येतावता तदनुप्रवेशविरोधिभेदाप्रसक्तेः । **अतएवाचार्यैरिहैव वक्ष्यते**—"भवतु कार्यान्विते भूते सङ्गतिग्रहः, तथापि स्वरूपं तत्र प्रतीयतएव; विशिष्टेऽपि स्वरूपसंभवादिति" तस्माद्वाच्यार्थानन्वयनियमाशङ्कायाः परिहारो न लब्ध इति—**चेत्**, लब्ध एव; 'वाक्यार्थाभावानुपपत्तिरेवान्वितलक्षणाया निदान'मित्यन्वयानुपपत्तिमनपेक्ष्यानुपपत्त्यन्तरस्य लक्षणाबीजत्वप्रदर्शनेन लक्ष्यार्थग्रहणसमाधेयानुपपत्तिमात्रं लक्षणाबीजं, नतु वाच्यार्थस्य वाक्यार्थेऽन्वयानुपपत्तिरेव, येन वाच्यार्थानन्वयनियमः स्यात्, काकेभ्यो दधि रक्ष्यतामित्याद्यजहल्लक्षणास्थले मुख्यार्थान्वयानुपपत्त्यभावेऽपि तात्पर्यानुपपत्तेर्लक्षणाबीजत्वाङ्गीकारादिति । **आकाङ्क्षासत्तीति** । **ननु**—एवं सत्यवश्यापेक्षिताकाङ्क्षादिवशादेव वाक्यार्थरूपान्वयप्रतीत्युपपत्तेर्न तत्र लक्षणा कल्पनीया, **नच**—प्रमाकरणप्रत्यासत्तिमन्तरेण संसर्गरूपस्यापि प्रमेयस्य

त्वेन, कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः । नहि भूतमुपदिश्यमानं क्रिया भवति । अ-क्रियात्वेऽपि भूतस्य क्रियासाधनत्वात्क्रियार्थ एव भूतोपदेश इति चेत्, नैष दोषः; क्रियार्थत्वे-

भामती ।

जनवत्पदार्थपरतयैकवाक्यता । तथाच तत्तदर्थान्तरविशिष्टैकवाक्यार्थप्रत्यय उपपन्नो भवति । **यथाहुः शास्त्रविदः**—'साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम् । वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले ॥ वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम् । पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् ॥' इति । तथाचार्थान्तरसंसर्गपरतामात्रेण वाक्यार्थप्रत्ययोपपत्तौ न कार्यसंसर्गपरत्वनियमः पदानाम् । एवंच सति कूटस्थनित्यब्रह्मरूपपरत्वेऽप्यदोष इति । **भव्यं कार्यम् । ननु** यद्भव्यार्थं भूतमुपदिश्यते, न तद्भूतं, भव्यसंसर्गिणा रूपेण तस्यापि भव्यत्वादित्यत आह—**नहि भूतमुपदिश्यमानमिति** । न तादात्म्यलक्षणः संसर्गः, किंतु कार्येण सह प्रयोजनप्रयोजनिलक्षणोऽन्वयः, तद्विषयेण तु भावार्थेन भूतार्थानां क्रियाकारकलक्षण इति न भूतार्थानां क्रियार्थत्वमित्यर्थः । शङ्कते—**अक्रियात्वेपीति** । एवंचाक्रियार्थकूटस्थनित्यब्रह्मोपदेशानुपपत्तिरिति भावः । परिहरति—**नैष दोषः । क्रियार्थत्वेऽपीति** । नहि क्रियार्थं भूतमुपदिश्य-

वेदान्तकल्पतरुः ।

न्वितान् । पदानि लक्षयन्त्यर्थानिति नातिप्रसङ्गिता ॥' प्रयोगस्तु गोपदं, गामानयेति वाक्येनानयत्यन्वितगोत्ववाचकम्, पदत्वात्, तुरगपदवदिति । एतत्सर्वमाह—**एकेति** । एकप्रयोजनसिद्ध्युपयोगित्वं हि पदार्थानामितरेतरवैशिष्ट्यमन्तरेण न घटतेऽतः प्रयोजनवत्त्वायैकवाक्यत्वाय च लक्षणयान्वितपरत्वं पदानां वाच्यमित्यर्थः । **ननु** विशिष्टानामप्यर्थानां भेदात्कथमेकवाक्यता ? अत आह—**तथाचेति** । गुणभूतनानापदार्थविशिष्टप्रधानार्थस्यैक्यादेकवाक्यत्वमित्यर्थः । पदानामनन्वितार्थापर्यवसानेऽन्वितपर्यवसाने च भट्टसंमतिमाह—**यथाहुरिति** । यदा लक्षणया योग्येतरान्वितपरत्वं पदानां, पदार्थानां च लक्षणायां द्वारत्वेन तत्परत्वं, तदा वेदान्तानां कार्याननन्वितब्रह्मपरत्वोपपत्तिरित्याह—**एवंच सतीति** । **भाव्यार्थत्वेनेति** भाष्ये भव्यशब्दो भवनकर्तृवचनत्वादुत्पाद्यमात्रपरो मा भूदित्याह—**भव्यमिति** । भाष्ये भूतस्य क्रियात्वप्रतिषेधस्य प्रसक्तिमाह—**नन्विति** । भव्यसंसर्गिणा रूपेण भूतमपि भव्यमित्यत्र किं कार्यं भव्यं ? उत क्रिया ? उभाभ्यामपि भूतार्थस्य नैक्यमित्याह—**न तादात्म्येति** । कार्यं हि साध्यतया प्रयोजनं भूतं साधकतया प्रयोजयतीति । **प्रवृत्तिनिवृत्तिव्यतिरेकेणे**त्यादिभाष्येण कार्यान्वयनियमभङ्गेन कूटस्थनित्यवस्तूपदेशस्य समर्थितत्वेऽपि कार्यान्विते व्युत्पत्तिनियममभ्युपेत्यापि परिहारान्तरं वक्तुमुक्तशङ्कामनुवदतीत्याह—**शङ्कत इति** । अङ्गीकृते कार्यान्वितव्युत्पत्तिनियमे कूटस्थनित्योपदेशानुपपत्तिरित्याह—**एवंचेति** । भवतु कार्यान्विते भूते सङ्गतिग्रहः, तथापि स्वरूपं तत्र प्रतीयतएव; विशिष्टेऽपि स्वरूपसद्भावात्, ततः किमत

कल्पतरुपरिमलः ।

भानं न संभवति, प्रत्यक्षे प्रकारविशेष्ययोरिव संसर्गांशेपि सन्निकर्षापेक्षादर्शनादिति—वाच्यम्; तथा नियमाभावात्, अनुमितिकरणे धूमे वह्निव्याप्तिसत्त्वमात्रेण पर्वतसंबन्धिवह्न्यनुमितिदर्शनात्, पक्षधर्मताबलात् साध्यस्य पक्षसंबन्धभानमिति चेत्, इहाप्याकाङ्क्षादिबलात् प्रधानपदार्थे समभिव्याहृतगुणान्वयप्रतीतिरस्त्विति **चेद्, मैवम्**; एवमपि शब्दबोध्यस्य वृत्तिविषयत्वनियमाप्रत्याख्यानात्, करणप्रत्यासत्तिमनपेक्ष्यानुमितौ भासमानस्यापि पक्षसाध्यसंबन्धस्य शब्देन बोधने कर्तव्ये पर्वतो वह्निमानिति तदभिधायकमतुप्प्रत्ययापेक्षादर्शनात् । घटः पटो नेत्यत्रान्योन्याभावे घटे पटो नेत्यत्र संसर्गाभावे च प्रतियोगिसंबन्धस्य शब्दवृत्तिविषयत्वं विनैव शाब्दबोधविषयत्वं दृष्टमिति चेद्, न; तदन्यवाचिनो नञः शक्तावधिकरणसंबन्धस्येव तदन्यवाचिनस्तदभाववाचिनश्च नञः शक्तौ प्रतियोगिसंबन्धस्यापि शक्यत्वेनानुप्रवेशकल्पनात्, अन्याभावशब्दयोः शक्तौ तदननुप्रवेशात् तदर्थवाचित्वेनाङ्गीकृतस्य नञः शक्तावपि न तदनुप्रवेश इत्यभ्युपगमे तयोः प्रयोगे इव नञः प्रयोगेऽपि प्रतियोगिनि पञ्चमीषष्ठ्योर्नञः प्रयोग इव तयोः प्रयोगेऽपि प्रतियोगिनि प्रथमाया वा निवारयितुमशक्यत्वात् । तस्मादन्वयांशेऽपि वृत्तिकल्पनं युक्तमेव । नच—तथापि प्राक् शक्यसंबन्धित्वेन ज्ञातस्यापूर्वस्य वाक्यार्थस्य लक्ष्यत्वं न युज्यत इति—वाच्यम्; प्रागविज्ञातहरिद्रानामकनदीविशेषेण हरिद्रायां नद्यां घोषविशेष इति श्रुते वाक्ये नदीपदसमभिव्याहारेण तदानीमेव हरिद्राशब्दस्य नदीविशेषशक्तिग्रहणेन नदीलिङ्गात्तत्संबन्धित्वेनानुमितस्य तीरस्येव आकाङ्क्षाद्युपस्थापितस्य वाक्यार्थस्यान्वयस्य वृत्त्युपस्थापितत्वसिद्ध्यर्थं लक्ष्यत्वोपपत्तेः । एकवाक्यान्तर्गतानां सर्वेषां पदानां इतरपदार्थान्वितस्वस्वार्थलक्षकतायां वाक्यार्थान्वयभेदेन वाक्यभेदमाशङ्क्य समभिव्याहृतयावद्गुणान्वितप्रधानपदार्थरूप एक एव लक्षणीयो वाक्यार्थ इति परिहरति—**नन्वित्यादिना** । इयं च वाक्यार्थलक्षणा समभिव्याहृतसकलपदवृत्तिः प्रधानपदमात्रवृत्तिर्वेत्यन्यदेतत् । **व्युत्पत्तिनियममिति** । प्रथमं

ऽपि क्रियानिर्वर्तनशक्तिमद्वस्तूपदिष्टमेव, क्रियार्थत्वं तु प्रयोजनं तस्य। नचैतावता वस्त्वनुपदिष्टं भवति। यदि नामोपदिष्टं किं तव तेन स्यादिति। उच्यते—अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति। तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यवि-

भामती।

मानमभूतं भवति, अपितु क्रियानिर्वर्तनयोग्यं भूतमेव तत्। तथाच भूतेऽर्थेऽवधृतशक्तयः शब्दाः क्वचित्स्वनिष्ठभूतविषया दृश्यमाना मृत्वा शीर्त्वा वा न कथंचित्क्रियानिष्ठतां गमयितुमुचिताः। नह्युपहितं शतशो दृष्टमप्यनुपहितं क्वचिद्दृष्टमदृष्टं भवति। तथाच वर्तमानापदेशा अस्तिक्रियोपहिता अकार्यार्था अप्यटवीवर्णकादयो लोके बहुलमुपलभ्यन्ते। एवं क्रियाऽनिष्ठा अपि संबन्धमात्रपर्यवसायिनः, यथा कस्यैष पुरुष इति प्रश्नोत्तरं राज्ञ इति। तथा प्रातिपदिकार्थमात्रनिष्ठाः, यथा कीदृशास्तरव इति प्रश्नोत्तरं फलिन इति। नहि पृच्छता पुरुषस्य वा तरूणां वास्तित्वनास्तित्वे प्रतिपित्सिते, किंतु पुरुषस्य स्वामिभेदस्तरूणां च प्रकारभेदः। प्रष्टुरपेक्षितं चाचक्षाणः स्वामिभेदमेव प्रकारभेदमेव च प्रतिवक्ति, न पुनरस्तित्वं तस्य तेनाप्रतिपित्सितत्वात्। उपपादिता च भूतेऽप्यर्थे व्युत्पत्तिः प्रयोजनवति पदानाम्। चोदयति—**यदि नामोपदिष्टं** भूतं **किं तव**—उपदेष्टुः श्रोतुर्वा प्रयोजनं **स्यात्**। तस्माद्भूतमपि प्रयोजनवदेवोपदेष्टव्यं नाप्रयोजनम्। अप्रयोजनं च ब्रह्म, तस्योदासीनस्य सर्वक्रियारहितत्वेनानुपकारकत्वादिति भावः। परिहरति—**अनवगतात्मोपदेशश्च तथैव**—प्रयोजनवानेव—**भवितुमर्हति**। अप्यर्थश्चकारः। **एतदुक्तं भवति**—यद्यपि ब्रह्मोदासीनं; तथापि तद्विषयं शाब्दज्ञानमवगतिपर्यन्तं विद्या स्वविरोधिनीं संसारमूलनिदानमविद्यामुच्छिन्दत्प्रयोजनवदित्यर्थः। **अपिच** येऽपि कार्यपरत्वं सर्वेषां पदानामास्थिषत, तैरपि 'ब्राह्मणो न हन्तव्यः' 'न सुरा पातव्या' इत्यादीनां न कार्यपरता शक्यास्थातुम्। कृत्युपहितमर्यादं हि कार्यं कृत्या व्याप्तं तन्निवृत्तौ निवर्तते, शिंश-

वेदान्तकल्पतरुः।

आह—**तथाचेति**। **स्वनिष्ठभूतविषया इति**। कार्यानन्वितभूतविषया इत्यर्थः, नत्वनन्वितविषयत्वमेव; अन्विते पदतात्पर्यस्य समर्थितत्वात्। ते च वक्ष्यमाणोदाहरणेषु दृश्यमाना नाध्याहारादिभिः क्लेशेनान्ययितव्या इत्यर्थः। **स्यादेतत्**—कार्यान्विते गृहीतसङ्गतेः पदस्य कथं शुद्धसिद्धाभिधायिता? नहि गोत्वे गृहीतशक्ति गोपदमभिदधाति तुरगत्वमत आह—**नहीति**। एवं मन्यते कार्यान्वयो न शब्दार्थः, किंतूपाधिः। **तथाहि**—कर्तव्यतातदभावावगमाधीनत्वात् प्रवृत्तिनिवृत्त्योः, प्रवृत्तिनिवृत्तिसाध्यत्वात्प्रयोजनस्य, तदधीनत्वाच्च विवक्षाप्रयोगयोः, प्रयोगाधीनत्वाच्च वाक्यार्थप्रतिपत्तिव्युत्पत्त्योः, विवक्षादिवत्कार्यान्वयस्यापि शब्दार्थावगत्युपायतावगम्यते, अतो विरहय्यापि कार्यान्वयं प्रयोगभेदे भवति भूतं वस्तु पदवाच्यम्; कथमपरथा भवतां प्रमाणान्तरगृहीतकार्यान्वितगृहीतसङ्गतिकपदवृन्दस्य वेदेऽपूर्वान्विताभिधायिता? **तदिदमुक्तं**—"उपहितं शतशो दृष्टमपि तदेव क्वचिदनुपहितं यदि दृष्टं भवति, तदा तददृष्टं नहि भवति, किंतु दृष्टमेव भवतीति"। **अटवीवर्णकादय इति**। तद्यथा अस्ति किल ब्रह्मगिरिनामा गिरिवरः। 'त्रैयम्बकजटाजूटकलनाय विनिर्मिता। पाण्डुरेव पटी भाति यत्र गोदावरी नदी॥' यस्य च—'सकुसुमफलचूतरुद्धघर्मद्युतिकरपातवनालिधूपजाते। तमसि हरकिरीटचन्द्रशुभ्रे धवलनिशा इव भान्ति वासराणि॥' इत्यादय इति। **क्रियानिष्ठा इति** अकारप्रश्लेषः। अभ्युपेत्य कार्यान्वयनियमं पर्यहार्षीत्, इदानीमभ्युपगमं त्यजति—**उपपादिता चेति**। एवं तावद्व्युत्पत्तिविरोधं परिहृत्य निष्प्रयोजनत्वचोद्यमुद्भाव्य परिहरति—**यदि नामेत्यादिना**। समुच्चयासंभवादप्यर्थश्चकारः शङ्काद्योती, तामेवाह—**यद्यपीति**। एवं तावद्द्रव्यगुणादिशब्दानां विधिवाक्यगतानां केवलभूतार्थतामापाद्य तद्वद्ब्रह्मापि शब्दगोचर इत्युक्तं, इदानीं तु निषेधवाक्यवद्वेदान्ताः सिद्धपरा इत्याह—**अपिचेत्यादिना**। यत्र कृतिस्तत्रैव कार्यम्, निषेधेषु कृतिनिवृत्तौ तद्व्याप्तं कार्यं निवर्तेत इत्युक्त्वा कृतेरपि तद्व्यापकधात्वर्थनिवृत्त्या निवृत्तिमाह—**कृतिर्हीत्यादिना**। न घटवत्प्रतिक्षणं समाप्तः, किंतु पचतीतिवत्पूर्वापरीभूतः। सच भवत्यादाविव नात्मलाभः, किंतु कर्तुरन्यस्योत्पाद्यस्यो-

कल्पतरुपरिमलः।

कार्यान्वितप्रयोगएव शक्तिग्रह इति नियममभ्युपेत्येत्यर्थः। एतदेव विवृणोति—**तथाहीति**। **कथमपरथेति**। प्राथमिकव्युत्पत्तिग्रहे कार्यान्वयनियमवत् कार्यस्य प्रमाणान्तरगृहीतत्वनियमोऽप्यस्ति; व्युत्पित्सोः गवानयनबन्धनादर्शने व्युत्पत्तिग्रहासंभवात्, तदन्वयो यथा व्युत्पत्तिग्रहोपायमात्रतयान्यथासिद्धस्तत्र न शब्दार्थकोटावनुप्रविशति, एवं कार्यान्वयोऽपीत्यर्थः। **अस्ति किलेति**। नासिकात्र्यम्बकस्थाने निवसद्भिराचार्यैरयं ग्रन्थः कृत इति प्रसिद्धिः। अतस्तत्रत्यगिरिनदीवनवर्णनं कृतम्। **जटाजूटकलनाय** जटाकलापबन्धाय। **पाण्डुरा पटी** उष्णीषरूपा। **रहस्तत्र** नित्यसंनिहितः त्र्यम्बकदेवः। **पचतीति**। पाको हि पूर्वापरीभूताधःसन्तापनादितण्डुलविक्लित्तिफलपर्यन्तक्रियासन्तानरूपो

भामती।

पात्वमिव वृक्षत्वनिवृत्तौ। कृतिर्हि पुरुषप्रयत्नः स च विषयाधीननिरूपणः। विषयश्चास्य साध्यस्वभावतया भावार्थ एव पूर्वापरीभूतोऽन्योत्पादानुकूलो भवितुमर्हति, न द्रव्यगुणौ। साक्षात्कृतिव्याप्यो हि कृतेर्विषयः। नच द्रव्यगुणयोः सिद्धयोरस्ति कृतिव्याप्यता। अतएव शास्त्रकृद्वचः—'भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत' इति। द्रव्यगुणशब्दानां नैमित्तिकावस्थायां कार्यावमर्शेऽपि भावस्य स्वतः द्रव्यगुणशब्दानां तु भावयोगात्कार्यावमर्श इति भावार्थेभ्य

वेदान्तकल्पतरुः।

दनादेरुत्पादनायामनुकूलः प्रयत्नविषयः। तत्र हेतुमाह—**साध्येति**। न द्रव्यगुणौ कृतिविषयावित्यत्र हेतुः—**साक्षादिति**। तत्रापि तदुत्पादनानुकूलो व्यापारः कृतिविषय इत्यर्थः। **भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते** (जै. अ. २ पा. १ सू. १) इति द्वितीयगतमधिकरणम्। अत्र गुरुमतेनार्थं संकलयति—**द्रव्येति**। अत्रावमर्शेपीत्यन्तः पूर्वः पक्षः। **अयमर्थः**—पदस्मारितानन्वितार्थेषु निमित्तेषु भवान्वितावस्था नैमित्तिकी, तस्यामस्ति सिद्धयोरपि द्रव्यगुणयोः क्रियान्वयेन साध्यता, अतो द्रव्यगुणभावार्थवाचकशब्दानामविशेषेण साध्यार्थवाचकत्वात्साध्यार्थविषयत्वाच्च नियोगस्याविशेषेण नियोगविषयसमर्पकत्वमिति ॥ राद्धान्तमाह—**भावस्येति**। भावशब्दस्येत्यर्थः। कार्यावमर्श इत्यनुषङ्गः। भावशब्दो हि स्वत एव साध्यरूपां क्रियामवमृशति, द्रव्यादिशब्दास्तु क्रियायोगद्वारा द्रव्यादीन्साध्यतयावमृशन्ति। किमित्यत आह—**भावार्थेभ्य इति**। नियोगो हि साक्षात्कृतेरविषयः संस्तद्विषयत्वाय स्वावच्छेदकत्वेन साक्षात्साध्यस्वभावं भावार्थमाकाङ्क्षति। तल्लाभे च न क्रियायोगद्वारा साध्यस्य द्रव्यादेस्तद्विषयता युक्ता। अतो भावार्थशब्देभ्य एव यजतीत्यादिभ्यो विषयविशिष्टा पूर्वाधिगतिरिति। भावनावाचिभ्योऽपि भावो भावनेत्यादिभ्यो नापूर्वाधिगति-

कल्पतरुपरिमलः।

नैकक्रियात्मकः, अतो घटादिवत्प्रतिक्षणं पर्याप्तवृत्तिर्न भवतीत्यर्थः। **उत्पादनायामिति**। उत्पत्तावित्यर्थः। ओदनोत्पत्त्यनुकूलपुरुषव्यापारस्य पाकस्यैवोदनोत्पादनत्वेन तस्य तदनुकूलत्वाभावात्। **यद्वा**—प्रज्वलनादिरूपोऽग्न्यादिव्यापारोऽपि भवत्योदनोत्पादना, तदनुकूलश्च पुरुषव्यापार इति तदभिप्रायो णिचः प्रयोगः। **प्रयत्नविषय इति**। साध्यतयेति शेषः। उद्देश्यतया प्रयत्नविषयत्वस्य घटभवनादौ फलेऽपि सत्त्वेन तद्व्यावृत्तत्वाभावात्। **तत्र हेतुमाहेति**। हेतुभूतं साध्यत्वमिह चिकीर्षाविषयत्वं, नतु प्रयत्ननिर्वर्त्यत्वं; साध्याविशेषात्। **ननु** द्रव्यगुणयोरपि घटरूपादिकयोः कृत्यपेक्षोत्पत्तिकत्वादस्ति साध्यतया कृतिविषयत्वमित्याशङ्क्य तत्रापि तदुत्पत्त्यनुकूलस्य तदुत्पादनारूपदण्डचक्रादिव्यापारानुकूलस्य च पुरुषव्यापारस्यैव तथात्वमित्याह—**तत्रापीति**। **पदस्मारितेति**। **ननु** गुरुमतेऽन्विताभिधानाङ्गीकारात् कथं कार्यान्विते गृहीतशक्तिकैः पदैरनन्वितार्थानां स्मारणं कथ्यते ? **उच्यते**; शक्तिग्रहात् पूर्वं तदर्थायानन्वितार्थोपस्थितिः सात्र निमित्तत्वेन विवक्षिता। **उक्तं हि निबन्धनपञ्चिकायामृजुविमलायां**—अनन्वितावस्था हि संबन्धग्रहणोपायतां गच्छन्ती वाक्यार्थप्रतिपत्तौ निमित्तं; एवं हि संबन्धग्रहणं अयमर्थोऽनेन शब्देनाकाङ्क्षितसंनिहितयोग्यार्थान्तरान्वितः सन्नभिधीयत इतीति। **अत्रायमर्थ** इत्यनन्वितावस्थस्य गवादेरुपस्थितिरुक्ता। एवंच **पदस्मारितेत्य**नेन शक्तिग्रहणार्थं पदश्रवणसमये कारणान्तरप्रत्यायितत्वं विवक्षितमिति न विरोधः। **यद्वा**—कार्यसामान्ये गृहीतशक्तिकैः पदैः स्मारितास्तस्यामवस्थायां समभिव्याहृतकार्यविशेषानन्वितार्था विवक्षिता इति न विरोधः। **अविशेषेणेति**। **नन्व**विशेषेण द्रव्यगुणभावार्थवाचकाः सर्वेऽपि नियोगविषयसमर्पका इत्ययं प्रतिपदाधिकरण (जै. अ. २ पा. १ सू. १) पूर्वपक्षः, तं वाक्यभेदतः प्रतीयमानक्रियाकारकभावरूपविनियोगविरोधेनानेकापूर्वाभ्युपगमगौरवप्रसङ्गेन च निराकृत्य तेषु कश्चिदेव नियोगविषयसमर्पक इति निर्धारणेन तस्मिन्नधिकरणे स्थिते, तेषु भावार्थवाचकशब्द एव नियोगविषयसमर्पक इति निर्धारणार्थं हि भावार्थाधिकरणम् (जै. अ. २ पा. १ सू. १–४)। **सत्यम्**; इहाऽविशेषेणेत्यनेन द्रव्यगुणभावार्थानां त्रयाणामपि कार्यत्वमविशिष्टमित्यनध्यवसायेन पूर्वपक्षो विवक्षितः। अनध्यवसायपूर्वपक्ष एव निबन्धनटीकायां दर्शितः। भाष्यगतस्याविशेषेणेति पूर्वपक्षे हेतूपन्यासस्य च अनध्यवसायएव तात्पर्यं वर्णितम्। **यद्वा**—विवरणटीकानुसारेण प्रतिपदाधिकरणशरीरमत्र लिखितम्। तन्मते हि प्रतिपदाधिकरणे कर्मैव विषयो न द्रव्यगुणाविति निर्धारणम्। भावार्थाधिकरणं तु किं कर्म नाम्ना विषयतया समर्प्यते, उत आख्यातेनेति विशेषविचारार्थं; प्रतिपदाधिकरणस्य भावार्थसूत्र (जै. अ. २ पा. १ सू. १) व्यतिरेकेण सूत्रान्तराभावात्, तदेव सूत्रमिह लिखितमिति न कश्चिद्दोषः। **भावार्थशब्देभ्य एवेति**। **भावार्थशब्दाः** यजत्यादिधातवः। तेभ्यो यद्यपि विषयमात्रस्याधिगतिः; तथापि विषयाधीनप्रतिपत्तिकत्वादपूर्वस्य कार्यस्य विषयवाचकेभ्य एव तस्याप्यधिगतिरुक्ता। **एवमेवोक्तमृजुविमलायां** "विध्यर्थो लिङादिभिः प्रत्याय्यते, तस्य च तत्प्रतिपाद्यमानस्य विषयाधीनप्रतिपत्तित्वाद् भावार्थानां च विषयबोधकत्वात् ततोऽपूर्वं प्रतीयत इत्युच्यते, न पुनरपूर्वस्यामी भावार्था वाचकाः" इतीति ॥ **भावो भावनेत्यादिभ्य इति**। भवतेर्णिजन्तात् 'एरजि'ति सूत्रेण भाववाचिन्यच्प्रत्यये 'णेरनिटी'ति सूत्रेण णिलोपे च

भामती ।

एवापूर्वावगतिर्न द्रव्यगुणशब्देभ्य इति। नच 'दध्ना जुहोति' 'संततमाघारयति' इत्यादिषु द्रव्यादीनां कार्यविषयता । तत्रापि हि होमाघारभावार्थविषयमेव कार्यम्। नचैतावता 'सोमेन यजेत'इतिवत् दधिसंततादिविशिष्टहोमाघारविधानात्

वेदान्तकल्पतरुः ।

रिति **कर्मशब्दा** इत्युक्तम् । क्रत्वर्थवाचिभ्यः कर्मशब्देभ्योऽपि याग इत्यादिभ्यो नैवापूर्वाधिगतिरिति **भावार्था** इत्युक्तम्। अतो धात्वर्थोपरक्तभावना येषु भाति यजेतेत्यादिषु तेभ्योऽपूर्वं प्रतीयेतैष हि भावनासाध्योऽपूर्वलक्षणोऽर्थो विधीयत इति सूत्रार्थः । **ननु** द्रव्यगुणौ विधीयेते दधिसान्तत्ये, तत्र तयोरेव कार्यावच्छेदकता, अत आह—**नच दध्नेति। आघारः** क्षारणम् । **सान्तत्यम**विच्छिन्नत्वम् । यदि दध्यादावपि भावार्थो विधेयः, तर्हि न्यायविरोध इत्याशङ्क्याह—**नचैतावतेति। ज्योतिष्टोमे श्रूयते**—'सोमेन यजेते'ति । तथा 'ऐन्द्रवायवं गृह्णाति, मैत्रावरुणं गृह्णाति, 'आश्विनं गृह्णाती'ति। तत्र संशयः—किमैन्द्रवायवादिवाक्ये विहितानां सोमरसानां यागानां च यथाक्रमं सोमेन यजेतेति सोमयागशब्दावनुवदितारौ, उत द्रव्ययुक्तस्य कर्मणो विधाताराविति ॥ तत्रैन्द्रवायवादिवाक्येषु द्रव्यदेवताख्यरूपप्रतीतेर्यागानुमानादितरत्र रूपाप्रतीतेः समुदायानुवाद **इति प्राप्ते—द्वितीये** (जै. अ. २ पा. २ सू. १७–२०) **राद्धान्तितम्,** नानुवादत्वं अप्रत्यभिज्ञानात् । लतावचनो हि सोमशब्दो न रसवचनः, ऐन्द्रवायवादिशब्दास्तु रसानभिदधतीति न तदनुवादी सोमशब्दः। नच यजेतेति प्रत्यक्षे यागे तदनुमा, अतः प्राप्त्यभावान्न यजिरप्यनुवादी । तस्मात्सोमवाक्ये यागविधिरितरत्र रसानामिन्द्रादिदेवताभ्यो ग्रहणान्युपकल्पनानि विधीयन्त इति ॥ एवं यथा सोमेनेति वाक्ये विशिष्टविधिः, एवं दधिसान्तत्यादिवाक्यानि यदि द्रव्यगुणविशिष्टहोमाघारविधायीनि, तर्हि अग्निहोत्राघारवाक्ये तद्विहितहोमानामाघाराणां च समुदायावनुवदेतां, तथाचाधिकरणान्तरविरोध इति शङ्का ॥ **तथाहि द्वितीये स्थितम्—आघाराग्निहोत्रमरूपत्वात्** (जै. अ. २ पा. २ सू. १३)।'आघारमाघारयत्यूर्ध्वमाघरयति' 'संततमाघारयति'। तथा 'अग्निहोत्रं जुहोति' 'दध्ना जुहोति' 'पयसा जुहोतीति' श्रूयते । तत्र संशयः—किं संततदध्यादिवाक्यविहितानामाघारहो-

कल्पतरुपरिमलः ।

क्तेर्निष्पन्नो भावशब्दो भावनाशब्दपर्यायः । **ननु** गुरुमते भावार्थशब्दस्य पूर्वापरीभाववैशिष्ट्यमर्थः । **उक्तं हि निबन्धनटीकायां**—पूर्वापरभावे हि भावार्थत्वं भवति, भावशब्दस्य पूर्वापरीभाववाचित्वादिति । **सत्यम्**; ण्यन्ताद्भवतेरजन्तस्य भावशब्दस्य भावनावाचित्वमप्युपपद्यते । नच भावनाया धात्वर्थत्वासंभवः; कृतिसाध्यत्वेन नियोगवाचिनां लिङादीनामिव तत्संघटनार्थं तथात्वेन यागादिविषयसमर्पकाणां धातूनां विशेषणभूतकृतिरूपभावनार्थत्वस्यापि सत्त्वात् । **कर्मशब्दा इत्युक्तमिति।** कर्मशब्दः क्रियत इत्यर्थे कृञ्धातोरौणादिके मनिन्प्रत्यये सति निष्पन्नः कृतिविषयवाची, न च कृतिः कृतिविषय इति तद्व्यावृत्तिः । **याग इत्येवमादिभ्य इति** । यागादिशब्दा भवन्ति वस्तुतः कृतिविषयाणां वाचका इति न कर्मशब्दाः; तेभ्यो यागादीनां कृतिसाध्यत्वेन प्रतीत्यभावादिति तद्व्यावृत्तिः । **तेभ्योऽपूर्वं प्रतीयतइति** । अनेन सूत्रे क्रियाशब्दः क्रियतेऽनेनेति व्युत्पत्त्या फलकरणत्वेन रूपेणापूर्वपर इति दर्शितम्। **एष हीति। ननु**—'एष ह्यर्थो विधीयत" इति सूत्रशेषस्येत्थं गुरुमते व्याख्यानं कथम्—अपूर्वस्य कृतिसाध्यतया प्राधान्येन प्रतिपाद्यस्य फलकरणतया तच्छेषत्वमित्याशङ्कानिराकरणार्थ**मेषहीत्यादि**सूत्रशेषः; यजेत स्वर्गकाम इत्यादिभिर्वाक्यैः यागेन स्वर्गकामः स्वकामनाविषयं स्वर्गं साधयेदित्येषोऽर्थो यस्माद्विधीयते तस्मात् तेनापूर्वं कृत्वेत्यपूर्वस्यापि फलकरणत्वेन सिद्धिर्भवति । स्वसिद्ध्यर्थं फलं साधयतश्चापूर्वस्य न प्राधान्यभङ्गः । 'आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये ॥ कुर्वेत्स्वर्गादिकमपि प्रधानं कार्यमेव नः ॥' इति न्यायात्—**इति । सत्यम्**; इहापि स एवार्थ उपन्यस्तः । **अपूर्वलक्षणोऽर्थो विधीयत** इत्यत्र करणत्वेनेति शेषाध्याहारेण सोऽर्थः स्पष्टीभवति। पशुसोमाधिकरणसूत्रस्य **द्रव्यसंयोगाच्चोदना पशुसोमयोः**(जै. अ. २ पा. २ सू. १७) इत्यादेर्महत्त्वादुदाहृतसोमवाक्यमात्रविषयत्वाभावाच्च तन्न लिखितम्। **द्रव्यदेवताख्येति** । ऐन्द्रवायवादिवाक्येषु गृह्णातेः सोममभिषुणोति सोमं पावयतीत्यादिसंनिहितवाक्यान्तरप्रकृतसोमरसविषयत्वाद् द्रव्यप्रतीतिः । **इतरत्रेति** । सोमवाक्ये देवताख्यरूपाप्रतीतेरित्यर्थः। **समुदायानुवाद इति** । यजिर्यागसमुदायस्य सोमशब्दस्तद्द्रव्यसोमरससमुदायस्य चानुवाद इत्यर्थः । अनुवादस्य च प्रयोजनं—सोमशब्दस्य तत्प्रख्यन्यायेन (जै. अ. १ पा. ४ सू. ४) कर्मनामधेयत्वप्राप्त्या स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इत्यादौ सोमशब्देनापि क्रतुव्यवहारसिद्धिरिति नानुवादवैयर्थ्यम्। **प्रत्यक्षे यागे इति** । ऐन्द्रवायवादिवाक्यैर्देवताविशिष्टेषु ग्रहणेषु चोदितेषु यागं विना ग्रहणमात्रेण द्रव्यस्य देवतासंबन्धासिद्धेर्यागापेक्षायां सोमेन यजेतेत्येतत्सर्वानेतान् द्रव्यदेवतासंबन्धानुपपादयद् यागान्तरानुमानं निरुन्ध्यादित्यर्थः । एवंचोत्पत्तिवाक्यविहितस्य लताद्रव्यस्याभिषवादिवाक्यपर्यालोचनेन रसद्वारा

भामती।

'अग्निहोत्रं जुहोति' 'आघारमाघारयति' इति तदनुवादः। यद्यप्यत्रापि भावार्थविषयमेव कार्यं; तथापि भावार्थानुबन्धतया द्रव्यगुणावविषयावपि विधीयेते। भावार्थो हि कारकव्यापारमात्रतयाऽविशिष्टः कारकविशेषेण द्रव्यादिना विशेष्यत इति द्रव्यादिस्तदनुबन्धः। तथाच भावार्थे विधीयमाने स एव सानुबन्धो विधीयत इति द्रव्यगुणावविषयावपि तदनुबन्धतया विहितौ भवतः। एवंच भावार्थप्रणालिकया द्रव्यादिसंक्रान्तो विधिर्गौरवाद्बिभ्यत्स्वविषयस्य चान्यतः प्राप्ततया तदनु-

वेदान्तकल्पतरुः।

मानामाघाराग्निहोत्रवाक्ये समुदायानुवादिनी, उतापूर्वयोराघारहोमयोर्विधातृणी इति॥ तत्रानुवादिनी; अरूपत्वात्, नह्यत्र दधिसान्तत्यादिवाक्यविहितहोमाघारेभ्यो विशिष्टं रूपमस्ति, होमाघारमात्रं तु प्रकृतमुपलभ्यते, अतोऽनुवादत्वे **प्राप्ते राद्धान्तः**; विधी इमौ स्याताम्; आघारयतिजुहोतिशब्दाभ्यामनुष्ठेयार्थप्रतीतेः, तत्संनिधौ श्रुतस्य सांतत्यवाक्यस्य दध्यादिवाक्यस्य च विशिष्टविधित्वे गौरवप्रसङ्गेन तद्विहितभावार्थानुवादेन गुणविधानार्थत्वादिति॥ हन्त नैतेन विरुध्येत सांतत्यदध्यादिवाक्ये भावार्थविषयं कार्यमित्यभ्युपगमः। तत्र हेतुमाह—**यद्यपीति**। यद्यपि सन्ततादिवाक्ये साक्षात्कृतिविषयत्वाद्भावार्थस्य तदवच्छिन्नमेव कार्यं; यद्यपि च कार्यं प्रति साक्षादविषयावनवच्छेदकौ द्रव्यगुणौ; तथापि भावार्थं प्रत्यनुबन्धतयावच्छेदकतया विधीयेते। तत्र हेतुमाह—**भावार्थो हीति**। तत्किं भावार्थो द्रव्यादिश्च विधेयः, तर्हि वाक्यभेदः, नेत्याह—**तथाचेति**। तर्हि संततादिवाक्यानि विशिष्टविधयः स्युः, स्याच्चाग्निहोत्रादिवाक्यमनुवादः, तत्राह—**एवंचेति**। यद्यप्यत्र विशिष्टविषयो विधिः प्रतीयते; तथापि भावार्थद्वारा द्रव्यादिकमपि विषयीकरोति। तत्र संक्रान्तो यदि भावार्थमन्यतो विहितं न लभेत, तर्हि गौरवमप्युररीकृत्य विशिष्टं विदधीत; अथ लभेत, तत उपपदाकृष्टशक्तिर्द्रव्यादिपरो भवत्यनुवदति तु भावार्थम्। **तदाहुः**—'सर्वत्राख्यातसंबद्धे श्रूयमाणे पदान्तरे। विधिशक्त्युपसंक्रान्तेः स्याद्धातोरनुवादता॥' इति। तदिहाग्निहोत्रादिवाक्यत एव भावार्थलाभाद्द्रव्यादिपरता। मीमांसकैकदेशिनः आग्नेय

कल्पतरुपरिमलः।

साधनत्वमित्यवगतेस्तस्य रसस्येन्द्रवाय्वाद्युद्देश्यकग्रहणसंस्कारविधिसामर्थ्यादुत्पत्तिवाक्यविधेये यागे देवता लभ्यते। तत्तद्देवतोद्देशेन गृहीतस्य रसस्य तत्तद्देवतायै त्यागाभावे ग्रहणे देवतोद्देशांशस्यादृष्टार्थत्वापत्तेः। अतो न तत्र देवताख्यरूपाऽलाभदोषः। **अरूपत्वादिति**। रूपशब्दो न द्रव्यदेवतामात्रपरः, किंतु सान्तत्यादिसाधारण्यार्थं गुणसामान्यपरः। **नह्यत्रेति**। '**दध्ना** जुहोति' 'पयसा जुहोति' 'तण्डुलैर्जुहोती'त्यादिवाक्यविहितानां होमानां, 'सन्ततमाघारयति' 'ऊर्ध्वमाघारयति' 'ऋजुमाघारयती'त्यादिवाक्यविहितानामाघाराणां च यानि रूपाणि दध्यादीनि सांतत्यादीनि च तेभ्योऽन्यदुपदिष्टमतिदिष्टं वा रूपं नास्ति; तेषां च कर्मान्तरगुणानां नान्यत्रान्वयः संभवतीत्यर्थः। **ननु** सान्तत्यादिवाक्यानि होमाघारविधायकानीति सिद्धान्ती न मन्यते, किंत्वग्निहोत्राघारवाक्यविहितहोमाघारानुवादेन गुणविधायकानीत्येव मन्यते, तं प्रति कथं तद्विहितहोमाघारेभ्य इति सिद्धवत्कृत्य कथनम्? **उच्यते**; अग्निहोत्राघारवाक्याभ्यां होमाघारयोर्विधानमेव न संभवति; होमक्षरणसामान्ययोर्होमान्तरक्षारणान्तरविधिसिद्धत्वेन विशेषोपस्थितिं विना अननुष्ठेयत्वेन च विधानायोगात्, तद्विशेषयोश्च विशेषकरूपाश्रवणेनाप्रतीतेः। **नच**—नामनी विशेषके स्यातामिति—वाच्यम्; विशेषकान्तरानुपस्थितौ कयोर्होमक्षारणविशेषयोरेते नामनी इति बोद्धुमशक्यत्वात्। नच—'उद्भिदा यजेत पशुकाम' इत्यत्र नामैव विशेषकं दृष्टमिति—शङ्कनीयम्, पशुफलेन प्रकृतिवच्छब्दसन्निधापितसौमिकाङ्गजातेन च लब्धविशेष एवोद्भिन्नामप्रवृत्तेः। नच दधिसान्तत्यादिगुणैरेव विशेषलाभः; तथा सति गुणविधिप्रवृत्त्यनन्तरं होमाघारविशेषविधी तयोर्विधाने सति तदनुवादेन गुणविधानमिति परस्पराश्रयापत्तेः, तस्माद् विशेषकसद्भावाद् दधिसांतत्यादिसगुणवाक्येष्वेव होमविशेषाणामाघारविशेषाणां च विधानम्। निर्गुणवाक्ये तदनुवादकेऽनुवादप्रयोजनमग्निहोत्राघारनाम्नोः संनिहितसर्वहोमाघारनामत्वसिद्ध्याग्निहोत्रं जुहुयात् स्वर्गकाम इति फलवाक्येन सर्वेषां होमानां फलसंबन्धसिद्धिः। इन्द्र ऊर्ध्वोऽध्वर इत्याघारमाघारयतीति गुणवाक्येन सर्वेषामाघाराणां मन्त्रसंबन्धसिद्धिश्चेति पूर्वपक्षाशयः। **अनुष्ठेयार्थप्रतीतेरिति**। विशेषकाश्रवणेऽप्यनुष्ठापकविधिसामर्थ्यादेवानुष्ठेयः कश्चन होमविशेष आघारणविशेषश्चात्र विवक्षित इति ज्ञायते। अतस्तयोर्विधानं नामविशेषोपबन्धश्चेत्युभयमुपपद्यते। ससुदायानुवादश्च निष्फलः; राजसूयनाम्न इव फलवाक्यगतस्यैवाग्निहोत्रनाम्नो गुणवाक्यगतस्यैव चाघारनाम्नः संनिहितसर्वधात्वर्थपरत्वोपपत्तेरिति भावः। **गुणविधानार्थत्वादिति**। गुणविशिष्टकर्मविधाने च दध्यादिवाक्यविहितहोमानां न देवतालाभः; 'यदग्नये च प्रजापतये च सायं जुहोति' 'यत् सूर्याय प्रजापतये च प्रातर्जुहोती'ति वाक्यविहितहोमयोर्न द्रव्यलाभः, तयोरपि दध्यादिवाक्याविशेषेण पूर्वपक्षे होमान्तरविधायकत्वस्य वक्तव्यत्वादित्याद्यपि दूषणं द्रष्टव्यम्॥ **पदान्तरे** गुणवाचिनि, नतु नामधेयरूपेऽपि। अत्र विधिशक्तेर्गुणसंक्रमणेन धातोरनुवादतोक्तिस्तात्पर्यपर्यवसानविषयार्थाभिप्राया, नतु शब्दवृत्तिबोध्याभिप्राया; द्रव्यगुणयोः स्वतःसिद्धतया धात्वर्थानुवादेन तन्मात्रविधानासंभवात्।

भामती ।

वादेन तदनुबन्धीभूतद्रव्यादिपरो भवतीति सर्वत्र भावार्थविषय एव विधिः । **एतेन**—'यदाग्नेयोऽष्टाकपालो भवति' इत्यत्र संबन्धविषयो विधिरिति **परास्तम्**;—**ननु** न भवत्यर्थो विधेयः, सिद्धे भवितरि लब्धरूपस्य भवनं प्रत्यकर्तृत्वात् । न खलु गगनं भवति । नाप्यसिद्धे; असिद्धस्यानियोज्यत्वात्, गगनकुसुमवत् । तस्माद्भवनेन प्रयोज्यव्यापारेणाक्षिप्तः प्रयोजकस्य भावयितुर्व्यापारो विधेयः । स च व्यपारो भावना, कृतिः, प्रयत्न इति निर्विषयश्चासावशक्यप्रतिपत्तिरतो विषयापेक्षायामाग्नेयशब्दोपस्थापितो द्रव्यदेवतासंबन्ध एवास्य विषयः । **ननु** व्यापारविषयः पुरुषप्रयत्नः कथमव्यापाररूपं संबन्धं गोचरयेत्? नहि घटं कुर्विल्यत्रापि साक्षान्नामार्थं घटं पुरुषप्रयत्नो गोचरयत्यपि तु दण्डादि हस्तादिना व्यापारयति । तस्माद्घटार्थां कृतिं व्यपारविषयामेव प्रतिपद्यते, नतु रूपतो घटविषयाम्, उद्देश्यतया त्वस्यामस्ति घटो नतु विषयतया । विषयतया तु हस्तादिव्यापार एव । अतएवाग्नेय इत्यत्रापि द्रव्यदेवतासंबन्धाक्षिप्तो यजिरेव कार्यविषयो विधेयः । किमुक्तं भवति, आग्नेयो भवतीति, आग्नेयेन यागेन भावयेदिति । अतएव 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजते'

वेदान्तकल्पतरुः ।

इत्यादौ द्रव्यदेवतासंबन्धो विधेय इत्याहुः । तत्रापि सिद्धस्य न विधेयत्वमित्युक्तमतिदिशति—**एतेनेति** । एकदेशी संबन्धस्य भावनावच्छेदकत्वेन विधेयत्वं शङ्कते—**नन्वित्यादिना** । **ननु** यथाश्रुतभवत्यर्थ एव विधीयतां, किं संबन्धविधिनेत्याशङ्क्य भवत्यर्थस्य कर्ता सिद्धोऽसिद्धो वा । **प्रथमे** विधिवैयर्थ्यं, **चरमे** नियोज्याभावाद्विध्यभाव इत्युक्त्वा किं तर्हि विधेयमिति वीक्षायामाह—**तस्मादिति** । **प्रयोज्यः** उत्पाद्यः । तद्व्यापारो हि भवनम् । तस्य हि व्यापारं भवतिधातुर्विशिनष्टि **भवतीति** । भवनं च नोत्पादकव्यापारमन्तरेणेति भवनाविनाभूतो भावकव्यापारो विधेय इत्यर्थः । **नन्वित्यादिना** चोद्यच्छलेन सिद्धान्ती मीमांसकैकदेशिनं दूषयति । भवतु लक्षितभावनाया विधानं, तस्यास्तु न संबन्धो विषयः; तस्य दध्यादिवत्साक्षात्कृतिविषयत्वायोगादित्यर्थः । **नन्वव्यापारोऽपि** घटादिः करोत्यर्थरूपभावनाविषयो दृश्यते, अत आह—**नहीति** । यदि दण्डादिविषयो हस्तादिव्यापारः कृतिविषयः, तर्हि कथं घटं कुर्विति घटस्य कृतिकर्मता भात्यत आह—**घटार्थामिति** । घटविषयव्यापार एव कृतिसाध्यो घटस्तूद्देश्यतया प्रयोजनमिति कर्मत्वनिर्देश इत्यर्थः । यदि संबन्धो न विधेयस्तर्ह्याग्नेयवाक्ये किं विधेयमत आह सिद्धान्त्येव—**अतएवेति** । अत्यक्तस्य हविषो देवतासंबन्धासंभवाद्यागः संबन्धाक्षिप्तः । **ननु** यजेरप्यपुमर्थत्वात्कथं विधेयतात आह—**आग्नेयेनेति** । यागेनेत्याग्नेयपदस्य लक्ष्यनिर्देशो भावयेदिति भवतिपदस्य । यत एवाग्नेयवाक्ये यागविधिरत एवानुवादे यजेतेति श्रुतम्; अन्यथा संबन्ध एव श्रूयेतेत्यर्थः । **उक्तं द्वितीये—प्रकरणं तु पौर्णमास्यां रूपावचनात्** (जै. अ. २ पा. २ सू. ३) । **एवं समामनन्ति** "यदाग्नेयोऽष्टाकपालोऽमावस्यायां पौर्णमास्यां चाच्युतो भवति" "उपांशुयाजमन्तरा भवति" "ताभ्यामेतमग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छत्" "ऐन्द्रं दध्यमावास्याया" "मैन्द्रं पयोऽमावास्यायामि"ति । तथा "य एवं विद्वान् पौर्णमासीं यजते" "य एवं विद्वानमावास्यां यजत"इति । तत्र संदेहः—किमिमौ यजती कर्मणोरपूर्वयोर्विधातारावुत प्रकृताग्नेयादियागानां समुदायस्यानुवदिताराविति ॥ तत्राभ्यासात्कर्मान्तरविधी । नच द्रव्यदेवते न स्तः; ध्रौवाज्यस्य साधारण्यान्मान्त्रवर्णिकदेवतालाभाच्च । आज्यभागक्रमे हि चतस्रोऽनुवाक्याः सन्ति । द्वे आग्नेय्यौ, द्वे सौम्ये । ते च क्रमाद्बलीयसा वाक्येनाज्यभागाभ्यामपच्छिद्यानयोः कर्मणोर्विधास्येते । एवंहि समामनन्ति । "वार्त्रघ्नी पौर्णमास्यामनूच्येते"

कल्पतरुपरिमलः ।

उक्तंहि आघाराग्निहोत्राधिकरण (जै. अ. २ पा. २ सू. १३–१६) **वार्तिके**—सर्वत्रैव विशिष्टविधानोत्तरकालं किं प्राप्तं किमप्राप्तमित्यन्वेषणायामप्राप्तमात्रविषयोपसंहाराद्विधेर्भावनाधात्वर्थयोरनुवाद इत्यभिधीयते, नत्वादित एव तावनूद्य द्रव्यं गुणो वा विधीयते; तत्र पश्चात्तने व्यापारे मन्दबुद्धिप्रतिपत्त्यर्थं स्थूलेन न्यायेन कथ्यमाने शास्त्रकृता एवैता वचनव्यक्तय इति भ्रान्तिरिति ॥ इहापि टीकायां तथैवोक्तम् । नचैवं—गुणमात्रविधानफलकवाक्येष्वपि विशिष्टविध्यभ्युपगमे प्राप्ते कर्मण्यनेकगुणविधानप्रयुक्तो वाक्यभेदो न स्यात्, प्रत्येकं गुणेषु विध्यनवतारादिति—वाच्यम्; शब्दबोध्यस्यार्थस्य विशिष्टरूपेणैक्येऽपि तत्र तात्पर्यविषयार्थभेदसद्भावेन तदभिप्रायत्वादनेकगुणविधानप्रयुक्तवाक्यभेदवर्णनस्य । **तदप्युक्तं वार्तिके**—'विधित्वे भावनात्स्थेपि तादर्थ्यं प्रविभज्यते । विशेषणफले चास्मिन् वाक्यभेदो भविष्यति ॥' इति । शब्दबोध्यार्थभेद इव तात्पर्यविषयार्थभेदेपि ह्यविशिष्टं गौरवम् । **मीमांसकैकदेशिनः** गुरुमते निबन्धनप्रस्थानानुवर्तिनः । **नन्वव्यापारोपीति** । होमसाधनस्य दध्यादेर्होमद्वारापि साध्यत्वासंभवान्मा भूद्विषयत्वं, द्रव्यदेवतासंबन्धस्य तु स्यात्; तस्य यागद्वारा साध्यत्वात्, किंचिद्द्वारा साध्यमपि हि साध्यमेव; अतएव हस्तादिव्यापारद्वारा घटस्य कृतिसाध्यत्वाद् घटं करोतीति द्वितीयानिर्देश इति भावः । **उद्देश्यतयेति** । घटोत्पत्तिमुद्दिश्य हस्तादिव्यापारं कुर्वन् घटं करोतीत्युच्यते, घटस्याप्युद्देश्यतया कृतिविषयत्वादित्यर्थः । **लक्ष्यनिर्देश इति** । आक्षेप्यस्यापि शाब्दत्वसिद्ध्यर्थं लक्ष्यतोक्तिः ।

भामती ।

इत्यनुवादो भवति 'यदाग्नेयः' इत्यादिविहितस्य यागषट्कस्य । अतएव च विहितानूदितस्य तस्यैव 'पूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यधिकारसंबन्धः । तस्मात्सर्वत्र कृतिप्रणालिकया भावार्थविषय एव विधिरित्येकान्तः । तथाच 'न हन्यात्' 'न पिबेत्' इत्यादिषु यदि कार्यमभ्युपेयेत, ततस्तद्व्यापिका कृतिरभ्युपेतव्या । तद्व्यापकश्च ऽर्थो विषयः । एवंच

वेदान्तकल्पतरुः ।

"वृधन्वती अमावास्यायामिति" । वृत्रघ्नपदवत्यौ **वार्त्रघ्नी** । वृधन्वत्पदवत्यौ **वृधन्वती** । तत्कर्मान्तरविधिः; इत्येवं प्राप्ते—**अभिधीयते** । प्रक्रियतइति **प्रकरणं** प्रकृतानि कर्माणि पौर्णमास्यमावास्यासंयुक्तवाक्यालम्बनम् । कुतः ? रूपावचनात् । ध्रौवाज्यलाभेऽपि देवता न लभ्यते । नच मन्त्रवर्णेभ्यस्तल्लाभः; तेषां क्रमाद्यागशेषत्वात् । **यत्तु** वाक्यं बलीय **इति, सत्यं;** बलवदपि न क्रमस्य बाधकमविरोधात् । क्रमावगताज्यभागायाज्यानुवाक्यायुगलद्वयस्य पौर्णमास्यमावास्याकालयोर्विभागेन प्रयोगव्यवस्थापकत्वात् । काले हीमौ शब्दौ रूढौ, न कर्म । कालद्वयोपहितकर्मसमुदायद्वयानुवादस्य च प्रयोजनं दर्शपूर्णमासाभ्यामित्यधिकारवाक्यगतद्वित्वोपपादनम् । तत्समुदायानुवादाविति । उत्पत्त्यधिकारयोरविसंवादार्थमप्याग्नेयादिवाक्ये यागविधिरभ्युपेय इत्याह—**अतएवेति** । उभयकारविधौ यजेत इति दर्शनात्प्रागपि यागविधिरित्यर्थः । कृतिनिर्वर्त्यस्य धात्वर्थस्यैव नियोगावच्छेदकतेत्युपसंहरति **तस्मादिति** । **विधिः** नियोगः । एवं नियोगकृतिभावार्थानां व्याप्यव्यापकतामुक्त्वा व्यापकनिवृत्त्या व्याप्यनिवृत्तिमप्याह—**तथाचेत्यादिना** । निषेधेषु भावार्थापादनमिष्टप्रसङ्ग इत्याशङ्क्याभ्युपगमे बाधकमाह—**एवंचेति** । निषेधधात्वर्थयोगे हि नञः

कल्पतरुपरिमलः ।

ध्रौवाज्यस्य "सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यमित्युत्सर्गतः सर्वयज्ञार्थं विहितस्य । **वृत्रघ्नपदवत्याविति** । वृत्रहननप्रकाशकपदवत्यावित्यर्थः । "अग्निर्वृत्राणि जङ्घनत्" "त्वं सोम राजोत" "अग्नेः । सोमस्य च मन्त्रयोर्वृत्रघ्नपदाभावात्—**वृधन्वत्पदवत्याविति** । वृद्धिप्रकाशकपदवत्यावित्यर्थः; "अग्निः प्रत्नेन वावृधे" "वर्धयामो वचोविदः" इति मन्त्रयोर्वृधन्वत्पदाभावात् । **प्रक्रियत इति** । **सूत्रे** प्रकरणशब्दः व्युत्पन्नः, तत्रैकवचनमविवक्षितं । पौर्णमासीशब्दो विद्वद्वाक्यद्वयोपलक्षणम् । आलम्बनशब्दस्याध्याहार इति दर्शितम् **अविरोधादिति** । पौर्णमास्यमावास्याशब्दयोः कालवाचित्वमादाय क्रमाविरोधे शक्योपपादने न तद्विरोधिकर्मत्वमङ्गीकार्यम् । तदङ्गीकारेऽत्र विद्वद्वाक्यविधेयत्वेनाभ्युपगतयोः पौर्णमास्यमावास्यासंज्ञकयोः कर्मणोः पृथगग्निप्रकाशकसोमप्रकाशकमन्त्रद्वयमनूच्येतेत्यनुवाक्यत्वेन विहितं स्यादिति मन्त्रविकल्पस्तत्प्रकाश्यदेवताविकल्पश्च भवेद्, आज्यभागयोः पुरोनुवाक्यान्तरकल्पनागौरवं च भवेदिति भावः । **बलवदपी**त्यपिशब्देनाभ्युपगमवादं सूचयति । लिङ्गसाहित्येनात्र वाक्याद् वलीयान् । अग्नेः सोमस्य च प्रागेवाज्यभागयोर्देवतात्वेन कॢप्ततया तदुभयप्रकाशिवार्त्रघ्नीवृधन्वतीनां तयोर्विनियोजकस्य लिङ्गस्यापि सद्भावादित्यपि व्यञ्जितम् । **काले हीति** । विद्वद्वाक्यविधेयपौर्णमास्यमावास्यासंज्ञककर्मद्वयाभ्युपगमे तयोः संज्ञयोः कालयोगेन निमित्तेन लक्षणैव वाच्या, नत्वपूर्वा रूढिः कल्पनीया, "पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायाममावास्यया यजेतेति" वाक्ययोरपि तत्रैव कर्मद्वये कालविधायकत्वम् । एवंच वार्त्रघ्नीवृधन्वतीवाक्यद्वयश्रुतयोः पौर्णमास्यमावास्याशब्दयोर्मुख्यवृत्तिसंभवे लक्षणा नाश्रयणीयेति भावः । उच्यते आज्यभागयोः कालयोगाश्रवणात्प्रधानद्वारा कालयोगाश्रवणे विकृतिषु "यदीष्ट्या यदि पशुना यदि सोमेन अमावास्यायां पौर्णमास्यां वा यजेते"ति कालविकल्पविधानात् पौर्णमासीकालोपांशुयाजाग्नीषोमीयविकारो यदा अमावास्यायां क्रियते, आमावास्याकालसांनाय्यैन्द्राग्नविकारो वा पौर्णमास्यां, तदा पौर्णमासीकालप्रधानाङ्गयोराज्यभागयोर्वार्त्रघ्नी, इतरमावास्याकालप्रधानाङ्गयोर्वार्त्रघ्नीप्राप्तेः प्रकृतिवद्भावबाधः स्यात् । अतस्तद्बाधाय पौर्णमास्याख्यकर्माङ्गयोर्वार्त्रघ्न्यावमावास्याख्यकर्माङ्गयोर्वृधन्वत्याविति वार्त्रघ्न्यादिवाक्यद्वयस्य आज्यभागविषयत्वेऽपि कर्मलक्षणाश्रयणीयेति; तथापि प्रधानादिपूर्वोक्तन्यायैराज्यभागविषयतयैवावतिष्ठत इति द्रष्टव्यम् । **द्वित्वोपपादनमिति** । "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति" फलवाक्यगताग्नेयादित्रिकद्वयरूपसमुदायद्वयोपपादनं विद्वद्वाक्यद्वयेन समुदायद्वयकरणस्य प्रयोजनं; तदभावे आग्नेयादीनां षण्णामिव प्रयाजादीनामपि फलसंबन्धेनाङ्गप्रधानव्यवस्था न सिध्येत् । **तथाहि**—नामाख्यातपरतन्त्रमाख्यातं स्वरसतो यावद् गृह्णाति तावति वर्तते; यथा बहूनामिष्टिपशुसोमयागानां सन्निधौ पठिते "स्वाराज्यकामो राजसूयेन यजेते"ति वाक्ये श्रुतमाख्यातं विशेषकाभावात्संनिधिपठितसर्वयागग्राहीति तत्समभिव्याहारसिद्धार्थं राजसूयनामापि तावद्यागवृत्ति । अत एवेष्टिपशुसोमात्मकाः सर्वे यागा राजसूये समप्रधानभूताः, प्रसिद्धं च न नाम नाख्यातपरतन्त्रं, किं त्वाख्यातमेव तत्परतन्त्रमित्याख्यातमपि स्वगृहीतार्थमात्रे व्यवस्थापयति । यथा "ज्योतिष्टोमेन स्वर्गकामो यजेतेति" वाक्ये श्रुतं नाम "त्रिवृत्पञ्चदशः सप्तदश एकविंशः एतानि वाव तानि ज्योतींषि य एतस्य" इत्यर्थवादोपदर्शितज्योतिर्नामकत्रिवृदा-

भामती।

प्रजापतिव्रतन्यायेन पर्युदासवृत्त्याऽहननापानसंकल्पलक्षणया तद्विषयो विधिः स्यात्। तथाच प्रसज्यप्रतिषेधो दत्तजलाञ्जलिः प्रसज्येद्। नच सति संभवे लक्षणा न्याय्या। 'नेक्षेतोद्यन्तम्' इत्यादौ तु 'तस्य व्रतम्' इत्यधिकारात्प्रस-

वेदान्तकल्पतरुः।

पर्युदासकता, न हन्यादित्यादौ त्वाख्यातयोगात्प्रतिषेधो भाति। तत्रानीक्षणवल्लक्ष्यः पर्युदास इत्येको दोषोऽपरश्च विधिनिषेधविभागलोप इत्यर्थः। प्रजापतिव्रतन्यायं (जै. अ. ४ पा. १ सू. ३–९) विभजते निषेधेषु तदभावाय—**नेक्षेतेति। तत्र हि य** ब्रह्मचारिणो **व्रत**मित्यनुष्ठेयवाचिव्रतशब्दोपक्रमादेकस्मिश्च वाक्ये प्रक्रमाधीनत्वादुपसंहारस्याख्यातयोगिना नञा प्राप्तोऽपि प्रतिषेधोऽननुष्ठेयत्वादुपेक्ष्यते। धात्वर्थयोगेन च पर्युदासो लक्षणीयः। तथा चेक्षणविरोधिनी क्रिया सामान्येन प्राप्ता विशेषबुभुत्सायां च सर्वक्रियाप्रत्यासन्नः संकल्प इत्यवगतम्। ईक्षइति तु संकल्पः ईक्षणापर्युदासेन नाद्रियते; ततोऽनी क्षसङ्कल्पलक्षणा युक्ता, नैवं निषेधेषु संकोचकमस्तीत्यर्थः। एवं निषेधेषु भावार्थाभावमभि-

कल्पतरुपरिमलः।

द्विस्तोमचतुष्टयसंबन्धनि कं, "ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति" वाक्येन तत्संबन्धितया प्रसिद्धे सोमयागे वर्तते इत्याख्यातमपि तन्मात्रे वर्तयति। अतएव सोमयाग एव प्रधानभूतः, तत्सन्निधिपठिता इष्टिपशवस्तदङ्गानि। एवं स्थिते यद्याग्नेयादिषु समुदायद्वयं प्रागेव प्रसिद्धं न स्यात्, तदा फलवाक्यगतं दर्शपूर्णमासाभ्यामिति पदमप्रसिद्धार्थमाख्यातपरतन्त्रं सन् संनिहितसर्वयागानुवचनस्वरसप्रवृत्ताख्यातानुसारेण राजसूयनामवत् संनिहितसर्वयागनाम स्याद्, द्विवचनं रसेन वचनव्यत्ययेनोपपद्येत, द्विवचनान्तप्रतिरूपकमव्ययमिति वा कल्प्येत। नहि कालयोगिषु प्राक्सिद्धसमुदायाभावे दर्शपूर्णमासनाम द्विवचनान्तं प्रसिद्धार्थं भवेत्; येषामाग्नेयादीनामुत्पत्तिवाक्यावगतः कालयोगोस्ति ते द्वित्वप्रसिध्यभावात्, ययोराज्यभागयोर्द्वित्वप्रसिद्धिरस्ति तयोः कालयोगावगत्यभावात्। तस्मादवगतकालयोगेष्वाग्नेया द्वित्वाप्रसिद्ध्यर्थं समुदायद्वयकरणं सप्रयोजनम्। तथा सति ह्याग्नेयादीनामेव प्रसिद्धार्थेन नाम्नोपात्तानां फलान्वयेन प्राधान्यं, प्रयाजादीनां तदङ्गतेति व्यवस्था सिध्यति। **ननु**—फलवाक्यस्थस्य द्विवचनान्तनाम्नः षट्स्विव विकृतिस्थयोरेकवचनान्तनाम्नोः त्रिषु त्रिष्वनन्वितार्थत्वेन अप्रसिद्धार्थतया यजतिपारतन्त्र्याऽविशेषादनयोरपि संनिहितयागानुवदनस्वरसयजत्यनुरोधेन तावन्नामत्वप्रसक्तिरपरिहार्या; यद्युच्येत तथा सति पौर्णमासीत्यमावास्येति च विद्वद्वाक्ययोर्नामपृथक्त्वं नोपपद्यते; अतस्तदेव परस्परव्यावृत्तनामिव्यवस्थां गमयतीति तद्व्यवस्थासिद्धये तत्तत्कालयोगिष्वेव त्रिषु तयोः प्रवृत्तिः कल्पनीयेति, एवं तर्हीयं युक्तिर्विद्वद्वाक्यद्वयेन समुदायद्वयसंपादनमनपेक्ष्य दर्शपूर्णमासाभ्यामिति शब्दएव योजयितुं शक्यते। तत्रैव चेयं युक्तिः—**दर्शपूर्णमासयोरिज्याप्राधान्यमविशेषा** (जै. अ. ४ पा. ४ २९) दिति चतुर्थोपान्त्याधिकरणे **पृथक्त्वेन त्वभिधानयोर्निवेशः** (जै. अ. ४ पा. ४ सू. ३४) इति सिद्धान्तसूत्रावयवे केषु चिदित्यध्याहारवता दर्शिता। **तस्य ह्ययमर्थः**—दर्शपूर्णमासाभ्यामिति द्विवचनश्रुत्या दर्शाभिधानस्य पूर्णमासशब्दस्य च दर्शाभिधानवाच्यात् पृथक्त्वेन निवेशः प्रतीयते, अतः प्रकृतयागमात्रवाचित्वे पृथक्त्वायोगात् केषुचिदेव यागेषु निवेशो युक्त इति। एवं तर्हि समुदायद्वयप्रसिद्ध्यर्थं विद्वद्वाक्यानुसरणेऽप्युक्तयुक्त्यन्वेषणे यथासूत्रं फलवाक्य एवेयमस्तु ताम्। अथोच्येत द्विवचनश्रवणं छान्दसत्वादिना नेतुं शक्यमिति तुल्यमिति—**चेत्, उच्यते;** तैत्तिरीयशाखायां एवं विद्वान्पौर्णमासीं यजते यावदुक्थ्येनोपाप्नोति तावदुपाप्नोति" "य एवं विद्वानमावास्यां यजते यावदतिरात्रेणोपाप्नोति तावदुपाप्नोती"ति विद्वद्वाक्याम्नातयोः पौर्णमास्यमावास्ययोर्व्यवस्थितफलार्थवादः श्रूयते, स तन्नाम्नोर्नामिभेदाभावे नोपपद्यत इति स्पष्टं नामिभेदः प्रतीयते, अतो विद्वद्वाक्याभ्यां समुदायद्वयसिद्धिराश्रिता। एवंच फलवाक्ये एव समुदायसंपादनं ततः समुदायान्तर्गतानां समुदायिनां फलसंबन्धबोधनं चेति प्रतिपत्तिगौरवमपि परिहृतं भवति। तस्माद् विद्वद्वाक्ययोः प्रयोजनकथनम्। **अविसंवादार्थमिति**। उत्पत्तिवाक्येन यस्येष्टसामान्ये करणत्वं बोधितं, तस्यैकारवाक्येनाकाङ्क्षितेष्टविशेषकरणत्वबोधनायां संवादो भवति। उत्पत्तिवाक्येन यत्र फले द्रव्यदेवतासंबन्धस्य करणत्वं तं, तत्रैव फले परित्यज्य तदाक्षिप्तस्य यागस्य करणबोधने तु तयोर्विसंवादः स्यादित्यर्थः। **नामधात्वर्थेति**। योगे पर्युदासतायां तदन्यतद्विरोध्यन्यतरत्वरूपायामब्राह्मणाऽधर्माद्युदाहरणम्, धात्वर्थयोगे तु नेक्षेतेति प्रदर्शयिष्यमाणमुदाहरणम्। **तत्राप्रतीतोऽपीति**। प्रधानभूताख्यातान्वयिना नञा प्रतीतोऽप्याख्यातार्थस्य कर्तव्यत्वस्याभावोऽननुष्ठेयत्वात्त्यजत इत्यर्थः। **लक्षणीय इति**। नञीक्षतिधातुभ्यामिति शेषः। **सर्वक्रियेति**। सर्वा हि पुरुषस्य क्रिया संकल्पपूर्वा तस्य तत्प्रत्यासत्तिः। **ननु** धातुर्लक्षकश्चेद् धात्वर्थसंकल्प एव किमिति न लक्ष्यत इत्याशङ्क्य नञा योगादित्याह—**तीति। संकोचकमिति**। हन्यादिति प्रकृतिविशिष्टप्रत्ययान्वयस्वरसस्य

शिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन । अपिच 'ब्राह्मणो न हन्तव्यः' इत्येवमाद्या निवृत्तिरुपदिश्यते । नच सा क्रिया । नापि क्रियासाधनम् । अक्रियार्थानामुपदेशोऽनर्थकश्चेत् ब्राह्मणो न हन्तव्य इत्यादिनिवृत्त्युपदेशानामानर्थक्यं प्राप्तम् । तच्चानिष्टम् । नच स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं, हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण । नञश्चैष

भामती ।

ज्यप्रतिषेधासंभवेन पर्युदासवृत्त्याऽनीक्षणसंकल्पलक्षणा युक्ता । तस्मात् 'न हन्यात्' 'न पिबेत्' इत्यादिषु प्रसज्यप्रतिषेधेषु भावार्थाभावात्तद्व्याप्तायाः कृतेरभावः, तदभावे च तद्व्याप्तस्य कार्यस्याभाव इति न कार्यपरत्वनियमः सर्वत्र वाक्य इत्याह—**ब्राह्मणो न हन्तव्य इत्येवमाद्या इति । ननु** कस्मान्निवृत्तिरेव कार्यं न भवति, तत्साधनं वेत्यत आह—**नच सा क्रियेति ।** क्रियाशब्दः कार्यवचनः । एतदेव विभजते—**अक्रियार्थानामिति । स्यादेतत्**—विधिविभक्तिश्रवणात्कार्यं तावदत्र प्रतीयते, तच्च न भावार्थमन्तरेण । नच रागतः प्रवृत्तस्य हननपानादावकस्मादौदासीन्यमुपपद्यते विना विधारकप्रयत्नम् । तस्मात्स एव प्रवृत्त्युन्मुखानां मनोवाग्देहानां विधारकः प्रयत्नो निषेधविधिगोचरः क्रियेति नाक्रियापरमस्ति वाक्यं किंचिदपीत्याह—**नच हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुम् ।** केन हेतुना न शक्यमित्यत आह—**स्वभावप्राप्तहन्त्यर्थानुरागेण** नञः । **अयमर्थः**—हननपानपरो हि विधिप्रत्ययः प्रतीयमानस्ते एव विधत्त इत्युत्सर्गः । नचैते शक्ये विधातुं; रागतः प्राप्तत्वात् । नच नञः प्रसज्यप्रतिषेधो विधेयः; तस्याप्यौदासीन्यरूपस्य सिद्धतया प्राप्तत्वात् । नच विधारकः प्रयत्नः; तस्याश्रुतत्वेन लक्ष्यमाणत्वात्, सति संभवे च लक्षणाया अन्याय्यत्वात्, विधिविभक्तेश्च रागतः प्राप्तप्रवृत्त्यनुवादकत्वेन विधि-

वेदान्तकल्पतरुः ।

धाय तद्व्याप्तकृतिनियोगयोरभावमाह—**तस्मादिति । तदयं प्रयोगः**—विमतं न नियोगावच्छेदकं, अभावत्वात्संमतवदिति । **क्रियाशब्द इति ।** विभागभाष्येऽक्रियार्थानामानर्थक्याभिधानादिह क्रियाशब्दः कार्यवचनः । अकार्यार्थानां ह्यानर्थक्यं नियोगवादिनो मतं, न भावार्थाविषयाणाम्; नियोगस्याप्यभावार्थत्वादिति । निषेधेषु भावार्थाभावान्न कार्यमित्युक्तं, तत्र हेत्वसिद्धिं शङ्कते—**स्यादेतदिति ।** विधिश्रुतिसिद्धो नियोगो विषयं भावार्थमाक्षिपतु, स एव कः ? न तावद्धननादिः; तस्य रागप्राप्तेः, अनुपातक्रियाविधौ च लक्षणाप्रसङ्गात्, अत आह—**नच रागत इति ।** लक्षणया हननविरोधी यत्नो विधेयः, प्रयोजनलाभे च लक्षणा न दोषायेत्यर्थः । **इत्याहेति ।** अस्यां शङ्कायामाहेत्यर्थः । व्यवहितान्वयेन व्याकुर्वन् भाष्यमुदाहरति—**नचेति ।** भाष्ये नञ इति पदम् अनुरागेणेत्यधस्तनेनाप्राप्तक्रियार्थत्वमित्युपरितनेन च संबध्यते । **स्वभावप्राप्तहन्त्यर्थानुरागेणेति** नेदमनुवादस्थं; तथा सति हि सर्वमेव भाष्यं प्रतिज्ञापरं स्यात्—'स्वभावप्राप्तहन्त्यर्थानुरागेण यन्नञोऽप्राप्तक्रियार्थत्वं तन्नेति' । तच्च न युक्तम्; नञश्चेत्युत्तरभाष्यस्य चशब्दयोगेन शङ्कानिरासित्वाद्धेत्वदर्शनात्, तन्मा भूदिति पृथक्कृत्य हेतुभागमाकाङ्क्षापूर्वकं योजयति—**केनेति ।** किमिह विधेयं हननादि वा नञर्थो वा विधारकप्रयत्नो वेति विकल्प्य क्रमेण दूषयति—**हननेत्यादिना ।** अत्र विधारकप्रयत्नविधिराशङ्कितः, स एव च निराकर्तव्यः, इतरत्तु पक्षद्वयं परस्य शाखाचंक्रमनिरासार्थं दूषि-

कल्पतरुपरिमलः ।

नञः प्रधानं प्रत्ययं परित्यज्य प्रकृतिमात्रान्वयरूपं संकोचापादकं नास्तीत्यर्थः । **शाखाचंक्रमनिरासार्थमिति ।** विधारकप्रयत्नविधिपक्षे स्थिरशङ्कायोग्ये लक्षणाप्रसङ्गेन दूषिते तदपहाय तर्हि न हन्यादित्यत्र श्रुतधातुनञर्थमध्यएव किंचिद्विधेयमस्त्वित्युत्तानधीः शङ्केत, तन्मा भूदित्येतदर्थं तदपि पक्षद्वयं विकल्पमुखेनोद्भाव्य दूषितमित्यर्थः । **ननु** नञर्थविधिपक्षो विधारकप्रयत्नविधिपक्षादपि स्थिरशङ्कायोग्यः । **तथाहि**—न हन्यादित्यत्र नञः संनिधानाद्धात्वर्थेन हननेनान्वय इति तस्य हननाभावोऽर्थः, स च प्रागभावरूपोऽनादिरपि हननचिकीर्षापनयद्वारा परिपाल्यत्वेन साध्यः, अतः स एव नियोगविषयोऽस्त्विति स्थिरैव शङ्का । नचैषा हननाभावस्य स्वतःसिद्धत्वहेतुना निराकर्तुमपि शक्या; स्वतःसिद्धस्यापि तस्य परिपाल्यत्वेन साध्यताया भाष्यटीकयोरनुपदमेव वर्णयिष्यमाणत्वात् । **किंच** गुरुमते न हन्यादित्यादिनिषेधवाक्येषु हननाद्यभावो नियोगविषय इत्येव सिद्धान्तः । तन्मते हि **प्रतिषेधेष्वकर्मत्वात्** (**जै. अ. ६ पा. २ सू. १९**) इति षष्ठाध्यायगताधिकरणे 'न कलञ्जं भक्षयेदित्यादिषु चतुर्थगतप्रजापतिव्रताधिकरण (जै. अ. ४ पा. १ सू. ३–६) न्यायेन अभक्षणसंकल्पो विधिविषय इति पूर्वपक्षे प्राप्ते,- श्रुतभक्षणाद्यभावात्मकस्यौदासीन्यस्यैव स्वतःसिद्धस्यापि प्रसक्तचिकीर्षापनयद्वारा साध्यत्वेन नियोगविषयत्वसंभवान्न लक्षणया भक्षणादिसंकल्पस्य तथात्वमङ्गीकर्तुं युक्तमिति सिद्धान्तः । इत्थंभूतः पक्षः कथं शङ्कायोग्यत्वेनापि नेक्षितः, **उच्यते**; हन्याद्भक्षयेदित्यादिपदं परिपूर्णं हि नञा संबध्यते, न पदैकदेशभूतं धातुमात्रम् । अतो धात्वर्थविशिष्टस्य प्रत्य

स्वभावो यत्स्वसंबन्धिनोऽभावं बोधयतीति । अभावबुद्धिश्चौदासीन्यकारणम् । सा च

भामती ।

विषयत्वायोगात् । तस्माद्यपि वेद्धन्याद्वेत्यनूद्य तन्नेति निषिध्यते, तदभावो ज्ञाप्यते, नतु नञर्थो विधीयते । अभावश्च स्वविरोधिभावनिरूपणतया भावच्छायानुपातीति सिद्धे सिद्धवत्, साध्ये च साध्यवद्भासत इति साध्यविषयो नञर्थः साध्यवद्भासत इति नञर्थः कार्य इति भ्रमः । तदिदमाह—**नञश्चैष स्वभाव इति । ननु** बोधयतु संबन्धिनोऽभावं नञ्, प्रवृत्त्युन्मुखानां तु मनोवाग्देहानां कुतोऽकस्मान्निवृत्तिरित्यत आह—**अभावबुद्धिश्चौदासीन्यपालनकारणम् । अयमभिप्रायः**—'ज्वरितः पथ्यमश्नीयात्' 'न सर्पायाङ्गुलिं दद्यात्' इत्यादिवचनश्रवणसमनन्तरं प्रयोज्यवृद्धस्य पथ्याशने प्रवृत्तिं भुजङ्गाङ्गुलिदानोन्मुखस्य च ततो निवृत्तिमुपलभ्य बालो व्युत्पित्सुः प्रयोज्यवृद्धस्य प्रवृत्तिनिवृत्तिहेतू इच्छाद्वेषावनुमिमीते । **तथाहि**—इच्छाद्वेषहेतुके, वृद्धस्य प्रवृत्तिनिवृत्ती, स्वतन्त्रप्रवृत्तिनिवृत्तित्वात्, मदीयस्वतन्त्रप्रवृत्तिनिवृत्तिवत् । कर्तव्यतैकार्थसमवेतेष्टानिष्टसाधनभावावगमपूर्वकौ च, अस्येच्छाद्वेषौ, प्रवृत्तिनिवृत्ति-

वेदान्तकल्पतरुः ।

तम् । **ननु** नञर्थश्चेन्न विधीयते, तर्हि हननं नास्तीत्यादाविव सिद्धतया प्रतीयेतेत्याशङ्क्याह—**अभावश्चेति ।** रागप्राप्तकर्तव्यताकहननलक्षणप्रतियोगिगतं साध्यत्वमभावे समारोप्यत इत्यर्थः । कर्तव्यत्वाभावबोधस्य निवर्तकत्वमयुक्तं; सत्यपि तस्मिन्हननगतदृष्टेष्टसाधनत्वप्रयुक्तकर्तव्यताया अनपायादित्युत्तरभाष्यस्य शङ्कामाह—**ननु बोधयत्विति ।** औदासीन्यस्य प्रागभावतया कारणानपेक्षत्वादध्याहरति—**पालनेति ।** निषेधेषु नञ्समभिव्याहृतविधिप्रत्ययेन प्रकृत्यर्थभूतहननादिगतक्षुद्रेष्टोपायतामनपबाध्य तद्गतगुरुतरादृष्टानिष्टोपायता ज्ञाप्यतेऽतो निवृत्त्युपपत्तिरिति वक्तुं लोके विधिनिषेधयोरिष्टानिष्टोपायत्वबोधकत्वं व्युत्पत्तिबलेन दर्शयति—**अयमभिप्राय इत्यादिना—प्रवर्तकेषु वाक्येषु** इत्यतः प्राक्तनेन ग्रन्थेन । इन्दूदयगतहितसाधनतायां न प्रवृत्तिहेतुता, प्राकृतभुजगाङ्गुलिदाने च नाधुना निवृत्तिहेतुत्वं, ततो विशिनष्टि—**कर्तव्यतेति ।** कर्तव्यतया सहैकस्मिन् धात्वर्थे समवेताविष्टानिष्टसाधनभावौ तौ तथोक्तौ । फलेच्छाद्वेषयोरुक्तविधसाधनभावावगमपूर्वकत्वाभावादनैकान्तिकत्वमाशङ्क्याह—**प्रवृत्तिनिवृत्तिहेतुभूतेति** । दृष्टान्ते साध्यविकलतामाश-

कल्पतरुपरिमलः ।

यार्थस्याभावो लभ्यते, नोपसर्जनस्य धात्वर्थस्याभावः । एवंच नञर्थस्य प्रधानसंबन्धोऽपि भवति । गुणसंबन्धो हि **गुणानां च पदार्थत्वादसंबन्धः समत्वात्स्या** (जै. अ. ३ पा. १ सू. २२) दिति न्यायविरुद्धः । एवंच प्रत्ययार्थस्याभावएव वाक्यार्थे स्थिते कोत्र विधिरस्तीति तं प्रत्यप्रतीतो हननाद्यभावो विषय इत्युपपाद्यते । यद्युच्येत व्युत्पत्त्या न्यायेन च प्राप्तोऽपि नञ आख्यातान्वयो न संभवति; रागप्राप्तहननादिविषयस्य नियोगस्याप्रसक्त्या तदभावबोधनासंभवात्, अत स्तस्य विशेष्यमतिलङ्घ्य तद्विशेषणधात्वर्थान्वय इष्यत इति, एवमपि हननाद्यभावो विषयो न लभ्यते; नामार्थान्वयिन इव धात्वर्थान्वयिनोऽपि नञः पर्युदासार्थत्वनियमेन प्रतिषेधार्थत्वासंभवात् । **यथाहुः**—'नामधात्वर्थयोगे तु नैव नञ् प्रतिषेधकः । वदत्यब्राह्मणाऽधर्मावन्यमात्रविरोधिनौ ॥' इति । एवंच धात्वर्थान्वयेन नञः पर्युदासार्थकत्वे सति हननादिविरोधी विधारकप्रयत्नो विषयो भवेदिति तृतीयपक्ष एवान्तर्भवेत् । यथाकथंचिद् नञो हननाभावाद्यर्थत्वसमर्थनेऽपि तस्य साक्षात्कृतिसाध्यत्वाभावात् तदवस्थितिमुद्दिश्य कर्तव्यस्तदाक्षेप्यो विधारकप्रयत्न एव यदाग्नेयवाक्ये श्रुतद्रव्यदेवतासंबन्धाक्षेप्यो याग इव विधेयः स्यादिति तृतीयपक्षान्तर्भावदोषो नातिवर्तते । एवं हननाद्यभावस्य विधेयत्वासंभव आचार्यैर्नामधात्वर्थयोगे हि नञः पर्युदासतेत्युक्त्या यदाग्नेयवाक्ये श्रुतद्रव्यदेवतासंबन्धाक्षेप्यस्य यागस्यैव विधिरिति समर्थनेन च सिद्धः । अतो नञर्थविधिविकल्पोत्र आख्यातार्थाभावविषयः पर्यवस्यतीति तस्यापुरुषतन्त्रस्य स्वतःसिद्धतया प्राप्तत्वादिति टीकायां दोष उक्तः । तत्र चौदासीन्यरूपस्येत्येतदभावरूपत्वाभिप्रायम् । **यद्वा**—यथा पुरुषस्यानीप्सितेष्वौदासीन्यं स्वतःसिद्धमेवमयमपि नञर्थ इत्यौदासीन्यसादृश्याभिप्रायमिति सर्वमनवद्यम् । **ननु—नञर्थश्चेदित्यादिना** अभावश्चेत्यादिटीकावतारिकाग्रन्थेन स्वमते हननाभावमर्थमङ्गीकृत्य तथात्वे न हन्यादित्यस्य हननं नास्तीत्यतो विशेषो न स्यादिति शङ्का तदवतारितव्याख्याग्रन्थेन न हन्यादित्यत्र प्रतियोगिनो लिङा कर्तव्यतया प्रतीतेस्तदभावेऽपि प्रतियोगिच्छायानुपातिनि कर्तव्यताभ्रमाविशेष इति परिहाराभिप्रायकथनं च न युक्तम्, नहि स्वमते न हन्यादित्यत्र हननाभावो वाक्यार्थः, किंतु हननकर्तव्यत्वाभावः, स च हननस्य बलवदनिष्टानुबन्धित्वपर्यवसायी; तथाऽनुपदमेव टीकाकारैराचार्यैश्च वक्ष्यमाणत्वात्, किंतु टीकाग्रन्थ इत्थमवतारयितुं युक्तः—'**ननु** हननाभावो न विधेयश्चेत् कथं न हन्यादित्यत्र हननाभावः कर्तव्यतयोच्यत' इति प्रतिभातीति, परिहाराभिप्रायश्चेत्थं वर्णनीयः—न हन्यादित्यव्यवधानाद् नञो धात्वर्थान्वयेन हननाभावोऽर्थ इति कश्चन भ्रमः, ततः प्रतियोगिच्छायानुपातिनि तस्मिन् कर्तव्यतयोच्यत इति कश्चन भ्रमः, एवं भ्रमद्वयावलम्बन एव केषांचिद् हननाभावस्य विधेयत्वेन व्यवहार—**इति । सत्यम्**; टीकाग्रन्थस्यैवमर्थः स्पष्ट इति प्रौढ्यार्थान्तरमपि दर्शितम् । **कर्तव्यत्वाभावबोधस्येति ।** कर्तव्यत्वविशिष्टेष्टसाधनत्वाभावबोधस्येत्यर्थः । इष्टसाधनत्वाभाव एव हि नञर्थ इति

भामती ।

हेतुभूतेच्छाद्वेषत्वात्, मत्प्रवृत्तिनिवृत्तिहेतुभूतेच्छाद्वेषवत् । न जातु मम शब्दतद्व्यापारपुरुषाशयत्रैकाल्यानवच्छिन्नभावनापूर्वप्रत्ययपूर्वाविच्छाद्वेषावभूताम्, अपितु भूयोभूयः स्वगतमालोचयत उक्तकारणपूर्वावेव प्रत्यवभासेते । तस्माद्वृद्धस्य स्वतन्त्रप्रवृत्तिनिवृत्ती इच्छाद्वेषभेदौ च कर्तव्यतैकार्थसमवेतेष्टानिष्टसाधनभावावगमपूर्वाविल्यानुपूर्व्या सिद्धः कार्यकारणभाव इतीष्टानिष्टसाधनतावगमप्रयोज्यवृद्धप्रवृत्तिनिवृत्ती इति सिद्धम् । स चावगमः प्रागभूतः शब्दश्रवणानन्तरमुपजायमानः शब्दश्रवणहेतुक इति प्रवर्तकेषु वाक्येषु 'यजेत' इत्यादिषु शब्द एव कर्तव्यमिष्टसाधनं व्यापारमवगमयंस्तस्येष्टसाधनतां कर्तव्यतां चावगमयति, अनन्यलभ्यत्वादुभयोः, अनन्यलभ्यस्य च शब्दार्थत्वात् । यत्र तु कर्तव्यतान्यत एव लभ्यते, यथा 'न हन्यात्' 'न पिबेत्' इत्यादिषु हननपानप्रवृत्त्यो रागतः प्रतिलम्भात्, तत्र तदनुवादेन नञ्समभिव्याहृता लिङादिविभक्तिरन्यतोऽप्राप्तमनयोरनर्थहेतुभावमात्रमवगमयति । प्रत्यक्षं हि तयोरिष्टसाधनभावोऽवगम्यते; अन्यथा रागविषयत्वायोगात् । तस्माद्रागादिप्राप्तकर्तव्यतानुवादेनानर्थसाधनता ज्ञापनपरं 'न हन्यात्' 'न पिबेत्' इत्यादिवाक्यं, नतु कर्तव्यतापरमिति सुष्ठूक्तमकार्यनिष्ठत्वं निषेधानाम् । निषेध्यानां चानर्थसाधनताबुद्धिरेव

वेदान्तकल्पतरुः ।

श्चाह—**न जात्विति** । शब्दादीनामपूर्वपर्यन्तानां ये प्रत्ययास्तत्पूर्वाविच्छाद्वेषौ बालस्य मा भूतां, प्रत्यक्षव्यवहारे सर्वेषामभावादित्यर्थः । पचतीत्यादौ प्रतीतापि भावना न प्रवर्तिकेति त्रैकाल्यानवच्छिन्नेरयुक्तम् । **इत्यानुपूर्व्या सिद्धः कार्यकारणभाव** इत्यन्वयव्यतिरेकप्रदर्शनपरम् । **इष्टेत्यादिसिद्धमित्यन्त**मिष्टानिष्टोपायतावगमस्य प्रवृत्तिनिवृत्ती प्रति हेतुत्वप्रदर्शनपरम् इति विवेक्तव्यम् । **ननु** कर्तव्यतेष्टसाधनत्वविशिष्टव्यापारपरः शब्दोऽस्तु, किं धर्ममात्रपरत्वेनात आह—**अनन्यलभ्यत्वादिति** । व्यापारो लोकसिद्ध इति न शब्दार्थ इत्यर्थः । **ननु** हननादिषु प्रत्यक्षदृष्टेष्टसाधनत्वकर्तव्यत्वयोर्निषेद्धुमशक्यत्वात्कथमभावबुद्धिरिति भाष्यमत आह—**निषेध्यानां चेति** । दृश्यमानमपीष्टं बह्वदृष्टानि-

कल्पतरुपरिमलः ।

वक्ष्यते । **इष्टसाधनत्वप्रयुक्तकर्तव्यताया इति** । इष्टसाधनत्वावगतिकार्यप्रवृत्तेरित्यर्थः । **शब्दादीनामिति** । विधिनिषेधात्मकः शब्द एव पुरुषस्य प्रवृत्तिं निवृत्तिं च भावयन् शब्दभावनेत्युच्यत इति लिङादियुक्तेषु वाक्येषु द्वे भावने अवगम्येते शब्दात्मिका चार्थात्मिका चेति यथा श्रुतवार्तिकग्रन्थानुसारी कश्चित्पक्षः । स मीमांसकैरेव 'तत्र शब्दः स्वरूपेण वायुवच्चेत्प्रवर्तकः । प्रमाणत्वं विहन्येत नियमाच्च प्रवर्तयेत्, (जै. अ. १ पा. २ सू. ७) इत्यादिन्यायैर्निराकृतः ॥ लिङादिभिर्नञ्समभिव्याहृतलिङादिभिश्च बोधितः प्रवर्तनानिवर्तनात्मकशब्दस्य व्यापारः शब्दभावना । लोके हि प्रैषाध्येषणादिः प्रवर्तकस्य पुरुषस्य व्यापारो गामानयेत्यादिवाक्येषु प्रवृत्तिनिवृत्तिहेतुत्वेनावगतः । अपौरुषेये वेदे वक्तृपुरुषव्यापारासंभवाच्छब्दस्यैव स व्यापार **इत्यन्यः पक्षः** ॥ वेदस्येश्वरकर्तृकत्वात् तदभिप्राय एवाज्ञारूपः प्रवर्तको निवर्तकश्च लिङादीनां नञ्युक्तलिङादीनां चार्थ **इत्युदयनादितार्किकपक्षः** ॥ त्रैकाल्यानवच्छिन्नरूपेण लिङादिनञ्युक्तलिङाद्यसाधारणार्थभूतार्थभावनैव प्रवर्तिका निवर्तिका चेति शब्दभावनामनङ्गीकुर्वतां **मीमांसकैकदेशिनां पक्षः** ॥ विधिनिषेधलिङादिबोध्यापूर्वरूपो नियोगः प्रवर्तको निवर्तकश्चेति **प्राभाकरपक्षः । प्रत्यक्षव्यवहारे इति** । नच—स्वेच्छाधीने प्रत्यक्षव्यवहारे प्रवर्तनाद्यभावेऽपि परप्रेरितव्यवहारे प्रेरयितृपुरुषप्रेरणात्मकं प्रवर्तनादिकमस्तीति—शङ्कनीयम्; तत्रापि स्वेष्टानिष्टसाधनताज्ञानं विना चेतनस्य प्रवृत्तिनिवृत्त्यसंभवेन आवश्यकस्य तस्यैव प्रवृत्तिनिवृत्तिहेतुत्वे प्रेरयितृव्यापारस्य तेनान्यथासिद्धेः । **नच** यागस्य स्वर्गकारणत्वनिर्वाहार्थम् अपूर्वमिव प्रेरयितृपुरुषव्यापारस्य प्रवृत्त्यादिकारणत्वनिर्वाहार्थम् इष्टसाधनतादिज्ञानं द्वारत्वेन कल्प्यते; यतस्तेनान्यथासिद्धिर्न स्यात्, क्लृप्तमेव हि तस्य स्वेच्छाधीनव्यवहारस्थले प्रवृत्त्यादिकारणत्वम् । **अन्वयव्यतिरेकेति** । टीकायां कार्यकारणभावशब्दस्तद्ग्राहकान्वयव्यतिरेकपर इति भावः । **व्यापारो लोकसिद्ध इति** । साध्यत्वेष्टसाधनत्वयोर्धर्मी व्यापारो ह्यत्र यागादिकः, स च यज्यादिधात्वर्थत्वेन लोकप्रसिद्ध इति यज्यादिधातुसमभिव्याहारादेव तयोर्धर्मिसंबन्धसिद्धेः न धर्म्यपि लिङादिशब्दार्थ इत्यर्थः । **यद्वा**—कृतिसाध्यत्वेष्टसाधनत्वविशिष्टयागस्वर्गयोर्व्यापारेऽपूर्वे शक्तिरिति शङ्का । व्यवहितयोः कार्यकारणभावद्वारापेक्षाया लोकसिद्धत्वेन आक्षेपादेव तत्सिद्धेर्नापूर्वरूपो व्यापारः शब्दार्थः । अतो न तत्र शाब्दयोः कृतिसाध्यत्वेष्टसाधनत्वयोरन्वयः, किंतु यज्यादिधात्वर्थ एवान्वय इति भावः । **ननु**—यदि यागादिः समभिव्याहारलभ्यत्वाद् अपूर्वव्यापारो लौकिकन्यायालभ्यत्वाच्च न लिङाद्यर्थः, तर्हि कर्तव्यत्वमपि तदर्थो न भवेत्, तदपि हि कृतिसाध्यत्वरूपं लोकत एवावगन्तुं शक्यं, यागादिः कृत्या साधयितुं शक्यो नतु चन्द्रमण्डलहरणादिवदशक्य इति ॥ **स्यादेतत्**—यः स्वर्गादिफलकामादिरधिकारी तत्कृत्यैव साधनीयत्वं न लोकतः सिद्धमित्यन्यकृत्या साधितानामपि तेषामन्यफलार्थत्वं प्रसज्येत, तन्माभूदिति कर्तव्यत्वस्यापि लिङाद्यर्थानुप्रवेशः कल्प्यः; तथा सति हि समभिव्याहृतस्य स्वर्गका-

भामती ।

निषेध्याभावबुद्धिः । तया खल्वयं चेतन आपाततो रमणीयतां पश्यन्नप्यायतिमालोच्य प्रवृत्त्यभावं निवृत्तिमवबुध्य

वेदान्तकल्पतरुः ।

ष्टोदयावहत्वादनिष्टमित्यनर्थहेतुत्वज्ञापनपरं वाक्यम् । एवंच पर्युदासपक्षादस्य न विशेष इति न शङ्क्यं; श्रुतेष्टसाधनत्वाभावोपपत्तयेऽनिष्टसाधनत्वकल्पनात्, त्वन्मते श्रुतं परित्यज्याश्रुतविधारकप्रयत्नविधिकल्पनादिति । **आयति**र्भाविफलम् । प्रवृत्त्यभावमित्यस्य व्याख्या—**निवृत्तिमिति** । उद्यतउद्यमक्रियाया मयोपरन्तव्यमिति बुद्ध्या निवर्तते, नतु प्रवृत्तिप्राग-

कल्पतरुपरिमलः ।

मादेर्यदिष्टं तत्साधनत्ववत् तत्कृतिसाध्यत्वमपि सिध्यति । **नच**—यजेतेत्यादिकर्त्रभिप्रायार्थकात्मनेपदवत्त्वात् तत्सिद्धिः स्यादिति—वाच्यम्; आत्मनेपदस्यासार्वत्रिकत्वात्, आग्नेयमष्टाकपालं निर्वपेद् रुक्काम इत्यादौ तदभावात् । **नच**—तत्राग्नीनादधीतेत्याधानवाक्यगतात्मनेपदबलात्तत्सिद्धिः स्यात्, तत्र साक्षादाधानफलस्याग्निसंस्कारस्याहवनीयादिगतत्वेनाग्निसाध्यक्रतुफलानां परम्परयाधानसाध्यानां कर्तृगामित्वमपेक्ष्यैव तत्रत्यात्मनेपदस्य निर्वाह्यत्वादिति—वाच्यम्; अग्निनिरपेक्षजपादिविधिश्रुतफलानां कर्तृगामित्वस्य ततो निर्वाहाभावात्, येनाधानं कृतं तस्याग्निषु तेन स्वफलकामनया क्षेत्रजपुत्रोत्पादनन्यायादन्येन यागानुष्ठापनप्रसङ्गस्यैवमप्यपरिहाराच्च । तस्मात्फलकामकर्तव्यत्वं न लोकसिद्धमिति तल्लाभाय कर्तव्यत्वं लिङाद्यर्थ इत्यभ्युपेयमिति—**चेत्, न**; कर्तव्यत्वस्य तदर्थत्वाभ्युपगमेऽपि तच्छङ्कानपायात्, यः पुत्रगतपूतत्वादिवत्पित्रादिगतं स्वर्गं कामयते सोऽपि स्वर्गकाम इति तत्कृत्या साधितस्य यागस्य पित्रादिगतस्वर्गजनकत्वशङ्का हि तथैवानुवर्तेत । यद्युच्येत प्रवर्तको विधिः कर्तृगतफलपर्यवसायिन्येव पुरुषं प्रवर्तयतीति नियमः । पुत्रगतपूतत्वादिकमपि सत्पुत्रेण भाविफलमालोचयतः स्वगतफलपर्यवसायीति परम्परया स्वफलोपयोगि । इह स्वर्गकाम इत्यादौ पूतत्वादाविव परम्पराश्रयणे प्रमाणभावादौत्सर्गिकं साक्षात्त्वं न त्यक्तव्यमिति स्वकीयस्वर्गकामादिरेव तदर्थः । अतो नातिप्रसङ्गो भवतीति, एवं तर्हि कर्तव्यत्वस्य लिङाद्यर्थत्वाभावेऽपि स्वर्गकामो यजेतेति सामानाधिकरण्येन स्वकीयस्वर्गकामस्यैव यागकर्तृत्वप्रतीतेस्तस्य न तदर्थत्वमभ्युपगन्तव्यम् । यजेतेत्यत्र ह्याख्यातसामान्यार्थकृत्याक्षिप्तस्तदाश्रयः कर्ता प्रतीयतएव यत्रैकवचनाद्यर्थसंख्यान्वयः । तस्मात्कर्तव्यत्वं लिङाद्यर्थ इति नाभ्युपेयमिति—**चेत्, सत्यम्**; यद्यपि सूक्ष्मदृष्ट्यान्यलभ्यमपि कर्तव्यत्वं प्रवर्तकज्ञानविषयत्वात्प्रवृत्तिप्रयोजकस्य लिङादेरर्थोऽभ्युपेयते; तथापि कर्तव्यत्वेष्टसाधनत्वयोर्धर्मी यागादिस्तदर्थो नाभ्युपेयः; धातुसमभिव्याहारादेव तयोस्ताद्धर्म्यसिद्धेः स्पष्टत्वादित्यत्र तात्पर्यम् । **श्रुतेष्टसाधनत्वाभावोपपत्तये इति ।**
ननु—इष्टसाधनत्वाभावः श्रुत इत्ययुक्तम्; तस्य न हन्यादित्येतदर्थत्वाभावात्, सांदृष्टिकेष्टोपायत्वे विद्यमाने तदभावस्य बाधितत्वात्, हननेष्टसाधनतामनपबाध्य तद्गुरुतरादृष्टानिष्टोपायता ज्ञायत इति पूर्ववाक्ये तदबाधनस्योक्तत्वाच्च । एवंच श्रुतेष्टसाधनत्वाभावोपपत्तये गुरुतरानिष्टसाधनत्वं कल्प्यत इत्यप्ययुक्तम्; गुरुतरानिष्टसाधनत्वे कल्पितेऽपि सांदृष्टिकेष्टोपायत्वस्य प्रत्यक्षसिद्धस्यापनेतुमशक्यत्वेन तदभावोपपादनायोगादिति—**चेत्, उच्यते**; गुरुतरानिष्टसाधनत्वे कल्पिते तत्प्रतिसंधानेन सांदृष्टिकफलादिच्छा निवर्तेत, तन्निवृत्तौ च तस्येष्टत्वं नास्तीति इष्टसाधनत्वाभावस्य न हन्यादित्येतदर्थतायां न काचिदनुपपत्तिः । गुरुतरानिष्टसाधनत्वकल्पनायाश्च न तदुपपादकत्वासंभवः । पूर्ववाक्ये तात्कालिकक्षुद्रेष्टसाधनत्वानपबाधनोक्तिस्तु तात्कालिकफलत्वाभिमतसाधनत्वयोग्यतायाः स्वरूपतो बाधनाभावपरा, नतु तस्य फलस्येच्छाविषयत्वबाधनाभावपरापीति न विरोधः । **ननु**—आस्तिककामुकस्य रागान्धस्य सत्यपि भाविनरकदुःखावश्यंभावावगमे तात्कालिकफलेच्छा नापैतीति तं प्रतीष्टसाधनत्वाभावबोधकस्य निषेधवाक्यस्याप्रामाण्यं स्यात्, सर्वान्प्रति प्रमाणभूतस्य च वेदवाक्यस्य पुरुषभेदेन प्रामाण्याप्रामाण्यवैलक्षण्यं न युक्तमिति—**चेत्**, यद्येवमत्रापरितोषः तदैवमुपपादनीयम् । इष्टोपायत्वमात्रं न लिङाद्यर्थः, किंतु बलवदनिष्टाननुबन्धित्वविशेषितम् । तथाच निषेधवाक्यैर्विशिष्टाभावबोधने नास्ति बाधः । विशेष्यवति विशिष्टाभावो विशेषणाभावेनोपपादनीय इति तदुपपादनार्थं विशेषणाभावात्मकबलवदनिष्टानुबन्धित्वकल्पनेति श्रुतेष्टसाधनत्वाभावोपपत्तय इत्यादिग्रन्थस्य तात्पर्यम् । सत्यपि तात्कालिकेष्टाद्वस्तुतो भाविनरकानिष्टस्याधिक्ये रागान्धस्य तात्कालिकसुखमेव ततोऽधिकमिति मोहान्निषिद्धाचरणं निषेधवाक्यप्रामाण्यं चोपपद्यते । ग्रन्थे गुरुतरादृष्टानिष्टसाधनत्वकल्पनोक्तिः निन्दार्थवादरहितेषु निषेधवाक्येषु, निन्दार्थवादसत्त्वे तु ततएव तल्लाभः । हननादिषु निषेध्येषु तात्कालिकेष्टापेक्षया भाव्यनिष्टस्य गुरुतरत्ववचनं निन्दार्थवादः, यागादिषु तात्कालिकक्लेशापेक्षया भाविन इष्टस्य गुरुतरत्ववचनं स्तुत्यर्थवाद इति हि वृद्धाः । **नच**—यागादीनां विधेयानां लिङादिना बलवदनिष्टाननुबन्धित्वबोधने स्तुत्यर्थवादवैयर्थ्यमिति—शङ्कनीयम्; तद्बोधनेऽपि इष्टानिष्टयोः साम्येन तुल्यायव्ययत्वशङ्कापरिहारेण स्तुत्यर्थवादसाफल्यादित्येषा दिक् । **ननु** निवृत्तिशब्देन प्रवृत्त्यभावः केन प्रकारेण व्याख्यातो भवतीत्याकाङ्क्षायां तेन लभ्यं विशेषमाह—**उद्यमक्रियाया इति ।** प्रवृत्त्यभावमवबुध्येत्येतावताऽनादिसिद्धप्रवृत्तिप्रागभावबोधमात्रमुक्तं स्यात्, न तद्बोधमात्रान्निवर्तते, किंतु स्वज्ञोद्यमनादिरूपा

दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति। तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव 'ब्राह्मणो न हन्तव्यः' इत्यादिषु प्रतिषेधार्थं मन्यामहे, अन्यत्र प्रजापतिव्रतादिभ्यः। तस्मात्पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम्। यदप्युक्तम्—कर्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात्, सप्तद्वीपा वसुमती्यादिवदिति, तत्परिहृतम्; रज्जुरियं नायं

भामती।

निवर्तते। औदासीन्यमात्मनोऽवस्थापयतीति यावत्। **स्यादेतत्**—अभावबुद्धिश्चेदौदासीन्यस्थापनकारणं यावदौदासीन्यमनुवर्तेत, नचानुवर्तते; नह्युदासीनोऽपि विषयान्तरव्यासक्तचित्तस्तदभावबुद्धिमान्। नचावस्थापककारणाभावे कार्यावस्थानं दृष्टम्। नहि स्तम्भाभावपाते प्रासादोऽवतिष्ठतेऽत आह—**सा च दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति**। तावदेव खल्वयं प्रवृत्त्युन्मुखो न यावदस्यानर्थहेतुभावमधिगच्छति। अनर्थहेतुत्वाधिगमोऽस्य समूलोद्धारं प्रवृत्तिमुद्धृत्य दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति। **एतदुक्तं भवति**—यथा प्रासादावस्थानकारणं स्तम्भौ नैवमौदासीन्यावस्थानकारणमभावबुद्धिः, अपित्वागन्तुकाद्विनाशहेतोस्त्राणेनावस्थानकारणम्। यथा कमठपृष्ठनिष्ठुरः कवचः शस्त्रप्रहारत्राणेन राजन्यजीवावस्थानहेतुः। नच कवचापगमे चासति च शस्त्रप्रहारे राजन्यजीवनाश इति। उपसंहरति—**तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेवेति**। औदासीन्यमजानतोऽप्यस्तीति प्रसक्तक्रियानिवृत्त्योपलक्ष्य विशिनष्टि। तत्किमक्रियार्थत्वेनानर्थक्यमाशङ्क्य क्रियार्थत्वोपवर्णनं जैमिनीयमसमञ्जसमेवेत्युपसंहारव्याजेन परिहरति—**तस्मात्पुरुषार्थेति**। पुरुषार्थानुपयोग्युपाख्यानादिविषयावक्रियार्थतया क्रियार्थतया च पूर्वोत्तरपक्षौ, नतूपनिषद्विषयौ; उपनिषदां स्वयंपुरुषार्थब्रह्मरूपावगमपर्यवसानादित्यर्थः। यदप्यौपनिषदात्मज्ञानमपुरुषार्थं मन्यमानेनोक्तम्—**कर्तव्यविध्यनुप्रवेशमन्तरेणेति**। अत्र निगूढाभिसंधिः पूर्वोक्तं परिहारं स्मारयति—**तत्परिहृतमिति**। अत्राक्षेप्ता स्वो-

वेदान्तकल्पतरुः।

भावमात्रमित्यर्थः। यथोक्ताभावबुद्धेरौदासीन्यस्थापकत्वेऽपि क्षणिकत्वात्तद्ध्वंसे हननोद्यमः स्याच्छश्वत्तत्संततौ च विषयान्तरज्ञानानुदयप्रसङ्ग इति शङ्कते—**स्यादेतदिति**। यथाग्निः पुनर्ज्वालोपजननिदानमिन्धनं दहन्नुपशान्तोऽपि भवति भाविनीनां ज्वालानामुदयविरोधी, एवमभावबुद्धिः क्षणिकतया स्वयमेव शाम्यत्यपि हननाद्यहितोपायतानवबोधं दग्ध्वा तन्निदाना उपरितनीः प्रवृत्ती रुणद्धीति। भाष्यार्थमाह—**तावदेवेति**। नह्यभावबुद्धिरौदासीन्यस्यानादिनः स्थापनकारणं, येन तदभावे कारणाभावादिदं न भवेत्, अपित्वपवादनिरासिकेत्याह—**एतदुक्तमिति**। अनादित्वादौत्सर्गिकमौदासीन्यं। तत्रापवादनिवर्तकासन्निधावप्यौत्सर्गिकस्थेम्नि दृष्टान्तमाह—**यथेति**। **कमठः** कूर्मः। यदौदासीन्यं तत्प्रागभावरूपत्वादुक्तमपि न निवृत्तिहेतुः, ततः कर्तव्यत्वेन प्रसक्तक्रियाप्रतियोगिकनिवृत्तिरूपेण विशिष्टं निवृत्त्युपयोगि, यद्धन्यात्तन्नेति प्रसक्तक्रियानिवृत्तिरूपता चौदासीन्यस्य न; सर्वदा क्रियाप्रसङ्गाभावात्। अतः काकवदुपलक्षणम्। तादृश्या निवृत्त्योपलक्ष्यौदासीन्यं विशिनष्टि भाष्यकार इत्याह—**औदासीन्यमिति**। **ननु** केयं प्रसक्तक्रियानिवृत्तिः? न तावद्धननादिप्रागभावः; अनादित्वादेव तद्बोधनस्यानुपयोगात्। नापि तद्ध्वंसः; प्रसक्तक्रियाया अनुदयेन ध्वंसायोगात्, **उच्यते; 'हननोद्यतखड्गादेः परावर्तनमुच्यते। निवृत्तिरिति तस्मिन्हि हननं न भविष्यति'**॥ एषा च निवृत्तिः नञर्थबोधफला, नञर्थस्तु हननगतेष्टसाधनत्वाभाव एवेति। भाष्ये जैमिनीयमानर्थक्याभिधानं क्रियासंनिधिस्थार्थवादादिविषयमित्युक्तम्, तदाम्नायस्य क्रियार्थत्वादिति हेतोस्तद्वत्त्वेनाक्रियार्थानामप्रामाण्यपूर्वपक्षस्य विध्येकवाक्यत्वेन प्रामाण्यमिति सिद्धान्तस्य च तद्विषयत्वोपलक्षणार्थमित्याह—**पुरुषार्थानुपयोगीति**। स्वयं पुमर्थब्रह्मावगमपरत्वमुपनिषदामसिद्धमित्याशङ्क्य भाष्यव्या-

कल्पतरुपरिमलः।

या हननोद्यमक्रिया तस्या उपरन्तव्यमिति कर्तव्यत्वेनानुसंधीयमाना या खड्गादिपरावर्तनक्रिया तदुपलक्षितत्वेन निवृत्तिरूपा। तत्र प्रवृत्त्यभावमवबुध्य निवर्तते निवृत्तिरूपापन्नप्रवृत्त्यभाववान्भवतीत्यर्थः। **यद्धन्यात्तन्नेतीति**। इदं वाक्यं प्रसक्तक्रियानिवृत्तिप्रतिपादकतया नोपात्तं; खड्गादिपरावर्तनरूपतया वक्ष्यमाणायाः प्रसक्तक्रियानिवृत्तेर्न हन्यादित्येतदर्थत्वाभावात्, किंतु निवृत्तिरूपा खड्गादिपरावर्त्यताबुद्धिः केन भवतीत्याकाङ्क्षायां न हन्यादित्येतदर्थभूतानिष्टसाधनत्वज्ञानेन भवतीत्येतदर्थप्रतिपादकतयोपात्तम्। **एषा चेति**। न हन्यादित्यनेन हननगतबलवदनिष्टानुबन्धित्वविशिष्टेष्ट-

१ न हन्यादित्यत्र हननाभावविषयकं कार्यमिति वा हननप्रागभावपरिपालनविषयकं कार्यमिति वा अभावकार्यत्वानुपपत्त्या लक्षणाप्रसङ्गेन च बोधासंभवेन लोकसिद्धेष्टसाधनत्वाबाधेन हनननिष्ठबलवदनिष्टाननुबन्धित्वाभावबोधस्यैवाङ्गीकरणीयतया कार्यपराणामेव वाक्यानां प्रामाण्यमिति नियमो न संभवदुक्तिकः। 'नातिरात्रे षोडशिनं गृह्णाती'त्यादिवाक्येषु तु इष्टसाधनत्वघटकनियमांशमात्रबाधान्निषेधवाक्यत्वोपपत्तिः। यथा व्रीहियवादिवाक्ये. **इति तु ब्रह्मविद्याभरणकाराः**।

सर्प इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात् । ननु—श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम्, अत्रोच्यते—नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुं, वेदप्रमाणजनितब्रह्मात्मभावविरोधात्। नहि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुम्। नहि धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति । नच कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वाभिमाननिमित्तं सुखं भवति । तदुक्तं श्रुत्या—'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छान्दो० ८।१२।१) इति । शरीरे पतितेऽशरीरत्वं स्यात् न जीवत इति चेन्न; सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात् । नह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वान्यतः सशरीरत्वं शक्यं कल्पयितुम् । नित्यमशरीरत्वमकर्मनिमित्तत्वादित्यवोचाम । तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेन्न; शरीरसंबन्धस्यासिद्धत्वाद्धर्माधर्मयोरात्मकृतत्वासिद्धेः। शरीरसंबन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य

भामती ।

क्तमर्थं स्मारयति—**ननु श्रुतब्रह्मणोऽपीति** । निगूढमभिसंधिं समाधातोद्धाटयति—**अत्रोच्यते— नावगतब्रह्मात्मभावस्येति** । **सत्यं**, न ब्रह्मज्ञानमात्रं सांसारिकधर्मनिवृत्तिकारणमपि तु साक्षात्कारपर्यन्तम् । ब्रह्मसाक्षात्कारश्चान्तःकरणवृत्तिभेदः श्रवणमननादिजनितसंस्कारसचिवमनोजन्मा षड्जादिभेदसाक्षात्कार इव गान्धर्वशास्त्रश्रवणाभ्यासंस्कृतमनोयोनिः । स च निखिलप्रपञ्चमहेन्द्रजालसाक्षात्कारं समूलमुन्मूलयन्नात्मानमपि प्रपञ्चत्वाविशेषादुन्मूलयतीत्युपपादितमधस्तात् । तस्माद्रज्जुस्वरूपकथनतुल्यतैवात्रेति सिद्धम् । अत्रच वेदप्रमाणमूलतया वेदप्रमाणजनितेत्युक्तम् । अत्रैव सुखदुःखानुत्पादभेदेन निदर्शनद्वयमाह—**नहि धनिन इति** । श्रुतिमत्रोदाहरति—**तदुक्तमिति** । चोदयति—**शरीरे पतित इति** । परिहरति—**न । सशरीरत्वस्येति** । यदि वास्तवं सशरीरत्वं भवेन्न जीवतस्तन्निवर्तेत, मिथ्याज्ञाननिमित्तं तु तत् । तच्चोत्पन्नतत्त्वज्ञानेन जीवतापि शक्यं निवर्तयितुम् । यत्पुनरशरीरत्वं तदस्य स्वभाव इति न शक्यं निवर्तयितुं, स्वभावहानेन भावविनाशप्रसङ्गादित्याह—**नित्यमशरीरत्वमिति** । **स्यादेतत्**—न मिथ्याज्ञाननिमित्तं सशरीरत्वमपि तु धर्माधर्मनिमित्तं, तच्च स्वकारणधर्माधर्मनिवृत्तिमन्तरेण न निवर्तते, तन्निवृत्तौ च प्रयाणमेवेति न जीवतोऽशरीरत्वमिति शङ्कते—**तत्कृतेति** । तदित्यात्मानं परामृशति। निराकरोति—**न शरीरसंबन्धस्येति** । न तावदात्मा साक्षाद्धर्माधर्मौ कर्तुमर्हति, वाग्बुद्धिशरीरारम्भजनितौ हि तौ नासति शरीरसंबन्धे भवतः, ताभ्यां तु शरीरसंबन्धं रोचयमानो व्यक्तं परस्पराश्रयं दोषमावहति । तदिदमाह—**शरीरसंबन्धस्येति** । यद्युच्येत

वेदान्तकल्पतरुः ।

व्यया परिहरति—**यदपीत्यादिना** । अवगतब्रह्मात्मभावस्येति भाष्येऽवगतिशब्दाभिप्रायमाह—**सत्यमिति** । साक्षात्कारस्य स्वरूपत्वान्न निवर्तकतेति, तत्राह—**ब्रह्मसाक्षात्कारश्चेति** । **आत्मानमपि** स्वसाक्षात्कारमपि । **इतीति** । श्रवणादिसंस्कृतमनोजन्यश्चेत्साक्षात्कारः कथं तर्हि वेदप्रमाणजनितेति भाष्यमत आह—**अत्रचेति** । अशरीरत्वं देहपातोत्तरकालमिति शङ्कायां सशरीरत्वस्य निमित्तवर्णनमयुक्तमित्याशङ्क्याह—**यदीति** । यदि सशरीरत्वं मिथ्यात्वाज्जीवत एव ज्ञानेन निवर्त्यं, तर्ह्यशरीरत्वमप्यभावत्वात्तथेत्याशङ्क्य न तत्त्वतः शरीरसंबन्धोऽभावोपलक्षितस्यातथात्वादित्याह—**यत्पुनरिति** । भाष्ये तच्छब्देन नह्यात्मन इति प्रस्तुतात्मपरामर्श इत्याह—**तदितीति** । शरीरसंबन्धस्येत्याद्यसिद्धेरित्यन्तं भाष्यं व्याचष्टे—**न तावदिति** । 'शरीरसंबन्धस्य धर्माधर्मयोरि'त्यादि 'प्रसङ्गा'दित्यन्तं भाष्यं विवृणोति—**ताभ्यां त्विति** । आत्मनि स्वतोऽसिद्धाभ्यां धर्माधर्माभ्यां जन्यशरीरसंबन्धं प्रति प्रीयमाणे वादिनि सिद्धे शरीरसंबन्धे धर्मादिसंबन्धः तत्सिद्धौ शरीरादिसंबन्ध इति परस्पराश्रयं स्वपक्षे प्रापयतीत्यर्थः । धर्माधर्मव्यक्त्योः शरीरसंबन्धव्यक्तेश्चेतरेतरहेतुकत्वे यद्यपीतरेतराश्रयः; तथापि न दोषोऽनादित्वादिति सत्कार्यवादी शङ्कते—**यद्युच्येतेति** । तत्र

कल्पतरुपरिमलः ।

साधनत्वाभावावगतिः, ततो बलवदनिष्टानुबन्धित्वकल्पनं तेनोद्यतं खड्गादिकं परावर्तनीयमिति बुद्धिः, ततस्तत्परावर्तनवैशिष्ट्येन लब्धपरिपालनतया निवृत्तिरूपापन्नौदासीन्यप्राप्तिरिति क्रमः ॥ **अभावत्वात्तथेति** । अभावो हि ब्रह्मस्वरूपे नान्तर्भवति; अतः प्रपञ्चान्तःपातित्वान्मिथ्येत्यर्थः । **अतथात्वात्** अशरीरत्वरूपत्वात् । **अनादित्वादिति** । **सत्कार्यवादी शङ्कत इति** । उभयोः सादित्वे खलु परस्परहेतुहेतुमद्भावाधीनः परस्पराश्रयः प्रसज्यते, उभयोरनादित्वे तदभावाद्

चेतरेतराश्रयत्वप्रसङ्गादन्धपरंपरैषानादित्वकल्पना। क्रियासमवायाभावाच्चात्मनः कर्तृत्वानुपपत्तेः। संनिधानमात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेन्न; धनदानाद्युपार्जितभृत्यसंबन्धित्वात्तेषां कर्तृत्वोपपत्तेः, नत्वात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिसंबन्धनिमित्तं किंचिच्छक्यं कल्पयितुम्। मिथ्याभिमानस्तु प्रत्यक्षः संबन्धहेतुः। एतेन यजमानत्वमात्मनो व्याख्यातम्। अत्राहुः—देहादिव्यतिरिक्तस्यात्मन आत्मीये देहादावभिमानो गौणो न मिथ्येति चेन्न, प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः। यस्य हि प्रसिद्धो वस्तुभेदः, यथा केसरादिमानाकृतिविशेषोऽन्वयव्यतिरेकाभ्यां सिंहशब्दप्रत्ययभाङ्मुख्योऽन्यः प्रसिद्धः, ततश्चान्यः पुरुषः प्रायिकैः क्रौर्यशौर्यादिभिः सिंहगुणैः संपन्नः सिद्धः, तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतो नाप्रसिद्धवस्तुभेदस्य। तस्य त्वन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ। यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायामकस्माद्रजतमिदमिति निश्चितौ शब्दप्रत्ययौ तद्वद्देहादिसंघातेऽहमिति निरुपचारेण शब्दप्रत्यया-

भामती।

सत्यमस्ति परस्पराश्रयः, नत्वेष दोषोऽनादित्वाद्बीजाङ्कुरवदित्यत आह—**अन्धपरंपरैषानादित्वकल्पना।** यस्तु मन्यते नेयमन्धपरंपरातुल्यानादिता। नहि यतो धर्माधर्मभेदादात्मशरीरसंबन्धभेदस्तत एव स धर्माधर्मभेदः किंत्वेष पूर्वस्मादात्मशरीरसंबन्धात्पूर्वधर्माधर्मभेदजन्मनः, एष त्वात्मशरीरसंबन्धोऽस्माद्धर्माधर्मभेदादिति, तं प्रत्याह—**क्रियासमवायाभावादिति।** शङ्कते—**संनिधानमात्रेणेति।** परिहरति—**नेति। उपार्जनं** स्वीकरणम्। न त्वियं विधात्मनीत्याह—**नत्वात्मन इति।** ये तु देहादावात्माभिमानो न मिथ्या, अपितु गौणः, माणवकादाविव सिंहाभिमान इति मन्यन्ते, तन्मतमुपन्यस्य दूषयति—**अत्राहुरिति।** प्रसिद्धो वस्तुभेदो यस्य पुरुषस्य स तथोक्तः। उपपादितं चैतदस्माभिरध्यासभाष्य इति नेहोपपाद्यते। यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे वस्तुनि पुरुषात् सांशयिकौ पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, तत्र हि पुरुषत्वमनियतमपि समारोपितमेव। एवं संशये समारोपितमनिश्चितमुदाहृत्य विपर्ययज्ञाने निश्चितमुदाहरति—**यथावा शुक्तिकायामिति।** शुक्लभास्वरस्य द्रव्यस्य पुरःस्थितस्य सति शुक्तिकारजतसाधारण्ये यावदत्र रजतविनिश्चयो भवति तावत्कस्माच्छुक्तिविनिश्चय

वेदान्तकल्पतरुः।

नित्यसत्योर्व्यक्त्योर्न हेतुहेतुमत्ता, अभिव्यक्त्योस्तु कादाचित्क्योरितरेतराधीनत्वे एकस्य अप्रसिद्धेरन्धपरंपरातुल्यानादित्वकल्पना स्यादित्याह—**अन्धपरम्परेति।** सत्कार्यवादी व्यक्तिभेदेनेतरेतराश्रयं परिहरतीत्याह—**यस्त्विति। किं त्वेष इति।** इदानीन्तनशरीरसंबन्धहेतुरित्यर्थः। पूर्वं एवात्मशरीरसंबन्धो विशेष्यते—**पूर्वधर्माधर्मभेदजन्मन इति।** पूर्वाभ्यां धर्माधर्मविशेषाभ्यां जन्म यस्य स तथोक्तः। **एष त्विति।** वर्तमान इत्यर्थः। आत्मन्यध्यासप्रस्तावोक्तयुक्तिभिर्नैकोपि क्रियासंबन्धः, कथमनन्तव्यक्तिसंभव इति परिहरतीत्याह—**तं प्रत्याहेति।** देहात्मसंबन्धहेतुर्मिथ्याभिमानः प्रत्यक्ष इत्युक्तम्, तदाक्षिप्य समाधत्ते—**ये त्विति।** अप्रसिद्धवस्तुभेदस्यान्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्ताविति प्रतिज्ञाय संशयनिमित्तशब्दप्रत्ययोदाहरणं भाष्येऽनुपपन्नमित्याशङ्क्य भ्रान्तिशब्देन समारोप उक्तः। अस्ति च संशयस्यापि समारोपत्वमित्याह—**तत्रहि पुरुषत्वमिति।** भ्रान्तेरप्युचितनिमित्तापेक्षणादकस्मादित्ययुक्तमित्याशङ्क्याह—**शुक्लभास्वरस्येति।** साधारणधर्मिणी दृष्टे किं तन्मात्रं विपर्ययकारणमुत सादृश्यादिदोषमिलितम्। **नाद्यः**; धवलभास्वररूपस्य शुक्तिरजतसाधारण्ये सति व्यवहितरजतनिश्चयात् प्रागेव संनिहितशुक्तिनिश्चयप्रसङ्गादित्यभिधाय **द्वितीयं** दूषयति

कल्पतरुपरिमलः।

न परस्पराश्रयप्रसक्तिरित्यर्थः। **टीकायां**—यस्तु मन्यत इत्यग्रिमग्रन्थेनासत्कार्यवादमवलम्ब्य प्रवाहानादित्वशङ्कायाः करिष्यमाणत्वात् इयं शङ्का सत्कार्यवादावलम्बस्वरूपाऽनादित्वविषया योजिता। **अन्धपरम्परेति।** स्वरूपनित्यत्वपक्षेऽपि अभिव्यक्त्योरनित्ययोः परस्परहेतुहेतुमद्भावेन तत्कृतपरस्पराश्रयानपायाद् उत्पत्तिस्थानीयां कादाचित्कीमभिव्यक्तिमङ्गीकृत्यापि स्वरूपनित्यत्वकल्पनेयमन्धपरम्पराऽऽप्तपटशौक्ल्योपदेशवदप्रामाणिकीत्यर्थः। **संशयनिमित्तेति।** संशयशब्देन विशेषादर्शनादिसंशयकारणकलापो विवक्षितः; संशयस्य प्रत्ययशब्देन तत्कार्यतया ग्रहणात्, संशयशब्दस्य मुख्यार्थत्वे तु संशयमूलकशब्दप्रयोगजन्यप्रत्ययान्तरपरः प्रत्ययशब्दो योज्यः। **उचितनिमित्तापेक्षणादिति।** करणदोषादिबहुनिमित्तापेक्षणादित्यर्थः। **साधारणधर्मिणि दृष्टे इति।** धवलभास्वरवर्णरूपसादृश्यविशिष्टे धर्मिणि दृष्टे। किं सादृश्यविशिष्टधर्मिज्ञानमात्रं विपर्ययकारणम्? उत सादृश्येनैव अन्यैश्च दोषैर्मिलितमित्यर्थः। **द्वितीयं दूषयतीति।** सादृश्यवद्दोषस्यापि प्रवेशितत्वात्। यद्यपि शुक्तिप्रमा न भवति, दोषस्य प्रमाप्रतिबन्धकत्वात्; तथापि संशयः किं न स्यात्? तस्यापि

वात्मानात्माविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम् । आत्मानात्मविवेकिनामपि पण्डितानामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ भवतः । तस्माद्देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव न गौणः । तस्मान्मिथ्याप्रत्ययनिमित्तत्वात्सशरीरत्वस्य, सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम् । तथाच ब्रह्मविद्विषया श्रुतिः—'तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते । अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृह० ४।४।७) इति । 'सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इव' इति च । स्मृतिरपि च—'स्थितप्रज्ञस्य का भाषा' (भ० गी० २।५४) इत्याद्या स्थितप्रज्ञलक्षणान्याचक्षाणा विदुषः सर्वप्रवृत्त्यसंबन्धं दर्शयति । तस्मान्नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वम् । यस्य तु यथापूर्वं संसारित्वं नासाववगतब्रह्मात्म-

भामती ।

एव न भवति । संशयो वा द्वेधा युक्तः; समानधर्मधर्मिणोर्दर्शनात् उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषद्वयस्मृतेश्च । संस्कारोन्मेषहेतोः सादृश्यस्य द्विष्ठत्वेनोभयत्र तुल्यमेतदित्यत उक्तम्—**अकस्मादिति** । अनेन दृष्टस्य हेतोः समानत्वेऽप्यदृष्टं हेतुरुक्तः । तच्च कार्यदर्शनोन्नेयत्वेनासाधारणमिति भावः । **आत्मानात्मविवेकिनामिति** । श्रवणमनन-कुशलतामात्रेण पण्डितानाम्; अनुत्पन्नतत्त्वसाक्षात्काराणामिति यावत् । **तदुक्तम्**—'पश्वादिभिश्चाविशेषात्' इति । शेषमतिरोहितार्थम् । जीवतो विदुषोऽशरीरत्वे च श्रुतिस्मृती उदाहरति—**तथाचेति** । सुबोधम् । प्रकृतमुपसंहरति—**तस्मान्नावगतब्रह्मात्मभावस्येति** । **ननूक्तं** यदि जीवस्य ब्रह्मात्मत्वावगतिरेव सांसारिकधर्मनिवृत्तिहेतुः, हन्त

वेदान्तकल्पतरुः ।

—संशयो वेति । समानो धर्मोऽस्य स तथोक्तः । दृष्टेऽपि साधारणे धर्मिणि निश्चयः स्याद्यद्यन्यतरकोटिनि-र्णायकं प्रमाणं स्यात्, स्थाणुत्वइव शाखादिदर्शनं, बाधकं वा प्रमाणं कोट्यन्तरमुपलभ्येत, यथा तत्रैव पुरुषत्व-विपरीते निश्चेष्टत्वादि, नैवमिहेत्याह—**उपलब्धीति** । उपलब्धिः साधकं प्रमाणम्, अनुपलब्धिर्बाधकं तयोरभावोऽत्रा-व्यवस्था । ततः संशयो वा युक्त इत्यधस्तनेनान्वयः । **ननु** विशेषद्वयस्मृतौ संशयः, इह तु रजतमेव स्मृतमिति विपर्यय एवेति, तत्राह—**विशेषद्वयेति** । अत्र हेतुमाह—**संस्कारेति** । इतिशब्दो हेतौ । उद्बुद्धः संस्कारो हि स्मृतिहेतुः तदु-द्बोधहेतुश्च सादृश्यम्, तस्य द्विष्ठत्वेन शुक्तिरजतोभयनिष्ठत्वेन हेतुनोभयत्रैतत्सादृश्यं तुल्यमिति यतोऽतः संशय एव युक्तः । नच रागाद्विपर्ययः; विरक्तस्यापि शुक्तौ रजतभ्रमादिति । **एषात्र संशयसामग्र्यक्षपादेन वर्णिता— "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय" इति । समानधर्मः** साधारणधर्मः । अनेकस्माद्व्यावृत्तो साधारणोऽनेकधर्मः । एवमिह विपर्ययनियामकं दृष्टं नास्तीत्युपपाद्याकस्मा-च्छब्द एवमभिप्राय इत्याह—**अत इति** । कथं तर्हि दृश्यमानविपर्ययनियमः ? तत्राह—**अनेनेति** । दृष्टं हेतुं प्रतिषिध्य कार्यनियमं प्रतिजानता भाष्यकारेणादृष्टं कर्म हेतुत्वेनार्थादुक्तमिति । **ननु** तदपि समं किं न स्यात् ? तत्राह—**तच्चेति । श्रुतिस्मृतीरिति** । श्रुतिं स्मृतिं चेत्यर्थः । साक्षात्कारो हि दृष्टं फलं तादर्थ्यं मननादेर्वदन्भाष्यकारो विधिं न मृष्यत

कल्पतरुपरिमलः ।

भ्रान्तिवद्दोषजन्यत्वादिति दूषयतीत्यर्थः । समानधर्मधर्मिण इति विशेषणं व्याचष्टे—**समानो धर्मो यस्येति । नच रागादिति** । रागः संशयव्यावृत्तो भ्रान्त्येकपक्षपाती दोष इति भावः । **समानानेकधर्मेति** । अत्राव्यवस्थात इत्येत-दन्तेन सूत्रांशेन त्रिविधा संशयसामग्री वर्णिता । विशेषापेक्ष इत्यनेनान्यतरविशेषावधारणात्मकत्वमुक्तम् । तेन **विशेषा-पेक्षो विमर्श** (गौतमसू. अ. १ आ. १ सू. २३) इति सूत्रांशेनानवधारणज्ञानं संशय इति तल्लक्षणं दर्शितम् । **अनेक-स्माद्व्यावृत्त इति** । अनेकशब्दस्य धर्मपदेन समासे शाकपार्थिवादिवन्मध्यमपदलोपेनानेकस्मात् सजातीयविजाती-याद्व्यावृत्तोऽसाधारणो धर्म इत्यर्थेनैकधर्मलाभ इति भावः । **कार्यनियमं प्रतिजानानेनेति** पाठः साधुः; "संप्रतिभ्या-मनाध्याने" इत्युत्कण्ठापूर्वकस्मरणरूपाध्यानव्यतिरिक्तार्थे संप्रतिपूर्वाद् जानातेरात्मनेपदविधानात् । **प्रतिजानतेति** पाठस्तु कथंचिदाध्यानार्थविवक्षया समर्थनीयः । **तत्रेति । ननु**—अनुष्ठितस्य फलादर्शनं जन्मान्तरकृतकर्मणः फलज-नकत्वं च तद्विधिव्याप्तमिति शङ्कितुर्नाभिप्रायः, येन तद्व्याप्तिभञ्जनतः परिह्रियेत, किंत्वन्वयव्यतिरेकव्यभिचाराल्लोकतः कार-णत्वं ग्रहीतुं न शक्यम्; अतो विधिबोध्यकारणत्वमङ्गीकृत्य तन्निर्वाहार्थं फलप्रतिबन्धकदुरितनिवृत्त्यादिवैकल्यकल्प-नयान्वयव्यभिचारो जन्मान्तरकृतश्रवणादिकल्पनया व्यतिरेकव्यभिचारश्च परिहरणीय इत्यभिप्रायः । नच विध्यभावे केवलमुदाहृतदृष्टान्तद्वयेनायं व्यभिचारः परिहृतो भवति; श्रुतवैशेषिकादिशास्त्राणां केषांचिदवबोधानुत्पत्तौ हि मतिमान्द्या-लस्यानभ्यासादिरूपकारणवैकल्यं स्पष्टं दृष्टमस्ति, शब्दमात्रस्य शाब्दप्रमाजनकत्वं चान्यत्र सामान्यतः सिद्धमस्ति,

भाव इत्यनवद्यम् । यत्पुनरुक्तं श्रवणात्पराचीनयोर्मनननिदिध्यासनयोर्दर्शनाद्विधिशेषत्वं ब्रह्मणो न स्वरूपपर्यवसायित्वमिति । न; अवगत्यर्थत्वान्मनननिदिध्यासनयोः । यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत भवेत्तदा विधिशेषत्वम् । नतु तदस्ति; मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात् । तस्मान्न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवतीत्यतः स्वतन्त्रमेव

भामती ।

मननादिविधानानर्थक्यं, तस्मात्प्रतिपत्तिविधिपरा वेदान्ता इति, तदनुभाष्य दूषयति—**यत्पुनरुक्तं श्रवणात्पराचीनयोरिति** । मनननिदिध्यासनयोरपि न विधिः, तयोरन्वयव्यतिरेकसिद्धसाक्षात्कारफलयोर्विधिसरूपैर्वचनैरनुवादात् । **तदिदमुक्तम्—अवगत्यर्थत्वादिति** । ब्रह्मसाक्षात्कारोऽवगतिस्तदर्थत्वं मनननिदिध्यासनयोरन्वयव्यतिरेकसिद्धमित्यर्थः । अथ कस्मान्मननादिविधिरेव न भवतीत्यत आह—**यदि ह्यवगतमिति** । न तावन्मनननिदिध्यासने प्रधानकर्मणि अपूर्वविषये अमृतत्वफले इत्युक्तमधस्तात् । अतो गुणकर्मत्वमनयोरवघातप्रोक्षणादिवत्परिशिष्यते, तदप्ययुक्तं; अन्यत्रोपयुक्तोपयोक्ष्यमाणत्वाभावादात्मनः, विशेषतस्त्वौपनिषदस्य कर्मानुष्ठानविरोधादित्यर्थः । प्रकृतमुपसंहरति—**तस्मादिति** । एवं सिद्धरूपब्रह्मपरत्वमुपनिषदाम् । ब्रह्मणः शास्त्रार्थस्य धर्मादन्यत्वाद्भिन्नविषयत्वेन शास्त्रभेदात्

वेदान्तकल्पतरुः ।

इत्याह—**तदिदमिति । अत्रैके वदन्ति**—नदृष्टाश्रवणादेरवगत्युपायता; कृतश्रवणादीनामपि केषांचिदिह साक्षात्कारासमुन्मेषात्, तात्कालिकश्रवणादिविधुरवामदेवादेरप्यपरोक्षज्ञानसमुदयाच्च । जन्मान्तरकृतस्य च विधिमन्तरेण साधनभावानवकल्पनात्, श्रवणादिविध्यनभ्युपगमे च तद्विध्युररीकारप्रवृत्तप्रथमसूत्रतद्भाष्यकदर्थनादयुक्तस्तदनभ्युपगमः—**इति ॥ तत्र न** तावदनुष्ठितसाधनस्येह फलादर्शनं तद्विधिव्याप्तम्; अनवरतं वैशेषिकाद्यसच्छास्त्रश्राविणामप्यपटुमतीनां केषांचित्तच्छास्त्रार्थानवबोधदर्शनेऽपि तच्छ्रवणविध्यभावात् । नापि भवान्तरकृतकर्मण इह फलजनकता तद्विधिव्याप्ता; जातिस्मरस्य प्राचि भवे धनमुपार्ज्य भुवि निखन्य प्रमीतस्येह जन्मनि तदादाय भोगान्भुञ्जानस्यापि प्राग्भवीयधनोपार्जनायाः संप्रतितनफलार्थमविहिताया अपि हेतुभावोपलम्भात् । प्रथमसूत्रं तु शास्त्रीयविषयफलनिरूपकं न विधिविचारपरमिति । **किंच प्राधान्यं श्रवणादेर्न भवतामपि संमतम् । गुणकर्मत्वमत्रैव भाष्यकृद्भिर्निजुह्नुवे ॥ 'यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येतेत्यादिनेति' । इत्युक्तमधस्तादिति** । गान्धर्वशास्त्राभ्यासवदपूर्वानपेक्षया साक्षात्कारहेतुतोक्तेत्यर्थः । **गुणकर्म** ह्युपयोक्ष्यमाणशेषः; यथाऽवघातादि, उपयुक्तशेषो वा; यथा कृतप्रयोजनप्रयाजशेषाज्यस्य हविष्षु क्षारणं 'प्रयाजशेषेण हवींष्यभिघारयेदिति' विहितम् । तदिहात्मन उपयुक्तोपयोक्ष्यमाणत्वाभावान्न तद्विषयं मननादि गुणकर्मेत्याह—**तदपीति** । नच श्रवणादिसंस्कृतस्यात्मनः साक्षात्कारजन्मन्यस्तूपयोग इति श्रवणादिगुणकर्मत्वसिद्धिः;

कल्पतरुपरिमलः ।

अतस्तत्रान्वयव्यभिचारस्य प्राक्सिद्धकारणत्वाविरोधित्वेऽप्यत्र बहुशः कृतश्रवणमननानां सम्यक्सकलवेदान्तार्थनिर्णयवतां साक्षात्कारानुदयः किंचिद्दृष्टकारणवैकल्यप्रयुक्तत्वेनादृश्यमानः कथं प्रागसिद्धस्य साक्षात्कारे शब्दप्रमाणकारणत्वस्य ग्रहणे विरोधी न स्यात् ? जन्मान्तरोपार्जितनिधिखननेनोपभोगे च पूर्वानुभूतस्मरणं दृष्टं कारणं सिद्धमस्ति; अतस्तत्र व्यतिरेकव्यभिचारसमाधानसंभवेऽप्यत्र जन्मान्तरकृतश्रवणादेरन्यतः सिद्ध्यभावेन तत्कल्पकस्य विधेरप्यभावे जाग्रद्व्यतिरेकव्यभिचारश्च कथं कारणत्वग्रहविरोधी न स्यात् ? तस्माद्विधिव्यभिचारोद्भावनं कृतशङ्कापरिहारानुपयुक्तमयुक्तम् । **तथा प्राधान्यं श्रवणादेर्न भवतामपि संमत**मित्येतदप्ययुक्तम्; अर्थज्ञानफलकाध्ययनविधेरिव साक्षात्कारफलश्रवणविधेरपि प्रधानकर्मत्वस्यैव प्राप्तेरिति—**चेद्**, उभयतो व्यभिचारेण श्रवणस्य साक्षात्कारकारणत्वं लोकत इव बाधेन विधितोऽपि ग्रहीतुं न शक्यमिति प्रागेव शब्दापरोक्षनिराकरणेनोक्तप्रायम् । अतो विधिना कारणत्वं निश्चित्य व्यभिचारः परिहरणीय इति शङ्कितुरभिप्रायो न संभवतीत्यभिप्रेत्य यद्यनयोक्तिभङ्ग्या विधिव्याप्तिराशङ्किता तदेदमपि दूषणान्तरमिति विधिव्याप्तौ व्यभिचार उपन्यस्तः । अथ यदि श्रवणस्य प्रधानकर्मत्वेऽर्थबाधात् तत्परित्यज्य श्रवणादिनिर्णीतमात्मतत्त्वमैन्द्रियकस्वसाक्षात्कारोत्पादनसमर्थं भवति; 'लवणक्षारक्षोदिनि पात्रे गोमूत्रपूरिते क्षिप्तम् । मर्दितमपि शालितुषैर्यदविकृतं तत्तु मौक्तिकं जात्यम् ॥ घृष्टं सदात्मनः स्वच्छां छायां यन्निकषोपले । स्फुटं प्रदर्शयेदेतद्वैडूर्यं जात्यमुच्यते ॥' इत्यादिशास्त्रोक्तपरीक्षाप्रकारनिर्णीतमिव रत्नतत्त्वम् इत्युपयोक्ष्यमाणसंस्कारतया गुणकर्मत्वमिष्यते, तदा न चेत्यादिना दूषणमुक्तमिति न किंचिदनुपपन्नम् । **ननु** प्रयाजशेषवाक्यस्य 'प्रयाजशेषं हविष्षु क्षारये'दि त्यर्थकल्पनं न युक्तम्; क्षारणेन प्रतिपाद्यतया प्रयाजशेषस्य शेषितायाः क्षारणदेशतया हविषां शेषतायाश्च प्रसङ्गात्, नैतद्युक्तम्; तथासति हि चात्वाले कृष्णविषाणां प्रास्यतीतिवद् हविष्षु प्रयाजशेषे च सप्तमीद्वितीये स्याताम्, इह तु द्वितीयया हविषां संस्कार्यत्वेन प्राधान्यं, तृतीयया प्रयाजशेषस्य तत्संस्कारार्थद्रव्यत्वेन शेषत्वं च प्रतीयत इत्याशङ्क्य विशेषयति—**कृतप्रयोजनेति** । निर्वृत्तप्रयोजनस्य हि शेषः प्रतिपत्तिमपेक्षते, करि-

ब्रह्म शास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयादिति सिद्धम् । एवंच सति 'अथातो ब्रह्मजिज्ञासा' इति तद्विषयः पृथक्शास्त्रारम्भ उपपद्यते । प्रतिपत्तिविधिपरत्वे हि 'अथातो धर्मजिज्ञासा' इत्येवारब्धत्वान्न पृथक्शास्त्रमारभ्येत । आरभ्यमाणं चैवमारभ्येत— अथातः परिशिष्टधर्मजिज्ञासेति, 'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' (जै० ४।१।१) इतिवत् । ब्रह्मात्मैक्यावगतिस्त्वप्रतिज्ञातेति तदर्थो युक्तः शास्त्रारम्भः—'अथातो ब्रह्मजिज्ञासा' इति । तस्मादहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्वाणि चेतराणि प्रमाणानि । नह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्यप्रमातृकाणिच प्रमाणानि भवितुमर्हन्तीति । अपिचाहुः—'गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् । सद्ब्रह्मात्माहमित्येवं बोधे कार्यं कथं भवेत् ॥ अन्वेष्टव्यात्मविज्ञानात्प्राक्प्र-

भामती ।

'अथातोब्रह्मजिज्ञासा' इत्यस्य शास्त्रारम्भत्वमुपपद्यत इत्याह—**एवंच सतीति** । इतरथा तु धर्मजिज्ञास्यैवेति न शास्त्रान्तरमिति न शास्त्रारम्भत्वं स्यादित्यत आह—**प्रतिपत्तिविधिपरत्व इति** । न केवलं सिद्धरूपत्वाद्ब्रह्मात्मैक्यस्य धर्मादन्यत्वमपितु तद्विरोधाऽपीत्युपसंहारव्याजेनाह—**तस्मादहं ब्रह्मास्मीति** । इतिकरणेन ज्ञानं परामृशति । विधयो हि धर्मे प्रमाणम् । ते च साध्यसाधनेतिकर्तव्यताभेदाधिष्ठाना धर्मोत्पादिनश्च तदधिष्ठाना न ब्रह्मात्मैक्ये सति प्रभवन्ति, विरोधादित्यर्थः । **न** केवलं धर्मप्रमाणस्य शास्त्रस्येयं गतिः, अपितु सर्वेषां प्रमाणानामित्याह—**सर्वाणि चेतराणि प्रमाणानीति** । कुतः? **नहि** । अद्वैते हि विषयविषयिभावो नास्ति । नच कर्तृत्वं; कार्याभावात् । नच करणत्वं अतएव । **तदिदमुक्तम्—अप्रमातृकाणि च** । इति चकारेण । अत्रैव ब्रह्मविदां गाथामुदाहरति—**अपिचाहुरिति** । पुत्रदारादिष्वात्माभिमानो गौणः । यथा स्वदुःखेन दुःखी यथा स्वसुखेन सुखी तथा पुत्रादिगतेनापीति सोऽयं गुणः । नत्वेकत्वाभिमानः, भेदस्यानुभवसिद्धत्वात् । तस्माद्गौर्वाहीक इतिवद्गौणः । देहेन्द्रियादिषु त्वभेदानुभवान्न गौण आत्माभिमानः, किंतु शुक्तौ रजतज्ञानवन्मिथ्या । तदेवं द्विविधोऽयमात्माभिमानो लोकयात्रां वहति । तदसत्त्वे तु न लोकयात्रा नापि ब्रह्मात्मैकत्वानुभवः, तदुपायस्य श्रवणमननादेरभावात् । तदिदमाह—**पुत्रदेहादिबाधनात्** । गौणात्मनोऽसत्त्वे पुत्रकलत्रादिबाधनम् । ममकाराभाव इति यावत् । मिथ्यात्मनोऽसत्त्वे देहेन्द्रियादिबाधनं श्रवणादिबाधनं च । ततश्च न केवलं लोकयात्रामुच्छेदः सद्ब्रह्माहमित्येवंबोधशीलं यत्कार्यम् । अद्वैतसाक्षात्कार इति यावत् । तदपि **कथं भवेत्** । कुतस्तदसंभव इत्यत आह—**अन्वेष्टव्यात्मविज्ञानात्प्रा-**

वेदान्तकल्पतरुः ।

अपूर्वोपयोगिन एव गुणकर्मत्वाद्, दृष्टे तु साक्षात्कारेऽपूर्वाभावेन तदयोगादिति । **ननु** नाह्यक्रियाविधिः प्रथमकाण्डे गतो मानसज्ञानविधिविचाराय पृथगारंभ इति शङ्कापोहार्थ**मारभ्यमाणं चेति भाष्यम्** ॥ अहं ब्रह्मास्मीति वाक्यस्य तदर्थस्य चेतरप्रमाणावसानत्वमयुक्तं; नित्यनिवृत्तिप्रसङ्गादित्याशङ्क्य ज्ञानपर इतिशब्द इत्याह—**इतिकरणेनेति** । विधीनामद्वैतज्ञानविरोधं दर्शयति—**विधयो हीति** । त्र्यंशा भावना हि धर्मः । तद्विषया विधयः साध्यादिभेदाधिष्ठानास्तद्विषयाः । अपि चैतेऽनुष्ठेयं धर्ममुपदिशन्तस्तदुत्पादिनः पुरुषेण तमनुष्ठापयन्तीति साध्यधर्माधिष्ठानास्तत्प्रमाणानीति यावत्, अतो नित्यसिद्धाद्वैतब्रह्मावगमे तेषां विरोध इत्याह—**धर्मोत्पादिन इति । नहीति** । हेतुभाष्यस्य प्रतीकोपादानम् । नहीत्यादिनिर्विषयाणीत्यन्तं भाष्यं व्याख्याति—**अद्वैते हीति** । विषयनिषेधो वाक्यार्थभेदः साध्यसाधनादिपदार्थभेदस्तम्भावर्थभेदश्चाद्वैतावगतौ न भवतीति भाष्यार्थः । अप्रमातृकाणीत्येतद्व्याचष्टे—**नच कर्तृत्वमिति** । ज्ञानकर्तृत्वमित्यर्थः । निर्विषयाण्यप्रमातृकाणीति बहुव्रीही विशेषणपरौ । तथा सति हि विषयप्रमातृनिषेधयोर्हेतुत्वसिद्धिः । भाष्ये चकारः करणनिषेधार्थ इत्याह—**तदिदमिति** । भाष्यस्थप्रमाणशब्दो भावसाधनत्वेन ज्ञानवाची ततश्चकारेण करणनिषेधः । पुत्रादावहमित्यभिमानो गौणात्मा चेत्तर्हि मुख्यात्मना किं गुणसाम्यमत आह—**यथेति** । वाहीको नाम देशविशेषस्तन्निवासी तच्छब्दोक्तः । पुत्रादेरुपकारकत्वारोपाद आत्माभिमानस्तस्मिन्निवृत्ते ममत्वबाधनेत्याह —**गौणात्मन इति** । श्रवणादिप्रमाणबाधमुक्त्वा प्रमित्यभावमाह—**न केवलमिति** । बोधीतीनन्तपाठो व्याख्यातः । सप्तम्यन्तस्तु निगदव्याख्यातः ।

कल्पतरुपरिमलः ।

ष्यमाणाज्यभागार्थग्राह्यमाज्यं प्रयाजशेषाज्येनासंसर्गसिद्ध्यै तस्य क्वचित् क्षारणमपेक्षते । तस्मादपेक्षितप्रतिपत्त्यर्थत्वमेव युक्तं, नत्वनपेक्षितहविःसंस्कारार्थत्वम् । एवंच क्षारणस्य दृष्टार्थत्वमपहायाऽदृष्टार्थत्वस्वीकारश्च परिहृतो भवति । प्रयाजेषु विनियुक्तस्य पुनः क्षारणे विनियोग इति विनियुक्तविनियोगविरोधोपि परिहृतो भवति । तस्माद् द्वितीयातृतीययोः सप्तमीद्वितीयार्थतैव युक्तेति भावः ॥ **अपूर्वेति** । अदृष्टपर्यवसायिन एव गुणकर्मणो विध्यपेक्षणात् श्रवणादेस्तु दृष्टद्वारेणैव साक्षात्कारोपयोगित्वाद नादृष्टानुप्रवेशोऽस्तीति न तत्राप्राप्तार्थविषयविध्यपेक्षेत्यर्थः । **त्र्यंशा भावना हि धर्म इति** । कौमा-

मातृत्वमात्मनः । अन्विष्टः स्यात्प्रमातैव पाप्मदोषादिवर्जितः ॥ देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः । लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्' इति॥४॥ इति भाष्ये चतुःसूत्री समाप्ता ॥

भामती ।

कप्रमातृत्वमात्मनः । उपलक्षणं चैतत् । प्रमाप्रमेयप्रमाणविभाग इत्यपि द्रष्टव्यम् । **एतदुक्तं भवति**—एष हि विभागोऽद्वैतसाक्षात्कारकारणं, ततो नियमेन प्राग्भावात् । तेन तदभावे कार्यं नोत्पद्यत इति । नच प्रमातुरात्मनोऽन्वेष्टव्य आत्मान्य इत्याह—**अन्विष्टः स्यात्प्रमातैव पाप्मदोषादिवर्जितः** । उक्तं ग्रीवास्थग्रैवेयकनिदर्शनम् । **स्यादेतत्**—अप्रमाणात्कथं पारमार्थिकाद्वैतानुभवोत्पत्तिरित्यत आह—**देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः । लौकिकं तद्वदेवेदं प्रमाणं तु** । अस्यावधिमाह—**आऽऽत्मनिश्चयात्** । आ ब्रह्मस्वरूपसाक्षात्कारादित्यर्थः । **एतदुक्तं भवति**—पारमार्थिकप्रपञ्चवादिभिरपि देहादिष्वात्माभिमानो मिथ्येति वक्तव्यं; प्रमाणबाधितत्वात्, तस्य च समस्तप्रमाणकारणत्वं भाविकलोकयात्रावाहित्वं चाभ्युपेयम् । सेयमस्माकमप्यद्वैतसाक्षात्कारे विधा भविष्यति । नचायमद्वैतसाक्षात्कारोऽप्यन्तःकरणवृत्तिभेद एकान्ततः परमार्थः । यस्तु साक्षात्कारो भाविकः, नासौ कार्यः; तस्य ब्रह्मस्वरूपत्वात् । अविद्या तु यद्यविद्यामुच्छिन्द्याजनयेद्वा, न तत्र काचिदनुपपत्तिः । **तथाच श्रुतिः**—'विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥' इति । **तस्मात्सर्वमवदातम्** ॥ ४ ॥
इति भामत्यां चतुःसूत्री समाप्ता ॥

वेदान्तकल्पतरुः ।

नियतप्राक्सत्त्वं हि कारणत्वं, प्रमात्रादिश्च ज्ञानकरणं तस्मिन् सकृदुदिततत्वसाक्षात्कारान्निवृत्ते नोर्ध्वं ज्ञानानुवृत्तिरित्यर्थपरत्वेन प्रथमार्धं व्याख्याय प्रमातृलये फलिनोऽभावाद् मोक्षस्यापुमर्थतेति शङ्कां द्वितीयार्धव्याख्यया निरस्यति—**नच प्रमातुरिति** । अन्वेष्टव्यः परमात्माऽन्वेष्टुः प्रमातृत्वोपलक्षिताच्चिदेकरसान्न भिन्नस्ततोऽध्यस्तप्रमातृत्वबाधेऽप्युपलक्षित आत्मैव पापदोषादिरहितोऽन्विष्टो विदितः स्यादतो नोक्तदोष इत्यर्थः । **ननु** यद्यन्वेष्टुरात्मभूतं ब्रह्म, किमिति तर्हि संसारे न चकास्ति ? तत्राह—**उक्तमिति** । प्रमात्रादेस्तत्त्वज्ञानहेतुतां सिद्धवत्कृत्य ज्ञानात्तन्निवृत्तौ हेत्वभावात्फलाभाव उक्तः । स न बाध्यस्य प्रमात्रादेः प्रमानुत्पादकत्वापाताद् इति शङ्कोत्तरत्वेन तृतीयश्लोकं व्याख्याति—**स्यादेतदिति** । यदलीकं तन्न प्रमाहेतुरिति व्याप्तिं प्रशिथिलयति—**एतदुक्तमिति** । य उत्पद्यतेऽनुभवो न स पारमार्थिको यः पारमार्थिको न स उत्पद्यतेऽतश्चाप्रमाणात्कथं पारमार्थिकानुभवोत्पत्तिरित्ययमिष्टप्रसङ्ग इत्याह—**नचायमिति** । वृत्तावपि प्रतिबिम्बितचिदंशः सत्योऽस्ति, तत उक्तम्—**एकान्तत इति** । **ननु** वृत्तिरूपसाक्षात्कारोऽलीकत्वादविद्यात्मकः कथमविद्यामुच्छिन्द्यादविद्या वा कथं स्वविरोधिनं तं जनयेदत आह—**अविद्या त्विति** । अलीकस्यापि सत्यविषयत्वादविद्यानिवर्तकत्वोपपत्तिः । दृष्टं च स्वप्नोपलब्धव्याघ्रादीनां स्वोपादानाविद्यानिवर्तकत्वमिति भावः । अविद्यामयी वृत्तिर्यद्यविद्यामुच्छिन्द्यात्तामेव स्वनिवर्तिकामविद्यां जनयेद्वोभयथाप्युक्तमार्गेण न काचिदनुपपत्तिरित्यर्थः । विद्यां वृत्तिमविद्यां च कार्यकारणभावेन सहितें यो वेद सोऽविद्योपादानत्वेन तन्मय्या वृत्त्या तदुपादानं मृत्युमविद्यां तीर्त्वा स्वरूपभूतविद्योपलक्षितममृतमश्नुत इति श्रुतेरर्थः ॥

भाष्योदाहृतश्रुतयो व्याख्यायन्ते । उत्तरत्रापि तत्तदधिकरणसमाप्तौ श्रुतयो व्याख्यास्यन्ते । **सदेवेति** । सदित्यस्तितामात्रमुक्तम् । एवशब्दोऽवधारणार्थः । किं तदवध्रियत इत्यत आह—**इदमिति** । यदिदं व्याकृतं जगदुपलभ्यते तत्, अग्रे प्रागुत्पत्तेः विकृतरूपपरित्यागेन **सदेवासीत्, हे सौम्य** प्रियदर्शनेति श्वेतकेतुः पित्रा संबोध्यते । मा भूत्स्थूलं पृथिवीगोलकादीदम्बुद्धिग्राह्यं प्रागुत्पत्तेः, अन्यत्तु महदादिकं किमासीन्नेत्याह—**एकमेवेति** । स्वकार्यपतितमन्यन्नासी-

कल्पतरुपरिमलः ।

रित्यमतानुसारेण साध्यसाधनेतिकर्तव्यताभेदो मतान्तरेष्वप्यविशिष्टः । **स्वप्नोपलब्धेति** । स्वप्नेषु पर्यापतन्तो दृष्टा व्याघ्रादय आकुलतामुत्पाद्य स्वप्रदृशमुत्थापयन्तो भवन्ति स्वोपादानाविद्यानिवर्तकाः । **इह** श्रुतिव्याख्यानेष्व**स्नाविरं** सिरारहितमिति व्याख्यातं, तत् स्नावाः सिरा अस्य सन्तीति स्नाविरं न स्नाविरम् अस्नाविरम् इतीशावास्योपनिषद्विवरणानुसारेण । प्राकु स्नाविरमविगलितमिति टीकानुसारेणान्यथा व्याख्यातम् । एवमन्यत्रापि मतभेदेनाविरोधो द्रष्टव्यः ॥ टीकायां विद्याऽविद्ययोः कार्यकारणभावं निवर्त्यनिवर्तकभावं चोपपाद्य तदर्थविषयत्वेन विद्यां चाविद्यां चेति मन्त्रस्योदाहृतत्वात् तदनुसारेण मन्त्रं योजयति—**अविद्यामिति** ।

अत्रेदं सकलमूलपूर्वापरग्रन्थगतजीवविषयप्रतिबिम्बावच्छेदव्यवहारद्वयतात्पर्यावधारणाय चिन्तनीयम्—अनयोः पक्षयोराचार्याणां कतरः पक्षः सिद्धान्त इति ?। द्वितीय एव; आद्यस्याचार्यैर्दूषितत्वादिति चेत्, न;

वेदान्तकल्पतरुः ।

दित्यर्थः । मृदो घटाकारेण परिणमयितृकुम्भकारवत् किं सतोऽन्यन्निमित्तकारणमासीद् नेत्याह—**अद्वितीयमिति** ॥ आप्नोतीत्या**त्मा** परमकारणं, **वै इति** जगतः प्रागवस्थां स्मारयति । इदमित्यादिपदव्याख्या पूर्ववत् । **तदिति** प्रकृत आत्मा परामृश्यते, य इन्द्रो मायाभिः पुरुरूप ईयत इत्युक्तः । नपुंसकप्रयोगस्तु विधेयब्रह्मापेक्षः । तदेतदेव यद्ब्रह्म तद्वा किंलक्षणमित्यत आह—**अपूर्वमिति** । नास्य पूर्वं कारणं विद्यत **इत्यपूर्वम्**, अकार्यमित्यर्थः । तथा नास्यापरं कार्यं वास्तवं विद्यत **इत्यनपरम्**, अकारणमिति यावत् । नास्यान्तरं जात्यन्तरम् अन्तराले विद्यत **इत्यनन्तरम्**, दाडिमादिवत्स्वगतरसान्तरविधुरमित्यर्थः । एवंविधमन्यादपि कूटस्थमेतदनात्मकतया बाह्यमस्य न विद्यत **इत्यबाह्यमिति** । यत्पुरस्ताद् दृश्यमविद्यादृष्टीनामब्रह्मेव प्रतिभासते, तत्सर्वमिदममृतं ब्रह्मैव वस्तुत इत्यर्थः । तथा पश्चाद्दक्षिणतः इत्यादिमन्त्रशेषेण सर्वात्मत्वमवगन्तव्यम् ॥ संपतत्यस्मादमुं लोकं फलभोगायेति **संपातः** कर्म, तद्यावत्तावदुषित्वा आवर्तत इति । **इष्टं** श्रौतम् । **पूर्तं** स्मार्तम् । **दत्तं** दानम् ॥ परमार्थतः शरीरसंबन्धरहितं **वाव एव सन्तं** भवन्तम् । तमात्मानं वैषयिके प्रियाप्रिये न स्पृशतः ॥ एवं परमार्थतोऽशरीरं शरीरेष्व**नवस्थेष्व**नित्येष्व**वस्थितं** नित्यं, **महान्तम्** । महत्त्वमापेक्षिकमित्याशङ्क्याह—**विभुम्** ॥ मन्तृमन्तव्यभेदनिषेधार्थमाह—**आत्मानमिति** । ईदृशमात्मानं **मत्वा धीरो** धीमान्न शोचति ॥ प्राणः क्रियाशक्तिः परमार्थतो न विद्यते यस्य **सोऽप्राणः** । तथा ज्ञानशक्तिमन्मनो यस्य नास्ति **सोऽमनाः** । क्रियाशक्तिमत्प्राणनिषेधेन तत्प्रधानानि कर्मेन्द्रियाणि, ज्ञानशक्तिमन्मनोनिषेधेन तत्प्रधानानि ज्ञानेन्द्रियाणि च सविषयाणि निषिद्धानि । यस्मादेवं तस्माच्छुभ्रः शुद्ध इति । स्वप्नाद्यवस्थाकृतकर्मस्वकर्तात्मेत्युक्तं स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवतीति पूर्ववाक्ये । तत्र हेतुरुच्यते—**असङ्गो हीति** । मूर्तं हि मूर्तान्तरेण संसृज्यमानं सृज्यते । आत्मा स्वयं पुरुषो न मूर्तः । अतो न केनचित्सृज्यत इत्यसङ्गः । अतो न **कर्तेति** ॥ **धर्मादधर्मात्तत्फ**लसुखदुःखाच्च **कृतात्** कार्यप्रपञ्चाद् **अकृतात्**कारणाद् **अन्यत्र** पृथक् भूतं **भूताद्दे:** कालाद**न्यत्र** तेनानवच्छेद्यं, चेत्पश्यसि तद्वदेति मृत्युं प्रति नचिकेतसः प्रश्नः ॥ **अस्य** विदुषोऽप्रवृत्तफलानि **कर्माणि, तस्मिन्** परावरे ब्रह्मणि आत्मत्वेन दृष्टे **क्षीयन्ते** । **परं** कारणम् । **अवरं** कार्यम् । **तद्रूपे** तदधिष्ठाने ॥ ब्रह्मणः स्वभावमानन्दं विद्वान् । यदस्मिन्देहे जलसूर्यवत् प्रविष्टं ब्रह्म जीवाभिधं तदाचार्येण बोध्यमानमात्मानमेव विधूतकल्पनमवेद् विदितवत् । किं साङ्ख्यमत इव द्वैतमध्ये ? न, अपि-

कल्पतरुपरिमलः ।

अध्यासपूर्वपक्षे हि तद्दूषणं कृतम् । सिद्धान्ते तस्यासमाहितत्वात् सिद्धान्ताभिमतमेव तद् दूषणमिति चेद्, न; असारं तद्दूषणमित्यनादरेणापि तदनुद्धारोपपत्तेः । **तथाहि**—रूपवत एव प्रतिबिम्ब इति नास्ति नियमः; रूपसंख्यापरिमाणसंयोगविभागपरत्वापरत्वचलनसुखत्वादिजातीनां प्रतिबिम्बदर्शनात् । द्रव्यस्य सत इति विशेष्यत इति चेद्, न; पृथिव्यादिनवकानुगतस्य द्रव्यत्वस्यासिद्धेः, द्रव्यं द्रव्यमिति तत्र तत्र लौकिकानामनुगतप्रत्ययाभावात्, तार्किकपरिभाषाया निष्प्रमाणकत्वात् । गुणाश्रयस्य सत इति विशेष्यत इति चेद्, न; संख्याया एव संख्यारूपगुणाश्रयभूताया नीरूपायाः प्रतिबिम्बदर्शनात् । अस्ति हि संख्यायामपि संख्या; एकत्वं प्रथमसंख्या द्वित्वं द्वितीयसंख्या बहुत्वेषु त्रित्वं प्रथमसंख्या चतुष्ट्वं द्वितीयसंख्येत्यादिव्यवहारात् । अतएव वसन्ताय कपिञ्जलानालभेतेत्यत्र त्रित्वमेव बहुवचनार्थो, नतु चतुष्ट्वादिकं, प्रथमातिक्रमे कारणाभावादिति न्यायविदः । अतएव च द्वावेकत्वसंख्यारूपावयवावस्या द्वित्वसंख्याया इत्याद्यर्थे ब्राह्मणद्वितयं ब्राह्मणद्वयमित्यादिशब्दनिष्पत्त्यर्थं "संख्याया अवयवे तयप्"इत्यादिसूत्रैस्तयप्प्रत्ययादयो विहिताः । अतएव च 'रक्षसां निहतान्यासन् सहस्राणि चतुर्दश'इत्याद्यभियुक्तव्यवहाराः । **ननु**—संख्यासु वस्तुतो नास्ति संख्यान्तरं, किंतु द्वित्वसंख्या द्वितीयेत्यादिसजातीयसंख्याव्यवहाराः सत्ता सतीति व्यवहारवदभेदेऽपि धर्मधर्मिभावकल्पनया, सहस्राणि चतुर्दशेत्यादिविजातीयसंख्याव्यवहाराः सहस्रादिसंख्याश्रयगतचतुर्दशसंख्यादिसामानाधिकरण्येन तत्कल्पनया, अतो न संख्याया मुख्यं गुणाश्रयत्वमिति—**चेत्, उच्यते**—तुल्यमेतदात्मनोपि । आनन्दादिधर्मास्तदभिन्ना इति । तस्यापि हि न मुख्यं गुणाश्रयत्वं; तस्माद्रूपवत एव प्रतिबिम्ब इति नियममवलम्ब्यात्मप्रतिबिम्बनिराकरणं तावदयुक्तम् ॥ तथा रूपवत्येव प्रतिबिम्ब इति नियममवलम्ब्यापि निराकरणमयुक्तम् । किं प्रतिबिम्बोपाधेर्वस्तुतो रूपवत्त्वं प्रतिबिम्बने प्रयोजकमिष्यते, उत रूपवत्त्वेन ग्रहणम् । **आद्ये** नात्मनोऽन्तःकरणे प्रतिबिम्बनानुपपत्तिः; अन्तःकरणस्य त्रिवृत्करणेन पञ्चीकरणेन वा रूपवत्त्वात् । **न द्वितीयः**; निजरूपवत्त्वेनागृह्यमाणेऽपि स्फटिके सन्निहितजपाकुसुमप्रतिबिम्बनेन अरुणः स्फटिक इति व्यवहारदर्शनात् । तस्माद् निरवद्यः प्रतिबिम्बपक्षः । प्रतिबिम्बपक्षे एव च जीवतदन्तर्यामिभावेनान्तःकरणे द्विगुणीकृत्य वृत्तिरुपपद्यते । **ननु**—प्रतिबिम्बपक्षे केन दृष्टान्तेन द्विगुणीकृत्य वृत्त्युपपत्तिः? अम्भस्याकाशस्य प्रतिबिम्बो नाभ्युपगतः, आलोकस्य तु प्रतिबिम्ब एव नावच्छेदोऽपि । **नच**—जलान्तर्गतसिकतादिप्र-

वेदान्तकल्पतरुः ।

तु अहं ब्रह्माद्वितीयमस्मीति । **तस्मादेव** विज्ञानादविद्याकृतासर्वत्वनिवृत्त्या **तद् ब्रह्म सर्वमभवत्** ॥ यस्मिन् **सर्वाणि भूतानि आत्मैवाभूद्विजानत इति । यः** सर्वात्मभावो विद्याभिव्यक्त उक्तः, तत्रात्मनि तत्र चाज्ञानकाले आत्मैकत्वं पश्यतः को मोहः । तत्पदलक्ष्यं ब्रह्म एतदात्मभावेनावस्थितमहमस्मीति पश्यन्नेतस्मादेव दर्शनादृषिः वामदेवाख्यः परं ब्रह्म अविद्यानिवृत्तिद्वारा प्रतिपन्नवान् किलेति । हशब्दो व्यवधानेन संबन्धनीयः । स एतस्मिन्दर्शने स्थितः सर्वात्मभावप्रकाशकानहं मनुरित्यादीन्मन्त्रांश्च ददर्श ॥ भारद्वाजादयः षडृषयः परं विद्याप्रदं पिप्पलादं गुरुं विद्यानिष्क्रयार्थमनुरूपमन्यदपश्यन्तः पादयोः प्रणम्य प्रोचुः । त्वं ह्यस्माकं पिता ब्रह्मशरीरस्याजरामरस्य विद्याया जनयितृत्वाद्, इतरौ तु शरीरमेव जनयतः । जनयितृत्वमपि सिद्धस्यैवाविद्यानिवृत्तिमुखेनेत्याह—**यस्त्वं नः** अस्मानविद्यामहोदधेः **परम**पुनरावृत्तिलक्षणं **पारं तारयसि** विद्याबलेनेति प्रश्नोपनिषत् ॥ **श्रुतं ह्येव मे इत्यादिच्छन्दोगश्रुतिः** सनत्कुमारनारदसंवादरूपा । तत्रापि तारयत्वित्यन्तमुपक्रमस्थं वाक्यं शेषमाख्यायिकोपसंहारस्थं वाक्यान्तरम् । **मम भगवद्दृशेभ्यो** भगवत्सदृशेभ्यः । **इदं** श्रुतम् । यत्तरति शोकं मनस्तापमकृतार्थबुद्धिमात्मविदिति । सोऽहमनात्मवित्त्वाच्छोचामि अतस्त्वं **मां शोकसागरस्य परमन्तं भगवांस्तारयतु** आत्मज्ञानोडुपेनेति । वल्कलादिवच्चित्तरञ्जको रागादिकषायो मृदितः क्षालितो विनाशितो यस्य ज्ञानवैराग्याभ्यासक्षारजलेन **तस्मै नारदाय तमसो**ऽविद्यालक्षणस्य **पारं** परमार्थतत्त्वं दर्शितवान् ॥ संवर्गविद्यायां श्रूयते । **वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति** उपशाम्यति **वायुमेवाप्येति** प्रलीयते **यदा सूर्योऽस्तमेति वायुमेवाप्येति । यदा चन्द्रोऽस्तमेति वायुमेवाप्येति । यदाऽऽप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतान्सर्वान्संवृङ्क्ते इत्यधिदैवतम् । अथाध्यात्मम्—प्राणोवाव संवर्गो यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मन इति ।** तद् ब्रह्मविदि

कल्पतरुपरिमलः ।

हणार्थं तदन्तरालोकप्रवेशस्य अवश्यंभावात् तेन तस्या अवच्छेदोऽप्यङ्गीकरणीय इति—वाच्यम्; आलोकप्रतिबिम्बेनैव सिकतादिप्रकाशोपपत्तेः । नच—समारोपितस्य प्रतिबिम्बालोकस्य सिकतादिभिः संयोगो नास्तीति—वाच्यम्; सद्योऽपवरकप्रविष्टस्य समारोपितेन तमसा तत्रत्यघटादिप्रकाशप्रतिबन्धवत्समारोपितेनालोकेन सिकतादिप्रकाशजननोपपत्तेरिति—**चेत्, मैवम्;** जलेनाकाशस्यावच्छेद एव तत्रालोकस्य प्रतिबिम्ब एवेति कल्पने दृष्टान्तसंप्रतिपत्त्यभावेपि प्रतिबिम्बाश्रयान्तःकरणेन सर्वगतस्यात्मनोऽवच्छेदस्याप्यवश्यंभावेन स्वत एव द्विगुणीकृत्य वृत्तिसिद्धेः ॥ प्रतिबिम्बपक्ष एव च सूत्रकारादिसंमतः । अंशो नानाव्यपदेशादित्यधिकरणे (ब्र. अ. २ पा. ३ सू. ४२) ह्यैकात्म्यवादे कर्मतत्फलव्यतिकरशङ्कापरिहारार्थं प्रवृत्तेन **आभास एवच** (ब्र. अ. २ पा. ३ सू. ५०) इति सूत्रेण जीवस्य ब्रह्मप्रतिबिम्बत्वमुक्तं । **तथैव च भाष्यकारैर्व्याख्यातम्**—आभास एवैष जीवः परस्यात्मनो जलसूर्यकादिवत्प्रतिपत्तव्यः, न सएव साक्षाद्, नापि वस्त्वन्तरम् । अतश्च यथा नैकस्मिन् जलसूर्यके कम्पमाने जलसूर्यकान्तरं कम्पते, एवं नैकस्मिञ्जीवे कर्मफलसंबन्धिनि जीवान्तरस्य तत्संबन्धः; एवमव्यतिकर एव कर्मफलयोः—इति" । टीकाकारैरपि तस्मिन्नधिकरणे जीवब्रह्माभेदे सकलजीवगतदुःखभाक्त्वं ब्रह्मणः स्यादिति शङ्कापरिहार एतत्सूत्रसिद्धं प्रतिबिम्बत्वमाश्रित्यैव समर्थितः । नच मोक्षस्यानर्थबहुलता यतः प्रतिबिम्बानामेव श्यामतावदातते, न बिम्बस्य, एवं जीवानामेव नानावेदनाभिः संबन्धः, ब्रह्मणस्तु बिम्बस्येव न तदभिसंबन्ध" इति । आचार्यैरप्येतदभिप्रायः स्पष्टीकृतः 'बिम्बप्रतिबिम्बयोरवदातत्वश्यामत्वादिव्यवस्थानान्न धर्मसांकर्यमित्यर्थ' इति । तस्मात्प्रतिबिम्बपक्ष एवाचार्याणामभिमतः । अतएवानिर्वाच्याविद्याद्वितयसचिवस्येति प्रथमश्लोकगतचराचरपदव्याख्यानसमये एव जीवस्य प्रतिबिम्बत्वमुक्तं 'जीवानामपि चराचरोपाधिकानां तत्प्रतिबिम्बत्वेन तद्विवर्तत्वाहे' ति । अवच्छेदपक्षस्तु भाष्यटीकागतघटाकाशादिदृष्टान्तस्वरसप्राप्तो न दूषितः परं, नतु स्वतन्त्रेषु स्ववाक्येषु जीवोऽवच्छेद इति क्वचिदप्युक्तम् । तस्मात् प्रतिबिम्बपक्ष एवाचार्याणां सिद्धान्त इति । एवं प्रतिबिम्बपक्षः श्रेयानिति मन्यमानानां मतानुसारेणाचार्याणां तात्पर्यं योजितम् ॥ **अथा**वच्छेदपक्षमभ्युपगच्छतां मतमनुसृत्योच्यते । प्रतिबिम्बपक्षो भाष्यकारैरेव न स्थानतोपि (ब्र. अ. ३ पा. २ सू. ११) इत्यधिकरणे निराकृतः । तत्र **ह्यतएव चोपमा सूर्यकादिव** (ब्र. अ. ३ पा. २ सू. १८)दिति सूत्रेण सूर्यादिप्रतिबिम्बदृष्टान्ते श्रुत्युदाहृते दर्शिते सूर्यादिवदात्मनः प्रतिबिम्बो न युज्यत इति तदाक्षेपकत्वे**नाम्बुदवदग्रहणात्तु न तथात्वम्** (ब्र. अ. ३ पा. २ सू. १९) इति सूत्रं व्याख्यातम् । "यथाम्बु सूर्यादिभ्यो मूर्तेभ्यो विप्रकृष्टदेशं गृह्यते न तथात्मनो विप्रकृष्टदेशं प्रतिबिम्बनयोग्यं वस्तु गृह्यते । अतो न क्वाप्यात्मनः सर्वगतस्य प्रतिबिम्बो युक्त" इति । ततो **वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्** (ब्र. अ. ३ पा. २ सू. २०)इति सूत्रमुक्तानुपपत्त्या सूर्यादिवदात्मनः प्रतिबिम्बनमनुपपन्नमित्यङ्गीकृत्यैव श्रुतिषु सूर्यादिप्रतिबिम्बोपादानस्य तात्पर्यान्तरवर्णनपरतया व्याख्यातम् । "यथा सूर्या-

वेदान्तकल्पतरुः ।

तत्कार्यादन्यदेव । अथो अपि अविदितात्कारणात् अधि उपरि अन्यदित्यर्थः । येन प्रमात्रा इदं सर्वं वस्तु विजानाति लोकः, तं **केन** करणेन विजानीयात् ? करणस्य ज्ञेयविषयत्वात्प्रमातरि वृत्त्यनुपपत्तेः । तस्मात्प्रमातापि न ज्ञेयः किमु तत्साक्षीत्यर्थः । **यद्वाचा** शब्देन**ानभ्युदितम्** अप्रकाशितम् । **येन** ब्रह्मणा **सा** वाग**भ्युद्यते** प्रकाश्यते इत्यविषयत्वम् उपन्यस्याह—तदेवात्मभूतम् प्रमातृत्वादिकल्पना अपोह्येत्येवकारार्थः । **ब्रह्म** महत्तममिति **त्वं** विद्धि, हे शिष्य यदुपाधिविशिष्टं देवतादीदमित्युपासते जनाः इदं त्वं ब्रह्म न विद्धीति तस्य ब्रह्मामतमविषय इति निश्चयः, तस्य **तद्** ब्रह्म **मतं** सम्यग् ज्ञातं **यस्य पुनर्म**तं विषयतया मतं ब्रह्मेति मतिर्न, स वेद ब्रह्मभेदबुद्धित्वात् । एतौ विद्वदविद्वत्पक्षावनुवदत्येवमेवेति नियमार्थम् । **अविज्ञातमिति** । विषयत्वेनाविज्ञातमेव ब्रह्म सम्यग्विजानतां विज्ञातमेव विषयतया भवति । यथावदविजानतां दृष्टेश्चक्षुर्जन्यायाः कर्मभूताया द्रष्टारं स्वभावभूतया नित्यदृष्ट्या व्याप्तारं दृश्ययाऽनया न पश्येः । **विज्ञाते**र्बुद्धिधर्मस्य निश्चयस्य विज्ञातारमिति पूर्ववत् । **तयो**र्जीवपरयोर्मध्ये **एको** जीवः **पिप्पलं** कर्मफलम् **अन्यः** परमात्मा**ऽभिचाकशीति** पश्यत्येव नात्ति । **आत्मीयं** शरीरम् आत्मा शरीरादिसंयुक्तमात्मानमित्यर्थः । **एको देवो गूढः ।** छन्नः । सर्वव्यापित्वं न गगनवत्, किंतु **सर्वभूतान्तरात्मा, कर्माध्यक्षः** कर्मफलप्रदाता, सर्वभूतानामधिवासोऽधिष्ठानम् । साक्षित्वे हेतु**श्चेतेति** । चैतन्यस्वभाव इत्यर्थः । **केवलो** दृश्यवर्जितः, **निर्गुणो** ज्ञानादिगुणवान् न भवति । ॥ **स** आत्मा, **परितः** समन्तात् **अगा**त्सर्वगतः । **शुक्रमित्या**दयः शब्दाः पुँल्लिङ्गत्वेन परिणेयाः; स इत्युपक्रमात् । **अकायो** लिङ्गशरीरवर्जितः । **अव्रणो**ऽक्षतः । **अस्नाविरः** शिरारहितः । अव्रणास्नाविरत्वाभ्यां स्थूलदेहराहित्यमुक्तम् । **शुक्र इति ।** बाह्याशुद्धिविरहउक्तः । **शुद्ध** इत्यान्तररागाद्यभावः । **अपापविद्धो** धर्माऽधर्मरहितः ।

कल्पतरुपरिमलः ।

दिप्रतिबिम्बस्य जलाद्युपाधिगतवृद्धिह्रासाद्यधीनवृद्धिह्रासादिभाक्त्वमेवमात्मनोऽप्यन्तःकरणादिगतवृद्धिह्रासाद्यधीनवृद्धिह्रासादिभाक्त्वमित्येतावता जलसूर्यादिदृष्टान्तीकरणं, नतु प्रतिबिम्बनेन; दृष्टान्तदार्ष्टान्तिकयोः सर्वथा साम्यस्यानपेक्षितत्वादिति" । **बृहदारण्यकभाष्येऽपि**—"स एष इह प्रविष्ट आ नखाग्रेभ्य" इति वाक्यव्याख्यानावसरे सर्वगतस्यात्मनः **कः** प्रवेशो नामेति विमृश्य प्रतिबिम्बप्रवेश इति पक्षमम्बुवदग्रहणात्त्विति सूत्रोक्तेन विप्रकृष्टदेशोपाध्यभावेनैव दूषयित्वा देहादावात्मन उपलभ्यमानत्वं प्रवेशः । नहि पाषाणादाविव देहादावात्मनोऽनुपलब्धिरस्तीति प्रवेशपदार्थस्यान्यथोपपादनेन प्रतिबिम्बपक्षदूषणं स्थिरीकृतम् । नहि लोकेपि जलाद्विप्रकृष्टदेशस्यैव चैत्रादेस्तदन्तर्निमग्नत्वेन विप्रकृष्टदेशस्यापि जले प्रतिबिम्बो दृश्यते । नच सावयवस्य चैत्रस्य जलान्तर्निमग्नाधरकायस्य ऊर्ध्वकायप्रतिबिम्बवदन्तःकरणादिगस्यात्मनस्तदभिमुखप्रदेशान्तरप्रतिबिम्ब उपपादयितुंशक्यः; निरवयवत्वशब्दकोपापत्तेः । तस्माद्बहुषु जलपात्रेषु चन्द्रस्य यावत एकत्र प्रतिबिम्बस्तावतोऽप्यन्येष्विव कृत्स्नस्यैवात्मन एकत्रान्तःकरणे प्रतिबिम्बितस्यान्येष्वपि प्रतिबिम्बो वक्तव्यः । **ननु** बहूनां दर्पणानां पुरतस्तिर्यक्प्रसारितस्य वंशदण्डस्य दर्पणेषु भिन्नभिन्नप्रदेशानामिवान्तःकारणेष्वात्मनस्तत्तदन्तःकरणाभिमुखभिन्नभिन्नप्रदेशानां प्रतिबिम्बो वाच्यः । सावयवत्वे हि तथा वक्तुं शक्यम् । नच निदाघार्तस्य जाह्नवीजलनिमग्नसर्वकायस्य सर्वाङ्गीणसुखोत्पत्त्यर्थमा केशादा नखाग्रादन्तःकरणव्याप्तौ सत्यां व्यवधानरहितस्तदभिमुखात्मप्रदेशो लभ्यते यस्य तत्र प्रतिबिम्बो वर्ण्येत । एवमविप्रकृष्टदेशरूपं दूषणं भाष्ये व्यक्तमिति दूषणान्तरमाचार्यैः पूर्वपक्षिमुखेनोद्घाटितम् । रूपवत एव रूपवत्येव प्रतिबिम्ब इत्यस्य चाक्षुषस्यैव चाक्षुषएव प्रतिबिम्ब इत्यर्थः । नह्यस्य नियमस्य क्वचिद्भङ्गोऽस्ति; मुखादिप्रतिबिम्बे तदीयचाक्षुषसर्वगुणानुभवात्, कस्तूरिकादिप्रतिबिम्बे तदाघ्राणेऽपि सौरभाननुभवाच्च । गुहादिषु प्रतिध्वनिर्ध्वनेः प्रतिबिम्ब इति **केचित् । तन्न;** स एव हि गगनगुणः शब्दः; दुन्दुभिसमुद्रदावानलझञ्झामारुतादिध्वनीनां पृथिव्यादिशब्दत्वात् । एवंच यद्यप्याभास (ब्र. अ. २ पा. ३ सू. ५०) इति सूत्रेण प्रतिबिम्बपक्ष उक्त इति प्रतिभाति; तथापि एकत्र जीवस्य प्रतिबिम्बत्वाभ्युपगमोऽन्यत्र तद्दूषणंच परमाप्तस्य सूत्रकारस्य न संभवतीति किंचिदनुसारेण कस्मिंश्चिन्नेतव्ये प्रतिबिम्बदूषणस्याविप्रकृष्टदेशत्वादियुक्तिपूर्वकं कृतत्वाद् **आभास एव चेति** सूत्रे भाष्यकारैरपि श्रुत्योपपत्त्या वा प्रतिबिम्बत्वस्य समर्थितत्वात्तदेव सूत्रं वृद्धिह्रासभाक्त्व(ब्र. अ. ३ पा. २ सू. २०) मिति सूत्रोक्तन्यायात्प्रतिबिम्बसादृश्यप्रतिपादनपरं योज्यं; तावताप्यव्यतिकरसिद्धेः । तदधिकरणटीकायां बिम्बप्रतिबिम्बयोर्ब्रह्मजीवदृष्टान्तत्वेनोपादानाच्च । वस्तुतस्त्वाभास एव चेति सूत्रं प्रतिबिम्बत्वरूपस्य प्रतिबिम्बसादृश्यरूपस्य वाभासत्वस्य प्रतिपादनपरमेव न भवति; षड्विंशतिरित्येव ब्रूयादितिवदेवकारोपहतविधिशक्तिकत्वेन यथाप्राप्तानुवादत्वात् ॥ **तथा हि**—प्रकृतावग्नीषोमीयपशावध्रिगुप्रैषे "षड्विंशतिरस्य वङ्क्रय" इति श्रुतम् । अस्य च्छागस्य पशोरेकैकस्मिन्पार्श्वे त्रयोदश त्रयोदशास्थीनीति षड्विंशतिर्वङ्क्रिशब्दोक्तानि पार्श्वास्थीनीत्यर्थः । अश्वमेधे

वेदान्तकल्पतरुः।

भाष्येऽनाधेयातिशयत्वनित्यशुद्धत्वयोः पूर्वसिद्धवदुक्तहेत्वोः सिद्धिमेतौ मन्त्रौ दर्शयत इति बोद्धव्यम्। **आत्मानं** साक्षिण**मयं** परमात्माऽस्मीत्यपरोक्षतया **जानीया**च्चेत्, कश्चित्पुरुषः चेच्छब्दः आत्मसाक्षात्कारस्य दुर्लभत्वप्रदर्शनार्थः। स स्वव्यतिरिक्तमात्मनः **किं फलमिच्छुः कस्य वा** पुत्रादेः **कामाय** प्रयोजनाय, तदलाभनिमित्ततया **शरीरं** संतप्यमान**मनु** तदुपाधिः सन् **संज्वरेत्** संतप्येत। निरुपाध्यात्मदर्शिनो नान्यदस्ति प्रयोजनं नाप्यन्यः पुत्रादिरित्याक्षेपः। य आत्मा चतुर्थेऽथात आदेशो नेति नेतीति वाक्येन विश्वद्वयनिषेधेन व्याख्यातः स एष पञ्चमेऽध्याये निरूप्यत इत्यर्थः। यथेन्द्रियादिभ्यः परं परमासीन्नैवं पुरुषादस्ति किंचित्परं सा पुरुषलक्षणा काष्ठावधिः सूक्ष्मत्वमहत्वादेः सैव गतिः परः पुरुषार्थः। **यस्योदा**हृतसविशेषब्रह्मणो **पृथिव्येव**। यस्यायतनमित्युपक्रम्योपन्यस्तानामधिष्ठानं त्वौपनिषदमुपनिषद्भिरेव विज्ञेयम्। विशेषणस्य व्यावर्तकत्वादयमर्थो लभ्यते। पुरुषं त्वा त्वां पृच्छामि हे शाकल्येति याज्ञवल्क्यस्य प्रश्नः। 'अत्र ब्रह्म समश्नुत' इति पूर्ववाक्ये जीवन्मुक्तिरुक्ता। तत्र देहे वर्तमानोऽपि पूर्ववन्न संसारीत्यत्र दृष्टान्तः। तत्तत्र **यथाऽहिनिर्ल्वयिनी** अहित्वग् वल्मीकादौ **प्रत्यस्ता** प्रक्षिप्ता **मृता** प्राग्वदहिनात्मत्वेनानभिमता **शयीत** वर्तेत एवमेवेदं विद्वच्छरीरं मुक्तेन पूर्ववदात्मत्वेनानभिमतं शेते। अथायं सूर्यस्थानीयो जीवन्मुक्तः शरीरे वर्तमानोऽप्यशरीरः। अहिरपि हि त्यक्तत्वचा संयुक्तोऽपि तामहमिति नाभिमन्यते। अशरीरत्वादेवामृतः प्राणिति जीवतीति प्राणः निरुपाधिः सन्नित्यर्थः। एवंच ब्रह्मैव तच्च ब्रह्मतेज एव विज्ञानज्योतिः परमार्थविवेकतोऽचक्षुरपि वाधितानुवृत्त्या सचक्षुरिवेत्यादिश्रुत्यन्तरयोजना॥

इति वेदान्तकल्पतरौ चतुस्सूत्री समाप्ता[1]॥

कल्पतरुपरिमलः।

त्वश्वस्य पशोरेकैकस्मिन् पार्श्वे सप्तदश सप्तदशास्थीनीति चतुस्त्रिंशद्वङ्क्रयः। तत्प्रकाशको वैशेषिको मन्त्रः पठ्यते "चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेतीति"। तेनौपदिष्टेन षड्विंशतिमन्त्रस्य सर्वथा निवृत्तौ प्रसक्तायां पुनरपि तत्र पठ्यते षड्विंशतिरित्येव ब्रूयाद् न चतुस्त्रिंशति। तेन प्राकृतमन्त्रः प्राप्यमाणः किं षड्विंशतिपदयुक्त एव प्राप्नोति, उताश्ववङ्क्रिसंख्यानुसारेण षड्विंशतिरिति पदस्थाने चतुस्त्रिंशत्पदोहयुक्त इति संशये 'षड्विंशतिरित्येव ब्रूयादिति" वचना**न्नास्ति वचनस्यातिभार इति न्यायात्** षड्विंशतिपदयुक्त एवेति प्राप्य, **राद्धान्तितं नवमे** (जै. अ. ९ पा. ४ सू. १–२१) "षड्विंशतिरित्येव ब्रूया"दिति वाक्यं न षड्विंशतिपदयोगेन प्राकृतमन्त्रविधायकम्; एवकारोपहतविधिशक्तिकत्वेन तस्य चतुस्त्रिंशन्मन्त्रनिषेधएव तात्पर्यात्। ततश्च निषेधेन वैशेषिकमन्त्रनिवृत्तौ प्राकृतमन्त्रोऽतिदेशेनैव प्राप्नोतीति षड्विंशतिरितीत्येतत्प्राप्तानुवादकम्। यथाप्राप्ति चानुवादो भवति प्राप्तिश्च चतुस्त्रिंशत्पदोहेनैव, यथा द्विपशुके पशुबन्धे द्विपञ्चाशत्पदोहेनैव। तस्मादश्वमेधे चतुस्त्रिंशत्पदोहयुक्त एव षड्विंशतिमन्त्रः प्रयोक्तव्य इति। एवमाभास एवेति सूत्रस्याप्येवकारोपहतविधिशक्तित्वेन जीवः साक्षाद् ब्रह्मैव न भवतीति भाष्यदर्शिते निषेधएव तात्पर्यम्, आभास इति तु यथाप्राप्तानुवादकम्। प्राप्तिश्च वृद्धिह्रासभाक्त्वमिति सूत्रोक्तन्यायात् प्रतिबिम्बसादृश्यस्येति तस्यैवानुवादकं, नतु कस्यचिदर्थस्य विधायकम्। तस्मादवच्छेदपक्षे न सूत्रादिविरोधशङ्का॥ तत्र तत्र प्रतिबिम्बत्वव्यवहारस्तु वृद्धिह्रासभाक्त्वसूत्रक्लृप्तसादृश्यमूलो गौणः। नहि ज्वलनाद्भिन्नत्वेनावगते माणवकेऽग्निरधीतेऽग्निरागच्छतीत्यादिप्रयोगसहस्रसत्त्वेऽप्यग्निशब्दो माणवके मुख्यत्वमश्नुवीत, अन्तःकरणकृतस्यैवात्मनो जीवान्तर्यामिभावेन भेदस्त्वविद्याश्रयत्वतद्विषयत्वान्तःकरणसंवलितत्वतदसंवलितत्वाद्युपाधिभेदादुपपद्यते; अन्यथा 'षडस्माकमनादय' इति सिद्धान्ते जीवेश्वरभिन्नत्वेनाभ्युपगतस्य जीवेश्वरतद्भेदादि सकलप्रपञ्चविवर्ताधिष्ठानत्वेन सर्वगतस्य शुद्धचैतन्यस्याप्यन्तःकरणे सत्त्वमवर्जनीयं, तत्तु प्रतिबिम्बपक्षमाश्रित्य द्विगुणीकृत्य वृत्त्युपपादनेनापि न निर्वहतीति त्रिगुणीकृत्य वृत्तिरुपपादनीया भवेत्; प्रतिब्रह्मोपासनमुपास्य धर्मिभेदस्याचार्यैरानन्दमयाधिकरणारम्भे (ब्र. अ. १ पा. १ सू. १२) वक्ष्यमाणत्वात्। दहरशाण्डिल्यविद्याद्युपास्यभिन्नभिन्नसगुणब्रह्मसत्त्वमपि तस्मिन्नभ्युपगन्तव्यमिति तदर्थं चतुःपञ्चगुणादिवृत्तिरप्युपपादनीया भवेत्। नच तदुपपादनं शक्यम्; दृष्टान्ताभावात्। तस्माज्जीवेश्वरोपाधिभ्यां वास्तवतदुभयाभावेन तत्तद्गुणोपाधिभेदेन चावच्छेदकभेदेन जीवेश्वरशुद्धचैतन्यादीनां भेद आस्थेयः। एवं जीवेश्वरयोरप्यवच्छेदकभेदेन भेदो भविष्यतीति नानुपपन्नमत्र किंचिदिति॥

इत्थं सत्संप्रदायाध्वप्राप्तयोः पक्षयोर्द्वयोः। समर्थनं यथाबुद्धि कृतं प्रीत्यै विपश्चिताम्॥

इति कल्पतरुपरिमले चतुस्सूत्री समाप्ता॥

---

१ अत्र समन्वयाधिकरणं चतुर्थं संपूर्णम्। अत्र–**तत्तु समन्वयात्** ४ इत्येकं सूत्रम्॥

कवाड	कपाट	कपाट, एक समुद्घात विशेष	५३१
कवित्थ	कपित्थ	कैथ, एक फल	४४०
कसाय	कषाय	क्रोधादि परिणाम	३९
‡कहं	कथ	कैसे, किसी प्रकार	१७८
कहा	कथा	कहानी, चरित्र	२८५
काउरिस	कापुरिस	कायर पुरुष	३०९
काउस्सग्ग	कायोत्सर्ग	शरीरसे ममत्वका त्याग करना	५१४
*काऊण	कृत्वा	करके	३४८
कामरूवित्त	कामरूपित्व	इच्छानुसार रूप-परिवर्तनकी ऋद्धि	५१३
काय	काय	शरीर	७९
कायकिलेस	कायक्लेश	शरीरको कष्ट देनेवाला तप	३१९
कायव्व	कर्त्तव्य	करने योग्य कार्य	१५
कारावग	कारापक	करानेवाला	३८६
कारिद्	कारित	कराया हुआ	७९
कारुय	कारुक	शिल्पी, कारीगर	८८
काल	काल	समय, मरण	२०
कालायरु	कालागुरु	चन्दन विशेष	४३८
काहल	काहल	वाद्य विशेष, महाढक्का	४११
किकवाय	कृकवाक	कुक्कुट, मुर्गा	१६६
*किच्चा	कृत्वा	करके	२८४
कित्तिम	कृत्रिम	बनाया हुआ	४४६
कित्तण	कीर्त्तन	स्तुति करना	४५३
किमि	कृमि	क्षुद्रकीट	८५
किमिकुल	कृमिकुल	कीट-समूह	१९६
किरिय / किरिया	क्रिया	व्यापार, प्रयत्न	२४, ३२
किरियकम्म	क्रियाकर्म	शास्त्रोक्त अनुष्ठान विधान	२८३
किराय	किरात	भील	८८
किलिस्समाण	क्लिश्यमान	क्लेश युक्त होता हुआ	२०२
किलेस	क्लेश	दुख, पीडा	२३६
किव्विस	किल्विष	पाप, नीच देव	१९४
कीड	कीट	जंतु, कीड़ा	३१५
*कुत्थ	कुत्र	कहा, किस स्थानमे	६८
कुभोयभूमि	कुभोगभूमि	कुत्सित भोगभूमि	३६१
कुमुय	कुमुद	चन्द्र-विकाशी कमल	५४०
कुपत्त	कुपात्र	खोटा पात्र	२२३
कुल	कुल वंश	जाति, यूथ	१५
कुलिंग	कुलिंग	मिथ्यामती	३८५
कुवलय	कुवलय	कमल कु + वलय भूमंडल	४२६
कुविअ	कुपित	क्रोधित	७५
†कुव्वंत	कूजन्त	कूजता हुआ	१८८
कुसुम	कुसुम	पुष्प	२२८

खयर	खचर	विद्याधर पक्षी	१३१
खर	खर	रासभ, कठोर	१०७
खल	खल	खलिहान, दुर्जन	१०९
†खलंत	स्खलन्त	गिरता हुआ	७३
खवण	क्षपण	क्षय करना	५१८
खवय	क्षपक	क्षय करनेवाला	५१७
खविय	क्षपित	नष्ट किया हुआ	५१५
खाइय	खाद्य	खानेयोग्य	२३४
खाइयसद्दिट्ठी	क्षायिक सद्दृष्टि	क्षायिक सम्यग्दृष्टि	५१२
खार	क्षार	खारा	१६२
खित्त	क्षेत्र	खेत	२४०
खिदि	क्षिति	पृथिवी	१२
खिल्लविल्लजोय	(देशी)	आकस्मिक योग	१७९
*खिवित्ता	क्षिप्त्वा	क्षेपण कर	२३९
खीणकसाय	क्षीणकषाय	बारहवां गुणस्थान	५२३
खीर	क्षीर	दूध	२४३
खीरजलहि	क्षीरजलधि	क्षीरसागर	४६८
खीरुवहि	क्षीरोदधि	क्षीरसमुद्र	४७५
खीरोद	क्षीरोद	क्षीरोदधि	४९१
खुहिय	क्षुभित	क्षुब्ध	४११
खेअ	खेद	रज, शोक	८
खेत्त	क्षेत्र	खेत	२५०
†खेलंत	क्रीडन्त	खेलता हुआ	६०
खोम	क्षौम	रेशमी वस्त्र	२५६
खंति	क्षान्ति	क्षमा	५४३
खंध	स्कन्ध,	कंधा, परमाणुओंका समुदाय	४९१

ग

गइ	गति,	ज्ञान, गमन, जन्मान्तर प्राप्ति	३४२
†गज्जंत	गर्जन्त,	गर्जना करता हुआ,	७५
†गज्जमाण	गर्जमान,	गरजता हुआ,	४११
गब्भ	गर्भ	उदर, उत्पत्तिस्थान	२६४
गब्भावयार	गर्भावतार	गर्भ-कल्याणक	४५३
गमण	गमन	गति,	२१४
*गमिऊण	गमित्वा	जाकर,	२८८
गयण	गगन	आकाश	८७
गरहा / गरिहा	गर्हा	निन्दा करना,	४९
*गहिऊण	गृहीत्वा	लेकर	२८३
गहिय	गृहीत	ग्रहण किया हुआ, स्वीकृत, पकड़ा हुआ	७४
गाम	ग्राम	छोटा गाँव, समूह	२११
गिद्ध	गृद्ध	गीध पक्षी	१९९

चक्कवट्टित्त	चक्रवर्त्तित्व	चक्रवर्त्तिपना	३६२
चक्कहर	चक्रधर	चक्री, चक्रका धारक	५०९
*चडाविऊण	चटापयित्वा	चढाकर	१०७
‡चदुधा	चतुर्धा	चार प्रकार	१६
चम्म	चर्म	चमड़ा	२३०
चमर	चामर	चँवर	४००
चय	चय	समूह, शरीर	४३०
चरण	चरण	सयम, पाद	१५४
चरित्त	चारित्र	व्रत, नियम	३२०
चरिम	चरम	अन्तिम	५२५
चरिया	चर्या	आचरण, गमन, भोजनार्थ विहार	३०९
चलण	चरण	पाद, पाव	२१८
चलपडिमा	चलप्रतिमा	अस्थिर मूर्त्ति	४४३
चवण	च्यवन	मरण, पतन	१९५
चाउव्वण्ण	चातुर्वर्ण्य	चार वर्णवाला; मुनि, आर्यिका, श्रावक, श्राविका रूप चतुर्विध संघ	४१५
चाडु	चाटु	खुशामद	९०
*चिट्ठेउं	स्थातुं	ठहरनेके लिए	१८७
चिण्ह	चिन्ह	लॉछन, निशान	४५२
चित्तपडिमा	चित्रप्रतिमा	चित्रगत मूर्त्ति	४३८
चिरविवत्था	चिरव्यवस्था	चिरस्थायी	२६
चिराउस	चिरायुष्क	दीर्घजीवी	३४५
चिरंतण	चिरंतन	पुरातन	४४६
चिंताउर	चिंतातुर	चिन्तासे पीडित	११४
चीण	चीन	छोटा, चीन देश	२५६
चीणपट्ट	चीनपट्ट	चीनका बना वस्त्र	
चुण्ण	चूर्ण	बारीक पिसा चून	४०५
चुण्णिअ	चूर्णित	चूर्ण चूर्ण किया गया	१५२
चुद / चुय	च्युत	पतित, गिरा हुआ	२८, ३०
चुलसीइ	चतुरशीति	चौरासी	१७१
चूरण	चूर्ण	चून	१६८
चेइय	चैत्य	प्रतिबिम्ब, स्मारक	२६७
चेइयगिह	चैत्यगृह	चैत्यालय	२७४
चेयणा	चेतना	चैतन्य ज्ञान	२९
चोद्दस	चतुर्दश	चौदह	३७०
चोद्दसी	चतुर्दशी	चौदस तिथि	३७०
चोरिया	चोरिका	चोरी	११०
चंडाल	चाण्डाल	डोम, हत्यारा, बधिक	८८
चंदण	चन्दन	सुगन्धित वृक्ष विशेष	२६७
चंदक	चन्द्रार्घ	अर्घ चन्द्रके समान आभावाला	३९९
चंदह	चन्द्राभ	चन्द्रके समान	४३८

‡णत्थि	नास्ति	नही है	८४
*णमिऊण	नत्वा	नमस्कार करके	२
णमोक्कार	नमस्कार	नमस्कार मन्त्र	४५७
‡णमोत्थु	नमोऽस्तु	नमस्कार हो, ऐसा वचन	२२६
*णमंसित्ता	नमस्कृत्य	प्रणाम करके	२८२
णयण	नयन	आँख	३८४
णयणंदि	नयनन्दि	इस नामके एक आचार्य	५४५
णयर	नगर	शहर	१८७
णयरी	नगरी	पुरी	५५
णर	नर	मनुष्य	६५
णरय	नरक	नारक बिल	१२०
णव	नव	नौ संख्या	४९७
णवगीव	नवग्रैवेयक	कल्पातीत विमान	४९१
णवण	नमन	नमस्कार	२२८
णवमी	नवमी	नवी तिथि	३६९
णवविह	नवविध	नौ प्रकार	२२५
*णवर	विशेष	केवल, नई बात	२९०
णवयार	नवकार	नमस्कार, नवकार पद	२७७
णवुंसय	नपुंसक	इस नामका वेद, खसिया	५२१
णह	नभ, नख	आकाश, नाखून	२२९, ४४६, ४७०
णहर	नखर	नख, तीक्ष्ण	१६६
ण्हवण	स्नपन	अभिषेक	४१३
ण्हवणपीठ	स्नपनपीठ	नहानेका आसन	४०७
*ण्हाऊण	स्नात्वा	स्नान करके	५०१
ण्हाण	स्नान	नहाना	२९३
ण्हाणगेह	स्नानगेह	स्नानघर	५०१
*णाऊण	ज्ञात्वा	जानकार	६९
णाडय	नाटक	अभिनय, खेल	४१४
णाण	ज्ञान	बोध	४५२
णाणुवयरण	ज्ञानोपकरण	ज्ञानका साधक अर्थ	३२२
णाम	नाम	एक कर्म, संज्ञा	५२९
णाय	नाग	सर्प, एक वृक्ष विशेष	४३१
णारंग	नारंग	फल विशेष, संतरा, नारंगी	४४०
णाराय	नाराच	वाण	१४१
णारय	नारक	नारकी जीव	१६३
णालिएर	नालिकेर	नारियल	४४०
णाव	नौ	नाव, नौका	३९
णास	न्यास	स्थापन करना, धरोहर	४१९
णासावहार	न्यासापहार	धरोहरको हड़प जाना	१३०
णाह	नाथ	स्वामी	४९२
णाहि	नाभि	शरीरका मध्य भाग	४६०
*णिअत्तिऊण	निवृत्य	लौटकर	३०५

ताल	ताल	वृक्ष विशेष	४०
तालवंट	तालवृन्त	पखा	४००
तासण	त्रासन	पीडन	१८०
तिउण	त्रिगुण	तिगुना	४७१
तिक्ख	तीक्ष्ण	तेज	१६६
तिण	तृण	तिनका, घास	२६७
तिणचारी	तृणचारी	घास खानेवाला	९६
तित्थ	तीर्थ	पवित्रभूमि	४५०
तित्थयर	तीर्थंकर	तीर्थ-प्रवर्त्तक	३४७
तिदिय	तृतीय	तीसरा	२१९
तिंदु	तेन्दु	तेंदू फल	४४१
तिपल्लाउग	त्रिपल्यायुष्क	तीन पल्यकी आयुवाला	२५८
तिय	त्रय, त्रिया	तीन, स्त्री	२५
तियाल	त्रिकाल	तीनो काल	५२६
तियालजोग	त्रिकालयोग	त्रिसन्ध्य, समाधि	३१२
तिरिक्खाउ	तिर्यगायु	तिर्यंचोंकी आयु	५१५
तिरिम	तिर्यक्	तिरछा	१८१
तिरियगई	तिर्यग्गति	पशुयोनि	१७७
तिरीट	किरीट-मुकुट	शिरका आभूषण	४७१
तिलय	तिलक	चदन आदिका टीका	३९१
तिलयभूय	तिलकभूत	श्रेष्ठ	३४३
तिलोय	त्रिलोक	तीन लोक	३४७
तिविह	त्रिविध	तीन प्रकार	२२१
तिव्व	तीव्र	तेज	१७६
तिसम्र	तृषित, तृषार्त	प्यासा	१८८
तिसट्ठी	त्रिषष्ठि	तिरेसठ	४२२
*तिसट्ठिखुत्त	त्रिषष्ठिकृत्वा	तिरेसठ वार	३७६
तिसा	तृषा	प्यास	१२६
तिसूल	त्रिशूल	शस्त्रविशेष	१४१
तिसंझ	त्रिसन्ध्य	तीनो काल	४२३
तिहि	तिथि	मिति	३९२
तीद	अतीत	भूत	२२
तीया	तृतीया	तीसरी तिथि	३६८
तुय, तय	त्वक्	छाल, चमड़ा	२९५
तुट्ठी	तुष्टि	संतोष	२२४
*तुरिश्र, तुरिय	त्वरित	तुरन्त	१९२
तुरुक्क	तुरुष्क	सुगन्धित द्रव्य विशेष	४२७
तुंड	तुन्द	मुख	१६६
तूर	तूर, तूर्य	तुरई	२५१
तूरंग	तूर्यांग	वादित्र देनेवाला कल्पवृक्ष	२५३
तेत्तीस	त्रयस्त्रिंशत्	देवोंकी एक जाति विशेष, तेतीस	१७४
तेय	तेज	प्रताप	२५८

माया	माया	छल	६०
मायबीय	मायाबीज	'ह्रीं' बीजाक्षर	४७१
मालई	मालती	वृक्ष विशेष, पुष्प	४३१
मालादुम	माल्यद्रुम	माला-दाता कल्पवृक्ष विशेष	२५७
मालंग	माल्यांग	,, ,,	२५१
माहप्प	माहात्म्य	महिमा	११०
मिच्चु, मिच्चू	मृत्यु	मौत	२६४
मिच्छत्त	मिथ्यात्व	मिथ्यादर्शन	२०२
मिच्छाइट्ठी	मिथ्यादृष्टि	मिथ्यात्वी जीव	२४४
मिट्ठ	मिष्ट	मीठा	४४१
मित्त	मात्र	केवल	१६२
मित्त	मित्र	सुहृद्	६२.
मित्तभाव	मित्रभाव	मैत्री	३३६
मिय	मित	परिमित	३३७
मिस्स	मिश्र	मिला हुआ	४२७
मिस्सपूजा	मिश्रपूजा	सचित्त-अचित्तपूजा	४५६
मुअ	मृत	मरा हुआ	१२७
मुक्क	मुक्त	सिद्ध छुटा हुआ	६५
मुक्ख	मुख्य	प्रधान	४०२
मुक्खकज्ज	मुख्य कार्य	प्रधान कार्य	२१
मुग्गर	मुद्गर	एक अस्त्र	१६७
मुच्छा	मूर्च्छा	मोह	२९९
*मुणिऊण	मत्वा	जानकर	२९१
मुणेयव्व	मन्तव्य	मानने योग्य	१४
मुत्त	मूर्त	रूपी	२३
मुत्तादाम	मुक्तादाम	मोतियोंकी माला	३९९
मुत्ताहल	मुक्ताफल	मोती	३९०
मुत्ति	मुक्ति	सिद्धि	३४७
मुह	मुख	मुह	२७४
मुहर	मुखर	वाचाल, बकवादी	४२८
मुहसुद्धि	मुखशुद्धि	मुखकी शुद्धि	२९१
मुहरा	मुखरा	वाचाल स्त्री	४९८
मुसल	मुशल	एक आयुध	१६७
मुहुत्त	मुहूर्त्त	दो घडी या ४८ मिनिटका समय	३९२
मूय	मूक	गूंगा	२३५
मेत्त	मात्र	प्रमित	२७१
मेहावी	मेधावी	बुद्धिमान्	२४४
मेहिय	निर्वृत्त (देशी)	रचे गये	४३३
मेहुण	मैथुन	संभोग	२९६
मोक्ख	मोक्ष	मुक्ति, छुटकारा	१०
मोइय	मोदित	प्रसन्न, मोचित, छुडवाया हुआ	२५७
मोत्तिय	मौक्तिक	मोतियों से बना	४२५

सन् १९५१ की प्रकाशित पुस्तकें